शाङ्करे अद्वैतमते ब्रह्मैव सत्यम् । अन्यत्सर्वं मिथ्या । जगदादि सर्वं शुक्तौ रजतमिव भासते । ब्रह्म निर्गुणम्, अत एव शब्दैरप्रतिपाद्यम् । अत एव वाङ्मनसयोरगोचरमिति श्रुतौ कथ्यते । सर्वज्ञत्वादयो गुणा अपि ब्रह्मणि औपाधिका एव । जीवो ब्रह्मरूपोऽपि अज्ञानात् भिन्न इव भाति । मनोबुद्ध्याद्युपाधिभिस्सर्वोऽपि जनः "अहं" मिति प्रत्येति । अत एव सुषुप्तौ मनोबुद्ध्यादिलयेन अहमाकारप्रतीत्यभावः । एवं मोक्षावस्थायामपि उपाधिलयात् अहमाकारप्रतीत्यभावः । एवञ्चाहमिति प्रतीतिरौपाधिकी । अयं प्रातीतिको जीव एक एव न तु नाना । अन्तःकरणभेदात् सुखदुःखानुभवभेदः । चैतन्यं सर्वव्यापकं स एव आत्मा इत्यभिधीयते । अयमात्मा ईश्वर-जीव-साक्षीति भेदेन त्रिविधः । सर्वजगन्मूलकारणम् अज्ञानम्, तस्मिन् चैतन्यान्तर्गते सति स आत्मा ईश्वर इत्यभिधीयते । स एव ईश्वरस्सत्त्वरजस्तमोभिर्विष्णु ब्रह्म-शङ्कराख्याः लभते । आत्मा ज्ञानस्वरूपो न तु ज्ञातृस्वरूपः । तस्य ज्ञातृत्वमहङ्काराद्युपाधिभिः । प्रपञ्चस्यापि

ज्ञेयत्वमज्ञानादेव । त्रिविधं सत्यत्वं-प्रातिभासिकं व्यावहारिकं पारमार्थिकञ्च । तत्र प्रातिभासिकस्य शुक्तिरजतादेः व्यावहारिकसत्यरजतेन बाधः । व्यावहारिकसत्यत्वं घटपटादीनाम्, तच्च पारमार्थिकसत्येन ब्रह्मदर्शनेन बाध्यते । ब्रह्मणस्तु कस्यामप्यवस्थायां न बाधः । अत एव तत् परमार्थसत् । घटपटादीनां व्यवहारदशायां सत्यत्वम् । वस्तुतस्तु ते स्वाप्निकपदार्थवत् मिथ्याभूताः । यथा स्वप्नगताः पदार्थाः जाग्रद्दशायां न सन्ति अतो मिथ्या, तथा पारमार्थिकदशायां अभावात् एते व्यवहारदशायां विद्यमाना अपि घटपटादयो मिथ्या । पारमार्थिकात्मज्ञानेन बाधसम्भवात् ।

कासुचित् श्रुतिषु सृष्टिराकाशक्रमेण, कासुचित् श्रुतिषु तेजआदिक्रमेण, कुत्रचित् सर्वं ब्रह्मैव नान्यदित्युक्तम् । सर्वासामपि श्रुतीनां अबाधितप्रामाण्यात् तत्समन्वयोऽवश्यं कर्तव्यः । तथा च इदमेव सिध्यति यत् ब्रह्मैव सत्यमिति पारमार्थिकदृष्ट्या उक्तम् । आकाशादिक्रमसृष्टिस्तु व्यावहारिकी । अनेनापि प्रमाणेन जगतो व्यावहारिकत्वम्, न परमार्थसत्यत्वम् । यदि जगत् परमार्थसत् स्यात् तर्हि अन्यत् किमपि नास्तीति प्रतिपादिनी श्रुतिरनर्थिका स्यात् । एवञ्च सत्यानृते मिथुनीकृत्य नैसर्गिकोऽयं लोकव्यवहार इति मन्तव्यम् । अत एव अज्ञानिदृष्ट्या तत्सत्यत्वं भासते । ज्ञानिदृष्ट्या च "तस्य पिता अपिता भवति" इत्युक्तरीत्या तस्य मिथ्यात्वम् । न केवलं सर्वस्य जगतो मिथ्यात्वं श्रुत्या बोध्यते, अपि तु स्वस्यापि मिथ्यात्वं श्रुतिर्निरभिमानितया ब्रूते ।

एतस्य सर्वस्य जगतः मूलस्वरूपमनाद्यविद्या । सा च त्रिगुणात्मिका । प्रलयकालसमाप्तिवेलायां अविद्यया जीवकृतकर्मभिश्च "तदैक्षत बहुस्यां प्रजायेय" इति रीत्या परमात्मा संकल्पयति, तत आकाशादिक्रमेण सृष्ट्युद्गमः । ततश्च पञ्चीकृतमहाभूतेभ्यः शरीरादीनि प्रादुर्भवन्ति । एवं उत्पन्नशरीरे प्रविष्टं चैतन्यं जीव इत्यभिधीयते । स च न अणुः, किन्तु व्यापकः, सर्वस्मिन् शरीरे सुखदुःखानुभवात् । स च जीवः मुक्तिपर्यन्तं स्थायी, जन्मान्तरीयकर्मजसुखदुःखसम्बन्धात् । जीवः विस्मृतकण्ठस्थचामीकरः पुरुष इव आत्मविस्मृतेः, अज्ञानात् सुखदुःखानुभवभाक् । अज्ञानं, लिङ्गशरीरम्, स्थूलशरीरञ्चेति उपाधिस्तस्य सदा प्रत्यासन्नः । अयमुपाधिः "दशमस्त्वमसीति" ज्ञानेन विस्मृतात्मस्वरूपस्य अज्ञानमिव, आत्मज्ञानेन जीवात्मपरमात्मैक्यज्ञानापरपर्यायेण नश्यति, सत्यज्ञानेन

विना मिथ्याभूतदर्शनस्यानिवृत्तेः । एवमविद्यानाशे जीवो मुक्तो भवति । तस्य ज्ञानाग्निः प्रारब्धेतराणि सञ्चितक्रियमाणानि कर्माणि नाशयति । दशायामस्यां प्रारब्धकर्माणि भुञ्जानः स विगतशरीराद्यभिमानो जीवन्मुक्त इत्यभिधीयते । प्रारब्धकर्मावसाने देहपाते स विदेहमुक्तो भवति । इयमेव परमा मुक्तिः । अस्यां जीवः परमात्मसायुज्यं नाम स्वरूपमधिगच्छति । न च मतान्तरवत् अल्पेनापि सेवकादिरूपेण भिन्नस्तिष्ठति । यद्यपि जीवस्सदा आत्मस्वरूप एव तथापि भावरूपेणाज्ञानेन आत्मानं सुखदुःखभाजं मनुते तदैव बद्ध इत्यभिधीयते, तादृशाज्ञाननिवृत्तौ स एव मुक्त इत्युच्यते ।

वेदविहितकर्मभिश्चित्तशुद्धिः, ततो ब्रह्मनिष्ठं गुरुं प्रतिशरणगमनम्, तेन तत्त्वमसीतिज्ञानोपदेशः, तच्छ्रवणमनननिदिध्यासनैः सन्न्यासाश्रममधिवसन् कर्माणि परित्यजन् स सुस्थिरज्ञानो मोक्षं लभते । मोक्षासौ ज्ञानमेव साक्षात् साधनम् । कर्मोपासने तु चित्तशुद्धिचित्तैकाग्र्यप्रापकत्वात् परम्परितसाधने । ज्ञानकर्मसमुच्चयस्तु नेष्टः । नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वञ्चेति साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा । अस्मिन् मते अनिर्वचनीयख्यातिः । प्रत्यक्षानुमानोपमानशाब्दार्थापत्त्यनुपलब्धि-आख्यानि षट् प्रमाणानि । अलौकिकेऽर्थे आत्मनि शाब्दमेव मुख्यं प्रमाणम् । अन्यदनुमानादि तदवष्टम्भेन प्रमाणम् । मतस्यास्य संग्राहकः श्लोकः "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति ।

अद्वैतसिद्धान्तविकासः

एतादृशस्य श्रुतिसिद्धस्य प्राचीनतमस्य अज्ञविज्ञोपकारकस्य सकलदर्शनशिरोऽलङ्काररत्नभूतस्य अद्वैतवेदान्तदर्शनस्य विशेषतः प्रबलप्रतिवादिनः भेदवादिनः न्यायवैशेषिकादयः, शालिकनाथप्रभृतयः पूर्वमीमांसकाः आसन् । त्रयोदशशतकादनन्तरं द्वैतमतप्रवर्तका आनन्दतीर्था अपि प्रतिवादिषु अन्यतमा अभूवन् । एतादृशैस्तर्काभिमानिभिर्वैशेषिकादिभिर्युक्त्याभासैः कलुषितस्य आनन्दतीर्थादिभिर्निन्दितस्य अद्वैतसिद्धान्तस्य रक्षणार्थं तर्केणैव समाधानार्थं च प्रवृत्तेषु ग्रन्थेषु चित्सुखीयन्यायमकरन्द न्यायदीपावली-अद्वैतसिद्धि-पञ्चदशीत्यादयः खण्डनखण्डखाद्यमित्यादयश्च विशिष्य उल्लेखार्हाः । इतरमतखण्डनपरग्रन्थेषु शैलीद्वयं दृश्यते ।

तत्र प्राचीना शैली तु युक्तिसहिता अर्थगाम्भीर्यवती श्रुतिमधुरशब्दविन्याससंयुक्ता सम्भाषणसमा दृश्यते । नव्यनैयायिकैः गङ्गेशोपाध्यायप्रभृतिभिः नवीनतया न्यायशास्त्रपरिवर्तने कृते भेदवादखण्डनार्थं प्रवृत्ताः मधुसूदनसरस्वतीप्रभृतयः ब्रह्मानन्दसरस्वत्यन्ता आचार्याः "यक्षानुरूपो बलि"रिति न्यायेन परिष्कारप्रधानान्येव वाक्यान्यारचय्य इतरमतखण्डने प्रवृत्ताः । सेयं नवीना शैली । चित्सुख-आनन्दबोधादीनां शैली तु प्राचीना । नैतच्छैल्यां काठिन्यं दृश्यते । नापि विषयप्रतिपादने युक्तिकथने शब्दविन्यासे वा मन्दता दृश्यते । चाटुकारीणि दृढयुक्तिकानि न्यायोपबृंहितानि च वाक्यानि तेषां वाग्मितां सिद्धान्तविमर्शक्षमताञ्च प्रतिपादयन्ति । तत्र भेदवादिनामयमाक्षेपः प्रबलतरः - यत् - जगतो मिथ्यात्वे मायिकत्वे वा तस्य असत्त्वप्रसङ्गः । यथा च शुक्तिरजतं असत् भवति तथा जगदपि असत् भवेत् । तथा सति सर्वप्रमाणव्यवहारस्य असम्भवस्स्यात् । किञ्चैवं सति वैदिकतत्त्वज्ञानस्यापि मिथ्यात्वापत्तिः । सर्वदृश्यान्तर्गतस्य वेदस्य मिथ्यात्वेन तदुक्तस्य तत्त्वज्ञानस्य अर्थादेव मिथ्यात्वं स्यात् इति । सोऽयमाक्षेपः विचार्य विकल्प्य दूरीकृत आचार्यैः । असत्त्वमित्यस्य कोऽर्थः ? किं अत्यन्तासत्त्वम् ? उत किञ्चित्कालासत्त्वम् ? । नाद्यः, प्रत्यक्षं दृश्यमानस्य अर्थक्रियाकारिणो जगतः शशशृङ्गवत् अत्यन्तासत्त्वानुपपत्तेः । तद्धि अत्यन्तासत् यत् कदापि केनापि नोपलब्धम्, न तु जगत् तथा, सर्वैरपि प्रत्यक्षमुपलभ्यमानत्वात् । तस्मात् जगत् न असत् । नापि सत्त्वेन स्वीकर्तुं शक्यते । नहि प्रत्यक्षेण दृश्यमानत्वं अर्थक्रियाकारित्वं वा अत्यन्तसत्त्वस्य प्रयोजकम्, तथा सति स्वाप्नपदार्थानां प्रत्यक्षं अनुभूयमानत्वेन, मनोरथानां अर्थक्रियाकारित्वेन च व्यभिचारात् । तस्मात् न शशशृङ्गादिवत् अत्यन्तासत् । नापि आत्मवत् अत्यन्तसत्, यद्रूपेण यत् निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्" इति प्रतिपादितं सत्यत्वं यस्य भवति तदेव सत्यमिति वक्तव्यम् । प्रतिक्षणपरिणामिनः सततचञ्चलस्वभावस्य नियतपरिवर्तनशीलस्य अस्य जगतः तद्गतपदार्थानां वा निरुक्तसत्यत्वलक्षणानाक्रान्तत्वात् । किन्तु सद्विविक्तत्वम्, अथवा सदसद्विलक्षणत्वं वा मिथ्यात्वमिति वक्तव्यम् । इदमेव मिथ्यात्वलक्षणं परिष्कृतं न्यायरत्नदीपावली तत्त्वप्रदीपिका - तर्कसंग्रह (आनन्दगिरीय) प्रमाणमालादिषु ग्रन्थेषु । लघुचन्द्रिकायाञ्च —

> आद्यं स्यात् पञ्चपाद्युक्तं ततो विवरणोदिते ।
> चित्सुखीयं चतुर्थं तु अन्त्यमानन्दबोधजम् ॥ इति ।

अद्वैतसिद्धान्तस्यास्य उपनिषद्-गीता-सूत्ररूपाणि श्रुति-स्मृति-युक्तिनाम्ना व्यवहृतानि प्रस्थानानि महाप्रस्थानानि प्रस्थानत्रयमिति च प्रसिद्धानि। तथा भामती-प्रस्थानं, विवरणप्रस्थानमिति च अवान्तरप्रस्थानं सिद्धान्तप्रतिपादनभेदमूलकं प्रसिद्धं विद्यते, एतत् प्रस्थानद्वयमपि —

यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि।
सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता॥


इति सुरेश्वरोक्त्या मान्यतां प्राप्नोत्येव। तयोस्सिद्धान्तभेदास्तु एवं दृश्यन्ते—

भामतीकारः कर्मणां विविदिषार्थत्वं वदति, विवरणकारस्तु कर्मणां विद्यार्थत्वं वदति। भामतीकारः ब्रह्मसाक्षात्कारः मनःकरणकः, न तु शब्दकरणक इति वदति। विवरणकारस्तु वेदान्तवाक्यरूपशब्दकरणक इति वदति। भामतीकारः श्रोतव्यो मन्तव्य इत्यादिवाक्ये विधिर्नास्तीति वदति, विधिरस्तीति विवरणकारः। भामतीकारः निदिध्यासनं अङ्गि, श्रवणमनने अङ्गभूते इति वदति। श्रवणं अङ्गि मनननिदिध्यासने अङ्गभूते इति विवरणकारः। जीवेश्वरविषये भामतीकार अवच्छेदवादी, विवरणकारः प्रतिबिम्बवादी भवति। भामतीकार अज्ञानाश्रयस्य अज्ञानविषयस्य च भेदं स्वीकरोति, विवरणकार अज्ञानस्य आश्रयविषयभेदो नास्तीति वदति। भामतीकारः प्रतिजीवं मूलाविद्या नाना इति वदति। विवरणकारः मूलाविद्या एकैवेति वदति। भामतीकार अखण्डाकारवृत्तेरुपहितं ब्रह्म विषय इति वदति। विवरणकार अखण्डाकारवृत्तेः शुद्धं ब्रह्म विषय इति वदति। भामतीकारस्य मते साधनचतुष्टये सत्यासत्यवस्तुविवेकः प्रथमसाधनम्, विवरणकारस्य मते नित्यानित्यवस्तुविवेकः प्रथमसाधनम्। स्वाध्यायोऽध्येतव्य इति विधिरर्थावबोधफलक इति भामती, अक्षरग्रहणफलक इति विवरणम्। भामती त्रिवृत्करणम्, विवरणं पञ्चीकरणं च स्वीकरोति। भामतीकारः ब्रह्मणः सर्वज्ञत्वं स्वरूपचैतन्येनेति वदति, विवरणकारः ब्रह्मणः सर्वज्ञत्वं मायावृत्तिभिरिति। भामतीकारस्य मते मनस इन्द्रियत्वमस्ति, विवरणकारस्य मते मनस इन्द्रियत्वं नास्ति। भामतीमते अविद्या जीवाश्रिता भवति, विवरणमते अविद्या ईश्वराश्रिता भवति।

अविद्यया संसक्तं अविद्यारूपिणा उपाधिना सहितञ्च ब्रह्मणः विशुद्धं चैतन्यमेव जीव इत्युच्यते। प्रतिजीवं एकं अन्तःकरणं उपाधिर्भवति। अतश्च जीवः परिच्छिन्न अल्पज्ञ इति व्यवहारः। विवरणमते अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीव इति, अन्तःकरणे ब्रह्मप्रतिबिम्बमेव जीव इति भवति। जीवस्वरूपविषये अवच्छेदवादः, आभासवादः, प्रतिबिम्बवादश्चेति पक्षाः सन्ति—

वाचस्पतेरवच्छिन्न आभासो वार्तिकस्य च।
संक्षेपशारीरककृतः प्रतिबिम्बं तथेष्यते॥ इति॥

तत्र अवच्छेदो नाम अन्तःप्रवेशः। तेन युक्त अवच्छिन्नः। यथा वा जले अन्तःप्रविष्टं आकाशं जलावच्छिन्नमित्युच्यते एवं अज्ञानाश्रयीभूतं शुद्धचैतन्यं जीव इत्युच्यते। येषां मते अविद्यया संयुक्तं चैतन्यं जीवः, स च अवच्छिन्नो वा उपहितो वा प्रतिबिम्बितो वा तेषां मते जीवावस्थायां जीवस्य एकत्वम्। अविद्याया एकत्वात्। अयमेव एकजीववादः। सुखदुःखादिवैचित्र्यन्तु उपाधिभेदात् भवति। अयमेकजीववादः भामतीकाराणां मते। बहुप्रकारया अविद्यया अविद्याकार्यबुद्ध्या वा संयुक्तं चैतन्यं जीवः, स च जीवः अवच्छिन्नो वा, उपहितः, प्रतिबिम्बितो वा, भवति इति ये वदन्ति तेषां मते जीवनानात्वम्। वार्तिककारसुरेश्वरः, पञ्चपादिकाविवरणकारप्रकाशात्मा संक्षेपशारीरककारसर्वज्ञात्मा प्रकटार्थविवरणकारश्च बहुजीववादिनः। न्यायमकरन्दकारानन्दबोधश्च सर्वेषामाचार्याणां सिद्धान्तं सविमर्शं निरूप्य, विशेषतः ब्रह्मसिद्धि-इष्टसिद्धिसिद्धान्तं मण्डयन् एकजीववादे श्रुतिप्रामाण्यं प्रदर्श्य युक्तियुक्ततां साधयति।



एवं निर्विशेषात् निर्लक्षणाच्च स्वयंप्रकाशात् ब्रह्मणः सविशेषस्य सलक्षणस्य च जगतः कथमुत्पत्तिः? एकस्मात् अद्वैतात् ब्रह्मणः नानात्मकस्य जगतः कथं सृष्टिः? इत्येतेषां प्रश्नानां यथावत् समाधानं मायास्वरूपवर्णनद्वारा आचार्यैरुप-वर्णितम्। शङ्करभगवत्पादैः माया-अविद्या अज्ञान-अव्यक्तादि शब्दानां समानार्थ-कत्वं सूत्रभाष्ये (1-4-3) उपवर्णितम्। शङ्करभगवत्पादादर्वाचीनेषु आचार्येषु माया-अविद्ययोस्तारतम्यविषये जीवेश्वरस्वरूपविषये अविद्याया आश्रयत्वे मायाया आश्रयत्वे च सिद्धान्तभेदा उद्भाविताः। भामतीकाराः जीवेश्वरविषये अवच्छेद-वादं अज्ञानाश्रयस्य अज्ञानविषयस्य च भेदं स्वीकुर्वन्ति। विवरणकाराश्च जीवेश्वर-विषये प्रतिबिम्बवादं अज्ञानाश्रयत्वविषयत्वयोर्भेदाभावं च स्वीकुर्वन्ति। भामतीमते अज्ञानविषयीकृतं चैतन्यं ईश्वरः। अज्ञानाश्रयीभूतं चैतन्यं जीव इति। विवरण-प्रस्थाने ईश्वरविषये आभासवादं, जीवविषये प्रतिबिम्बवादं च स्वीकृत्य अज्ञानो-पहितं बिम्बचैतन्यं ईश्वरः, अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीव इति स्वीक्रियते। एवं माया-अविद्याशब्दयोस्सूक्ष्मभेदं वर्णयन्ति। जीवत्व-ईश्वरत्वप्रापकोपाधिस्तु भावरूपं त्रिगुणात्मकं सदसद्भ्यां अनिर्वचनीयं अनादि अज्ञानम्। तच्चाज्ञानं माया-अविद्याभेदेन द्विविधम्। शुद्धसत्त्वप्रधानं मायापदवाच्यम्। मलिनसत्त्वप्रधानं अविद्यापदवाच्यम्। मायोपहितं चैतन्यं ईश्वरः। अविद्योपहितं चैतन्यं जीवः।

मायारहिते परमेश्वरे प्रवृत्तिर्न भवति। मायाशक्तिरहितः परमेश्वरः जगत्सर्जने अशक्तो भवति। मायाशक्तिरेव अविद्यात्मिका बीजशक्तिरव्यक्तनाम्ना व्यवह्रियते। मायेयं परमेश्वराश्रया भवति। अग्नेरपृथक्भूता दाहिका शक्तिरिव माया ब्रह्मण अपृथक्भूता शक्तिः। मायेयं ब्रह्मण एकदेशवर्तिनी न तु कृत्स्नवर्तिनी।

न कृत्स्नवृत्तिः सा शक्तिस्तस्य किन्त्वेकदेशभाक्।
घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते॥
पादोऽस्य विश्वा भूतानि त्रिपादस्ति स्वयम्प्रभः।
इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः॥ (पञ्चदशी)

"पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि" इति श्रुतिश्च प्रतिपादयति।

सत्त्वरजस्तमोगुणात्मिकेयं माया ज्ञानविरोधिनी भावरूपः पदार्थः। माया न सती। नापि असती। सदसदुभयविलक्षणतया शास्त्रे सा अनिर्वचनीयेति कथ्यते। ब्रह्म-ज्ञानेन बाधसम्भवात् माया न सती। त्रिकालाबाधितत्वं हि सत्त्वम्। यदि माया सती स्यात् तर्हि तस्या अबाधितत्वमेव स्यात्। ब्रह्मज्ञानेन तु माया बाध्यते। तस्मात् सा न सतीति वक्तुं शक्यते। परन्तु तस्याः प्रतीतिरनुभूयते। तस्मात् असतीति च न वक्तुं शक्यते। यतोऽसत् वस्तु न प्रतीयेत। एवञ्च मायायां उभयविरुद्धयोर्बाधितत्वप्रतीतिविषयत्वरूपयोः गुणयोरनुभवगम्यत्वात् माया अनि-र्वचनीयेति निश्चीयते। मायाभिधाया अविद्यात्वं प्रमाणासहिष्णुत्वमेव। तर्कादि-बलेन माया न ज्ञातुं पार्यते। यथा च अन्धकारस्य साहाय्येन अन्धकारस्य प्रतीतिस्तथैव तर्कबलेन मायायाः प्रतीतिः। उक्तञ्चेदं बृहदारण्यकवार्तिके—

अविद्याया अविद्यात्वे इदमेव तु लक्षणम्।
यत् प्रमाणासहिष्णुत्वं अन्यथा वस्तु सा भवेत्॥ इति।

सूर्योदयकाले यथा च अन्धकारस्य नाशो दृश्यते तथा ज्ञानोदयकाले मायायाः प्रतीतिर्नश्यति—

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी।
सहते न विचारं सा तमो यद्वद् दिवाकरम्॥

इत्युक्तम् नैष्कर्म्यसिद्धौ। एवञ्च प्रमाणासहिष्णुरूपिणी माया जगत उत्पत्तौ कारणमिति स्वीकर्तव्यम्। सा अव्यक्ता शक्तिः कार्यानुमेया इति विवेकचूडामणौ—

अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते॥ इति।

मायायाः शक्तिरावरणविक्षेपभेदेन द्विधा भिन्ना भवति। आभ्यामेव-शक्तिभ्यां ब्रह्मणः वास्तविकं सद्रूपमाच्छाद्यते। ब्रह्मणि असत असत्यस्य च जगतः प्रतीतिरारोप्यते।

शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम्।
विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत्॥

अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिस्सा संसारस्य कारणम् ॥ इति दृग्दृश्यविवेके ।

एवं—

" आच्छाद्य विक्षिपति संस्फुरदात्मरूपम्
जीवेश्वरत्वजगदाकृतिभिर्मृषैव ।
अज्ञानमावरणविभ्रमशक्तियोगात्
आत्मत्वमात्रविषयाश्रयताबलेन ॥ इति


संक्षेपशारीरके च उक्तम् । अधिष्ठानस्य सत्यत्वापलापादनन्तरमेव अधिष्ठाने नूतनधर्मारोपो भवेत् । यथा च ऐन्द्रजालिकस्य इन्द्रजालविद्या द्रष्टॄणां नेत्रेषु वास्तविकीं दर्शनक्षमतां आच्छाद्य भ्रान्तेरुत्पादनादेव सफला इति लोके दृश्यते, एवमेव मायया आवरणरूपा शक्तिः ब्रह्मणश्शुद्धस्वरूपमाच्छादयति । यथा च अग्निः स्वविरोधिनि जले साक्षात् प्रवेष्टुमशक्तोऽपि सूक्ष्मरूपेण पात्रादिद्वारा जले प्रविश्य तदीयं शैत्यं अपह्नुत्य तत्र स्वीयं उष्णत्वं प्रदर्शयति तथेयं माया सूक्ष्मतरेण स्वकीयमूलरूपेण ब्रह्मणि प्रविश्य तदीयं निर्विषयं निराश्रयञ्च स्वरूपमपह्नुत्य स्वीयं साश्रयत्वसविशेषत्वरूपं तत्र प्रदर्शयति । एवं लघुमेघः दर्शकाणां नेत्रं आच्छादयन् विस्तृतस्यादित्यमण्डलस्य यथा आच्छादको भवति तथा परिच्छिन्नमज्ञानं अपरिच्छिन्नस्य असंसारिण आत्मन आवारकं भवति । आवरणशक्तिरेव द्रष्टृदृश्ययोरन्तर्भेदम्, बहिर्ब्रह्मजगतोश्च भेदं उत्पादयति । यथा च रज्जौ सर्पभ्रान्तिस्सर्पज्ञानमुद्भावयति तथा मायापि अज्ञानावृते आत्मनि आकाशादिजगतः ज्ञानमुद्भावयति । उक्तञ्च—

मायाशक्तिर्निखिलकलनां साम्प्रतं वा विरुद्धाम्
स्वाधिष्ठाने चितिफलयुता दर्शयत्याविमोक्षम् ।
नैल्यं व्योम्नि स्रजि विषधरो वार्यथा रश्मिपूगे
तद्वन् मिथ्यात्मनि जगदिदं कल्पितं स्वप्नवच्च ॥

इति प्रत्यक्तत्त्वचिन्तामणौ । इयं माया अविद्यापदवाच्या अज्ञानाख्या कथं जाता ? केन कारणेनास्याः ब्रह्मणा सम्बन्धो जात इति न चोदनीयम् । अविद्यायाः तत्सम्बन्धस्य च अनादित्वाङ्गीकारात्—

"जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥

इति । मायासम्बन्धादेव प्रपञ्चोत्पत्तिः । मायेयं साश्रया सविषया च भवति । मायायाः विषय ईश्वरः । आश्रयो जीवः । एतदेव साश्रयत्वं सविषयत्वञ्च ज्ञानरूपे ब्रह्मणि तदीयत्वं प्रदर्शयति । साश्रयत्वेन सविषयत्वेन च भासमानं यत् ज्ञानं तदेव महत्तत्वम् । महत्तत्वादेव प्रपञ्चस्योत्पत्तिः ।



नवीनास्तु अद्वैतिनः अज्ञानस्य शक्तिः - ज्ञानशक्तिः क्रियाशक्तिश्चेति द्विधा भिद्यते । "सत्वात् सञ्जायते ज्ञान"मिति प्रामाण्यात् रजस्तमोभ्यामनभिभूतं सत्वं ज्ञानशक्तिः । क्रियाशक्तिस्तु आवरणविक्षेपभेदेन द्विविधा भवति । रजस्सत्वाभ्यामनभिभूतं तम आवरणशक्तिः । सा च अत्र घटो नास्तीति प्रपञ्चव्यवहारहेतुः । तमस्सत्वाभ्यामनभिभूतं रजो विक्षेपशक्तिः । सा च आकाशादिप्रपञ्चोत्पत्तिहेतुः । विक्षेपशक्तिमता अज्ञानेन उपहितस्यैव ईश्वरस्य जगत उपादानकारणता । अत्र "यथोर्णनाभिस्सृजते गृह्णते च" इति श्रुतिः प्रमाणम् । अत्र मते आवरणशक्तिप्रधानं अज्ञानमविद्या । विक्षेपशक्तिप्रधानमज्ञानं माया इत्युच्यते । मीयते अपरोक्षवत् प्रदर्श्यते अनयेति माया । स्वीयशक्तिबलात् प्रपञ्चमिमं प्रत्यक्षवत् सत्यमिव च प्रदर्शयतीयमित्यस्याः मायाख्या अन्वर्था भवति । इयमेव माया तमः, अविद्या, अव्यक्तमित्यादिशब्देन व्यवह्रियते—इत्यत्र

अन्यथा मानहेतुत्वात् इयं मायेति कीर्तिता ।
आत्मतत्वतिरस्कारात् तम इत्युच्यते बुधैः ।
विद्यानाश्यत्वतोऽविद्या मोहस्तत्कारणत्वतः ।
सद्वैलक्षण्यहेतुत्वात् असदित्युच्यते बुधैः ॥

कार्यवत् व्यक्तताभावात् अव्यक्तमिति गीयते ।
एषा माहेश्वरीशक्तिर्न स्वतन्त्रा परात्मवत् ॥

इत्यादिवृद्धवचनानि प्रमाणानि । एवं जगतः सृष्टौ ईश्वरस्य अभिन्ननिमित्तोपादानत्वमपि मायाद्वारेणैवेत्यत्र—इन्द्रो मायाभिः पुरुरूप ईयते । सर्वं खलु इदं ब्रह्म तज्जलानिति शान्त उपासीत " यतो वा इमानि भूतानि इत्यादीनि श्रुतिवाक्यानि,

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वां अधिष्ठाय सम्भवाम्यात्ममायया ॥
निरुपमनिर्गुणेऽपृथखण्डे मयि चिति सर्वविकल्पनादिशून्ये ।
घटयति जगदीशजीवभेदान् अघटितघटनापटीयसी माया ॥

इत्यादिवचनानि च प्रमाणानि । एवञ्च तत्वप्रतिभासप्रतिबन्धेन अतत्वप्रतिभासहेतुः आवरणविक्षेपशक्तिद्वयवती अविद्या सर्वप्रपञ्चप्रकृतिरिति प्रतिपादयन्ति । प्रतिपादितञ्च विद्यारण्यस्वामिभिः पञ्चदश्याम् । विद्यारण्यस्वामी तु विवरणप्रस्थानानुयायी सन्नपि विवरणप्रस्थानानुकूलानां सिद्धान्तानां मार्गप्रदर्शकः भामतीविवरणप्रस्थानयोस्समन्वयकारी च विराजते । रजस्तमोऽनभिभूता शुद्धसत्वप्रधाना माया, रजस्तमोऽभिभूता मलिनसत्वप्रधाना अविद्या इति प्रतिपादयन् मायाप्रतिबिम्बितं चैतन्यं सर्वज्ञत्वादिगुणविशिष्टं ईश्वर इति, अविद्याप्रतिबिम्बितं जीव इति—

सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ।
मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः ।
मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ ।

यथेच्छं पिबतां द्वैतं अद्वैतं परमार्थतः ॥ इत्यादिना पञ्चदश्यां विवरणप्रमेयसंग्रहे च प्रतिपादयति ।

मायाविषये प्राचीना :—

- माया
  - आवरणशक्तिः (ब्रह्मणश्शुद्धस्वरूपं आच्छादयति)
  - विक्षेपशक्तिः (शुद्धे ब्रह्मणि धर्मधर्मिभावं, विषयविषयिभावं, अनात्मबुद्धिं, प्रपञ्चभेदभावञ्च उत्पादयति)

मायाविषये नवीना :—

- अज्ञानम्
  - ज्ञानशक्तिः
  - क्रियाशक्तिः
    - अविद्या (आवरणशक्तिः)
    - माया (विक्षेपशक्तिः)

एवं विवरणमते ब्रह्मचैतन्यं ईश्वरचैतन्यं जीवचैतन्यञ्चेति चैतन्यत्रयं स्वीकृतम् । परन्तु कूटस्थचैतन्यं, ब्रह्मचैतन्यं, जीवेश्वरचैतन्यद्वयञ्चेति चतुर्विधं चैतन्यं स्वीकुर्वन् विद्यारण्यः भामतीविवरणप्रस्थानयोस्समन्वयकारिणं आत्मानं परिचाययति—

कूटस्थो ब्रह्म जीवेशौ इत्येवं चिच्चतुर्विधा ।
घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ॥ इति

साक्षिस्वरूपविषये विद्यारण्यात् प्राचीना वेदान्तिनः जीवेश्वराभ्यां भिन्नं शुद्धं चैतन्यात्मानं साक्षिणं वदन्ति । विद्यारण्यस्तु कूटस्थचैतन्यमेव साक्षीति प्रतिपादयति । यथा नृत्यशालास्थदीपः साक्षी भवति तथा कूटस्थचैतन्यमेव साक्षीति—

नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम् ।
दीपयेदविशेषेण तदभावेऽपि दीप्यते ॥
अहंकारः प्रभुः, सभ्याः विषया नर्तकी मतिः ।
तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः ॥ इति

इमानि तत्वानि पञ्चदश्यादिषु ग्रन्थेषु वर्णितानि दृश्यन्ते ।

एवं दशमशतकादनन्तरमुत्पन्नेषु षोडशशतकान्तेषु ग्रन्थेषु न्यायमकरन्द-न्यायदीपावली-वेदान्तकौस्तुभादिषु ग्रन्थेषु भामतीविवरणप्रस्थानानां विकासः, अनिर्वचनीयख्यातिसाधनम्, अखण्डार्थत्वनिरूपणमित्यादिविषयश्च विकासं प्राप्तो दृश्यते । विशेषतश्च अद्वैतसिद्धान्तखण्डनपरस्य द्वैतसिद्धान्तमण्डनपरस्य व्यासतीर्थकृतन्यायामृतस्य तद्व्याख्यायाः न्यायामृततरङ्गिण्याः न्यायभास्करस्य च खण्डनाय

प्रवृत्तानां अद्वैतसिद्धि - गुरु - लघुचन्द्रिका-विट्ठलेशीयादीनां ग्रन्थानाम्, एवं आधुनिके काले विशिष्टाद्वैतखण्डनपराणां शतदूषणीखण्डनपराणां शतभूषण्यादिग्रन्थानाञ्च आविर्भावे अद्वैतसिद्धान्तस्य विकासोन्मुखतामापादयति ।

यद्यपि अद्वैतवेदान्तस्य विकासः प्रस्थानत्रय्येति व्यपदिश्यते तथापि तस्य विकासः मद्दृष्ट्या न केवलं प्रस्थानत्रय्या परन्तु प्रस्थानत्रयीबहिर्भूतैः खण्डन-मण्डनपरैर्वादप्रधानैश्च ग्रन्थैः, अद्वैतानन्दानुभाविभिराचार्यैरुपरचितैरनुभवप्रधानभा-वाविष्करणात्मकैः - आत्मविद्याविलास - पञ्चदश्यादिप्रकरणग्रन्थैः, अद्वैतवेदान्त-सिद्धान्तप्रतिपादकैः ब्रह्मनैर्गुण्यवाद - विद्वन्मोदतरङ्गिणीप्रभृतिभिः काव्यैः योगवा-सिष्ठादिभिर्महाकाव्यैश्च सुतरामद्वैतवेदान्तसाहित्यं विकसितमिति तु नापरोक्षम् ।

एतद्ग्रन्थप्रयोजनम्

संस्कृतेतरासु विशेषत आङ्ग्लहिन्दीप्रभृतिषु प्रसृततरासु आधुनिकासु भाषासु प्रतिविषयमेतादृशाः ग्रन्थास्समुपलभ्यन्ते येषु तत्तद्विषयविशेषसम्बद्धाः कति ग्रन्थाः विद्यन्ते ? तत्तद्विषयस्योत्पत्तिः कुतः ? तत्तद्विषयस्य वृद्धिर्विकासश्च कथम् ? तत्तद्विषयाभिवृद्धौ दत्तचित्ता आचार्याः के के ? इति विशिष्टेतिहासो दरीदृश्यते । भौतिकविज्ञानाभिवृद्धौ वृद्धसमे नितरां विज्ञानवादिनि भारतेतरदेशे भौतिकविज्ञानविकासे स्तनन्धयशिशुकल्पस्य भारतवर्षस्य या कीर्तिः, या श्रद्धा, यश्च गौरवगरिमा तस्य मुख्यं कारणं भारतीयानामद्वैतवेदान्तशास्त्रमिति तु निस्संशयं विदुषाम् । एतादृशस्याद्वैतवेदान्तसाहित्यस्येतिहासलेखने ममायं विशेष अभिनिवेशस्समुदपद्यत । संस्कृतेतरभाषासु प्रायशस्तत्तद्भाषायामेव तत्त-द्विषयविशेषस्य इतिहासः दृश्यते । तस्मान्ममापि संस्कृतभाषायामेव संशोधनपूर्व-केतिहासलेखने महानादरस्समभूत् । तादृशाभिनिवेशपूर्तये मद्रासविश्वविद्यालय-संस्कृतविभागभूतपूर्वप्राध्यक्षाः पूज्यतमाः यशश्शरीरमापन्नाः Dr. V. राघवमहोदयाः मां प्रोत्साहितवन्त इति तेषामधमर्णोऽस्मि ।

ग्रन्थस्यास्य विषयप्रतिपादनसरणिः

अद्वैतवेदान्तसाहित्यं न केवलं प्रस्थानत्रय्या परमन्यैरपि ग्रन्थैरिति पूर्व-मुपवर्णितम् । तस्मात् अद्वैतवेदान्तसाहित्यस्येतिहासः उपनिषत् - गीता - सूत्रतद्-भाष्य - वादप्रधान - अनुभवप्रधान - काव्यात्मकशैलीप्रधानैः ग्रन्थैर्विकसित इति

अद्वैतवेदान्तस्य प्रस्थानषट्कमिति कथनमपि अविरुद्धमन्वर्थञ्च भवेत् । अत एवायं ग्रन्थः पूर्वोत्तरभागद्वयेन विभक्तः । तत्र पूर्वभागे ग्रन्थप्राधान्यं मनसिकृत्य षट् परिच्छेदाः परिकल्पिताः ।

तत्र प्रथमे उपनिषत्प्रस्थानप्रधाने परिच्छेदे अद्वैतपरा उपनिषदः ग्रन्थ-प्रतिपाद्यवर्णनपूर्वकं तासां भाष्याणि, अद्वैताचार्यकृताः व्याख्याः, उपव्याख्याश्च निरूपिताः । उपनिषदां कालः विचारनिर्णयबाह्य इति मत्या विमर्शकवरेण्यानां सिद्धान्ता एव तत्र तत्र निरूपिताः ।

द्वितीये गीताप्रस्थानप्रधाने परिच्छेदे निखिलपुराणान्तर्गता अद्वैतमताविरो-धिन्यः गीताः भगवद्गीताश्च प्रतिपाद्यविशिष्टा सभाष्यव्याख्योपव्याख्या निरूपिताः ।

तृतीये सूत्रतद्भाष्यप्रस्थानप्रधाने परिच्छेदे ब्रह्मसूत्राणि तेषां भाष्यम्, पञ्चपादिकाविवरणप्रस्थानानुयायिनः ग्रन्थाः, भामतीप्रस्थानानुयायिनः ग्रन्थाः भाष्यस्य स्वतन्त्रव्याख्यात्मकाः ग्रन्थाः भाष्यानुसारिण्यः वृत्तयश्च सव्याख्या निरूपिताः ।

चतुर्थः परिच्छेदः प्रकरणग्रन्थप्रधानः । परिच्छेदेऽस्मिन् प्रकरणग्रन्थाः सव्याख्याः मार्कि अष्टशतेभ्य अन्यूना निर्दिष्टाः । प्रकरणग्रन्थरचयितारः प्रस्थान-त्रयेऽपि ग्रन्थकारा दृश्यन्ते एवं बहूनां प्रकरणग्रन्थानां रचयिता दृश्यते । प्रक-रणग्रन्थाश्च असंख्येया वर्तन्ते । तस्मात् पौनरुक्त्यादिदोषपरिहाराय परिच्छेदेऽस्मिन् सव्याख्यानां प्रकरणग्रन्थानां नामनिर्देशमात्रं मातृकाक्रमेण निर्दिष्टम् । तत्तद्ग्रन्थ-प्रतिपादितास्तु विषयाः तत्तद्ग्रन्थकर्तृविचारावसरे (अद्वैतग्रन्थकारपरिच्छेदे) प्रति-पादिताः ।

पञ्चमे परिच्छेदे उद्धारमात्रज्ञाताः नाममात्रप्रसिद्धाश्च ग्रन्थाः निरूपिताः । ते च ग्रन्थाः कुत्रोद्धृता इत्यादिभिर्विवरणैस्साकं चत्वारिंशदन्यूनाः प्रतिपादिताः ।

षष्ठः परिच्छेदः अज्ञातकर्तृकाद्वैतग्रन्थप्रधानः । परिच्छेदेऽस्मिन् मुद्रिता-मुद्रितभेदेन अज्ञातकर्तृकाः पञ्चशतं ग्रन्थाः वर्णिताः । तेष्वपि समाननामानः विभिन्न-ग्रन्था अमुद्रिता विभिन्नहस्तलिखितपुस्तकालयेषु लभ्यन्ते । ये च मद्रासराजकीय हस्तलिखितपुस्तकालये अड्यारपुस्तकालये तञ्जपुरपुस्तकालये च लभ्यन्ते, येषाञ्च

वर्णनात्मकविस्तृतग्रन्थसूची विद्यते ते चाधीतास्सन्दृष्टाश्च । तेषाञ्च ग्रन्थानां भिन्नत्वाभिन्नत्वे निश्चिते च । तथापि अनिवार्यं काठिन्यं यत्र तत्र मौनीभाव एव स्वीकर्तव्यः उदाहरणार्थम्—आनन्दबोधेन न्यायमकरन्दे (p. No. 170) पदानां सिद्धे सङ्गतिग्रहस्थापनावसरे "विस्तरस्तु न्यायदीपिकायां अवगन्तव्यम्" इत्युक्तम् । एष ग्रन्थः प्रकरणवशात् स्वतन्त्रो वेदान्तग्रन्थ इत्येव निर्णेतुं शक्यते । परं न्यायदीपिकाख्याः बहवो ग्रन्थाः द्वैतपूर्वमीमांसाजैनन्यायशास्त्रेषु विद्यन्ते । न ते अद्वैतसाधकाः । मद्रपुरी तिरुवनन्तपुर हस्तलिखितपुस्तकालययोर्विद्यमानः न्यायदीपिकाख्यः ग्रन्थस्तु शाब्दनिर्णयव्याख्यारूप एव न तु स्वतन्त्रग्रन्थः, तस्य शाब्ददीपिका इत्येव नाम दृश्यते । एवमेव नासिकउज्जैनपञ्चाबादिपुस्तकालयस्थेषु वर्णनात्मकविस्तृतसूचीरहितेषु पुस्तकेषु किमस्माभिः कर्तव्यम् । तेषां ग्रन्थानां विषये संशयस्सुस्थ एव । तस्मादज्ञातकर्तृकग्रन्थप्रधानोऽयं परिच्छेदस्सन्दृब्धः ।

एवं प्रस्थानषट्केन विकासितस्यास्य वेदान्तसाहित्यस्य ग्रन्थाः मूलव्याख्यानभेदभिन्नाः परिच्छेदषट्केन प्रतिपादिताः । ग्रन्थाः मुद्रिता उतामुद्रिता इति च निर्दिष्टाः । अमुद्रितग्रन्थानां प्राप्तिस्थानानि च निरूपितानि । प्रसिद्धतमेभ्यः मूलव्याख्याग्रन्थेभ्य ऋते प्रायस्सर्वेषामपि मुद्रितामुद्रितग्रन्थानां विषयाश्च सङ्ग्रहेण प्रदर्शिताः । व्याख्येयग्रन्थानां यावत्यः व्याख्या उभयविधास्सन्ति तास्सर्वा अपि व्याख्येयग्रन्थप्रस्तावे अन्यत्र व्याख्यानग्रन्थकर्तृप्रस्तावे च निर्दिष्टाः । पठितॄणां प्रेक्षितॄणाञ्च सौलभ्याय अनुक्रमणिकापि व्याख्येयव्याख्यान ग्रन्थानुसारं समारचिता ।

एवं षट्सु परिच्छेदेषु मूलव्याख्यानभेदभिन्ना ज्ञाताज्ञातकर्तृकभेदभिन्नाश्च ग्रन्थाः षट्सप्तत्यधिकसहस्रसंख्यापरिमिताः (1076) ग्रन्थेऽस्मिन् निर्दिष्टाः । ग्रन्थेष्वेतेषु मुद्रितग्रन्थाः द्व्यधिकचतुश्शतसंख्याकाः (402) निर्दिश्यन्ते स्म अमुद्रितेष्वपि ग्रन्थलिपिदेवनागरीलिप्योर्मुद्रिता एव निर्देष्टुं पारिताः । व्याख्याग्रन्थाः षट्षष्ट्यधिकचतुश्शताधिकग्रन्थाः (466) निर्दिष्टाः ।

द्वितीयो भागः

भागेऽस्मिन द्वितीये अद्वैतवेदान्तग्रन्थकर्तारः उपवर्णिताः । भागोऽयमपि पञ्चभिः परिच्छेदैः परिच्छिन्नः । तत्र प्रथमे परिच्छेदे शङ्करभगवत्पादेभ्यः प्राचीना अनिर्णीतकालादिविषयविशेषाः अद्वैताचार्या वर्ण्यन्ते स्म । द्वितीये परिच्छेदे शङ्करादर्वाचीनाः प्रसिद्धतमाः अद्वैताचार्यशब्दव्यपदेश्याः ग्रन्थकारास्तिथिक्रमानुसारं निर्दिष्टाः । प्रत्यद्वैताचार्यं आश्रमभेदेन नामान्तराणि, कालः, आचार्य-प्राचार्य-सतीर्थ्याः, शिष्य-प्रशिष्याः, वासभूमिः, सामयिकाः, पोषक-पोष्या राजान इत्यादिकं तत्तत्प्रणीतग्रन्थप्रामाण्यादुपवर्णितम् । पश्चात् सदुपदेशात्मकगुरुशिष्यपरम्परारूपसम्प्रदायसमागता पण्डितमण्डलीमात्रप्रसिद्धा कथा अथवा किंवदन्ती च प्रतिपादिता । अनन्तरं संशोधनधुरीणानां प्राच्यप्रतीच्यभाषाविदुषां सिद्धान्ताश्च न्यरूपिषत । तत्तदाचार्यप्रणीता अद्वैतग्रन्थाः प्रतिपादिताः । ग्रन्थप्रतिपाद्यानां रूपरेखा च समाकृष्टा । तत्र तत्र आवश्यकस्थलेषु गुरुपरम्परावृक्षः, वंशवृक्षः व्याख्यानव्याख्येयग्रन्थपरम्परावृक्षा इति बहवो वृक्षास्समारोपिताः । ग्रन्थकारा ये सन्यासिनस्समानाचार्याश्च ते अभिन्ना इति निर्णीयन्ते स्म । ये तु समानाभिख्याः भिन्नप्राचार्याश्च त अभिन्ना इति न निर्णीताः परन्तु भिन्ना इति प्रथमद्वितीयसंख्याभिर्विशेषिताः ।

यद्यपि ग्रन्थेऽस्मिन् ग्रन्थकर्तॄणां इतिहासलेखने तत्तत्प्रणीत-अद्वैतग्रन्थनिर्देशेनैवालम्, तथापि यदि तेषां इतिहासलेखने तत्तत्प्रणीतेभ्य अद्वैतेतरग्रन्थेभ्यश्च प्रमाणं लभ्यते तदा तत्तद्ग्रन्थनिर्देशोऽप्यावश्यकस्सम्पन्नः । तस्मात्तेऽपि ग्रन्था अत्र निर्दिष्टाः । परन्तु न ते अनुक्रमणिकायां स्थानमर्हन्ति ।

तृतीये परिच्छेदे ये च ज्ञातकालादिविषयविशेषाः, ये तु न प्रसिद्धतमाः, ये च न सन्यासिनः, दर्शनान्तरे प्रतिष्ठिता अपि अद्वैतेऽपि कतिपयग्रन्थकर्तारस्तेषां जीवनवृत्तान्तः ग्रन्थाश्च ग्रन्थप्रतिपाद्यसहिताः वर्णमालाक्रमेण निरूपिताः ।

चतुर्थे परिच्छेदे ज्ञातनामान अज्ञातकालादिविषयविशेषाश्शङ्करादर्वाञ्चना ग्रन्थकारास्तेषां ग्रन्थाश्च निरूपिताः । पञ्चमे परिच्छेदे अज्ञातनामानः परन्तु तत्त-

द्गुरुशिष्यत्वेन मुद्रितामुद्रितग्रन्थेषु आत्मानं निर्दिशन्तो ग्रन्थकाराः तेषां ग्रन्थाश्च निर्दिष्टाः ।

ग्रन्थस्यादौ सङ्क्षेपसङ्केतबोधिनी निर्दिष्टा । सम्प्रदायसमागतश्शान्तिपाठक्रमः, मङ्गलपाठक्रमसहितस्संयोजितः यश्च अद्वैतवेदान्तसाहित्यस्य अनिवार्य आवश्यकः कल्याणकारी च भाग इति ममाभिनिवेशः । ग्रन्थस्यान्ते अद्वैतग्रन्थ-ग्रन्थकर्तृ सामान्यानुक्रमणिकाश्च संयोजिताः । तत्र स्थूलाक्षराङ्कितपत्रसंख्याः ग्रन्थानां, ग्रन्थकर्तॄणां, समानाख्यानां ग्रन्थानां ग्रन्थकर्तॄणाञ्च भिन्नतां वृत्तान्तञ्च बोधयन्ति । सामान्यानुक्रमणिकायां ग्रन्थकर्तुर्विभिन्नानि तथा अन्यानि नामानि, अद्वैतवेदान्तबहिर्भूताः ग्रन्थाः, देशपुरग्रामादयः, गोत्रवंशादयः, अद्वैतवेदान्तसम्बद्धाः पारिभाषिकशब्दाः, विद्याः, विभिन्ना वादाश्च स्थानं लभन्ते स्म । गच्छतस्स्खलनमिति न्यायात्, मुद्रणालयानवधानाद्वा उत्पन्नाः केचन मुद्रणदोषाः शोधनेन योजनेन दूरीकृतास्सन्ति । क्वचित् क्वचित् संस्कृतसुलभीकरणघोषगौरवदानाय केवलं सन्धिविच्छेदस्स्वीकृतः । द्वित्रस्थलेषु षष्टिशब्दस्थाने षष्ठिरिति प्रयोगः, सिंहशब्दस्थाने सिम्ह इति प्रयोगश्च स्वीकृतः । उद्धृतवाक्यानुक्रमणिका च संयोजिता । अन्ते च महानद्वैताचार्यगुरुशिष्यपरम्परावृक्षस्संरोपितः, यस्मिन् अद्वैतग्रन्थकर्तारः गुरवः, शिष्याश्च केवलं स्थानमलभन्त, न मठाम्नायादिप्रसिद्धाः, नापि अद्वैतसम्प्रदायागता अपि अकृतग्रन्थाः । नापि च संस्कृतेतरभाषासु ग्रन्थप्रणेतारो वा ।

एतद्ग्रन्थरचनायामनिवार्यं काठिन्यम् ।

एवममुद्रित-मुद्रित-उद्धृत-ज्ञातकर्तृक-अज्ञातकर्तृक-व्याख्यान-व्याख्येयभेदेन भिन्नास्सर्वेऽपि ग्रन्थाः प्रबन्धेऽस्मिन् यथामति यथाशक्ति च व्यलिख्यन्त तथापि

"कति कृतयः कति कवयः कति लुप्ताः कति चरन्ति कति शिथिलाः ।"

इत्यभियुक्तोक्तिमनुसृत्य कति ग्रन्थाः मद्दृष्टिगोचरतामानीताः ? कति विलुप्ता इति न ज्ञायन्ते । इदमेकं काठिन्यम् । अपरमेकं काठिन्यमिदम् यत् समाननामानस्समानकर्तृकाः विभिन्नकर्तृकाश्च बहवो ग्रन्थाः विभिन्नहस्तलिखितपुस्तकालयेषु लक्ष्यन्ते । ये च मद्रासराजकीय-अडयार-तञ्जपुर-तिरुवनन्तपुरपुस्तकालयेषु दृश्यन्ते, येषाञ्च वर्णनात्मकविस्तृतसूच्यो विद्यन्ते, तेषां ग्रन्थानां भिन्नत्वा-

भिन्नत्वे निर्णीते । परन्तु दूरदेशस्थानां वर्णनात्मकसूचीरहितानां पत्रव्यवहारेणापि अवेद्यानां ग्रन्थानां विषये किमस्माभिः कर्तव्यम्? । तेषां विषये संशयस्त्वस्थ एव । अत एवाज्ञातकर्तृकपरिच्छेदस्संदृब्धः ।

कृतज्ञताविष्करणम्

एतादृशमदीयज्ञानवृद्धिकरस्य कार्यस्य सफलतायै नूतनबृहत्सूचीसम्पादनाय मद्रासविश्वविद्यालयसंस्कृतविभागस्थानां निखिलविदेशस्वदेशस्थहस्तलिखितपुस्तकालयवर्णनात्मकविस्तृतसूचीनां प्रदानेन बहूपकृतवतां मद्रासविश्वविद्यालयसंस्कृतविभागस्थानां समेषाम्, अनर्घाभिप्रायोपदेशादिप्रदानेन उपकृतवतां प्राध्यापकवर्याणां Dr. K. K. Raja महोदयानाञ्च अधमर्णतमः कृतज्ञश्चास्मि ।

मदीयं प्रास्ताविकं आङ्गिलभाषायां संक्षिप्य अनूद्य उपकृतवते Dr. N. Veezinathan M.A. Ph.D, & Vedānta Śiromaṇi महाशयाय कृतज्ञतां निवेदये ।

अमुद्रितग्रन्थावलोकनाय हस्तलिखितग्रन्थप्रदानेन उपकारिभ्यः मद्रासराजकीयहस्तलिखितपुस्तकालयाध्यक्षेभ्यः, अडयारपुस्तकालयाधिपेभ्यश्च मदीयां कृतज्ञतां विनिवेदये ।

मुद्रितग्रन्थावलोकनाय नियमानपि शिथिलीकृत्य असंख्यग्रन्थप्रदानेन प्रोत्साहितवतां M. M. कुप्पुस्वामिशास्त्रिपुस्तकालयाधिकारिणाम्, मद्रासुरीसंस्कृतकलाशालाधिकारिणाम्, प्रान्तीयकलाशाला (Presidency College) संस्कृतविभागाध्यक्षाणाञ्च धन्यवादवादी कृतज्ञश्चास्मि ।

बहुषु ग्रन्थेषु मुद्रापणाय सत्स्वपि विषयविशेषम्, एतादृशग्रन्थनिर्माणपरिश्रमम्, ग्रन्थयोग्यताञ्च परिशील्य मुद्रापणाय प्रकाशनाय च प्रयतितवते उपकृतवते च गुणग्राहिणे मद्रासविश्वविद्यालयाय, विश्वविद्यालयानुदानायोगाय (University Grant Commission) च, एवं सुचारुरूपेण मुद्रितवते रत्नमुद्रणालयाय (Rathnam Press) मदीयां कृतज्ञतां विनिवेदये । मुद्रापणकार्यस्यास्य सफलतायै बहूपकृतवद्भ्यां संस्कृतविभागकार्यालयकार्यव्यापृताभ्यां चिरञ्जीविस्वामिनाथ-बाबू राजेन्द्राभ्यां सन्तु श्रेयांसि सूर्यांशीत्याशासे ।

अनेन मदीयेन परिश्रमेण विद्वांसस्संस्कृताभिज्ञाश्च नूनं किञ्चिदपि प्रयोजनं प्राप्स्यन्तीति विश्वस्य—

"तद्विद्वांसोऽनुगृह्णन्तु चित्तश्रोत्रैः प्रसादिभिः ।
सन्तः प्रणयिवाक्यानि गृह्णन्ति ह्यनसूयवः ॥ इति

कुमारिलभट्टवाक्येन सम्प्रार्थ्य ग्रन्थमिमं आचार्य-जगद्गुरुशङ्करभगवत्पादकमलयोस्समर्पये—

सिद्धार्थिनामसंवत्सरम्
कार्तिक-शुक्लसप्तमी
षड्विंशतितमो दिवसः
26-11-1979
मद्रास-5

इत्थम्
विदुषां विधेयः
R. THANGASWAMI SARMA

ABBREVIATIONS

सङ्क्षेपसङ्केतबोधिनी

ABORI:	Annals of Bhandarkar Oriental Research Institute, Poona.
ALS:	Adyar Library Series, Madras.
AL:	Adyar Manuscripts Library, Madras.
ALPS:	Adyar Library Pamphlet Series.
AMSS:	Aryamata Samvardhini Sanskrit Series Madras.
AMS:	Advaita Manjari Series, Kumbakonam.
AOR:	Annals of Oriental Research, Madras.
AUSS:	Allahabad University Sanskrit Series.
ASS:	Anandasrama Sanskrit Series, Poona.
AS:	Asutosh Mukherjee Series, Calcutta.
BMP:	Balamanorama Press, Madras-4.
BRD:	Gaekwad Oriental Research Institute, Baroda.
BSS:	Banaras Sanskrit Series.
BUL	Bombay University Manuscripts Library.
BSP:	Bombay Sanskrit and Prakrit Series.
CPB:	Catalogue of Central Provinces and Berar.
COSS:	Cochin Sanskrit Series.
CSS:	Calcutta Sanskrit Series.
CU:	Calcutta University.
DC:	Descriptive Catalogues.
Edn:	Edition.
GNPB:	Gopalnarayan Press, Bombay.
GOML: Mysore:	Government Oriental Manuscripts Library, Mysore.
GOSS:	Gaekwad Oriental Sanskrit Series, Baroda.
HIP:	History of Indian Philosophy; S. N. Das Gupta.
IA:	Indian Antiquary.
IHQ:	Indian Historical Quarterly.
IHR:	Indian Historical Review.

IOL: India Office Library, London.
JOR: Journal of Oriental Research, Madras.
JRAS: Journal of the Royal Asiatic Society.
MGOML: Madras Government Oriental Manuscripts Library.
MGOMLS: Madras Government Oriental Manuscripts Library Series.
MUSBS: Madras University Sanskrit Bulletin Series.
MUSS: Madras University Sanskrit Series.
NCC: New Catalogus Catalogorum.
NIA: New Indian Antiquary.
NSP: Nirnayasagar Press, Bombay.
ORISS Mysore: Oriental Research Institute Sanskrit Series, Mysore.
PNS: Pandit New Series, Banaras.
PSB: Pandit Series, Banaras.
Q: Quoted.
RAS: Royal Asiatic Society.
SBC: Catalogues of Saraswathi Bhavan Library Banaras.
SBTS: Saraswathi Bhavan Text Series.
SBS: Saraswathi Bhavan Series, Banaras.
SME: Sankara's Memorial Edition, Vanivilas Press, Sri Rangam.
SVP: Sri Vanivilas Press, Sri Rangam.
SVPK: Saradha Vilas Press, Kumbakonam.
TCD: Travancore Curator's Library Descriptive Catalogue.
TCL: Travancore Curator's Library.
TMPL: Travancore Maharaja's Palace Library.
TSML: Tanjore Saraswathi Mahal Library.
TSS: Travancore Sanskrit Series.
VBS: Viswabharathi, Santiniketan, Calcutta.
VNSS: Vizianagaram Sanskrit Series.
VORIT: Venkateswara Oriental Research Institute, Tirupati.
VVP: Vanivilas Press (Sri Rangam)
VVSS: Vanivilas Sanskrit Series, Sri Rangam.

शाङ्करभाष्यपठनक्रमः

A

श्रीशङ्करभगवत्पादकृतभाष्यपाठारम्भे सम्प्रदायसमागतः

शान्तिमन्त्रपठनक्रमः

शिष्यास्सर्वे वस्त्रावगुण्ठितशरीराः पठेयुः

शिवनामनि भवितेऽन्तरङ्गे महति ज्योतिषि मानिनीमयार्धे ।
दुरितान्यपयान्ति दूरदूरे मुहुरायान्ति महान्ति मङ्गलानि ॥

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥

1. ओं शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ।

2. सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ।

3. यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधयापिहितः । श्रुतं मे गोपाय । ओं शान्तिः शान्तिः शान्तिः ।

4. अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणँ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् । ओं शान्तिः शान्तिः शान्तिः ।

5. पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ओं शान्तिः शान्तिः शान्तिः ।

6. आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुःश्रोत्रमथो बलमिन्द्रियाणि सर्वाणि। सर्वं ब्रह्मौपनिषदम्। माहं ब्रह्म निराकुर्याम्। मा मा ब्रह्म निराकरोत्। अनिराकरणमस्त्वनिराकरणं मे अस्तु। तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु। ओं शान्तिः शान्तिः शान्तिः।

7. वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणीस्थः। श्रुतं मे मा प्रहासीः। अनेनाधीतेन। अहोरात्रान् सन्दधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु तद्वक्तारमवतु। अवतु मां अवतु वक्तारमवतु वक्तारम्। ओं शान्तिः शान्तिः शान्तिः।

8. भद्रं नो अपि वातय मनः। ओं शान्तिः शान्तिः शान्तिः।

9. भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु। ओं शान्तिः शान्तिः शान्तिः।

10. यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवं आत्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये। ओं शान्तिः शान्तिः शान्तिः।

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः। सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि। अधीहि भो भगवः, अधीहि भो भगवः।

ततः किञ्चिद् भाष्यं पठेयुः।

अनन्तरं दक्षिणामूर्त्यष्टकं देहं प्राणमपीत्यन्तं पठन्तः प्रतिश्लोकं नमस्कुर्युः

11. मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानम्
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिम्
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे॥

12. विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।
यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

13. बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम्।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

14. यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।
यत्साक्षात्करणाद् भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

15. नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरम्
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते।
जानामीति यमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

16. देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

तत इमान् श्लोकान् पठन्तः नमस्कुर्युः—

17. श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भगवत्पादं शङ्करं लोकशङ्करम्॥

18. शङ्करं शङ्कराचार्यं केशवं बादरायणम्।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥

19. नमः श्रुतिशिरःपद्मषण्डमार्तण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥

20. ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥

21. नारायणं पद्मभुवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरञ्च
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ।
श्रीशङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकञ्च शिष्यम्
तं तोटकं वार्तिककारमन्यान् अस्मद्गुरून् सन्ततमानतोऽस्मि ॥

22. शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावये ॥

23. वेदान्तनिकुरुम्बेण तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु नः ॥

24. सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

ततः भाष्यश्रवणं कर्तव्यम् ।

B

श्रीशङ्करभगवत्पादकृतभाष्यपाठान्ते सम्प्रदायसमागतः शान्तिमन्त्रपठनक्रमः ।

1. शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन् माम् । आवीद् वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ।

2. ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु । मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ।

3. ओं यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । ओं शान्तिः शान्तिः शान्तिः ।

4. ओं अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणं सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् । ओं शान्तिः शान्तिः शान्तिः ।

5. ओं पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ओं शान्तिः शान्तिः शान्तिः ।

6. ओं आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुःश्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदम् । माहं ब्रह्म निराकुर्याम् । मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे अस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु । ओं शान्तिः शान्तिः शान्तिः ।

7. ओं वाङ् मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविराविर्म एधि । वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः । अनेनाधीतेन । अहोरात्रान् सन्दधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । अवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ।

8. ओं भद्रं नोऽपि वातय मनः । ओं शान्तिः शान्तिः शान्तिः ।

9. ओं भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । ओं शान्तिः शान्तिः शान्तिः ।

10. ओं यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये । ओं शान्तिः शान्तिः शान्तिः ।

इतः परं दक्षिणामूर्त्यष्टके अवशिष्टाः श्लोकाः पठनीयाः, प्रणामश्च कर्तव्यः ।

11. राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

12. बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

13. विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

14. भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

15. सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद् ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत् तत्पुनरष्टधा परिणतञ्चैश्वर्यमव्याहतम् ॥

16. वटविटपिसमीपे भूमिभागे निषण्णम्
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवम्
जननमरणदुःखच्छेददक्षं नमामि ॥

17. चित्रं वटतरोर्मूले वृद्धाश्शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

18. अङ्गुष्ठतर्जनीयोगमुद्राव्याजेन देहिनाम् ।
श्रुत्यर्थं ब्रह्मजीवैक्यं दर्शयन्नोऽवताच्छिवः ॥

19. ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥

20. गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

21. चिद्घनाय महेशाय वटमूलनिवासिने ।
सच्चिदानन्दरूपाय दक्षिणामूर्तये नमः ॥

C

महाप्रदोषदिने परं यथापूर्वं भाष्यपाठश्रवणं कृत्वा दशशान्तिमन्त्रपाठानन्तरं (B/1—10) श्रीशङ्करभगवत्पादपूजां कृत्वा श्वेतसर्षपेण मधुना च मिश्रं दधि दूर्वातृणानि च निवेदनं कृत्वा एते मङ्गलपाठश्लोकाः वारत्रयं पठनीयाः—

1. अशुभानि निराचष्टे तनोति शुभसन्ततिम् ।
स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं परम् ॥ (त्रिः)

2. अतिकल्याणरूपत्वात् नित्यकल्याणसंश्रयात् ।
स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मङ्गलं परम् ॥ (त्रिः)

3. ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥ (त्रिः)

ओं अथ ओं अथ ओं अथ ।

अतः परं "राहुग्रस्त" इत्यारब्धाः "दक्षिणामूर्तये नम" इत्यन्ताः (11-21) श्लोकाः सप्रणामं पठनीयाः ।

इति शान्तिपाठसम्प्रदायः ।

श्रीः

उपनिषत्प्रस्थानम्

वैदिकसाहित्ये उपनिषदां स्थितिरन्यादृशी । औपनिषदानां महर्षीणां कार्यात्मकविश्वब्रह्माण्डस्य अभिन्नत्वे अखण्डत्वे च महान् विश्वासः दरीदृश्यते । औपनिषदा मुनयस्सुखदुःखेभ्य उदासीना दृश्यन्ते । सान्तस्यानन्तेन सम्बन्धः औपनिषदानां महर्षीणां रहस्यात्मकवाणीष्वेव प्रथमं अभिव्यक्तः ।

ब्राह्मणग्रन्थास्तु कर्मसु पुरुषं प्रेरयन्ति । उपनिषदस्तु ज्ञाने प्रेरयन्ति । जीवनात् जीवनसम्बद्धविचारे उपनिषदामैदम्पर्यं दृश्यते । वेदकालिका भारतीया ऐहिकस्यैश्वर्यस्य साधने यथा बद्धपरिकरा दृश्यन्ते, यथा च ब्राह्मणकालिका भारतीयास्स्वर्गादिपरलोकेप्सवश्च दृश्यन्ते न तथोपनिषत्कालिका भारतीयाः । परन्तु ते साधका ऐहिकैश्वर्यात् परलोकेच्छायाश्चोदासीनाः मुमुक्षवश्च दृश्यन्ते । गतिशीलैः प्राकृतिकवस्तुभिरेव जनिमतां न सम्बन्धः, परन्तु अनिर्वचनीयेन केनचित् स्थिरतत्वेनैव तेषां सम्बन्ध इत्युपनिषत्कालवर्तिनां भारतीयानां सिद्धान्तः । अतएवो-पनिषदां सिद्धान्ताः विचारप्रधाना वर्तन्ते ।

उपनिषदः गम्भीरानर्थान् काव्यसुलभया गद्यपद्यात्मकशैल्या प्रतिपादयन्ति । परम् उपनिषदः नैककर्तृकाः । यत एकस्यामेवोपनिषदि शिक्षकभेदो दृश्यते ।

उपनिषदां संख्याः —

सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम् ।
सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम् ॥ (1 - 44) इति

अष्टोत्तरशतोपनिषदां सारभूतत्वं प्रतिपादयन्त्या मुक्तिकोपनिषदा अष्टोत्तरशताधिकानां उपनिषदां सत्वे प्रमाणमप्यावेदितं भवति । परन्तु न तास्सर्वा उपनिषद अद्यावधि प्रकाशिता उपलब्धाः वा सन्ति । काश्चनोपनिषद अडयारपुस्तकालयात् प्रकाशतां

नीताः । तास्वष्टोत्तरशतोपनिषत्सु दशोपनिषद ऋग्वेदीयाः, एकोनविंशत्युपनिषदश्शुक्लयजुर्वेदीयाः, द्वात्रिंशदुपनिषदः कृष्णयजुर्वेदीयाः, षोडशोपनिषदस्सामवेदीयाः, एकत्रिंशदुपनिषद अथर्ववेदीया इति ज्ञायते ।

अष्टोत्तरशतोपनिषत्स्वपि विषयप्रतिपादनदृष्ट्या त्रयोदशोपनिषद एव प्राचीनतमा इति ज्ञायन्ते । ऐतरेय-कौषीतक्युपनिषद ऋग्वेदीयाः, छान्दोग्यकेनोपनिषदस्सामवेदीयाः, तैत्तरीय नारायण-कठ-श्वेताश्वतर-मैत्रायण्युपनिषदः कृष्णयजुर्वेदीयाः, ईशावास्योपनिषच्छुक्लयजुर्वेदीया बृहदारण्यकोपनिषदपि शुक्लयजुर्वेदीया, मुण्डक-माण्डूक्यप्रश्नोपनिषद अथर्ववेदीया इति च प्रसिद्धाः । एतास्वपि दशोपनिषदामेव शङ्करभगवत्पादैर्भाष्यं कृतमिति ता एवात्र प्रधानतमास्स्वीक्रियन्ते । नृसिम्होत्तरतापिनीकौषीतकी-श्वेताश्वतरोपनिषदामपि व्याख्याः दृश्यन्ते । अतः अद्वैताचार्यैः व्याख्याताः अथवा व्याख्यातत्वेन प्रसिद्धाः सर्वा अप्युपनिषदः निर्देशार्हा इति सामान्यं नियमं मनसि कृत्वा शङ्करैरव्याख्याता अपि नारायणाश्रमि-शङ्करानन्दादिभिर्व्याख्याता अद्वैतमतप्रतिपादकास्सर्वा अप्युपनिषदः निर्दिष्टाः ।

उपनिषदां पौर्वापर्यम्—

सर्वासूपनिषत्सु का वा उपनिषत् प्राचीना ? का वा नवीना ? इति निश्चेतुं न शक्यते । यतोऽस्मिन् विषये मतभेदास्सप्रमाणाः दृश्यन्ते ।

1. प्रोफ़ेसर–डायसनस्तु गद्यशैल्यां दृश्यमाना उपनिषद एव प्राचीना इति "फिलासफि आफ द उपनिषत्स्" इति ग्रन्थे अभिप्रैति ।

2. प्रो-रामचन्द्ररानडे तु "ए कंस्ट्रक्टिव सर्वे आफ़ उपनिषदिक फ़िलासफ़ि" नामके ग्रन्थे उपनिषदां पौर्वापर्यमेवमभिप्रैति - बृहदारण्यक - छान्दोग्य-ईश-केन-ऐतरेय-तैत्तरीय-कौषीतकी - कठ-मुण्डक - श्वेताश्वतर-प्रश्न-मैत्रायणि-माण्डूक्या इति उपनिषदां उत्तरोत्तरकालोत्पन्नतां प्रतिपादयन्ति । तस्य मतेन उपनिषदः पञ्चभिर्वर्गैः परिगणिताः—प्रथमवर्गे बृहदारण्यकछान्दोग्ये, द्वितीयवर्गे ईशकेनोपनिषदौ, तृतीयवर्गे ऐतरेयतैत्तरीयकौषीतक्यः, चतुर्थवर्गे कठमुण्डकश्वेताश्वतराः, पञ्चमवर्गे प्रश्नमैत्रीमाण्डूक्यानि चेति । एषु प्रथमवर्गः प्राचीनतमः, अन्तिमश्चार्वाचीन इति ।

3. बेलवलकर महाशयस्तु–एकस्यामेवोपनिषदि भिन्नकालिकानां रचनाविशेषाणां दर्शनात्, एकस्या एवोपनिषदः केचन भागाः प्राचीनाः, केचनार्वाचीना भवन्तीति वर्णयति ।

4. सर्-राधाकृष्णमहोदयास्तु वेदकालादारभ्य क्रिस्तोः पूर्वं (B. C.) षष्ठशतकात्पूर्वावधिकः काल उपनिषदां काल इति निश्चिन्वन्ति ।

प्राचीनतमासु उपनिषत्सु दार्शनिकविचारधारायाः प्राधान्यं, अनन्तरभाविनीषु धार्मिकविचारधारायाः भक्तिधारायाश्च प्रवेशस्सन्दृश्यते ।

उपनिषत्सु शाण्डिल्य - दध्यौच - सनत्कुमार - आरुणि-याज्ञवल्क्य-उद्दालक-रैक्व - प्रतर्दन - अजातशत्रु - जनक - पिप्पलाद-वरुण - गार्गी - मैत्रेयी - नचिकेतःप्रभृतीनां बहूनां आचार्याणां महर्षीणाञ्च नाम दृश्यते । केचिदेतेषु सपत्नीकास्सापत्याश्च दृश्यन्ते । श्वेतकेतोः पुत्रः आरुणिः, वरुणस्य पुत्रः भृगुः, याज्ञवल्क्यः द्विभार्य इत्यादि । औपनिषदास्सिद्धान्तास्सर्वेऽपि पतिपत्नीसंवादशैल्यां पितृपुत्रसंवादशैल्याञ्च प्रतिपादिता इति तु विशेषत अवधेयार्हः विषयः ।

उपनिषच्छब्दनिर्वचनम् —

कठोपनिषदां प्रस्तावनाभाष्यप्रामाण्यात्, मुण्डकोपनिषदां प्रस्तावनाभाष्यप्रामाण्यात्, केनोपनिषदि (4-32) "उपनिषदम्ब्रूम" इति वाक्यस्य भाष्यप्रामाण्यात्, छान्दोग्योपनिषत्स्थाष्टमाध्यायाष्टमखण्ड चतुर्थखण्डिकास्थभाष्यप्रामाण्यात् बृहदारण्यकोपनिषत्प्रस्तावनाभाष्यप्रामाण्याच्च संसारबीजविनाशिनी या विद्या सा उपनिषच्छब्देन मुख्यया वृत्या बोध्यत इति निश्चीयते । तादृशविद्याप्रतिपादकत्वात् लक्षणया ईशावास्यादयो ग्रन्था अप्युपनिषच्छब्देन व्यवह्रियन्ते ।

उपनिषदां सिद्धान्ताः —

प्रायः मुख्यासूपनिषत्सु ब्रह्मस्वरूपं, तत्प्रतिपत्तय उपासनाः, काश्चित् स्वतन्त्राः, काश्चित्कर्माङ्गत्वेन, आख्यायिकासहिताः प्रतिपादिताः । ब्रह्मविद्याप्राप्तेस्साधनानि ब्रह्मविद्याजिज्ञासूनां आवश्यकगुणविशेषाः, कर्ममार्गस्य जटिलत्वम्, ज्ञानमार्गस्य सुगमत्वम्, अनासक्तकर्मपरत्वं वैराग्यञ्चत्येवमादीनि आत्मज्ञानाप्तेस्साधनानि, न तु तर्कविचारः युक्तिवादा वा इत्यादि प्रतिपादितम् ।

उपनिषत्सु जाग्रत्तत्त्वानुशीलनपराः नैकविधाः कथाश्श्रूयन्ते । औपनिषदाः मननशीला मुनयः जगतः मूलतत्त्वानुसन्धाने बद्धश्रद्धाः दृश्यन्ते । प्रापञ्चिकानां नैकविधानां वस्तूनां विभिन्नतायां एकत्वसम्पादकं तत्वं किं स्यात् ? तादृशतत्व-लाभोपायः कः ? इति शङ्काकुलाः पञ्चभूतानुशीलनमार्गेण आत्मतत्वविचारपराः भूत्वा स्वस्मिन्नेव तादृशं तत्वं प्रत्यक्षीचक्रुः । एतादृशस्वानुभवशीलानां तेषां क्रान्त-दर्शिन्याः दृष्टेः आन्तरबाह्यजगतोर्न कोऽपि भेदः विषयीबभूव । छान्दोग्योपनिषदी-यया इन्द्रविरोचनकथया (8–7–12), आरुणिश्वेतकेतुसंवादरूपया न्यग्रोधकथया (6-12) च "तत्त्वमसि" "अयमात्मा ब्रह्म" इत्येष एव सिद्धान्तः प्रतिपादितः। एवं सप्रपञ्च-निष्प्रपञ्च ब्रह्मस्वरूपवर्णना, मनस्तत्वविवेचना, कर्म - सन्यास - मोक्ष-सिद्धान्ताः, भारतीयविविधदर्शनमूलभूतास्सर्वेऽपि सिद्धान्ताः प्रतिपादिताः ।

एवञ्च भारतीयाध्यात्मिकविचारधारया उपजीव्यत्वात् उपनिषदः प्रस्था-नत्रये प्रथमगणनामर्हन्ति । यद्यप्युपनिषद् असंख्यास्तथापि या उपनिषद् अद्वैत-सिद्धान्तमूलभूताः, याश्च गौडपादशङ्करभगवत्पादादिभिरद्वैताचार्यैः व्याख्यातास्त एवात्र सव्याख्योपव्याख्या वर्णमालाक्रमेण निर्दिश्यन्ते ॥

1. अथर्वशिखोपनिषत् —

अस्यामुपनिषदि सकलवेदमूलभूतस्य प्रणवस्य स्वरूपं, तदीयमात्राणां देव-तादयः, प्रणववाचकानां ओङ्कारतारकादिपदानां व्युत्पत्तिः, तद्ध्यानध्यातृध्येय-स्वरूपं च इत्येतत् सर्वं निरूप्यते । इयमुपनिषद् आनन्दाश्रममुद्रणालये मुद्रिता । अस्या व्याख्याः —

नारायणाश्रमिकृता— अथर्वशिखोपनिषद्दीपिका

अथर्वशिखोपनिषदां व्याख्यात्मकोऽयं ग्रन्थः आनन्दाश्रममुद्रणालये मुद्रितः। अस्य कर्ता श्रीनाथपौत्र रत्नाकरभट्टपुत्रः आनन्दात्मशिष्यः नारायणाश्रम इति ज्ञायते । अनेन विरचितायां "माण्डूक्योपनिषद्दीपिकायां" अमुद्रितायां सरस्वती-महालयपुस्तकालयस्थायां (1556 D. C. T. S. M. L.) आनन्दगिरिर्निर्दिष्टः। आनन्दाश्रममुद्रितायां जाबालोपनिषद्दीपिकायां आनन्दात्मा अध्यात्मगुरुरिति निर्दिष्टः । आनन्दात्मा तु शङ्करानन्दस्यापि गुरुरिति नारायणाश्रमस्य कालः त्रयोदशचतुर्दशशतकम् (1275-1350 A. D.) इति निश्चीयते ॥

शङ्करानन्दविरचिता— अथर्वशिखोपनिषद्दीपिका

आनन्दात्मनः विद्यातीर्थस्य च शिष्योऽयं शङ्करानन्दः विद्यारण्यस्य गुरुः त्रयोदशशतकारम्भकालवासी (1275—1350 A.D.) इति ज्ञायते । अमुद्रितोऽयं ग्रन्थः सरस्वतीमहालयसूच्यां (1427 TSML) अडयारपुस्तकालये बरोडापुस्तकालये च दृश्यते । शङ्करानन्दमधिकृत्याधिकं सूत्रवृत्तिप्रकरणे प्रकरण-ग्रन्थप्रकरणे अद्वैताचार्यप्रतिपादनावसरे च प्रतिपाद्यते ॥

शङ्कराचार्यकृतं— अथर्वशिखोपनिषद्भाष्यम् (?)

ग्रन्थोऽयं शङ्कराचार्यकृतत्वेन अडयारपुस्तकालयस्थे (30 B 22 व 6 AL) आदर्शपुस्तके दृश्यते । अमुद्रितश्चायं ग्रन्थः । अस्य कर्ता न प्रसिद्धश्शङ्कराचार्यो भवितुमर्हति । तथा प्रसिद्धेरभावात् । अन्तरङ्गपरीक्षायान्तु कृतायां सर्वथा न शङ्कराचार्यकृतोऽयं ग्रन्थ इत्येव प्रतीयते । यतः—यासामुपनिषदां शङ्कराचार्यै-र्व्याख्या कृता तासां व्याख्याप्रस्तावे नारायणाश्रमिणा "शङ्करोक्त्युपजीविना" इत्युच्यते । यासां न व्याख्या कृता तासां व्याख्याप्रस्तावे "श्रुतिमात्रोपजीविना" इत्येव निर्दिश्यते । दृश्यते चात्र श्रुतिमात्रोपजीविना इति । तस्मादपि कारणात् नेयं व्याख्या शङ्कराचार्यकृता इत्येव प्रतिभाति ॥

उपनिषद्ब्रह्मेन्द्रकृतं–विवरणम् अडयार पुस्तकालये मुद्रितम् ।

2. अथर्वशिर उपनिषदः—

अस्यामुपनिषदि देवानां को भवानिति रुद्रं प्रति प्रश्नः, तदुत्तरेण तस्य सर्वात्मकत्वज्ञानेन तन्नतिपूर्वकं बहुधा तस्य स्तुतिः, तत्प्रतिपादकत्वेन प्रसिद्धानां "ओङ्कार - प्रणव - सर्वव्याप्यनन्तादिपदानां निर्वचनं, इत्यादयो विषयाः प्रति-पादिताः । ग्रन्थोऽयमानन्दाश्रममुद्रणालये मुद्रितः । अस्या व्याख्याः—

नारायणाश्रमकृता— अथर्वशिर उपनिषद्दीपिका

श्रुतिमात्रोपजीविना नारायणाश्रमिणा रचितेयं दीपिका आनन्दाश्रमुद्रणालये मुद्रिता । अस्य कालादि पूर्ववत् ।

शङ्करानन्दकृता— अथर्वशिर उपनिषद्दीपिका

ग्रन्थोऽयं आनन्दाश्रममुद्रणालये मुद्रितः । शङ्करानन्दस्य कालादि पूर्ववत् ।

शङ्कराचार्यकृतं— अथर्वशिर उपनिषद् भाष्यम् ?

अमुद्रितोऽयं ग्रन्थः अडयारपुस्तकालये (30 B 22 व 28 AL) लभ्यते । उपनिषद्ब्रह्मेन्द्रकृतं विवरणं अडयार पुस्तकालये मुद्रितम् ।

3. अमृतनादोपनिषत्—

अस्यामुपनिषदि शास्त्राभ्यासस्य ब्रह्मज्ञानफलकत्वमुपवर्ण्य प्रत्याहारध्यान-प्राणायामधारणातर्कसमाध्यभिधेयाङ्गषट्ककस्य योगस्य तत्तदङ्गलक्षणकथनपूर्वकं अभ्यसनप्रकारं फलञ्च निरूप्य प्राणादिवायूनां स्थानवर्णादिकमभिधीयते । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये । अस्या व्याख्याः—

(क) शङ्करानन्दविरचिता— अमृतनादोपनिषद्दीपिका

नारायणविरचिता, उपनिषद्ब्रह्मेन्द्रविरचिताश्च व्याख्यास्सन्ति । मुद्रिता आनन्दाश्रममुद्रणालये अडयार पुस्तकालये च ।

4. अमृतबिन्दूपनिषत्—

अस्यामुपनिषदि मनश्शुद्धिप्रशंसापूर्वकं ब्रह्मज्ञानावाप्तये साधनमुपवर्ण्य मुक्तिस्वरूपं निरूप्य ब्रह्मज्ञानं प्रशस्यते । मुद्रिताचेयमुपनिषदानन्दाश्रममुद्रणालये । अस्या व्याख्याः—

(क) नारायणाश्रमि विरचिता— अमृतबिन्दूपनिषद्दीपिका

श्रुतिमात्रोपजीविना नारायणाश्रमिणा विरचितेयं दीपिका आनन्दाश्रममुद्रणालये मुद्रिता । अस्य कालादि पूर्ववत् ॥

(ख) शङ्करानन्दविरचिता— अमृतबिन्दूपनिषद्दीपिका

व्याख्याचेयं मुद्रिताऽनन्दाश्रममुद्रणालये । कालादि पूर्ववत् ।

(ग) सदाशिवेन्द्रसरस्वतीकृता— अमृतबिन्दूपनिषद्दीपिका

अमुद्रितेयं व्याख्या मद्रासराजकीयप्राचीनहस्तलिखितपुस्तकालये (R 1492 M. G. O. M. L) लभ्यते । अस्य कर्ता कामकोटिपीठाधीशस्य महा-

देवेन्द्रसरस्वत्याः प्रशिष्यः, चन्द्रचूडेन्द्रसरस्वत्याः गुरुः, ब्रह्मतत्त्वप्रकाशिकाकारस्य प्रसिद्धस्य सदाशिवब्रह्मेन्द्रसरस्वत्याः प्राचार्यः सदाशिवेन्द्रसरस्वती षोडशशतकीयः (1550–1650 A. D.) इति ज्ञायते । अनेन आत्मानात्मविवेकोऽपि रचितः ॥ उपनिषद्ब्रह्मयोगिकृतं विवरणमपि मुद्रितम् ।

5. आत्मप्रबोधोपनिषत्—

अत्र प्रणवस्वरूपं प्रशस्य तत्सहिताष्टाक्षरेण महामन्त्रेण ब्रह्मानुसन्धानं कुर्वत उत्तमलोकावाप्त्या परमानन्दानुभवप्रकारोऽभिधीयते । ऋक्शाखीयायां अस्यामुपनिषदि आत्माद्वैत - जीवन्मुक्तादि - प्रतिपादिकाः कारिकाः विशेषत उल्लेखार्हाः । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये । अस्या व्याख्याः—

(क) नारायणाश्रमिकृता— आत्मप्रबोधोपनिषद्दीपिका

श्रुतिमात्रोपजीविना नारायणाश्रमिणा रचितेयं व्याख्यानन्दाश्रममुद्रणालये मुद्रिता गद्यभागानामेव विद्यते ।

(ख) शङ्करानन्दविरचिता— आत्मप्रबोधदीपिका

अमुद्रितोऽयं ग्रन्थः शृङ्गगिरिसूच्यां (10. C) दृश्यते ॥ उपनिषद्ब्रह्मेन्द्र-व्याख्या च मुद्रिता ।

6. आरुणिकोपनिषत्—

आरुणिप्रजापतिप्रश्नप्रतिवचनरूपायामस्यामुपनिषदि सर्वसङ्गपरित्यागपूर्वक-सन्यासाश्रमग्रहणप्रकारमुपवर्ण्य सन्यासिनां धर्मांश्चाभिधायान्ते परमपदावाप्तिरिति प्रतिपादितम् । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये । अस्य व्याख्याः —

(क) नारायणाश्रमिकृता— आरुणेकोपनिषद्दीपिका

"नारायणेन रचिता शङ्करानन्दपाठत" इति दीपिकायामस्यां दर्शनात् शङ्करानन्ददीपिकाया अनन्तरं रचितेयं दीपिकेति ज्ञायते । मुद्रिता चेयमानन्दाश्रममुद्रणालये ।

(ख) शङ्करानन्दरचिता— आरुणिकदीपिका

मुद्रिताचानन्दाश्रमे । उपनिषद्ब्रह्मेन्द्रव्याख्या च मुद्रिता ।

7. ईशावास्योपनिषत्—

अस्यामुपनिषदि चिदचित्स्वरूपस्य जगतः परमात्माधीनस्वरूपस्थित्यादिमत्वं, आदेहपातं यथाशक्ति ब्रह्मविद्याङ्गभूतकर्मयोगस्यानुष्ठेयत्वं, अविदुषो निन्दनं, परमात्मनः विचित्रानन्तशक्तिमत्वं, ब्रह्मात्मकजगदनुसन्धानस्य फलं, ईशेशितव्यवेदिनः ज्ञानयोगाद्युपदेशः, केवलकर्मयोगावलम्बिनां विनिन्दनं भगवद्भक्तिनिष्ठस्यावश्यानुसन्धेयोपदेश इत्यादिकमुपवर्णितं दृश्यते। यजुर्वेदीयेयमुपनिषत् आनन्दाश्रममुद्रणालये (ASS. 5) मुद्रिता। अस्या उपनिषदः रचनाकालः क्रिस्तोः पूर्वं सप्तमशतकम् (700 BC) इति विमर्शकाः। अस्याः व्याख्याः, उपव्याख्याश्च—

(क) शङ्कराचार्यकृतं— ईशावास्योपनिषद्भाष्यम्

मुद्रितञ्चेदं भाष्यमानन्दाश्रममुद्रणालये (ASS 5)। शङ्कराचार्यकालादि सविस्तरं प्रकरणग्रन्थप्रस्तावे अद्वैताचार्यप्रस्तावे च प्रतिपाद्यते।

(A) आनन्दगिरिकृता— ईशावास्यभाष्यव्याख्या

व्याख्यायामस्यां "तत्वालोकः" निर्दिष्टः। भास्करमतं खण्डितञ्च। मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये (ASS 5)।

व्याख्याया अस्याः कर्ता आनन्दज्ञानापराभिध आनन्दगिरिः। सन्यासस्वीकारात्पूर्वं जनार्दन इत्यस्यैव नाम। गुजरातप्रान्तजोऽयं द्वारकास्थ शङ्करपीठाधीश आसीदिति प्रसिद्धिः। आन्ध्रदेशज इति साम्प्रदायिकाः। अनुभूतिस्वरूपाचार्यशुद्धानन्दयोश्शिष्योऽयं अखण्डानन्दस्य प्रज्ञानानन्दस्य च गुरुः, कलिङ्गदेशाधिपतेर्नृसिम्हदेवस्य सामयिकस्त्रयोदशशतकीय (1260-1320 A. D.) इति ज्ञायते। अदसीया अन्ये ग्रन्थाः प्रकरणप्रस्तावे अद्वैताचार्यप्रस्तावे च प्रतिपाद्यन्ते॥

(B) शिवानन्दयतिकृतं— ईशावास्यभाष्यटिप्पणम्

अमुद्रितोऽयं पूर्णग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R 3882 M.G O.M.L) लभ्यते।

अस्य कर्ता रामनाथविदुष आचार्यस्सप्तदशाष्टादशशतकमध्यवर्ती (1650–1750 A. D.) शिवानन्दयतिरिति ज्ञायते। अनेन रचित आनन्ददीपाख्यः प्रकरणग्रन्थः अन्यत्र निरूपितः॥

(ख) अनन्ताचार्यकृता— वेदार्थदीपिका

समग्रवेदभागस्य व्याख्यात्मकोऽयं ग्रन्थः। प्रकृतिप्रत्ययविवेचनपूर्वकं सप्रमाणं प्रक्रियां निरूपयत्ययं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः।

अस्य कर्ता काण्वशाखीयः नागदेवभट्टपुत्रः, समग्रवेदभागव्याख्याता अनन्ताचार्यः। अनेन विधानपारिजाताख्यः ग्रन्थः (1625 A. D.) काले रचितः।

(ग) आनन्दभट्टकृतम्— ईशावास्यभाष्यम्

ग्रन्थोऽयमानन्दाश्रममुद्रणालये मुद्रितः। ग्रन्थेऽस्मिन् शङ्करानन्दः निर्दिष्टः। अस्य कर्ता जातवेदभट्टजाह्नव्योः पुत्रः वासुदेवपुरी-आत्मावासपूज्यपादशिष्य आनन्दभट्टश्शङ्करानन्दादर्वाचीन इति परं ज्ञायते।

(घ) उपनिषद्ब्रह्मेन्द्रकृतम्— ईशावास्यविवरणम्

भावेन वाक्यविन्यासेन च शाङ्करं भाष्यं पूर्णतयानुसरदिदं विवरणं अड्यारपुस्तकालये मुद्रितम्।

अस्य कर्ता प्रथमवासुदेवेन्द्रप्रशिष्यः द्वितीयवासुदेवेन्द्रशिष्यः रामचन्द्रेन्द्रसतीर्थ्यः, कृष्णानन्दगुरुः, अष्टादशशतकापरार्धकालवासी (1765—1850 A.D.) उपनिषद्ब्रह्मेन्द्रापरनामा रामचन्द्रेन्द्र इति ज्ञायते।

(ङ) उवटाचार्यकृतम्— ईशावास्यभाष्यम्

ईशावास्योपनिषदां विवरणात्मकः माध्यन्दिनशाखान्तर्गतस्य समग्रवेदभागस्य व्याख्यात्मकश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः। अस्य कर्ता आनन्दपुरवास्तव्यस्य वज्रटभट्टस्य सूनुरवन्तीपुरवासी भोजराजसामयिकः उवटाचार्य इति शुक्लयजुर्वेदसंहिताभाष्यप्रमाणाज्ज्ञायते। यद्ययं भोजराजः धारानगराधीशः सरस्वतीकण्ठाभरणशृङ्गारप्रकाशकारस्स्यात् तर्हि तस्य शासनकालः (1010—1062 A. D.) इति यपिग्राफिका इण्डिकापत्रिकायाः प्रथमभाग- (230 Page) प्रमाणात् ज्ञायते। तस्मादुवटाचार्योऽपि एकादशशतकीय इति निर्णेतुं शक्यते॥

(च) गोपालानन्दकृता— ईशावास्यटीका

अमुद्रितोऽयं ग्रन्थः बरोडापुस्तकसूच्यां (4527 DC BRD) दृश्यते। अस्य कर्ता सहजानन्दशिष्यः गोपालानन्दः मार्कि सप्तदशएकोनविंशतिशतकमध्यवर्तीति ज्ञायते॥

(छ) नरसिंहभट्टकृता— ईशावास्यटीका

अमुद्रितोऽयं ग्रन्थः मध्यप्रान्तीयबरार्ग्रन्थसूच्यां (481 CCPB) दृश्यते। अस्य कर्ता अद्वैतचन्द्रिकाकारः, नागेश्वररामभद्राश्रमयोःशिष्यः रघुनाथभट्टपुत्रः किम्मिडि (खिमुण्ड) वंशजस्य जगन्नाथनृपतेस्सामयिकः मिथिलावासी अष्टादशशतकीयः नरसिम्हभट्ट इति ज्ञायते॥

(ज) ब्रह्मानन्दसरस्वतीकृतम्— ईशावास्यरहस्यम्

आनुष्टुभेन छन्दसा षष्टितैः पद्यै रचितोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः। अस्य कर्ता ब्रह्मानन्दसरस्वती। यद्ययं गुरुचन्द्रिकाकारस्याचर्हि नारायणतीर्थशिष्यस्सप्तदशशतकीय (1600—1700 A. D.) इति निर्णेतुं शक्यते॥

(झ) भास्करानन्दसरस्वतीकृता— ईशावास्यव्याख्या

शाङ्करभाष्यानुसारिणीयं व्याख्या भारतीजीवनमुद्रणालये वाराणस्यां मुद्रिता। अस्य कर्ता शाण्डिल्यगोत्रजः कान्यकुब्जब्राह्मणः, गोभिलसूत्री, सामवेदी, कौथुमशाखीयः, पूर्वाश्रमे वेङ्कटमिश्रनामा, मिश्रीलालमिश्रपुण्यमत्योः पुत्रः, अनन्तरामपण्डितशिष्यः, पूर्णानन्दस्वामिनो लब्धदीक्षः, मणिरामचौबेदौहित्रः मैथिलोऽपि काशीवासी भास्करानन्दसरस्वती एकोनविंशतिशतकीयः (1800-1900 A. D.) इति ज्ञायते।

(ञ) रामचन्द्रपण्डितकृता— ईशावास्यरहस्यविवृतिः

प्रतिमन्त्रं अर्थसंग्राहकश्लोकेन साकं भाष्यार्थसंग्राहकोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः। अस्य कर्ता माध्यन्दिनशाखाध्यायी, आत्रेयगोत्रजः, श्रीसिद्धपुत्रः सिद्धेश्वरशिष्यः एकोनविंशतिशतकवासी (1817 A. D.) रामचन्द्रपण्डित इति ज्ञायते॥

(ट) श्रीधरानन्दकृतः— ईशावास्यविवेकः

अमुद्रितोऽयं ग्रन्थः अडयारपुस्तकालये (33 H. L. आ 2 A. L.) लभ्यते।

(ठ) सच्चिदानन्दाश्रमिकृता— ईशावास्यदीपिका


अमुद्रितोऽयं ग्रन्थः बरोडापुस्तकसूच्यां (1969) दृश्यते। अस्याः कर्ता नृसिम्हाश्रमिशिष्यस्सच्चिदानन्दाश्रमीति ज्ञायते। यद्ययं नृसिम्हाश्रमी अद्वैतदीपिकाकारस्स्याचर्हि षोडशशतकीयोऽयमिति निर्णेतुं शक्यते॥

(ड) शङ्करानन्दकृता—ईशावास्यदीपिका

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये। एनमधिकृत्य विस्तरेण अद्वैताचार्यप्रकरणे पूर्वमेवोपपादितम्।

(ढ) सदानन्दकृतः— ईशावास्यचिन्तामणिः

अमुद्रितोऽयं ग्रन्थ उज्जैनसूच्यां (1947) दृश्यते। अस्य कर्ता सदानन्द इति ज्ञायते। कोऽयं सदानन्दः? किं काश्मीरी सदानन्दः? उत सदानन्दसरस्वती? आहोस्वित् सदानन्दव्यासवर इत्यत्र न किमपि प्रमाणमुपलभामहे॥



ऐतरेयोपनिषत्—

ऋग्ब्राह्मणान्तर्गतेयमुपनिषत्। अध्यायत्रिकरूपाया अस्या उपनिषदः खण्डषट्कं विद्यत इति कृत्वोपनिषदियम् आत्मषट्क मित्यपि प्रसिद्धा। अस्यामुपनिषदि त्रिष्वध्यायेषु सर्वशरीरस्य ब्रह्मणः जगत्सृष्ट्यादिवर्णनम्, बद्धस्य जीवात्मनो वैराग्योदयाय गर्भप्रवेशदुःखानुभवादिनिरूपणं, निश्श्रेयसावाप्त्यर्थं परमात्मोपासनञ्च प्रतिपाद्यते। अस्या रचनाकाल 600-500 B. C. इति विमर्शकाः। मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये। अस्या व्याख्याः—

1. शङ्कराचार्यकृतम्— ऐतरेयभाष्यम्

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये वाणीविलासमुद्रणालये च ।

(क) अभिनवनारायणेन्द्रकृता— भाष्यव्याख्या

अमुद्रितोऽयं ग्रन्थ मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 1475 MGOML) अडयारपुस्तकालये च लभ्यते ।

अस्याः कर्ता कैवल्येन्द्रसरस्वतीप्रशिष्यः ज्ञानेन्द्रसरस्वतीशिष्य अग्निहोत्रभट्टसतीर्थ्यः परमशिवेन्द्रसरस्वतीगुरुः षोडशसप्तदशशतकमध्यवासी 1550—1650 A.D. अभिनवनारायणेन्द्रसरस्वतीति विज्ञायते । अदसीया अन्येऽपि ग्रन्थास्तत्प्रकरणे वर्णिताः ॥

(ख) आनन्दगिरिकृता— भाष्यटिप्पणी

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये । ग्रन्थेऽस्मिन् (Page 28) विद्यारण्यकृता दीपिका निर्दिष्टा । विद्यारण्यश्चानन्दगिरेरर्वाचीन इति प्रसिद्धिः । तस्मात् न प्रसिद्धोऽयमानन्दगिरिरस्य कर्ता । परन्तु यः कोऽप्यन्य एव स्यात् । मुद्रितग्रन्थे शुद्धानन्दादिगुरुवन्दनापि न दृश्यते ॥

(ग) ज्ञानामृतयतिकृता— भाष्यटिप्पणी

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 332 MGOML) लभ्यते । ग्रन्थादस्मात् सायणाचार्यसामयिकोऽयमिति ज्ञायते । उत्तमामृत—आनन्दाख्ययोश्शिष्यः, सायणाचार्यसामयिकः नैष्कर्म्यसिद्धिव्याख्याविद्यासुरभिकर्ता चतुर्दशशतकीय (1350 A. D.) ज्ञानामृतयतिरिति श्रूयते ॥ नृसिम्हाश्रमकृता भाष्यव्याख्या चास्तीति श्रूयते । सीतानाथतर्कभूषणेन आधुनिकेन कृता 'शङ्करकृपा' नाम्नी व्याख्या च मुद्रिता ।

(घ) उपनिषद्ब्रह्मेन्द्रकृतम्— भाष्यविवरणम्

अमुद्रितोऽयं ग्रन्थ अडयारपुस्तकालये (36 F. 14 म 79 A.L.) लभ्यते अस्य कर्ता उपनिषद्ब्रह्मेन्द्रः वासुदेवेन्द्रशिष्यः अष्टादशशतकीय इति प्रतिपादितमन्यत्र ॥

2. भास्करानन्दकृता— ऐतरेयदीपिका (व्याख्या)

मुद्रितश्चायं ग्रन्थः भारतीजीवनमुद्रणालये वाराणस्याम् । अस्याः कर्ता एकोनविंशतिशतकीयः भास्करानन्दः पूर्वमुपपादितः ।


3. विद्यातीर्थकृता— ऐतरेयदीपिका

अमुद्रितोऽयं ग्रन्थः वेङ्कटेश्वरपुस्तकालये तत्सूच्याञ्च लक्ष्यते । अस्याः कर्ता रुद्रप्रश्नभाष्यकर्ता नृसिम्हतीर्थशिष्यः भारतीतीर्थविद्यारण्यगुरुः, कृष्णानन्दभारती - ब्रह्मानन्दभारती-विद्यारण्यानां प्रगुरुः, विद्याशङ्करशङ्करानन्द इत्यपरनामा त्रयोदशशतकीयः (1228-1333 A.D.) विद्यातीर्थ इति ज्ञायते । विद्यारण्यकृताया दीपिकाया इयं भिद्यते न वा इति न निश्चेतुं शक्यते ।

4. विद्यारण्यकृता— ऐतरेयदीपिका

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये । अस्य कर्ता विद्यारण्यः श्रीकण्ठाचार्यशङ्करानन्दभारतीतीर्थानां शिष्यः, विद्यातीर्थप्रशिष्यः, रामकृष्ण - कृष्णानन्दभारतीब्रह्मानन्दभारतीगुरुः पञ्चदश्यादिग्रन्थप्रणेता चतुर्दशशतकीयः (1300-1400 A.D.) इति ज्ञायते । ग्रन्थस्यास्य भाष्यमिति नाम सरस्वतीमहालयस्थे पुस्तके (1451 TSML) दृश्यते ।

5. शङ्करानन्दकृता— ऐतरेयदीपिका । ग्रन्थोऽयं शृङ्गगिरिसूच्यां दृश्यते ॥



काठकोपनिषत्—

नचिकेतोमृत्युसंवादरूपायामस्यामुपनिषदि प्रत्येकं वल्लीत्रितययुते अध्यायद्वितये सर्वमेधाख्ये यज्ञे दत्तसर्वस्वदक्षिणस्य वाजश्रवसनाम्नो महर्षेः पुत्रेण नचिकेतोनाम्ना निजनिर्बन्धादेव पित्रा मृत्यवे प्रदत्तेन मृत्युलोकमधिगम्य त्रिरो रात्रीरुपोषितवता मृत्युप्रसादादेव निजपितुरशान्तचित्तत्वं, नचिकेता इति स्वनामधेयोपेतस्याग्नेः ब्रह्मविद्याङ्गतया विज्ञानं सविस्तरं मृत्युनैवोपदिष्टं प्रत्यगात्मपरमात्मनोस्स्वरूपज्ञानं च इत्येतद्वरत्रितयं पुत्रपौत्रचिरायुस्सम्पत्यादिकं प्रत्याचक्षाणेन समधिगतमिति प्रतिपाद्यते । अस्या उपनिषदो रचनाकालः 500—400 BC इति विमर्शकाः । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये । अस्या व्याख्याः —

1. शङ्कराचार्यकृतम्— कठोपनिषद्भाष्यम्

सव्याख्योऽयं ग्रन्थः आनन्दाश्रममुद्रणालये मुद्रितः ।

(क) अच्युतकृष्णानन्दकृता— भाष्यटीका

अमुद्रितेयं काठकशाङ्करभाष्यटीका महीशूरहस्तलिखितपुस्तकालये (1278 ब 22 प My GML) लभ्यते ।

अस्याः कर्ता रामानन्दप्रशिष्यस्स्वयम्प्रकाशशिष्य अद्वैतानन्दसरस्वत्याश्च शिष्यः, तैत्तरीयव्याख्यावनमालाकारः सप्तदशाष्टादशशतकीय (1650—1750 A. D,) अच्युतकृष्णानन्द इति ज्ञायते ।

(ख) आनन्दगिरिकृता— भाष्यटीका । मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये ।

(ग) गोपालबालयतिकृतम्— कठवल्लीभाष्यविवरणम् । मुद्रिता चेयं व्याख्या आनन्दाश्रममुद्रणालये ॥

अस्याः कर्ता बालगोपालयतिरित्यपरनामा जगन्नाथाश्रमिशिष्यः, नृसिम्हाश्रमिसतीर्थ्यः, स्वयम्प्रकाशगुरुः, मनीषापञ्चकव्याख्यामधुमञ्जरीकारः षोडशशतकीयः 1500—1600 A.D. गोपालबालयतिरिति ज्ञायते ॥

(घ) शिवानन्दयतिकृता— कठभाष्यटिप्पणी

अमुद्रितोऽयं ग्रन्थ मद्रासराजकीयहस्तलिखितपुस्तकालये (R 3882 MGOML) लभ्यते । अस्य कर्ता रामनाथविदुष आचार्यः सप्तदश–अष्टादशशतकमध्यवर्ती 1650—1751 A.D. शिवानन्द इति पूर्वमुपपादितम् ।

(ङ) श्रीधरशास्त्रिपाठककृता— भाष्यव्याख्या–बालबोधिनी

मुद्रिताचेयं व्याख्या पूनानगरे । अस्याः कर्ता त्र्यम्बकशास्त्रिपुत्रः डेक्कान संस्कृतकलाशालाप्रधानाध्यापकः विंशतिशतकीयः 1850—1920 A.D. श्रीधरशास्त्रीति ज्ञायते ॥

2. अभिनवनारायणेन्द्रकृता— कठोपनिषद्व्याख्या

अमुद्रितोऽयं ग्रन्थ औधसूच्यां दृश्यते । अस्य कर्ता कैवल्येन्द्र ज्ञानेन्द्रयोश्शिष्य अग्निहोत्रभट्टसतीर्थ्यः षोडशशतकीयः 1550—1650 A.D. अभिनवनारायणेन्द्र इति ज्ञायते ।

3. उपनिषद्ब्रह्मेन्द्रकृता— कठवल्लीव्याख्या

मुद्रिताचेयं व्याख्या अडयारपुस्तकालये । अस्य कर्तारं उपनिषद्ब्रह्मेन्द्रमधिकृत्य पूर्वमेवोपपादितम् ॥

4. दिगम्बरानुचरकृता— कठवल्लीव्याख्या–अर्थप्रकाशिका

मुद्रिता चेयं व्याख्या आनन्दाश्र मुद्रणालये । अस्याः कर्ता एकनाथसामयिकः महाराष्ट्रीयसाधुर्दिगम्बरानुचर इत्येव ज्ञायते ।

5. नारायणगजपतिराजकृता— कठोपनिषद्व्याख्या–द्विमतप्रकाशिका

अमुद्रितोऽयं ग्रन्थः शाङ्करभाष्यानुसारिणीं व्याख्यां द्वयोर्मतयोरन्यतमाश्च स्वीकरोति । ग्रन्थोऽयं बरोड सूच्यां (10058 BRD) दृश्यते । अस्य कर्ता नारायवेङ्काम्बयोः पुत्रः जनदग्निगोत्रजः क्षत्रियः नारायणगजपतिराय इति परं ज्ञायते ॥


6. नारायणाश्रमिकृता— कठवल्लीदीपिका । मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये ।

7. भास्करानन्दसरस्वतीकृता— कठवल्लीव्याख्या

मुद्रितश्चायं ग्रन्थः भारतीजीवनमुद्रणाले वाराणस्याम् । भास्करानन्दश्च पूर्वमुपपादितः ॥

8. शङ्करानन्दकृता— कठवल्लीदीपिका

मुद्रितश्चायं ग्रन्थः आनन्दाश्रममुद्रणालये । शङ्करानन्दश्च उपपादितपूर्वः ।



केनोपनिषत्—

खण्डचतुष्टयेन विभक्तायामस्यां केनोपनिषदि प्रथमखण्डे मनःप्रभृतिकरण-प्रवृत्तेश्चेतनायत्तत्वेन तत्प्रवर्तकचेतनविशेषस्य परब्रह्मत्वमभिधीयते । द्वितीयखण्डे ब्रह्मणोऽपरिच्छिन्नत्वात् तस्य कात्स्न्येन विज्ञातुमशक्यत्वेन योग्यैकदेशज्ञानादेव इष्टावाप्तिरित्यभिधीयते । तृतीयखण्डे–परं ब्रह्म कार्त्स्न्येन ज्ञातुमशक्यमित्यस्मिन्नर्थे ब्रह्मानुप्रवेशलब्धासुरविजयानां स्वेषामेव जेतृत्वाभिमानवतां देवानां गर्वापनोदन-मुखेन स्वमाहात्म्यं यक्षरूपधरेण ब्रह्मणा प्रकाशितमित्याख्यायिकाभिधीयते । चतुर्थ-खण्डे यक्षरूपधरे ब्रह्मणि देवानामुपदेशाय हैमवतीं देवीमाकाशेऽवस्थाप्य अन्तर्हिते सति तया देव्या इन्द्रः, तस्माच्चान्येऽपि आधिदैवताध्यात्मरूपं उपास्यब्रह्मणो रूपमजानन् । अस्या रचनाकाल (500-400 B. C.) इति विमर्शशीलाः । मुद्रिता चेयमुपनिषत् सव्याख्याऽनन्दाश्रममुद्रणालये ॥

अस्या व्याख्या :—

(1) शङ्कराचार्यकृतम्— 1. पदभाष्यम्
2. वाक्यभाष्यम्

मुद्रितञ्चेदं भाष्यद्वयमानन्दाश्रममुद्रणालये । किमेतत् भाष्यद्वयमपि शङ्करा-चार्यकृतम् ? उत नेति विमृश्यते—

भाष्यद्वयस्यापि एककर्तृकत्वे अर्थैक्यं अभिप्रायसाम्यञ्चापेक्ष्यते । तत्तु नात्रो-पलभ्यते । वैलक्षण्यस्य दर्शनात् । वैलक्षण्यानि—

(क) पदभाष्ये "नाहं मन्ये सुवेदेति" 2–10 मन्त्रे अहमिति पाठं गृहीत्वा व्याख्यातम् । वाक्यभाष्ये तु अवधारणार्थक अह इति पाठं गृहीत्वा व्याख्यातम् । यद्युभयोर्भाष्ययोरेकः कर्ता स्यात्तर्हि मया पदभाष्येऽयं पाठो व्याख्यात इत्याद्युच्येत । न तथोक्तमिति कर्तुर्वैलक्षण्यं स्पष्टम् ।

(ख) पदभाष्ये 1-1 मन्त्रे "प्रेषित" इत्यस्यार्थः प्रेरितमिति वर्णितः । वाक्य-भाष्ये तु तस्यैव "प्रेषितमिव" इति पूर्वविलक्षणोपमार्थ उपवर्णितः ।

(ग) पदभाष्ये "श्रोत्रस्य श्रोत्रम्" 1-2 मन्त्रे श्रोत्रमाद्याः प्रथमास्सन्तीति साधितम् । वाक्यभाष्ये तु तत्रैव प्रथमाद्वितीयेति विभक्तिद्वयं साध्यते ।

(घ) 1-3 मन्त्रे, 2-9 मन्त्रे, च अवतरणिकाभेदस्सन्दृश्यते । 1-4 मन्त्रे पदवाक्यभाष्ययोरक्षरार्थसाम्येऽपि अभिप्रायभेदो दृश्यते । "भूतेषु भूतेषु विचित्य" 2-13 मन्त्रे विचित्येत्यस्य पदवाक्यभाष्ययोर्भिन्नार्थता च दृश्यते ।

एवमादिभिर्वैलक्षण्यदर्शनैः पदभाष्यवाक्यभाष्ययोर्निर्मातारौ भिन्नाविति प्रतीयते । एवं भिन्नकर्तृकत्वे सिद्धे कतरत् पूर्वम् किं पदभाष्यम् ? उत वाक्य-भाष्यम् ? इति विमर्शः कर्तव्यः ।

केनोपनिषदां पदभाष्यं भगवत्पूज्यपादानां आदिशङ्कराणां कृतिः । वाक्य-भाष्यन्तु तदनुयायिनां श्रीशङ्करपीठमधिष्ठितानां केषाञ्चिदाचार्याणामित्यस्माकं मतिः । तत्रेमानि कारणानि—

पदभाष्यापेक्षया वाक्यभाष्ये श्रुत्यन्तराणां प्रमाणार्थनिर्देशोऽल्पीयान् । यत्र तत्र पूर्वपक्षखण्डनेश्वरसिध्यादिर्लेखो भूयान् दृश्यते । आद्याचार्यो हि उन्मूलम-प्रासङ्गिकं उपनिषद्भाष्ये न कदापि लिखति । उपनिषदां बहूनि वाक्यानि आद्या-चार्याणां ग्रन्थे सम्भवन्ति । तस्मात् वाक्यभाष्यं आद्याचार्येतरकृतमिति भाति ।

"प्रतिबोधविदितम्" 2-22 इति मन्त्रे वाक्यभाष्ये प्रतिबोधमित्यस्यार्थत्रितयं वर्णितम्। तत्र द्वितीयव्याख्या सद्योमुक्तिं प्रत्याययति। सद्योमुक्तिश्च न शास्त्रीया। एतादृशमशास्त्रीयं मतमाद्याचार्याः कदापि न प्रतिपादयन्तीति वाक्यभाष्यमाद्याचार्येतरकृतम्। पदभाष्ये यथाक्रमं शब्दशो विवरणम्। वाक्यभाष्ये तु सुगमशब्दविशिष्टो मन्त्रो न व्याख्यायते। आद्याचार्याणां सर्वत्रेयं परिपाठी यत् ते यथाक्रमं सर्वान् शब्दान् निर्दिशन्ति, विशिष्टशब्दान् व्याख्यान्ति च।

वाक्यभाष्ये चतुर्थखण्डे षष्ठमन्त्रे "सेवन्ते स्म" इति पदं निरर्थकं प्रयुक्तम्। एवं निरर्थकशब्दप्रयोग आद्याचार्याणां ग्रन्थे न सङ्घटीति इदं तत्कृत न सम्भवति।

अत्र केचन साम्प्रदायिका इत्थं समादधते यत्—यथाऽन्यासामुपनिषदां मन्त्रान् विषयवाक्यत्वेन गृहीत्वा तेषां व्याख्यानं आचार्यैः सूत्रभाष्ये कृतं तथा केनोपनिषत्स्थमन्त्राणां न कृतम्। तत्रस्थानां मन्त्राणां विषयवाक्यत्वाभावात्। तेन पदभाष्यं कृत्वाऽपरितुष्यन्तो भगवत्पादा पुनर्वाक्यभाष्यमकुर्वन्निति। अतएव "पदशो व्याख्यायापि न तुतोष भगवान् भाष्यकार" इत्यानन्दज्ञानोक्तिसङ्गच्छत इति च। परं तन्न विचारसहम्। यतो यथा केनोपनिषत्स्थमन्त्राः न विषयवाक्यत्वेन सूत्रभाष्ये व्याख्याता तथा ईशावास्यमन्त्रा अपि विषयवाक्यत्वेन ब्रह्मसूत्रे न व्याख्याताः। ततश्च ईशावास्योपनिषदि भगवत्पूज्यपादैः भाष्यान्तरं कृतं स्यात्, तत्तु नोपलभ्यते। तेन पूर्वोक्तं समाधानं स्खलीयः। किञ्चैतत्समाधानं पूर्वोक्तवैलक्षण्यविवरणं न सहत इति तु अन्यदेतत्। तस्मात् पदभाष्यं प्राचीनं, वाक्यभाष्यं पश्चात्तनमिति सिध्यति।

अयं वाक्यभाष्यकृत् शङ्करानन्दात्प्राक्तनः। शङ्करानन्दो विद्यारण्यगुरुः। तेन शङ्करानन्दकालः त्रयोदशशतकं भवितुमर्हति। शङ्करानन्देन च "व्याकरिष्ये पदाध्वना" इति तत्कृतदीपिकायां कथ्यते। आनन्दगिरिणा तु ऐतरेयोपनिषद्भाष्यव्याख्यायां विद्यारण्यीयैतरेयोपनिषद्दीपिकास्थवाक्यस्य निर्देशात् शङ्करानन्दादर्वाचीनेन भाव्यम्। तस्मात् भाष्यद्वये व्याख्याकरणं सुसङ्गतमेव। 'अपरितुष्य" न्निति अवतरणिकाप्रदानमपि तन्मत्यनुसारं न विरुध्यते च।

तस्मात्—शाङ्करपीठाधिष्ठितेनान्येन केनचित् एकं भाष्यं केनोपनिषदि कृतम्। तस्य वाक्यभाष्यमिति सञ्ज्ञा कृता। परं कालवशात् अज्ञात्वा

तत्कर्तारं भाष्याव्याख्यायिभिरस्य वाक्यसंज्ञां दृष्ट्वा पूर्वभाष्यस्य पदसंज्ञा कृता भवेत् इति निश्चीयते॥

भाष्यव्याख्याः—

(क) अभिनवनारायणेन्द्रकृता— भाष्यटीका

अमुद्रितोऽयं ग्रन्थ औधसूच्यां XXI 26 दृश्यते। अभिनवनारायणेन्द्रः पूर्वमुपपादितः।

(ख) आनन्दगिरिकृता—भाष्यटिप्पणी। मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये। उपपादितपूर्वश्चायमानन्दगिरिः।

(ग) शिवानन्दयतिकृता— भाष्यटिप्पणी

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितग्रन्थागारे D 392 लभ्यते। सरस्वतीमहालयसूच्याञ्च दृश्यते। अस्य कर्ता शिवानन्दयतिः पूर्वमुपपादितः॥

(घ) श्रीधरशास्त्रिकृता— भाष्यव्याख्या बालबोधिनी

मुद्रितश्चायं ग्रन्थः पूनानगरे। अस्य कर्ता श्रीधरशास्त्री डेक्कानसंस्कृतकलाशालाप्रधानाध्यापकः त्र्यम्बकशास्त्रिपुत्रः विंशतिशतकीय इति पूर्वमुपपादितम्॥ आधुनिकेन सच्चिदानन्देन्द्रसरस्वत्या कृता काचन भाष्यव्याख्या मुद्रिता च विद्यते।

(2) उपनिषद्ब्रह्मेन्द्रकृतम्—केनोपनिषद्विवरणम्। मुद्रितश्चायं ग्रन्थ अड्यार पुस्तकालये। अस्य कर्ता उपनिषद्ब्रह्मेन्द्र पूर्वमुपपादितः।

3. कृष्णलीलाशुककृता— केनोपनिषद्व्याख्या, शङ्करहृदयङ्गमा

मुद्रितश्चायं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालयसंस्कृतग्रन्थमालायाम्। ग्रन्थेऽस्मिन् क्षीरस्वामी बुद्धः शङ्कराचार्यश्च निर्दिष्टाः।

अस्याः कर्ता कृष्णलीलाशुकः। अयमेव बिल्वमङ्गलाचार्य इति प्रसिद्धः। यद्येवमस्य पिता दामोदरः। माता नीलीनाम्नी। ईशानदेवशिष्योऽयं कृष्णलीलाशुकः केरलदेशवासी कोचिन्साम्राज्यवर्तिनि तिरुच्चूरन्तर्गते तेकमठे लब्धवासः

1220-1300 A.D. काले उवासेति प्राच्यभाषामहासम्मेलनपत्रिकाया: नवमे भागे दृश्यते।

यद्ययं कृष्णलीलाशुकः सरस्वतीकण्ठाभरणव्याख्यापुरुषकार - कृष्णलीलामृतादिकर्ता स्यात् तर्हि अस्य कालः द्वादशत्रयोदशशतकोत्तरार्धपूर्वार्धावधिक इति निर्णेतुं शक्यते। यतः पुरुषकारे हेमचन्द्र उद्धृतः। हेमचन्द्रकालस्तु 1166-1220 A.D.। पुरुषकारस्य पंक्तयः देवराजकृतायां निघण्टुटीकायां उद्धृताः। देवराजकालस्तु 1293-1343 A.D.। एवञ्च तयोर्मध्यपाती पुरुषकारकर्तायं कृष्णलीलाशुकः 1168-1293 A.D. काले आसीदिति निर्णेतुं शक्यते।

सीतारामजयराम जोशी तु कृष्णलीलाशुकं एकादशशतकीयं 1100 A.D. स्वीये संक्षिप्तसाहित्येतिहासे वदति।


श्रीचिह्ननामा कश्चन ग्रन्थः कृष्णलीलाशुकेन रचितः। तत्रायं श्लोकस्सन्दृश्यते। "श्रीपद्मपादमुनिवर्यविनेयवर्गश्रीभूषणं मुनिरसौ कविसार्वभौमः" इति। पश्चादस्मात् पद्मपादशिष्यः कृष्णलीलाशुक इति वक्तुं शक्यते। केनोपनिषद्व्याख्यायां (Page 10) दृश्यमाना "ब्रह्म भूयं गते पूर्वे शंकरे कृत्स्नवेदिनि। पूर्वे च तादृशे" इति श्लोकीया "पूर्वे च तादृशे" इति पंक्तिरपि पद्मपादाचार्यं निर्दिशतीव लक्ष्यते। एवञ्च वेदान्ते पद्मपादाचार्यशिष्योऽयं कृष्णलीलाशुकः नवमशतकीय इति सिध्यति। अत एव "इण्डियन् हिस्टारिकल रेव्यू" नामकपत्रिकायां सप्तमे भागे (I. H. R. VII Page 334) कृष्णलीलाशुकः नवमशतकीय इति प्रतिपादितम्। केचित्तु वङ्गदेशीयं वदन्ति।

4. नारायणाश्रमिकृता— केनोपनिषद्दीपिका

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये। बालकृष्णानन्दसरस्वत्या कृता काचन व्याख्या अमुद्रिता लन्दननगरकार्यालयपुस्तकालये विद्यते।

5. भास्करानन्दकृता—केनोपनिषद्व्याख्या। मुद्रितश्चायं ग्रन्थः भारतजीवनमुद्रणालये वाराणस्याम्।

6. शङ्करानन्दकृता—केनोपनिषद्दीपिका। मुद्रितश्चायमपि ग्रन्थ आनन्दाश्रममुद्रणालये॥



कैवल्योपनिषत्—

आश्वलायनपरमेष्ठिप्रश्नोत्तररूपायामस्यामुपनिषदि ब्रह्मज्ञानेनाविद्याविनाशः, सन्यासिनां प्रशंसना, सगुणनिर्गुणोपासनाक्रमश्च प्रतिपाद्यन्ते। मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये। अस्याः व्याख्याः—

1. उपनिषद्ब्रह्मेन्द्रकृतम्—कैवल्योपनिषद्विवरणम्। मुद्रितोऽयं ग्रन्थ अडयार पुस्तकालये।

2. नारायणाश्रमिकृता— कैवल्योपनिषद्दीपिका

श्रुतिमात्रोपजीविना नारायणाश्रमिणा कृतेयं दीपिका आनन्दाश्रममुद्रणालये मुद्रिता।

3. शङ्करानन्दकृता— कैवल्योपनिषद्दीपिका

शङ्करानन्दकृतत्वेन मुद्रितेयं दीपिका आनन्दाश्रममुद्रणालये। परन्तु बरोडा-अडयार-नासिकादिपुस्तकालयस्थेषु आदर्शपुस्तकेषु विद्यारण्यकृता इति ग्रन्थान्तपुष्पिकाया ज्ञायते॥ अस्या तैलनाम्नी व्याख्या (Mad: uni RAS. 12 C.) विद्यते।

4. सदाशिवब्रह्मेन्द्रसरस्वतीकृता— कैवल्योपनिषद्दीपिका

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यते (R 1492d MGOML)।

अस्याः कर्ता परमशिवेन्द्रसरस्वतीशिष्यः, ब्रह्मतत्त्वप्रकाशिका—आत्मविद्याविलासादिकारः, नल्लादीक्षितगुरुरष्टादशशतकीयः सदाशिवब्रह्मेन्द्रसरस्वतीति सूत्रवृत्तिप्रकरणे प्रकरणग्रन्थप्रस्तावे चोपपादितम् ॥

कौषीतक्युपनिषत्—

ऋक्शाखीयायामस्यामुपनिषदि फलसङ्गाद्यभिसन्धियुतानां धूमादिमार्गेण चन्द्रमसं प्राप्य पुनरावृत्तानां संसृतौ भ्रमणम्, विद्याकर्मविहीनानां कीटपतङ्गाद्यात्मना क्लेशानुभूतिः, गुर्वनुग्रहाधिगतविद्यानां ब्रह्मचारिगृहिप्रभृतीनां अर्चिरादिमार्गेण उत्तमां गतिं प्रपन्नानां ब्रह्मणस्सारूप्यमधिगतानां ब्रह्मालङ्कारपरिमण्डितानां परब्रह्मानुभवप्रकारः, इन्द्रप्रतर्दनाख्यायिकया स्वदेहभोगस्य प्रारब्धपरिक्षयैकपर्यवसायित्वकथनम्, प्राणोपासनाभिधानम्, अजातशत्रवाख्यायिकया आदित्य-चन्द्र-अग्नि-विद्युत्-स्तनयित्न्वादिषु उपासनासु विसंवादप्रदर्शनपूर्वकं परमात्मस्वरूपतद्विज्ञानादिप्रकाशनमित्येतत्सर्वं प्रतिपाद्यते। अस्या रचनाकालः 200-100 BC इति विमर्शकाः। मुद्रिता चेयमुपनिषत् सव्याख्याऽनन्दाश्रममुद्रणालये ॥ अस्या व्याख्याः—

1. उपनिषद्ब्रह्मेन्द्रकृतम्— कौषीतकिविवरणम्। अडयारपुस्तकालये मुद्रितोऽयं ग्रन्थः।

2. नागरनारायणकृता—ज्ञानमाला। रामेन्द्रसरस्वतीशिष्येण कृतेयं व्याख्या अमुद्रिता बरोडापुस्तकालये तत्सूच्यां (3327 BRD) च दृश्यते।

3. नारायणाश्रमिकृता—दीपिका

4. शङ्करानन्दकृता—दीपिका। मुद्रिते चेमे दीपिके आनन्दाश्रममुद्रणालये ॥

क्षुरिकोपनिषत्—

यजुश्शाखीयायामस्यामुपनिषदि स्वयम्भूपदिष्टं योगाभ्यसनक्रममनुष्ठातुर्जातवैराग्यस्य योगिनः प्राणायामपूर्वकनाडीभेदनद्वारा उत्तमलोकावाप्तिरभिधीयते ॥ मुद्रिता चेयमुपनिषदुपनिषदां समुच्चये आनन्दाश्रममुद्रणालये ॥ अस्या व्याख्या :—

1. उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम्। अडयार पुस्तकालये मुद्रितम्।
2. नारायणाश्रमिकृता— दीपिका। आनन्दाश्रममुद्रणालये मुद्रिता।
3. शङ्करानन्दकृता—दीपिका। आनन्दाश्रममुद्रणालये मुद्रिता।

गोपालतापिन्युपनिषत्—

इयमुपनिषदाथर्वणी पूर्वोत्तरभागद्वयेन विभक्ता दृश्यते। तत्र पूर्वभागे—मुनिब्राह्मणप्रश्नोत्तररूपेण मृत्योरपि भयजनकः परमो देवश्श्रीकृष्ण इति प्रतिपाद्य तदुपासनोपयोगिनस्संसारोत्तारकाः तद्देवताकाः केचिन्मन्त्रा आम्नाताः। उत्तरभागे श्रीकृष्णस्य नित्यब्रह्मचारित्वं दुर्वाससो मुनेर्दूर्वाशित्वं प्रतिपाद्य दुर्वाससा गान्धर्वीनाम्न्याः उपदेशव्याजेन श्रीकृष्णस्य परब्रह्मत्ववर्णनपूर्वकं तन्माहात्म्यमभिधाय सप्तपुरीमध्यगतब्रह्मगोपालपुरीवर्णनपूर्वकं श्रीभगवन्माहात्म्यं तदुपासनाप्रकारश्च प्रतिपाद्यन्ते। अस्या व्याख्याः—

1. उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम्। अडयारपुस्तकालये मुद्रितम्।
2. नारायणाश्रमिकृता—दीपिका (ASS 29)
3. विश्वेश्वरकृता—दीपिका

स्वयम्प्रकाशशिष्योऽयं विश्वेश्वर इति परं ज्ञायते। अमुद्रितोऽयं ग्रन्थस्सरस्वतीमहालये तत्सूच्यां (1174 DCTSML), बरोडापुस्तकालये तत्सूच्यां (234 DCBRD) च दृश्यते ॥

छान्दोग्योपनिषत्—

सामशाखीयायामस्यां छान्दोग्योपनिषदि प्रथमप्रपाठके त्रयोदशभिः खण्डैः उद्गीथस्यानेकधा उपासनानि, स्तोभाक्षरोपासनम्, तत्फलम्, सामादिज्ञानं तत्फलञ्च प्रतिपाद्यते। द्वितीयप्रपाठके चतुर्विंशतिखण्डैः—साम्नः पञ्चधा सप्तधा चोपासनम्, तत्फलञ्च कथ्यते। तृतीयप्रपाठके एकोनविंशतिखण्डैः आदित्योपासनम्, मधुविद्या, गायत्रीविद्या, शाण्डिल्यविद्या, तासां फलानि चाभिधीयन्ते। चतुर्थप्रपाठके सप्तदशखण्डैः विद्यादानश्रद्धणविचारः उपकोसलविचारः, ब्रह्मविदो गतिविचारश्च कृतः। पञ्चमप्रपाठके त्रयोविंशतिखण्डैः—प्राणस्य मुख्यत्वविचारः, पञ्चाग्निविद्या, सगुणब्रह्मविद्याफलं आख्यायिकामुखेन वैराग्योदयाय संसारगतिः,

वैश्वानरविद्या चाभिधीयते । षष्ठप्रपाठके षोडशभिः खण्डैराख्यायिकामुखेन ब्रह्मविद्या विचारिता । अनेकधा आत्मतत्त्वविचार उपदेशश्च कृतः । सप्तमप्रपाठके पञ्चदशभिः खण्डैः भूमविद्या प्रपञ्च्यते । अष्टमप्रपाठके पञ्चदशखण्डैर्दहरविद्या तत्फलं, प्रत्यगात्मविद्या तत्फलं च प्रकाश्यते । अस्या रचनाकालः 700 BC इति विमर्शकाः । सव्याख्येयमुपनिषन्मुद्रिता आनन्दाश्रममुद्रणालये । अस्या व्याख्याः—

1. द्रविडाचार्यकृतम्— छान्दोग्यभाष्यम्

2. ब्रह्मनन्दिकृतम् – छान्दोग्यवाक्यम्

इमौ द्वावपि ग्रन्थौ नोपलभ्येते, तथापि तत्र विभिन्नग्रन्थेषु उद्धरणात् तयोर्ग्रन्थयोस्सत्ता ऊह्यते । एतावधिकृत्य विस्तरेण प्रतिपादितं अद्वैताचार्यप्रकरणे ।

3. शङ्कराचार्यकृतम्— छान्दोग्यभाष्यम् (ASS 14)

(क) अभिनवनारायणेन्द्रकृता— भाष्यटीका । अमुद्रितोऽयं ग्रन्थ मद्रास-राजकीयहस्तलिखितपुस्तकालये (R 1662 MG OML) अडयारपुस्तकालये च लभ्यते ॥

(ख) आनन्दगिरिकृता— भाष्यव्याख्या (ASS 14)

4. उपनिषद्ब्रह्मेन्द्रकृतम् — छान्दोग्यऋजुविवरणम् । अडयारपुस्तकालये मुद्रितोऽयं ग्रन्थः ।

5. त्यागराजशास्त्रिकृतः— सद्विद्याविलासः सव्याख्यः

(राजुशास्त्रिकृत) (रसानुभूतिरिति नामान्तरं व्याख्यायाः)

छान्दोग्यषष्ठाध्यायसंग्रहात्मकः पद्यात्मकश्चायं ग्रन्थः भाष्यतद्व्याख्यानानुसारं विस्पष्टार्थप्रकाशकः चिदम्बरनगरे ग्रन्थाक्षरेषु मुद्रितः ।


अस्य कर्ता आधुनिकोऽयं प्रकाण्डविद्वान् न्यायेन्दुशेखरकर्ता मन्नार्गुडि राजुशास्त्रीति विख्यातः, त्यागराजपौत्रः, अप्पादीक्षितपुत्रः, भारद्वाजगोत्रजः, यज्ञस्वामिदीक्षितपिता, नारायणसरस्वती - रघुनाथशास्त्रि - गोपालशास्त्रिशिष्यः एकोनविंशतिशतकीयः (1815-1904 A. D.) त्यागराजदीक्षितः । अदसीया अन्ये ग्रन्था अन्यत्र प्रतिपादिताः ॥

6. नित्यानन्दाश्रमिकृता— मिताक्षरा

मुद्रिता चेयं मिताक्षरानाम्नी छान्दोग्यव्याख्या बम्बईसंस्कृतमुद्रणालये । क्वचिदादर्शपुस्तकेषु बरोडा–अडयारपुस्तकालयस्थेषु ग्रन्थस्यास्य "अर्थप्रकाशिका" इत्यपि नामान्तरं दृश्यते ।

अस्याः कर्ता पुरुषोत्तमाश्रमशिष्यः, नित्यानन्दाश्रमीति ज्ञायते । एनमधिकृत्य नाधिकं ज्ञातुं पार्यते । मुद्रितपुस्तकात् कालनिर्णययोग्यानि प्रमाणानि नोपलभ्यन्ते । परं तु उज्जयिनीपुस्तकालयस्थे 1373 संख्याके आदर्शपुस्तके 1746 संवत् इति दृश्यते । यदि स लेखककालस्स्यात् तर्हि सप्तदशशतकात् (1690 AD) पूर्वतन इति सिध्यति । यदि वा स एव ग्रन्थकर्तुः कालस्स्यात्तर्हि सुवर्णे सौगन्ध्यायितम् ।

7. शङ्करानन्दकृता—छान्दोग्यदीपिका । मुद्रिता चेयमानन्दाश्रममुद्रणालये ॥



जाबालोपनिषत्—

पैप्पलादिजाबालप्रश्नोत्तररूपायामस्यामुपनिषदि पशुपदार्थनिरूपणपूर्वकं पशुपतिशब्दार्थं प्रकाश्य विभूतिधारणात् ज्ञानं मोक्षसाधनं भवतीत्युक्त्वा तत्प्रसङ्गात् भस्ममहिमानमुपवर्ण्य भस्मधारणप्रकारञ्च प्रकाश्य भस्मधारणप्राशस्त्यं च प्रतिपादितम् । सामशाखीयेयमुपनिषदानन्दाश्रममुद्रणालये मुद्रिता । अस्या व्याख्या :—

1. नारायणाश्रमिकृता—जाबालोपनिषद्दीपिका

व्याख्यायामस्यां नारायणाश्रमस्य गुरुः "आनन्दात्मा" इति निर्दिष्टः । "आनन्दात्मानमध्यात्मगुरुं देवं नतोऽस्म्यहम्" Page 275 इति दृश्यते ।

श्रुतिमात्रोपजीविना नारायणाश्रमिणा रचितेयं दीपिका आनन्दाश्रममुद्रणालये मुद्रिता । अनेन बृहदारण्यकस्यापि दीपिका कृता इति जाबालोपनिषद्दीपिकाया Page 275 ज्ञायते । नारायणाश्रमी श्रीनाथपौत्रः भट्टरत्नाकरपुत्रः आनन्दगिरेरर्वाचीन आनन्दात्मशिष्य इति पूर्वमपि प्रतिपादितम् ।

2. वल्लभेन्द्रसरस्वतीकृता—जाबालोपनिषद्व्याख्या मोक्षलक्ष्मीविलासः

अमुद्रितोऽयं ग्रन्थः अडयारपुस्तकालये तत्सूच्यां (33 E 33 दे 152 AL) बरोडासूच्यां (1701 BRD) लन्दननगरस्थभारतकार्यालयपुस्तकालये तत्सूच्याञ्च (2433 DCIOL) दृश्यते । अस्य कर्ता वासुदेवेन्द्रशिष्यः काशीवासी वल्लभेन्द्रसरस्वती (1801 AD) कालात्प्राचीन इति ज्ञायते ।

3. शङ्करानन्दकृता दीपिका

अमुद्रितोऽयं ग्रन्थस्सरस्वतीमहालयसूच्यां (1484 DCTSML) दृश्यते । आनन्दाश्रमे मुद्रिता च ।

4. श्रीनिवासशास्त्रिकृतम्—जाबालोपनिषद्भाष्यम्

जाबालोपनिषद्दीपिकापरनामायं ग्रन्थः ब्रह्मविद्यामुद्रणालये चिदम्बरक्षेत्रे ग्रन्थलिप्यां मुद्रितः । अस्य कर्ता राजुशास्त्र्यपरनामकस्य त्यागराजशास्त्रिणः शिष्यः रामयज्वसीताम्बयोः पुत्रः कौण्डिन्यगोत्रजः द्रविडदेशवासी चोलदेशीयः एकोनविंशतिशतकवासी (1894 AD) श्रीनिवासशास्त्रीति ज्ञायते ॥

तैत्तरीयोपनिषत्—

तैत्तरीयोपनिषद्यस्यां संहित्याख्यायां शिक्षावल्ल्यां अङ्गभूतोपासनोपदेशपूर्वकं परविद्या प्रस्तूयते । आनन्दवल्ल्यां परमतत्त्वहितपुरुषार्थप्रतिपादनं दृश्यते । वारुण्याख्यायां भृगुवल्ल्यां तपोवधूतकल्मषमनसो ब्रह्मप्रतिपत्तिरित्यभिधीयते । अस्याः रचनाकाल (600-500 BC) इति विमर्शकाः । आनन्दाश्रममुद्रणालये मुद्रिताच । अस्या व्याख्याः—

1. शङ्कराचार्यकृतम्—तैत्तरीयभाष्यम् (ASS 12)

क. अच्युतकृष्णानन्दकृता—भाष्यव्याख्या वनमाला

वनमालाख्या तैत्तरीयशाङ्करभाष्यव्याख्याऽनन्दाश्रमे वाणीविलासमुद्रणालये च मुद्रिता । अस्याः कर्ता अद्वैतानन्दस्वयम्प्रकाशसरस्वतीशिष्यः रामानन्दप्रशिष्यः सिद्धान्तलेशसंग्रहव्याख्याकृष्णालङ्कारकर्ता सप्तदशशतकापरार्धवासी (1650–1750 AD) अच्युतकृष्णानन्दतीर्थः ।

(ख) अभिनवनारायणेन्द्रकृता—भाष्यटिप्पणी । अमुद्रितोऽयं ग्रन्थः महीशूरपुस्तकालये लभ्यते ।

(ग) आनन्दगिरिकृता— भाष्यटिप्पणी (ASS 12) ज्ञानामृतयतिकृतं व्याख्यानं आनन्दगिरिव्याख्यायाः अस्तीति ज्ञायते ।

(घ) सुरेश्वराचार्यकृतम्—तैत्तरीयभाष्यवार्तिकम्

शाङ्करतैत्तरीयकभाष्यस्य पद्यमयी वार्तिकाख्या व्याख्या आनन्दाश्रममुद्रणालये (ASS 13) वाराणस्याञ्च मुद्रिता । अस्याःकर्ता शङ्कराचार्यशिष्येषु अन्यतमः पद्मपादादिसतीर्थ्यः अष्टमशतकवासी (800 AD) सुरेश्वराचार्यः ।

पूर्वाश्रमे शोणानदीतीरवासी पञ्चगौडान्तर्गतः कुमारिलभट्टजामाता पूर्वकाण्डप्रवर्तकः मण्डनमिश्र इति ख्यातः विश्वरूप एव सन्यासस्वीकारादनन्तरं सुरेश्वर इति प्रसिद्ध इति साम्प्रदायिकाः वदन्ति ।

"जानोप् महाशयेन नैष्कर्म्यसिद्धिभूमिकायां मण्डनमिश्रसुरेश्वरविश्वरूपाणामैक्यं स्वीक्रियते । सप्तदशशतकीयेन बालकृष्णानन्दसरस्वत्या कृते शारीरकमीमांसाभाष्यवार्तिके मण्डनमिश्रसुरेश्वरविश्वरूपाणामैक्यमेवोपवर्णितम् । विद्यारण्यैर्विवरणप्रमेयसंग्रहे बृहदारण्यकभाष्यवार्तिकादुद्धरणं दत्तम् । तत्रापि विश्वरूपशब्देन सुरेश्वर एव निर्दिष्टः ॥

दासगुप्तस्तु सुरेश्वरविश्वरूपावभिन्नौ मण्डनमिश्रस्तु भिन्न इति (HIP Vol. II) वदति । हिरियण्णामहाशयस्तु (J. R. A. S. 1924) जर्नल आफ रायल आसियाटिक सोसाइटि पत्रिकायां सुरेश्वरः मण्डनादन्य इति प्रतिपादयति ।

कुप्पुस्वामिशास्त्रिणस्तु ब्रह्मसिद्धिभूमिकायां सुरेश्वरब्रह्मसिद्धिकारयोस्सिद्धान्तगतभेदमुपवर्ण्य ब्रह्मसिद्धिकारः सुरेश्वरादन्य इति प्रतिपादयन्ति ।

संक्षेपशारीरककर्ता सर्वज्ञात्मा सुरेश्वरशिष्य इति तु प्रसिद्धिः । सुरेश्वरश्च देवेश्वरशब्देन सर्वज्ञात्मना निर्दिष्ट इति तु पण्डितपरम्परागता वार्ता ।

श्रीकण्ठशास्त्री (I. H. Q. Val. XIV) एवं (J. O. R. 1937) पत्रिकायां नायं सर्वज्ञात्मगुरुस्सुरेश्वर इति प्रतिवादयति । देवेश्वरस्त्वन्य इति च प्रतिपादयति । चिन्तामणिमहोदयेन च अङ्गीक्रियते । निरूपितश्चैतदस्माभिर्विस्तरेण सर्वज्ञात्मप्रसङ्गे ।

श्रीकण्ठशास्त्रिणा प्रदर्शितायां शृङ्गगिरिगुरुपरम्परायां नित्यबोधघनाभिधः नित्यबोधाचार्य एव सुरेश्वरशिष्य इति निर्दिश्यते । नित्यबोधाचार्यकालश्च 773–848 इति च निर्दिश्यते । तस्मात् सर्वज्ञात्मन एव नित्यबोधाचार्य इति नामान्तरस्वीकारोऽपि सुष्ठु लगति ।

कुप्पुस्वामिशास्त्रिसिद्धान्तानुसारं, श्रीकण्ठशास्त्रिप्रदर्शितशृङ्गगिरिपरम्परानुसारश्च सुरेश्वरकालः सप्तमाष्टमशतकमिति (620–777 A. D.) इति सिध्यति ।

(A) आनन्दगिरिकृता — तैत्तरीयवार्तिकव्याख्या । (ASS. 13)

(B) लिङ्गनसोमयाजिकृतम् — कल्याणविवरणम्

शाङ्करभाष्यार्थप्रकाशकः वार्तिकमेवं सुलभं बोधयन् अयं ग्रन्थः शारदामुद्रणालये भटनविलीनगरे मुद्रितः ।

अस्य कर्ता श्रीरमणराज्यलक्ष्म्योः पुत्रः कल्याणानन्दभारतीशिष्यः आत्रेयगोत्रजः गुण्टूराख्यान्ध्रदेशवासी पञ्चदशीव्याख्याता विंशतिशतकीयः (1900-1950 A. D.) लिङ्गनसोमयाजीति ज्ञायते ॥

(C) विश्वानुभवकृता — तैत्तरीयभाष्यवार्तिकसङ्गतिः

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R 2929 M. G. O. M. L.) लभ्यते । अस्य कर्ता प्रत्यग्बोधभगवतशिष्यः विश्वानुभव इति परं ज्ञायते ॥

2. अद्वैतानन्दतीर्थकृता — तैत्तरीयदीपिका

"तैत्तरीयोपनिषत्तात्पर्यदीपिका" नाम्ना प्रसिद्धोऽयं ग्रन्थः ब्रह्मविद्यामुद्रणालये मुद्रितः । अस्य कर्ता दक्षिणदेशवासी सदानन्दतीर्थशिष्यः, पूर्वाश्रमे माध-

वसूरि-महालक्ष्म्योः पुत्रः हारीतगोत्रजः, आधुनिकोऽयं अद्वैतानन्द इति ज्ञायते । अदसीया ब्रह्मसूत्रवृत्तिरपि प्रतिपादिता ॥

3. उपनिषद्ब्रह्मेन्द्रकृतम् — तैत्तरीयविवरणम् । (A. L. S.)

4. तारकब्रह्माश्रमिकृतः — तैत्तरीयोपनिषत्सारसंग्रहः

अमुद्रितोऽयं ग्रन्थ अडयार पुस्तकालये लभ्यते । अस्य रचयिता दक्षिणदेशीयः रामचन्द्राश्रमिशिष्यः, कल्पतरुपरिमलसंग्रहकर्ता अष्टादशशतकीयः (1700-1800 A. D.) तारकब्रह्माश्रमीति ज्ञायते ॥

5. नारायणाश्रमिकृता — दीपिका । (ASS. 12)

6. बालकृष्णानन्दसरस्वतीकृतम् — तैत्तरीयविवरणम्

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R 383 M.G. O. M. L.) लभ्यते । अस्य कर्ता पद्ममयशारीरकमीमांसाभाष्यवार्तिककर्ता काञ्चीमण्डलान्तर्गतवेदपुरीवासी अभिनवद्रविडाचार्यबिरुदभूषितः, श्रीधरानन्दसरस्वत्याः प्राप्तदीक्षः, गौडब्रह्मानन्दसरस्वत्याशिष्यः, महादेवकैलासेशगुरुः सप्तदशशतकीयः (1600–1700 A. D.) बालकृष्णानन्दसरस्वतीति ज्ञायते ।

7. भास्करानन्दकृता — तैत्तरीयकव्याख्या । मुद्रितश्चायं ग्रन्थः भारतीजीवनमुद्रणालये वाराणस्याम् ॥

8. विज्ञानात्मकृता — तैत्तरीयकविवृतिः

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (R. 3208 M.G.O.M.L.) लभ्यते । अस्य कर्ता परमानन्दमस्करीत्यपरनामा ज्ञानोत्तमस्य शिष्यः चित्सुखाचार्यसतीर्थ्यः द्वादशशतकवासी (1100–1200 A. D.) विज्ञानात्मा इति ज्ञायते ॥

9. विद्यारण्यकृता — लघुदीपिका । अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (R. 1968 M.G.O.M.L.) बरोडासुच्याश्च लभ्यते । अस्य कर्ता विवरणप्रमेयसंग्रहकारः पञ्चदशीनिर्माता विद्यारण्यः ॥

(क) कृष्णानन्दश्रीरामशिष्यकृता — लघुदीपिकाटीका

विद्यारण्यकृतलघुदीपिकासारसंग्रहकारी ग्रन्थोऽयं अमुद्रितः सरस्वतीमहालये (1494 T. S. M. L.) मद्रासराजकीयपुस्तकालये (D. 515 M. G. O. M. L.) च लभ्यते ।


10. **वेङ्कटनाथकृता— तैत्तरीयकटीका।** ग्रन्थोऽयं वेङ्कटनाथकृतायां ब्रह्मानन्दगिरिनाम्न्यां भगवद्गीताव्याख्यायां (461 V. V. P. Edn.) ग्रन्थकारेणैव निर्दिष्टः ।

11. **शङ्करानन्दकृता—दीपिका।** (ASS. 12)

12. **सीतारामकृतम्—तैत्तरीयकव्याख्यानम् आगमामृतम्**

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 514 M.G.O.M.L.) लभ्यते । ग्रन्थोऽयं शिक्षावल्याः परं लभ्यते। अस्य कर्ता उत्तरमायूरक्षेत्रवासी कौण्डिन्यगोत्रजः वीरमाम्बागर्भजः अच्चासूरिपुत्रः शिष्यश्च सप्तदशशतकीयस्सीतारामशास्त्रीति ज्ञायते ॥

13. **अज्ञातकर्तृका—तैत्तरीयकव्याख्या** । ग्रन्थोऽयं मद्रासराजकीयहस्तलिखितपुस्तकालये D 508 M.G.O.M.L.) लभ्यते ॥



नारायणोपनिषत्—

अस्यामुपनिषदि भगवतो नारायणस्य सङ्कल्पात् प्राणेन्द्रियभूतानामुत्पत्तिः, तस्मादेव ब्रह्मरुद्रेन्द्रादीनां स्वस्वकार्येषु प्रवृत्त्यादिकञ्च ऋग्वेदशिरोधीतमभिहितम् । तथा यजुर्वेदशिरोधीतं नारायणस्य ब्रह्मशिवाद्यन्तर्यामित्वजगद्व्याप्त्यादिकम्, सामवेदशिरोधीतं नारायणाष्टक्षरमन्त्रस्वरूपतदध्ययनफलादिकं, अथर्वशिरोधीतं प्रणवोपासनाभ्यां दिव्यलोकगमनादिकं प्रतिपादितम् । यद्यपीयमुपनिषद्विशिष्टाद्वैतसिद्धान्तमूलमिति प्रथा वर्तते तथापि अद्वैतिभिरियमुपनिषदद्वैतसिद्धान्तप्रदर्शिनी व्याख्याता ॥

1. **उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम्** (ALS)

2. **नारायणाश्रमिकृता—दीपिका।** ग्रन्थो बरोडासूच्यां दृश्यते (11529 BRD)

3. **माधवाचार्यकृतम्—भाष्यम्** । सरस्वतीमहालये (1504 D.C.T.S.M.L.) दृश्यते ।

4. **विज्ञानात्मकृतम्—विवरणम्** । सरस्वतीमहालये तत्सूच्यां (1505 D.C.T. S. M. L.) दृश्यते ।

5. **शङ्करानन्दकृता—दीपिका ।** सरस्वतीमहालये तत्सूच्यां (1508 D.C. T.S.M.L.) बरोडासूच्याञ्च (98191 BRD) दृश्यते ॥

नृसिम्हतापनीयोपनिषत्—

पूर्वोत्तरभागद्वयेन विभक्तायामस्यामुपनिषदि पूर्वभागे श्रीनृसिम्हविद्यायाः साख्यायिकाप्रदर्शनमवतारणम्, सामसम्बन्धित्वेन पृथिव्यादिलोकानामुपासनम्, साङ्गसामोपासनम्, सामाङ्गदेवतानामग्न्यादिदेवतानामुपासनम्, आरूढयोगस्य नरकेसरिणः उपासनाकारविशेषादिनिरूपणपूर्वकं सामचतुष्टयोद्धारप्रकाशनम्, साख्यायिकमधिकारिविशेषणान्तरकथनम्, प्रणवचतुर्मात्राव्यूहोपासनम्, हृदयाद्यङ्गपञ्चकोपन्याससहितम्, पादाक्षरसंख्यापूर्वककृत्स्नमूलमन्त्राक्षरसंख्यानिरूपणम्, मूलमन्त्रगतपदोद्धारपूर्वकं तदर्थप्रकाशनम्, मूलमन्त्रजपोपयोगिशक्तिबीजादिनिरूपणम्, मूलमन्त्राङ्गमन्त्राणामुपदेशः, प्रणवसावित्रीमहालक्ष्मीनृसिम्हगायत्रीरूपाणां अङ्गमन्त्राणां व्याख्यानपूर्वकं द्वात्रिंशन्नृसिम्हव्यूहस्तुतिमन्त्राणां प्रदर्शनम्, नृसिम्हविद्याफलञ्च प्रतिपादितम् ।

उत्तरस्मिन् भागे प्रणवमहिमानुवर्णनपूर्वकं प्रणवोपासनाप्रकारं प्रकाश्य तन्मुखेन ब्रह्मणस्स्वरूपादिकं विस्तरेणोपपादितं दृश्यते ॥ मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये अडयार पुस्तकालये च ।

1. उपनिषद्ब्रह्मेन्द्रकृतम्— विवरणम् (ALS)

2. गौडपादमुनिकृतम्—नृसिम्हतापिनीभाष्यम्

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (D.581 D.582 MGOML) उज्जैनसूच्यां नासिकसूच्यां च दृश्यते । किमयं माण्डूक्यकारिकाकार उत अन्य इति न ज्ञायते । गौडपादमधिकृत्य माण्डूक्योपनिषत्प्रस्तावे उपपादयिष्यते ॥

3. नारायणाश्रमिकृता—दीपिका । अमुद्रितोऽयं ग्रन्थः बरोडासूच्यां (11490 BRD) लभ्यते ।

4. विद्यारण्यकृता—दीपिका । उत्तरतापिन्याः परं विद्यारण्यकृता दीपिका अमुद्रिता मद्रासराजकीयपुस्तकालये (R. 3615 MGOML), बरोडापुस्तकालये च लभ्यते । विद्यारण्यः उपपादितचरः ॥

5. शङ्कराचार्यकृतम्—नृसिम्हतापिनीभाष्यम्

ग्रन्थोऽयं मद्रासराजकीयपुस्तकालये (D. 581-583 MGOML) सरस्वती महालये (1509 DC. TSML) बरोडासूच्यां 269 च लभ्यते । शङ्कराचार्येण नृसिम्हतापनीयस्य व्याख्या कृता इत्यत्र माधवाचार्येण अथवा अभिनवकालिदासेन कृतं शङ्करदिग्विजयकाव्यमपि प्रमाणं भवति । ग्रन्थोऽयं आनन्दाश्रमे (ASS 30) मुद्रितः ।

6. शङ्करानन्दकृता च दीपिका विद्यते ।

प्रश्नोपनिषत्—

अस्यामुपनिषदि सृष्टिप्रकारः, प्राणस्य प्राधान्यम्, प्राणविद्योपासनम्, परविद्याविचारः, प्रणवोपासनम्, षोडशकलपुरुषविचारश्च विविच्य प्रतिपादिताः । अथर्ववेदीया इयमुपनिषत् । अस्या रचनाकाल (500–400 B. C.) इति विमर्शकाः । मुद्रिता चानन्दाश्रममुद्रणालये ।

1. शङ्कराचार्यकृतम्—प्रश्नोपनिषद्भाष्यम् (ASS 8) वाणीविलासमुद्रणालये आनन्दाश्रमे च मुद्रितम् ।

(क) अभिनवनारायणसरस्वतीकृता—भाष्यव्याख्या

अमुद्रितेयं व्याख्या मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 621 MGOML) अडयारपुस्तकालये बरोडासूच्यां च (6944 DCBRD) दृश्यते ।

(ख) आनन्दगिरिकृतम्—भाष्यटिप्पणम् ।

यद्यपि आनन्दगिरिकृता इति व्याख्येयमानन्दाश्रमे मुद्रिता तथापि आनन्दगिरेरर्वाचीनाया विद्यारण्यकृतदीपिकायास्तत्रोल्लेखात् नेयं प्रसिद्धानन्दगिरिकृता भवितुमर्हति । शुद्धानन्दादिगुरुस्मरणमपि न तत्र दृश्यते । मुद्रितग्रन्थस्य अन्तिमपुष्पिकायां विद्यमानः "कैवल्येन्द्रशिष्यज्ञानेन्द्रगुरुचरणसेविनारायणेन्द्रसरस्वतीविरचितं प्रश्नोपनिषद्भाष्यविवरणं समाप्तम्" इति पाठभेदोऽपि आनन्दगिरिकृतत्वे संशयमुत्पादयति ॥


(ग) शिवानन्दयतिकृतम्—भाष्यटिप्पणम् । अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 389) अडयारपुस्तकालये च लभ्यते ॥

(घ) अज्ञातकर्तृकम्—भाष्यटिप्पणम् । अमुद्रितोऽयं ग्रन्थः मद्रासपुस्तकालये (D. 620 MGOML) लभ्यते ।

2. उपनिषद्ब्रह्मेन्द्रकृतम्—प्रश्नोपनिषद्विवरणम् । (ALS)

3. नारायणाश्रमिकृता—दीपिका । (ASS 8)

4. शङ्करानन्दकृता—दीपिका । (ASS 8)



बृहदारण्यकोपनिषत्—

शुक्लयजुश्शाखान्तर्गतायां षडध्यायीपरिमितायां अस्यां उपनिषदि षड्भिर्ब्राह्मणैर्विभक्ते प्रथमेऽध्याये अश्वमेधीयाश्वस्य ब्रह्मदृष्ट्यौपयिकविश्वरूपत्वोत्कीर्तनम्, उद्गातरि मुख्यप्राणदृष्टिकथनम्, नारायणतदुपासनतत्प्राप्तीनां परमतत्त्वहितपुरुषार्थत्वकथनम्, मनुष्यादिसृष्टिकथनम् कृत्स्नब्रह्मोपासनाभिधानम्, सर्वविज्ञानप्रश्नोत्तराभिधानम्, आत्मलोकोपासनकथनम्, पांक्तयज्ञादिकथनम्, अविद्याकार्योपसंहार इत्येतत्सर्वं दृश्यते ।

ब्राह्मणषट्कपरिमिते द्वितीयेऽध्याये कार्यकरणात्मकमूर्तस्वरूपनिर्धारणं मूर्तामूर्तब्रह्मस्वरूपाभिधानम्, "आत्मैवेदं सर्व" मिति प्रतिज्ञातार्थनिर्वहणम्, विद्याप्रवर्तकाचार्यवंशकथनम् इतीमे विषयाः प्रतिपाद्यन्ते ।

नवभिर्ब्राह्मणैर्विभक्ते तृतीयेऽध्याये याज्ञवल्क्यमहिमानुवर्णनपूर्वकस्तेन सह कहोलगार्ग्युद्दालकशाकल्यादिसंवादः परिदृश्यते ।

ब्राह्मणषट्कपरिमिते चतुर्थाध्याये जनकं प्रति याज्ञवल्क्येन जीवस्वरूपदेहान्तरासिक्रमतदुपेयपरमफलतत्साधनादिकमभिहितं दृश्यते ।

पञ्चदशभिर्ब्राह्मणैर्विभक्ते पञ्चमाध्याये प्रणवोपासना सर्वोपास्त्यङ्गभूतशमदमादयः, ब्रह्मोपासनाङ्गं हृदयोपासनम्, विद्युदादिषु ब्रह्मदृष्ट्योपासनानि, ब्रह्मविदां गतिः, तपसःउपासनम्, अन्नप्राणयोर्ब्रह्मत्वेनोपासनम्, उक्थयजुस्सामदृष्ट्या प्राणोपासनानि, गायत्र्युपहितब्रह्मोपासनम्, आतिवाहिकादित्याग्न्योः प्रार्थनामन्त्राश्च अभिधीयन्ते ।

ब्राह्मणैः पञ्चभिरुपेते षष्ठेऽध्याये वाक्चक्षुःश्रोत्रमनोरेतआत्मकप्राणोपासनानि, वागादीनामुत्क्रमणप्रवेशक्रमः, प्रवहणनाम्ना राज्ञा गौतमाय पञ्चाग्निविद्योपदेशः, पञ्चाग्निविदां तदविदाञ्च गतिः, कर्मानुष्ठातुः सति दोषे प्रायश्चित्तानां कामनाविशेषेषु कर्तव्यानाञ्च विधिः ओदनपाककालजातकर्मनामकरणानि पुत्रवत्त्वप्रशंसा, एतद्विद्याप्रवचनवंशश्चाभिधीयन्ते ।

शुक्लयजुश्शाखीयशतपथब्राह्मणान्तर्गतमिदं उपनिषत्काण्डं बृहत्त्वात् आरण्यपाठ्यत्वात् ब्रह्मविद्याप्रतिपादकत्वाच्च बृहदारण्यकोपनिषदिति व्यपदिश्यते । अध्या-

यषट्कपरिमितमप्येतत् प्रथमद्वितीययोर्ब्रह्मप्रतिपादकत्वात् तृतीयस्याश्वमेधविषयकत्वेऽपि ब्रह्मदृष्टिविधिरूपतया ब्रह्मात्मकत्वप्रतिपादनपरतया च ब्रह्मसम्बन्धित्वेन तृतीयाध्यायप्रभृति अध्यायषट्कपरिमितमेव उपनिषदिति व्यवह्रियते ।

अस्या रचनाकालः (600 B.C.) इति विमर्शकाः । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालयेऽन्यत्र च । एतत्सम्बद्धाः व्याख्यानुव्याख्यारूपाः ग्रन्थाः—

1. शङ्कराचार्यकृतम्—बृहदारण्यकभाष्यम् (ASS 16)

(क) आनन्दगिरिकृता—भाष्यव्याख्या (ASS 16) व्याख्यायामस्यां भर्तृप्रपञ्चकृता बृहदारण्यकव्याख्या निर्दिष्टा या चाद्यावधि न लभ्यते ॥

(ख) महादेवेन्द्रसरस्वतीकृता—भाष्यतात्पर्यदीपिका ।

द्वितीयाध्यायचतुर्थब्राह्मणसारात्मकोऽयं ग्रन्थस्सरस्वतीमहालये (1539—1540 DC. TSML) लभ्यते । अस्य कर्ता गोपालबालयोगिप्रशिष्यः स्वयम्प्रकाशानन्दसरस्वत्याः सतीर्थ्यः सुदर्शनेन्द्रेत्यपरनामा महादेवसरस्वती षोडशसप्तदशशतकवासी (1600—1700 A.D.) इति ज्ञायते । एनमधिकृत्याधिकं प्रकरणग्रन्थनिरूपणावसरे प्रतिपादितम् ।

(ग) शिवानन्दयतिकृतम्—भाष्यटिप्पणम् । अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (R. 3882 MGOML) लभ्यते ।

(घ) सुरेश्वराचार्यकृतम्—बृहदारण्यकभाष्यवार्तिकम् । मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये (ASS 16) सव्याख्यः ।

(A) आनन्दगिरिकृता—भाष्यवार्तिकव्याख्या । (ASS 16) शास्त्रप्रकाशिकानामायं ग्रन्थः आनन्दाश्रमे (ASS 16) मुद्रितः । सुरेश्वरश्चोपपादितपूर्वः ।

(B) आनन्दपूर्णविद्यासागरकृता—भाष्यवार्तिकव्याख्या ।

न्यायकल्पलतिका नाम्नीयं व्याख्या अमुद्रिता मद्रासराजकीयपुस्तकालये (R. 5283 MGOML) बरोडासूच्याञ्च (8938 B.C. BRD) दृश्यते । अस्य कर्ता खण्डनखण्डखाद्यव्याख्याता श्वेतगिर्यभयानन्दशिष्यः, पुरुषोत्तमानन्दगुरुः विद्यासागरापरनामा आनन्दपूर्णश्चतुर्दशशतकीय इति ज्ञायते । तिरुपति केन्द्रीयविद्यापीठेन ग्रन्थस्यास्य भागद्वयं प्रकाशितम् । एनमधिकृत्याधिकमन्यत्र निरूपितम् ॥

(C) ज्ञानोत्तममिश्रकृता—भाष्यवार्तिकव्याख्या ।

ग्रन्थोऽयं दशमशतकीयेन ज्ञानोत्तममिश्रेण कृत इति दासगुप्तमहाशयेन (HIP. vol. II) निर्दिश्यते । परन्तु ग्रन्थस्य प्राप्तिस्थानं न लभ्यते ।

(D) नृसिम्हप्रज्ञकृतम्—भाष्यवार्तिकविवरणम् ।

न्यायतत्त्वविवरणमित्यपरनामायं ग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 3327 MGOML) अडयारपुस्तकालये अनन्तशयनपुस्तकालये शृङ्गगिरिमठसूच्यां वेङ्कटेश्वरपुस्तकालयसूच्याञ्च दृश्यते । अस्य कर्ता कुलशेखरपुरीशिष्यः नृसिम्हप्रज्ञ इति परं ज्ञायते ॥

(E) विश्वानुभवकृता—भाष्यवार्तिकसम्बन्धोक्तिः ।

अनादिरनन्तश्चायं ग्रन्थस्तृतीयाध्यायचतुर्थाध्याययोः परं अमुद्रितः मद्रासराजकीयपुस्तकालये (R. 4435 MGOML) अडयारपुस्तकालये च लभ्यते । अस्य कर्ता प्रत्यग्बोधशिष्यः विश्वानुभव इति परं ज्ञायते ॥

(F) विद्यारण्यकृतः—वार्तिकसारः । मुद्रितश्चायं ग्रन्थः वाराणसीग्रन्थमालायाम् । अस्य कर्ता प्रसिद्धः विद्यारण्यः पञ्चदश्यादिकर्ता ।

1. अज्ञातकर्तृका – वार्तिकसारव्याख्या । अमुद्रितोऽयं ग्रन्थः तिरुवनन्तपुरसूच्यां (397 TCD) दृश्यते ।

2. महेश्वरतीर्थकृतः—वार्तिकसारसंग्रहः ।

ग्रन्थोऽयं वारणसीसंस्कृतग्रन्थमालायां मुद्रितः । अस्य कर्ता चिदानन्दघनस्य विद्यारण्यस्य च शिष्यः महेश्वरतीर्थः । स्वग्रन्थे आनन्दगिरिं निर्दिशन्नयं ग्रन्थकारः विद्यारण्यशिष्यः चतुर्दशशतकीय (1350–1450 A.D.) इति निश्चेतुं अर्हते ॥

3. अज्ञातकर्तृका—वेदान्तोपनिषत् । वार्तिकसारात्मकोऽयं ग्रन्थः (7612 TSML) सरस्वतीमहालये लभ्यते ।

4. उपनिषद्ब्रह्मेन्द्रकृतम्—बृहदारण्यकविवरणम् । (ALS)

5. द्रविडाचार्यकृतम्—बृहदारण्यकभाष्यम् ।

भाष्यमिदं नोपलभ्यते । तथापि शङ्करात् पूर्वतनेन द्रविडाचार्येण कृतमिति भाष्यादिषु उद्धृतत्वात् ज्ञायते । एतच्च द्रविडाचार्यप्रकरणे प्रतिपादयिष्यते ।


6. नारायणाश्रमिकृता—दीपिका । यद्यपीयं दीपिका नोपलभ्यते तथापि जाबालोपनिषद्दीपिकायाः 275 तमे पुटे ग्रन्थकृतैव निर्दिष्टा ॥

7. नित्यानन्दाश्रमकृता—मिताक्षरा । (ASS 31)

8. वासुदेवब्रह्मकृता—प्रकाशिका । अमुद्रितोऽयं बरोडासूच्यां दृश्यते । अस्य कर्ता अनिरुद्धपुत्रः हृषीकेशशिष्यः वासुदेवब्रह्म एकोनविंशतिशतकीय (1800-1909 A.D.) इति ज्ञायते ।

9. विद्यारण्यकृता—बृहदारण्यकव्याख्या । ग्रन्थोऽयममुद्रितः नासिकसूच्यां दृश्यते ।

10. शङ्करानन्दकृता—दीपिका । ग्रन्थोऽयं सरस्वतीमहालयसूच्यां दृश्यते ॥



ब्रह्मविद्योपनिषत्—

अस्यामुपनिषदि प्रणवस्वरूपविवरणं कृतम् । प्रणवोपासनाप्रकारा अनेकविधा विद्याश्च प्रदर्शिताः । तासु हंसविद्याया मुख्यत्वं प्रदर्शितम् । निष्कलसकल-

भावविवेचनं ज्ञानमाहात्म्यप्रदर्शनञ्चावधेयार्हविषयाः । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये (ASS 29) ।

1. उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम् । (ALS)
2. नारायणाश्रमिकृता—दीपिका । (ASS 29)
3. शङ्करानन्दकृता—दीपिका । (ASS 29)

ब्रह्मोपनिषत्—

अस्यामुपनिषदि आत्माभिव्यक्तिस्थानानि ब्रह्मस्वरूपं, ब्रह्मोपासनाक्रमः, तेषां फलञ्च प्रतिपादितम् । याजुषीयमुपनिषदानन्दाश्रमे मुद्रिता (ASS 29) ।

1. उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम् । (ALS)
2. नारायणाश्रमिकृता—दीपिका । (ASS 29)
3. शङ्करानन्दकृता—दीपिका । (ASS 29)

महोपनिषत्—

अध्यायषट्कपरिच्छिन्नायामस्यामुपनिषदि सृष्ट्यादौ ब्रह्म निर्दिश्य तस्मात् सृष्टिक्रमः, पञ्चविंशतितत्त्वोत्पत्तिः, नारायणात् रुद्रादीनामुत्पत्तिः, नारायणस्य सर्वात्मकत्वप्रतिपादनं, शुकजनकसंवादमुखेन ब्रह्मविद्याप्रशंसापूर्वकं शुकस्योत्तमां गतिमभिधाय, निदाघऋभुसंवादेन चिदचित्स्वरूपं प्रकाश्य जीवन्मुक्तत्वस्वरूपप्रकाशनपूर्वकं वैराग्यं प्रशस्य ब्रह्मज्ञानतत्प्राप्तिप्रकारं च निरूप्य एतत्पाठकस्य फलञ्चाभिहितम् ।

1. उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम् । (ALS)
2. नारायणाश्रमिकृता—दीपिका । (ASS 29)
3. शङ्करानन्दकृता—दीपिका । (ASS 29)

माण्डूक्योपनिषत्—

नवधाथर्वण इति व्याकरणमहाभाष्यवाक्यात् अथर्वणवेदः नवशाखात्मकः । तस्यान्यतमा शाखा माण्डूक्यशाखा । दुर्दैवपरिपाकात् तस्यास्संहिताभागः, ब्राह्मणभागो वा साम्प्रतं नोपलभ्यते । केवलं द्वादशमन्त्रात्मकं उपनिषन्मात्रं उपलभ्यते । तच्च माण्डूक्योपनिषदिति व्यवह्रियते ।

मण्डूको नाम मन्त्रद्रष्टा कश्चित् ऋषिः । मण्डूकस्य गोत्रापत्यं माण्डूकः । स एव माण्डूक्यः । माण्डूक्यस्य ऋषिपरत्वे प्रमाणन्तु बृहदारण्यकवंशब्राह्मणम् । तत्र हि 6·5-2 "जायन्तीपुत्रो माण्डूकायनिपुत्रात्, माण्डूकायनिपुत्रो माण्डूकीपुत्रात्, माण्डूकीपुत्रो शाण्डिलीपुत्रात" इति दृश्यते । तेन प्रोक्ता उपनिषत् माण्डूक्योपनिषत् । अस्या उपनिषदः प्रशंसा मुक्तिकोपनिषदि 1-26, 29 मन्त्रैः कृता । अस्या उपनिषदः द्वादश मन्त्राः । एषु सप्त मन्त्राः नृसिम्हतापिन्युपनिषदि रामतापिन्युपनिषदि च दृश्यन्ते । तथा च तयोरुपनिषदोरर्वाचीनत्वं ज्ञायते । अत एव नृसिम्हतापनीयोपनिषदोऽपि गौडपादेन व्याख्या कृता इत्युक्तिरम्शतस्सत्यतामुपैति ।

अस्या उपनिषदः प्रथमे मन्त्रे चित्तशुद्धये उपास्यस्य प्रणवस्य सर्वात्मकता प्रदर्शिता । द्वितीये मन्त्रे ब्रह्मणश्शुद्धचिद्रूपस्य सर्वात्मकता वर्णिता । सा च ब्रह्मणस्सर्वात्मकता दुग्धदधिवत्त परिणामवादमाश्रित्य, निरवयवे कूटस्थब्रह्मणि तदभावात्, किन्तु रज्जुसर्पवत् विवर्तवादमाश्रित्य । अन्ते आत्मनश्चतुष्पात्त्वं प्रतिज्ञातम् । ततश्चतुर्भिः 3, 4, 5, 6 मन्त्रैः "अध्यारोपापवादाभ्यां निष्प्रपञ्च आत्मा प्रपञ्च्यते" इति रीत्या विश्ववैश्वानरयोस्तैजसहिरण्यगर्भयोः प्राज्ञाव्याकृतयोर्व्यष्टिसमष्टिरूपयोस्तुरीये चिद्रूपे आरोपः कृतः । सप्तमेन नान्तःप्रज्ञमिति मन्त्रेण विश्वादीनामपवादेन तुरीयोऽवशेषितः ।

ये तु विशुद्धचित्ता उत्तमाधिकारिणस्तेषां कृते नान्तःप्रज्ञमित्यादि मुख्योपदेशः । ये तु मध्यमाधिकारिणस्तेषां चित्तशुद्धये क्रममुक्तये च प्रणवमात्राणां अकार-उकार-मकार-तुरीयाणां आत्मनो ब्रह्मणः पादैः विश्वतैजसप्राज्ञतुरीयैः व्यष्टिभिः समष्टिभिश्च वैश्वानरहिरण्यगर्भईश्वरतुरीयैरभेदभावना 8, 9, 10, 11 मन्त्रैरुपदिष्टा । द्वादशेन मन्त्रेण प्रणवोपासनाफलमुक्तम् ।

उपनिषदां औपनिषदानाञ्च ऋषीणामनादिः काल इति सम्प्रदायः । परन्तु पाश्चात्यानां विमर्शकानां मत माण्डूक्योपनिषदां कालः (200—100 B.C.) इति प्रतिपादयति । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालयेऽन्यत्र च ।

अस्या व्याख्या एतत्सम्बद्धाः कृतयश्च—

1. गौडपादाचार्यकृता—माण्डूक्यकारिका । (ASS 10)

गौडपादकारिकाभिधेऽस्मिन् माण्डूक्योपनिषदां व्याख्यात्मके पद्यबद्धे ग्रन्थे चत्वारि प्रकरणानि सन्ति। तत्र प्रथमे भागे आगमाख्ये एकोनत्रिंशत् द्वितीये वैतथ्याख्ये अष्टत्रिंशत्, तृतीये अद्वैताख्ये अष्टाचत्वारिंशत्, चतुर्थे अलातशान्तिप्रकरणे शतमिति संहत्या 215 कारिकास्सन्ति। मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये (ASS 10)

आगमप्रकरणम्—इदमागमप्रकरणं माण्डूक्योपनिषदां भावार्थरूपम्। आगममूलकत्वादन्वर्थं नाम। प्रकरणेऽस्मिन् अकार-उकारमकारैः प्रतिपादितेभ्यः वैश्वानर-हिरण्यगर्भ-ईश्वरेभ्यः जाग्रत्-स्वप्न-सुषुप्ति-अवस्थाभ्यश्च भिन्नं तदनुगतं साक्षिरूपञ्च परमात्मतत्वं तुरीय इति नाम्ना वर्णितम्।

वैतथ्यप्रकरणम्—

द्वितीयेऽस्मिन् वैतथ्याख्ये प्रकरणे दृश्यप्रपञ्चस्य मायामयत्वं, मिथ्यात्वञ्च सयुक्तिकं साधितम्। आत्मा एक एव नित्यः, तस्मिन् विविधकल्पनावशात् प्रपञ्चस्योत्पत्तिरिव विकल्पो भवति। अस्य मूलकारणं माया। मायाकल्पितजगतः गन्धर्वनगरवत् असत्यत्वमिति प्रतिपाद्य "न निरोधो न चोत्पत्ति" रित्यादिना अखण्डचिद्घनानन्दात्मतत्वादन्यस्य असत्वं साधितम्।

अद्वैतप्रकरणम्—

तृतीयेऽस्मिन् प्रकरणे अनेकाभिस्सुदृढाभिर्युक्तिभिः अद्वैततत्वं साधितम्। आत्मनि सुखदुःखभावना नितरामसङ्गता यथा बालाः धूलिधूमादिसंसर्गेण आकाशं मलिनमामनन्ति वस्तुतः यथा चाकाशो मालिन्यशून्यः तथैवात्मनोऽपि सुखित्वदुःखित्वकथनं बालबुद्धिविलासतुल्यमिति प्रतिपादितम्। असङ्गोह्यात्मा। माया हि द्वैतकल्पनायाः कारणम्। अमृतस्य मर्त्यत्वं मर्त्यस्यामृतत्वञ्चासङ्गतम्। अत अमृतस्यात्मनो यद्युत्पत्तिस्स्वीक्रियते तर्हि मर्त्यत्वधर्मं आपद्येत इति आत्मनः उत्पत्तिः-जातिः नास्तीति प्रतिपादितम्। अयमेव गौडपादाचार्याणामजातिवादः। सोऽयं वादः

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः॥ 2-31.

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थता॥ 2-32.

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं सर्वमद्वैतं परमार्थतः॥ 1-17.

न किञ्चिज्जायते जीवसम्भवोऽस्य न विद्यते।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते॥ 3-4.

इत्यादिषु तत्र तत्र प्रतिपादितः।

अयमजातिवादः गौडपादात्प्राचीनस्य बौद्धाचार्यस्य दिङ्नागस्य माध्यमिकवृत्तौ, एवं दिङ्नागात् प्राचीनेषु पालीभाषाप्रणीतबौद्धग्रन्थेषु दर्शनात् ततो गृहीत इति विधुशेखरभट्टाचार्याः प्रवदन्ति। पालीभाषाया अपि प्राचीनेषु उपनिषद्ग्रन्थेषु "अजायमानो बहुधा व्यजायत" इत्यादिदर्शनात्, "नासतो विद्यते भाव" इति गीतायाञ्च दर्शनात् पूर्वोक्तोक्त्यनुपपत्तौ भारतीयसंस्कृतिभक्ताः प्रमाणम्।

अलातशान्तिप्रकरणम्—

चतुर्थेऽलातशान्त्याख्ये प्रकरणे "अलाते भ्रामिते सति यथा गोलाकार प्रतीतिर्जायते परन्तु सा गोलाकृतिः भ्रमणजन्यैव, न वस्तुतः, एवं जगदादि मायाकल्पितमेव। मनसः व्यापारादेवोत्पत्तिस्तस्य मनसो निरोधे च स नास्त्येवेति। यथा च भ्रमणादिक्रियाशान्तौ गोलाकारकालातप्रतीतिशान्तिः, एवं मनस अमनीभावात् जगतश्शान्तिः। जगदुत्पत्तिलयौ प्रतीत्यप्रतीती उभेऽपि भ्रान्तिजनिते। परमार्थतः परमात्मतत्वं पारमार्थिकमिति प्रतिपादितम्।

अद्वैतवेदान्तस्य प्राणभूता अनिर्वचनीयख्यातिरपि प्रकरणेऽस्मिन्नेव—

विपर्यासात् यथा जाग्रत् अचिन्त्यात् भूतवत् सृजेत्।
तथा स्वप्ने विपर्यासात् धर्मान् तत्रैव पश्यति॥ 4-41.

न निर्गतास्ते विज्ञानात् द्रव्यत्वाभावयोगतः।
कार्यकारणताभावात् यतोऽचिन्त्यास्सदैव ते॥ 4-52.

उभे ह्यन्योन्यं दृश्येते किं तदस्तीति नोच्यते।
लक्षणाशून्यमुभयं तन्मतेनैव गृह्यते॥ 4-67.

इत्यादिभिः कारिकाभिः प्रदर्शिता।

प्रकरणस्यास्य भाषा "विज्ञप्ति" रित्यादिपारिभाषिकशब्दैः पूर्णा । ते च शब्दाः बुद्धग्रन्थेषु दृश्यन्त इति बुद्धमतमेव गौडपादः वेदान्तापदेशेन प्रतिपादयतीति, बुद्धप्रभावः गौडपादे दृश्यत इति, प्रच्छन्नबौद्धा अद्वैतिन इति च केचिद्वदन्ति ।

परन्तु शब्दसाम्यं नात्र प्रमाणमकिञ्चित्करञ्च । यतः–अध्यात्मशास्त्रस्य पारिभाषिकशब्दाः न केवलं बौद्धानां स्वम् । परन्तु ते सर्वदर्शनसामान्याः । तेषां प्रयोगे यथा गौडपादस्य तथा बौद्धानाम् यथा बौद्धानां तथा गौडपादस्यापीति समानस्वातन्त्र्यादिसत्वात् तादृशी युक्तिरसङ्गतैव ।

अस्याः कारिकायाः कर्ता गौडपादाचार्यः शुकमुनीन्द्रशिष्य इति वेदान्तसम्प्रदायप्रतिपादकात् "नारायणं पद्मभुवं वसिष्ठ" मितित्यादिश्लोकात् ज्ञायते । एवं नृसिम्हतापनीयोपनिषदां गौडपादकृते व्याख्याने (D. 581, 582 MGOML) दृश्यते । श्वेताश्वतरोपनिषदां शाङ्करे भाष्ये तथा च शुकशिष्यो गौडपादाचार्यः" (Page 30 ASS Edn 17) दृश्यते । लक्ष्मणशास्त्रिकृते गुरुवंशकाव्येऽपि (Page 12) दृश्यते ॥

गौडपादस्य स्थानं नाद्यापि निश्चितम् । विषयेऽस्मिन् विचाराः भिन्ना एव दृश्यन्त । परन्तु माण्डूक्यकारिकाशाङ्करभाष्यव्याख्याने आनन्दगिरीये अलातशान्तिप्रकरणस्य "तं वन्दे द्विपदां वरम्" इति पद्यांशस्य व्याख्याने एवं दृश्यते —

"आचार्यो हि पुरा बदरिकाश्रमे नरनारायणाधिष्ठिते नारायणं भगवन्तमभिप्रेत्य तपो महदतप्यत" (Page 157 ASS Edn) इति । एवञ्च बदरिकाश्रम एव गौडपादस्य स्थानमिति ज्ञायते ।

सप्तशतशतकीयेन बालकृष्णानन्दसरस्वत्या स्वीये शारीरकमीमांसाभाष्यवार्तिके—

"गौडचरणाः कुरुक्षेत्रगताः हीरावतीनदीतीरभवगौडजातिश्रेष्ठा देशविशेषभवनाम्नैव प्रसिद्धाः द्वापरयुगमारभ्यैव समाधिनिष्ठत्वेन आधुनिकैर्जनैरपरिज्ञातविशेषाभिधानाः सामान्यनाम्नैव लोकविख्याता" इति प्रतिपादितम् (ASI. Page 6) । एवञ्च गौडपादः कुरुक्षेत्रवासी गौडजात्युत्पन्न इति गौडपादीयनामान्तरापरि-

ज्ञाने च कारणं सूचितम्, केचित्तु गौडपादं बंगालदेशानां उत्तरभागवर्तिगौडदेशोद्भवमामनन्ति ।

भारतीयाद्वैतवेदान्तपरम्पराप्रामाण्यात् गौडपादश्शुकशिष्यः, शङ्करश्च गौडपादशिष्यः गौडपादेनानुगृहीतश्चेति शङ्करात्पूर्वतनो वा शङ्करकालपर्यन्तजीवीति वा निश्चीयते । यदि वयं कुप्पुस्वामिशास्त्रिणां सिद्धान्तमनुसृत्य (632-664 A.D.) कालवर्तिनं शङ्कराचार्यमभ्युपगच्छामस्तर्हि गौडपादकाल (520-620 A.D.) इति, इच्छामात्रशरीरत्यागिनां गौडपादानां कालश्शङ्कराचार्यानुग्रहपर्यन्तमिति वा स्वीकर्तव्यम् ।

विधुशेखरभट्टाचार्यास्तु–आगमशास्त्रस्य भूमिकायां द्वितीयशतकादारब्धानां चतुर्थशतकपर्यन्तानां बौद्धपण्डितानां ग्रन्थस्य गौडपादकारिकायाश्च शब्दसाम्यदर्शनात् गौडपादस्तदर्वाग्भव इति गौडपादः पञ्चमशतकीय (500 A.D.) इति प्रतिपादयन्ति ।

गौडपादस्यातिप्राचीनत्वेन प्रसिद्धेः, गौडपादकारिकास्था एव शब्दाः द्वितीयशतकादारब्धचतुर्थशतकान्तकालवर्तिभिः बौद्धपण्डितैस्स्वीकृताः, बौद्धैरेव गौडपादोऽनुसृतः, न तु गौडपादेन बौद्धपण्डिता इति च सम्प्रदायविदां सिद्धान्तः । गौडपादकारिकायाः व्याख्याः—

(क) शङ्कराचार्यकृतम्—माण्डूक्यकारिकाभाष्यम् (ASS. 10)

1. अनुभूतिस्वरूपाचार्यकृतम्—गौडपादीयभाष्यटिप्पणम् ।

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (R. 2911 MGOML) अडयारपुस्तकालये च लभ्यते । अस्य कर्तारं अनुभूतिस्वरूपाचार्यं अधिकृत्य प्रकटार्थविवरणस्थले उपपादयिष्यते ।

2. आनन्दगिरिकृता—माण्डूक्यकारिकाभाष्यव्याख्या । मुद्रितश्चायं ग्रन्थस्समूल आनन्दाश्रममुद्रणालये (ASS 10) । शुद्धानन्दकृता शाङ्कर कारिकाभाष्यस्य व्याख्या चास्तीति श्रूयते ।

(ख) स्वयम्प्रकाशयोगिकृता—मिताक्षरा (BSS 48)

गौडपादीयकारिकाव्याख्यात्मकोऽयं ग्रन्थः वाराणसीसंस्कृतग्रन्थमालायां मुद्रितः । अस्य कर्ता स्वयम्प्रकाशयोगी यदि तत्त्वानुसन्धानव्याख्याता स्यात्तर्हि तस्य

कालः (1700-1900 A. D.) समयान्तर्गतो भवति । नान्यदत्र प्रमाणं दृश्यते ॥

(ग) स्वामियतिकृता—मिताक्षरा ।

माण्डूक्यकारिकाव्याख्यात्मकोऽयं ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः । अस्य कर्ता स्वामियतिर्विरूपाक्षपुत्रः धारणकोटिकुलोत्पन्नः ब्रह्मानन्दशिष्यः रसरामशैलशशिगे शकवत्सरे 1736 शक (1813 A. D.) स्वग्रन्थं चकारेति ज्ञायते ॥

(घ) उपनिषद्ब्रह्मेन्द्रकृता—कारिकाव्याख्या । अमुद्रितोऽयं ग्रन्थ अडयारपुस्तकालये लभ्यते ॥

(ङ) अज्ञातकर्तृकः—गौडपादीयविवेकः । अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (R. 3882 MGOML) लभ्यते । माण्डूक्योपनिषद्भाष्यादि—

2. शङ्कराचार्यकृतम्—माण्डूक्योपनिषद्भाष्यम् ।

(क) आनन्दगिरिकृता—माण्डूक्यभाष्यव्याख्या । उभावपीमौ ग्रन्थौ आनन्दाश्रमे मुद्रितौ । (ASS 10)

(ख) मधुरानाथशुक्लकृता—माण्डूक्यभाष्यव्याख्या । ग्रन्थोऽयं दासगुप्तमहाशयेन (H. I. P. Vol. II Page 78) निर्दिष्टः ।

(ग) अज्ञातकर्तृका—पदार्थविवृतिः । माण्डूक्यभाष्यव्याख्यात्मकोऽयममुद्रितः ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 17021 MGOML) लभ्यते ।

(घ) राघवानन्दकृतः—माण्डूक्यभाष्यार्थसंग्रहः ।


ग्रन्थोऽयं दासगुप्तमहाशयेन (H. I. P. Vol. II Page 78) निर्दिष्टः । अस्य कर्ता विश्वेश्वरसरस्वतीप्रशिष्यः अद्वयभगवत्पादशिष्यः राघवानन्द इति ज्ञायते ।

3. उपनिषद्ब्रह्मेन्द्रकृतम्—माण्डूक्यविवरणम् । (ALS)

4. नारायणाश्रमिकृता—दीपिका । अमुद्रितोऽयं ग्रन्थ अडयारपुस्तकालये सरस्वतीमहालये (1556 TSML) च लभ्यते ।

5. भास्करानन्दकृता—माण्डूक्यव्याख्या ।

6. शङ्करानन्दकृता—दीपिका । (1552 TSML) मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 707 MGOML) बरोडापुस्तकालये च लभ्यते ॥



मुण्डकोपनिषत्—

अथर्वशाखान्तर्गतायां प्रत्येकं खण्डद्वितययुतमुण्डकाख्यप्रकरणत्रितयविभक्तायामस्यां उपनिषदि ब्रह्मविद्योपदेशपरम्पराप्रदर्शनपूर्वकं ब्रह्मज्ञानसाधनभूतपरापरविद्यास्वरूपादिकमभिधाय परविद्यावेद्यब्रह्मणः स्वरूपं प्रकाश्य तस्मादेव जगतस्संग्रहेण प्रादुर्भावमुपवर्ण्य मुमुक्षुमुमुक्षुकर्तव्यानि च संगृह्य ब्रह्मणो जगत्सृष्टिं विस्तरतः प्रतिपाद्य प्रणवाख्यशरेण ब्रह्मात्मकलक्ष्यभेदनप्रकारमुक्त्वा प्राप्यस्वरूपतःप्राप्तिप्रकारतत्साधनादिकं ब्रह्मविदाऽङ्गीरसा शौनकायोपदिष्टं दृश्यते ॥ अस्या रचनाकालः 500-400 BC इति विमर्शकाः । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये ।

अस्या व्याख्यादि—

1. शङ्कराचार्यकृतम्—मुण्डकोपनिषद्भाष्यम् । (ASS 9)

(क) अभिनवनारायणेन्द्रकृता—मुण्डकभाष्यटीका । अमुद्रितोऽयं ग्रन्थ "औध" सूच्यां (XXI 26) दृश्यते ।

(ख) आनन्दगिरिकृता—मुण्डकभाष्यव्याख्या । (ASS 9)

(ग) शिवानन्दयतिकृता—मुण्डकभाष्यटिप्पणी ।


अमुद्रितोऽयं ग्रन्थः सरस्वतीमहालयसूच्यां (1563 DCTSML) मद्रासराजकीयपुस्तकालये (D. 722 MGOML) च लभ्यते ।

2. उपनिषद्ब्रह्मेन्द्रकृतम् —मुण्डकोपनिषद्विवरणम् । (ALS)

3. नारायणाश्रमिकृता —मुण्डकोपनिषद्दीपिका । (ASS 9)

4. भास्करानन्दकृता—मुण्डकोपनिषद्दीपिका ।

5. शङ्करानन्दकृता—मुण्डकोपनिषद्दीपिका । अमुद्रितोऽयं ग्रन्थस्सरस्वती महालयसूच्यां (1561 DCTSML) लभ्यते ।



रामतापिन्युपनिषत्—

पूर्वोत्तरतापिनीभेदेन द्विधा विभक्तेयमुपनिषत् । अत्र पूर्वतापिन्यां रामशब्दार्थः परं ब्रह्म इत्युक्त्वा तदुपासनोपयोगि मन्त्रमभिधाय रामाख्यबीजात् जगदुत्पत्तिमभिवर्ण्य रामायणाख्यायिकाश्रवणफलान्युक्त्वा रामयन्त्रोद्धारक्रमश्च प्रतिपादितः । उत्तरतापिन्यां तारकशब्दनिर्वचनपूर्वकं तारकमन्त्रस्योपदेष्टारं स्थानमभिधाय तद्देवतानमस्कारमन्त्रकथनपूर्वकं तारकमन्त्रस्य महात्म्यं फलञ्च निरूपितम् । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये ।

I. उपनिषद्ब्रह्मेन्द्रकृतम्—रामतापिनीविवरणम् । (ALS)

2. नागेश्वरसूरिकृता—रामतापिनीवृत्तिः । अमुद्रिता चेयं मद्रासराजकीयपुस्तकालये (D. 763 MGOML) लभ्यते ।

3. नारायणाश्रमिकृता—रामतापिनीदीपिका । (ASS 29)

4. भट्ट मुद्गलसूरिकृता—रामोत्तरतापिनीव्याख्या । अमुद्रितेयं व्याख्या (D. 762 MGOML) लभ्यते ।

5 रामयतिकृता— पदयोजनिका

अमुद्रितोऽयं ग्रन्थः (D. 764 MGOML) मद्रासराजकीयपुस्तकालये, अडयारपुस्तकालये, बरोडासूच्याञ्च दृश्यते । गोविन्दानन्द शिष्योऽयं रामयतिरिति परं ज्ञायते ।

6. विश्वेश्वरकृता—रामतापिनीपूर्वखण्डव्याख्या ।

अमुद्रितोऽयं ग्रन्थः (D. 762 MGOML) अडयारपुस्तकालये बरोडापुस्तकालये च लभ्यते । स्वयम्प्रकाशशिष्योऽयं विश्वेश्वरः ॥

7. सुरेश्वराश्रमिकृता—रामचन्द्रज्योत्स्ना ।

रामोत्तरतापिन्याः परं व्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः बरोडापुस्तकालये (246 DC BRD) दृश्यते । अस्य कर्ता रघुरामतीर्थशान्ताश्रमिशिष्य इति परं ज्ञायते ।

8. अज्ञातकर्तृका—रामतापिनीव्याख्या । ग्रन्थोऽयं सरस्वतीमहालयसूच्यां (1564 DC TSML) दृश्यते ॥

श्वेताश्वतरोपनिषत्—

अस्यामुपनिषदि क्षराक्षरस्वरूपकथनपूर्वकं योगक्रममुपपाद्य योगगम्यस्य परमात्मनस्स्वरूपादिकं तस्य पुरुषसूक्तप्रतिपाद्यत्वमोक्षप्रदत्वादिकं चोपवर्ण्य, प्रकृतिस्वरूपं विविच्य परमात्मनो गायत्रीप्रतिपाद्यत्वमुक्त्वा क्षराक्षरविद्याफलभेदादिकं प्रकाश्य परमात्मस्वरूपतदुपासनातन्महिमादिकं प्रपञ्च्यते । श्वेताश्वतरविद्वदुपदिष्टत्वादियं श्वेताश्वतरोपनिषदिति कथ्यते । अस्या रचनाकालः (200–100 BC) इति विमर्शकाः । मुद्रिता चेयमानन्दाश्रममुद्रणालये । (ASS 17)

1. शङ्कराचार्यकृतम्—श्वेताश्वतरभाष्यम् । (ASS 17)

शङ्कराचार्यकृतत्वेनेदं भाष्यं मुद्रितमानन्दाश्रममुद्रणालये । सरस्वतीमहालयस्थादर्शग्रन्थान्ते (1565 TSML) च शङ्कराचार्यकृतमिति दृश्यते । परन्तु शङ्कराचार्यैः श्वेताश्वतराणां भाष्यं न कृतमिति ज्ञायते । अथवा नेदं भाष्यं शङ्कराचार्यकृतमिति निश्चीयते । अत्रेमानि कारणानि ।

(1) विद्यारण्यप्रणीतशङ्करविजये षष्ठसर्गे आचार्यशङ्करकृतोपनिषद्भाष्यादिनामनिर्देशे श्वेताश्वतरोपनिषद्भाष्यनामानिर्देशः । तत्रहि—

"करतलकलिताद्वयात्मतत्त्वं क्षपितदुरन्तचिरन्तनप्रमोहम् ।
उपचितमुदितोदितैर्गुणौघैः उपनिषदामयमुज्जहार भाष्यम् ॥"

अत्र धनपतिसूरिकृतडिण्डिमाख्यटीकायां उपनिषदामित्येतत्पदव्याख्याने "ईशादिबृहदारण्यकान्तानां दशानामेवोपनिषदां संग्रहःकृतः । यदि श्वेताश्वतरोपनिषदामपि भाष्यं शङ्कराचार्यैः प्रणीतं स्यात्तर्हि डिण्डिमकारेणास्या उपनिषदोऽप्युल्लेखः कृतो भवेत् ।

(2) यासामुपनिषदां भाष्यं शङ्कराचार्येण कृतं तासाम्, यासामुपनिषदां शङ्कराचार्येण भाष्यं न कृतं तासामपि दीपिकानाम्नी व्याख्या नारायणाश्रमिणा रचिता आनन्दाश्रममुद्रणालये मुद्रिता च । तासु शङ्कराचार्यकृतत्वेन निश्चितभाष्याणामुपनिषदां व्याख्यावसरे नारायणाश्रमिणा "शङ्करोक्त्युपजीविना" इत्युच्यते । तासु दीपिकासु दृश्यते वाक्यतोऽपि साम्यं भाष्येण । शङ्कराव्याख्यातानामुपनिषदां व्याख्यावसरे "श्रुतिमात्रोपजीविना" इत्येव दीपीकायां निर्दिश्यते । श्वेताश्वतरदीपिकापि श्रुतिमात्रोपजीविना नारायणाश्रमिणैव कृता न तु शङ्करोक्त्युपजीविना । तस्मात् श्वेताश्वतरोपनिषदां शाङ्करं भाष्यं नास्तीत्येव ज्ञायते ।

(3) नारायणविरचिते दीपिकाख्ये व्याख्याने षष्ठेऽध्याये—"यदा चर्मवदाकाशं" इत्यादिविंशतितमवर्ग्याख्यानावसरे "अयमर्थ आचार्यसम्मतः । चर्मवदाकाशवेष्टनासम्भववत् अविदुषो मोक्षासम्भवश्रुतेरिति सर्वधर्मान् परित्यज्येतिश्लोके शाङ्करगीताभाष्ये उक्तत्वादिति" विद्यते । यदि श्वेताश्वतरोपनिषदः भाष्यं कृतं स्यात्तर्हि गीताभाष्ये उक्तत्वादिति हेतुरसङ्गतः । एतद्भाष्ये एव आचार्यैरुक्तत्वादित्येव वक्तुं शक्यम् ।

(4) आचार्यशङ्करप्रणीतदशोपनिषद्भाष्येषु दृश्यमाणाः पदलालित्य गाम्भीर्य सरलतादयो गुणाः अस्या भाष्ये न दृश्यते । तस्मात् शङ्करपीठाधिष्ठितैः अन्यैर्वा शङ्कराचार्याणां नाम्ना केनापि विदुषा वा कृतं स्यादित्येव निर्णीयते । शाङ्करभाष्याणां सर्वेषामपि आनन्दगिरिणा व्याख्या कृता श्रूयते । परन्तु श्वेताश्वतरोपनिषद्भाष्यस्य आनन्दगिरिकृता व्याख्या नाद्यापि लक्ष्यते च ।

2. **उपनिषद्ब्रह्मेन्द्रकृतम्—श्वेताश्वतरविवरणम्** । (ALS)

3. **नारायणाश्रमिकृता—दीपिका** । (ASS 17)

4. **विज्ञानभगवत्कृतम्—श्वेताश्वतरविवरणम्** । (ASS 17)

मुद्रितश्चेदं विवरणमानन्दाश्रममुद्रणालये (ASS 17) । अस्य कर्ता विज्ञानात्मा ज्ञानोत्तमशिष्यः, चित्सुखाचार्यसतीर्थ्यः, द्वादशशतकवासी (1100–1200 A.D.) इति प्रकृतग्रन्थपरामर्शात् श्रीकण्ठशास्त्रिकृतोपन्यासात् (IHQ Vol XIV) च ज्ञायते ।

5. **शङ्करानन्दकृता—दीपिका** । (ASS 17)

6. **अज्ञातकर्तृका — दीपिका** । सरस्वतीमहालयपुस्तकालये (1567 DC TSML) दृश्यते ॥

हंसोपनिषत्—

अस्यामुपनिषदि सर्वव्यापिनस्त्रिमात्रस्य हंसाख्यपरमात्मनः ध्यानक्रमं निरूप्य तस्य नादे विलयप्रकारमुक्त्वा ऋषिच्छन्दोदेवतान्यासपूर्वकं तन्मन्त्रस्वरूपादिकं संगृह्य तस्य दशविधनादस्वरूपतायां फलविशेषाश्च संगृहीताः । मुद्रिता चेयमानन्दाश्रम मुद्रणालये ॥

1. **उपनिषद्ब्रह्मेन्द्रकृतम्—विवरणम्** । (ALS)

2. **नारायणाश्रमिकृता—दीपिका** । अमुद्रितेयं दीपिका बरोडासूच्यां (11529 BRD) दृश्यते ।

3. **शङ्करानन्दकृता—दीपिका** । (ASS 27) आनन्दाश्रममुद्रणालये मुद्रिता । शङ्करानन्दः पूर्वमुपपादितः ॥

गीताप्रस्थानम्

एवं असंख्याभिरुपनिषद्भिरद्वैतवेदान्तभावा प्रतिपादिताः। एवमपि उपनिषत्समय एव कचित् वैदिकधर्मविरोधिनां विभिन्नानां दर्शनानां सूक्ष्मस्सद्भावः कठोपनिषत्स्थात्—"येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीतिचैके" 1-20 मन्त्रात् ज्ञायते। एवं "नत्थि किरियं नत्थि कम्म नत्थि विरियम्" इत्यादिना सर्वशून्यत्ववादः निष्क्रियवादश्च वात्यावेगेन प्रचलित आसीदनन्तरभाविषु कालेषु। एतस्य सर्वशून्यवादस्य प्रतिक्षेपणाय जैनमतानुयायिनः "अत्थि उत्थानेति वा कर्मेति वा बलेति वा विरियेति वा पुरिसकारेति वा परक्कमेति वा" (भगवतीसूत्रम् 1-3-5) इति सिद्धान्तं प्रकटयामासुः। जैनबौद्धधर्मणां तत्सामयिकेषु नास्तिकदर्शनेषु सयुक्तिकत्वात् तत्तद्दर्शनाचार्याः समाजे समादृतास्समभूवन्। एवं श्वेताश्वतरोपनिषदि—

"कालस्स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।
संयोग एषां न त्वात्मभावात् आत्माप्यनीशस्सुखदुःखहेतोः॥" (I-2)

इति मन्त्रश्श्रूयते। एतत्प्रमाणादपि उपनिषत्काल एव विभिन्नसिद्धान्तानां सद्भाव ऊहितुं शक्यते। एतेषां विभिन्नानां सिद्धान्तानुयायिनां प्रभावेण प्रजासु विभिन्ना भावा प्रचालिता प्रचलिताश्चासन्। कारणादस्मात् भारतीयाध्यात्मिकवायुमण्डले लोकायतिकमतोदयस्समभूत। वैदिकमतानां हानिरिवाभूत्। विभिन्नदर्शनानां खण्डनस्य वैदिकधर्मस्य पुनः प्रतिष्ठायाश्चावश्यकत्वं अनिवार्यं सञ्जातम्। तस्मात् भगवान् व्यासः पञ्चमवेदतुल्यं महाभारतं, महापुराणानि उपपुराणानि च निर्ममे। तत्तत्पुराणपठनात् असंख्यानि दर्शनानि कचित् सनामनिर्देशं कचित् ससिद्धान्तानुवादं खण्डितानि दृश्यन्ते। महाभारतस्थशान्तिपर्वानुशासनिकपर्वणी महाभारतकालिक्याः आध्यात्मिकभावनायाः प्रत्यक्षं निदर्शनम्। महाभारतादिषु इतिहासग्रन्थेषु महापुराणोपपुराणादिषु च वैदिकमतप्रतिष्ठापनाय आध्यात्मिकविज्ञानप्रतिपादकाः निखिलवेदान्तसारभूताश्च गीताः स्थानमलभन्त। तादृश्यः आध्यात्मिकभावनाप्रधानाः गीता अद्वैतवेदान्तसाहित्यस्य द्वितीयं प्रस्थानम्। यद्यपि प्रतिपुराणं बह्व्यः गीताश्श्रूयन्ते तथापि याश्चाद्वैतवेदान्ताविरोधिन्यः, याश्चाद्वैताचार्यैर्व्याख्यातास्ता एव गीता अत्र वर्णमालाक्रमेण निर्दिश्यन्ते। तासु काश्चन

गीताः 'गीतासमुच्चये" मुद्रिताः, काश्चन पुराणान्तर्गताश्च विद्यन्ते। तास्सर्वा अपि निर्दिश्यन्ते च॥

1. अगस्त्यगीता—

बिब्लियोथिका–इण्डिकाग्रन्थमालायां कलकत्तानगरे मुद्रितस्य वराहपुराणस्य एकपञ्चाशत्तमादध्यायादारभ्य त्रिपञ्चाशत्तमाध्यायपर्यन्तेयं गीता (51-53) अगस्त्यगीतेति कथ्यते।

भद्राश्व-अगस्त्यसंवादरूपायां अस्यां गीतायां अहङ्कार-अज्ञान-विज्ञानेन्द्रियाणामुत्पत्तिः, जगत्सृष्टिः, ज्ञानस्वरूपमित्येते विषयाः पशुपालकथाव्याजेन निरूपिताः॥

2. अनुगीता—

महाभारतान्तर्गतेयं गीता। महाभारतस्याश्वमेधिकपर्वणि षोडशाध्यायादारभ्य प्रवृत्तः कृष्णार्जुनसंवादः अनुगीताशब्देन व्यवहृतः। पूर्वोपदिष्टगीतार्थस्य संग्रामव्यग्रस्य अत एव विस्मृतगीतार्थस्यार्जुनस्य प्रार्थनया भगवान् भगवद्गीतार्थं सङ्गृह्णाति। ज्ञानस्याविनाशित्वं, ज्ञानादेव मुक्तिरिति च प्रतिपादयन्तीयं गीता मुद्रिता। (S. B. E. 8)

1. **गौडपादमुनिकृतम्–अनुगीताभाष्यम्।** अमुद्रितोऽयं ग्रन्थः नासिकहस्तलिखितपुस्तकालयसूच्यां (XXVI 35) दृश्यते। गौडपादमुनिश्च माण्डूक्यप्रकरणे उपपादितः।

अवधूतगीता—

दत्तगीता, जीवन्मुक्तगीता इत्यादिनाम्ना प्रसिद्धेयं गीता 'आष्टेकर कम्पेनि' पूनानगरे मुद्रिता। गोरक्षदत्तात्रेयसंवादरूपेऽस्मिन् ग्रन्थे जीवन्मुक्तस्य स्वरूपं, मोक्षस्वरूपं आत्मज्ञानविचारश्च सम्यगुपपादिताः। अस्य कर्ता यदि महाभारतादिषु प्रसिद्धः दत्तात्रेयस्स्यात्तर्हि अत्रेरनसूयायाश्च पुत्रः, निमेः पिता, श्रीमतः पितामहः इति महाभारतानुशासनपर्व–सभापर्वप्रमाणात् निर्णेतुं शक्यते।

1. परमानन्दतीर्थकृता—अवधूतगीताटीका।

अमुद्रितोऽयं ग्रन्थ मद्रासराजकीयहस्तलिखितपुस्तकालये (D. 17476 MG OML) तिरुवनन्तपुरपुस्तकालये महीशूरपुस्तकालये च लभ्यते। अस्याः कर्ता

परमानन्दतीर्थः विद्यातीर्थप्रशिष्यः भारतीतीर्थशिष्यः चतुर्दशशतकीय (1300—1400 A.D.) इति निश्चीयते ।

2. शङ्कराचार्यकृतः—अवधूतगीतासारः । अमुद्रितोऽयं ग्रन्थः (D. 18884 MGOML) लभ्यते ।

3. अज्ञातकर्तृका—अवधूतगीताव्याख्या । अमुद्रितोऽयं ग्रन्थः (R. 5498 MGOML) लभ्यते ॥

अष्टावक्रगीता—

अष्टावक्रीयं, अष्टावक्रसूक्तं, अवधूतानुभूतिरित्यादिनामभिः प्रसिद्धेयं गीता एकविंशतिभिरध्यायैः पूर्णा अष्टावक्रजनकसंवादरूपेण अद्वैतवेदान्तसिद्धान्तान् ब्रह्मणोऽद्वितीयत्वं चिन्मयत्वञ्च प्रतिपादयति । मुद्रिता चेयं गीता आष्टेकर कम्पेनि–पूनानगरे ।

1. पूर्णानन्दकृता—अष्टावक्रगीताव्याख्या ।

ग्रन्थोऽयं मध्यप्रान्तीय वरार्ग्रन्थसूच्यां (327 CCPB) दृश्यते । यद्ययं पूर्णानन्दः ब्रह्मविद्याभरणकाराणां अद्वैतानन्देन्द्राणां शिष्यः, रामानन्दस्य प्रशिष्यः, अच्युतकृष्णानन्दसतीर्थ्यः, भाष्यरत्नप्रभाव्याख्यापूर्णानन्दीयकर्ता स्यात् तर्हि अस्य कालः (1650–1750 A.D.) सप्तदशशतकीय इति निर्णेतुं शक्यते ॥

2. भासुरानन्दकृता—अष्टावक्रगीताव्याख्या ।

ग्रन्थोऽयं मध्यप्रान्तीयवरार्ग्रन्थसूच्यां दृश्यते । भासुरानन्दोऽयं काशीवासी-सन्नपि चोलदेशानागतः कावेरीतीरवासी सञ्जातः । अस्य शिष्य उमानन्दाख्यः । उमानन्देन नित्योत्सव इति ग्रन्थ कृतः यश्च मद्रासनगरे (R. 2462 MGOML) लभ्यते । भासुरानन्देन रत्नावलीनामा ग्रन्थोऽपि कृत इति ज्ञायते ॥

3. मुकुन्दमुनिकृता—अष्टावक्रगीताव्याख्या ।

ग्रन्थोऽयमपि मध्यप्रान्तीयवरार्ग्रन्थसूच्यां दृश्यते । अस्य कर्ता मुकुन्दमुनिः हरिनाथप्रशिष्यः रामनाथशिष्यः ब्रह्मामृतवर्षिणीकर्तुः रामकिङ्करधर्मस्य गुरुः, महाराष्ट्रदेशीयः, मुकुन्दानन्दमुक्तिनाथमुकुन्दराजापराभिधानस्सुज्ञानविंशतिकाराद्भिन्नः सप्तदशशतकीय (1550–1650A.D.) इति निश्चीयते ॥

4. विश्वेश्वरपण्डितकृता—अष्टावक्रदीपिका ।

अवधूतानुभूतिदीपिका, अध्यात्मदीपिका, अष्टावक्रदीपिका इत्यपरनामायं ग्रन्थ आष्टेकरकम्पेनि पूनानगरे मुद्रितः । अस्य कर्ता विश्वेश्वरपण्डितः माधवप्रज्ञशिष्य इति परं ज्ञायते ॥

ईश्वरगीता—

कूर्मपुराणान्तर्गतेयं ईश्वरगीता । द्वादशभिरध्यायैः पूर्णेयं गीता ऋषिव्याससंवादमुखेन प्रवृत्ता बिब्लियोथिकासंस्कृतग्रन्थमालायां मुद्रिता ।

1. यज्ञेश्वरसूरिकृता—ईश्वरगीताव्याख्या ।

ईश्वरगीताभाष्यमित्यपरनामायं ग्रन्थ अमुद्रितस्सरस्वतीमहालये (8997 DC. TSML) लभ्यते । अस्य कर्ता काश्यपगोत्रजः बह्वृचशाखाध्यायी चर्कूरिवंशजः कोण्डुभट्ट–गङ्गाम्बिकयोः पुत्रः, तिरुमलैदीक्षितकनीयान् भ्राता यज्ञेश्वरकृष्णाश्रमयोः शिष्यः चोलदेशीयः, शाहेन्द्रग्रामवासी नृसिंहाश्रमिण अर्वाचीनस्सप्तदशशतकीयः (1600–1700 A.D.) शास्त्रदीपिकाव्याख्याप्रभामण्डलकर्ता यज्ञेश्वरदीक्षित इति पञ्चपादिकाविवरणोज्जीविनी (R. 592 MGOML) ईश्वरगीताव्याख्यानाच्च ज्ञायते ॥

उत्तरगीता—

कृष्णार्जुनसंवादात्मकोऽयं ग्रन्थः प्रणवोपासनादीनद्वैतवेदान्तप्रकरणग्रन्थप्रतिपादितान् विषयान् त्रिभिरध्यायैः प्रतिपादयन् महाभारतान्तर्गतः वाणीविलासमुद्रणालये कलकत्तायां बाम्बे नगर्याञ्च मुद्रितः ।

1. काण्डद्वयातीतयोगिकृता—उत्तरगीताव्याख्या

अमुद्रितोऽयं ग्रन्थस्सरस्वतीमहालयपुस्तकालये (7568 DC TSML) लभ्यते । अस्य कर्ता हारीतगोत्रजः अतिवर्णाश्रमी सन्यासात् पूर्वं काण्डयार्यनीलाम्बयोः पुत्रः सामराजतीर्थशिष्यः काण्डद्वयातीतयोगीति ज्ञायते । यद्ययं सामराजः रतिकल्लोलिनीश्रीदामचरितश्रृङ्गारामृतलहर्यादिकर्ता नरहरिदीक्षितपुत्रः आनन्दरायकालिकः मथुरावासी सामराजस्स्यात्तर्हि काण्डद्वयातीतयोगिनः कालः 1775 सं. 1719 A.D. इति निर्णेतुं शक्यते ।

2. गौडपादाचार्यकृता - उत्तरगीतादीपिका

मुद्रितोऽयं ग्रन्थः वाणीविलासमुद्रणालये । अस्य कर्ता गौडपादः किं माण्डूक्यकारिकाकर्ता ? उतान्य इत्यत्र न निश्चयः ॥

3. परमानन्दतीर्थकृता—उत्तरगीताटीका

ग्रन्थोऽयं महीशूरपुस्तकसूच्यां दृश्यते । परमानन्दतीर्थोऽयं विद्यातीर्थप्रशिष्यः भारतीतीर्थशिष्यश्चतुर्दशशतकीय (1300–1400 A.D.) इति ज्ञायते ॥

4. अज्ञातकर्तृकः—उत्तरगीतासारः—

गीतासार इत्यपरनामायं ग्रन्थः महीशूरसूच्यां (Vol. II Page 22) दृश्यते । आनन्दगिरिणा कृता च काचन व्याख्या मुद्रिता विद्यते ॥

ऋभुगीता—

शिवरहस्यान्तर्गतेयं गीता सप्तविंशतिभिरध्यायैः पूर्णा सरस्वतीमहालये अड्यारपुस्तकालये महीशूरपुस्तकसूच्याञ्च दृश्यते ॥

कपिलगीता—

देवहूतिभगवत्संवादरूपेयं गीता आष्टेकरकम्पनीमुद्रितगीतासंग्रहान्तर्गता। पद्मपुराणान्तर्गता अन्या काचन शिवपार्वतीसंवादात्मिका कपिलगीतापि विद्यते ।

गणेशगीता—

गजाननवरेण्यसंवादमुखेन प्रवृत्तेयं गीता भगवद्गीतां सर्वात्मनानुकरोति । मुद्रिता चेयमुपनिषदानन्दाश्रममुद्रणालये (ASS 52)

1. नीलकण्ठतीर्थकृता—गणपतिभावदीपिका

गणेशगीताव्याख्यात्मकोऽयं ग्रन्थस्संक्षेपशारीरकं वार्तिकञ्चोद्धरन् आनन्दाश्रमे (ASS 52) मुद्रितः । अस्य कर्ता चतुर्धरवंशावतंसः काशीवासी गोविन्दसूरिपुत्रः नीलकण्ठतीर्थः षोडशशतकान्तिमात् समयादारभ्य सप्तदशशतकान्ते काले 1750 सं–1696 A.D. आसीदिति गगनशरगिरीन्दुमिते विक्रमसंवत्सरे ग्रन्थञ्चकारेति च ज्ञायते ॥

जीवन्मुक्तिगीता—

उपेन्द्रनाथमुखोपाध्यायेन कल्कत्तायां मुद्रितेयं गीता कृष्णार्जुनसंवादमुखेन जीवन्मुक्तस्वरूपं वर्णयति ।

ज्ञानगीता—

अमुद्रितोऽयं ग्रन्थ नासिकसूच्यां (XXIV 22) दृश्यते । अद्वैतसिद्धान्तप्रतिपादिकेयं गीता इति (J. O. R. Vol. 12 Page 114) जर्नल आफ ओरियण्टल पत्रिकाया द्वादशतमात् भागात् ज्ञायते ॥

देवीगीता—

योगत्रयप्रतिपादिकेयं गीता देवीभागवतसप्तमस्कन्धान्तर्गता । भगवती गीता इत्यपि नामान्तरमस्या श्रूयते । हिमवद्देवीसंवादमुखेन प्रवृत्तेयं गीता आष्टेकरकम्पनि मुद्रितगीतासंग्रहे दृश्यते ।

बोधानन्दगीता

ईशादिबृहदारण्यकान्तानां दशोपनिषदां भाष्यानुसारिणमर्थं सङ्गृह्णन्तीयं गीता द्वादशभिः परिच्छेदैः पूर्णाऽमुद्रिता च तिरुवनन्तपुरं पुस्तकालये (316 DCTCL) लभ्यते ।

अस्य कर्ता ब्रह्मानन्दयतिशिष्यः गुरुमूर्तिगुरुः पञ्चनदक्षेत्रवासी (1700–1800 A.D.) अष्टादशशतकीयः कैवल्यदीपिकाकारः (R. 2934 MGOML) बोधानन्द इति ज्ञायते ॥

ब्रह्मगीता I

योगवासिष्ठोत्तरार्धगतनिर्वाणप्रकरणान्तर्गता वसिष्ठरामसंवादमुखेन प्रवृत्तेयं गीता आष्टेकरकम्पनिगीतासंग्रहे मुद्रिता ॥

ब्रह्मगीता II

स्कान्दपुराणान्तर्गतसूतसंहितान्तर्गतेयं गीता गीतासंग्रहे मुद्रिता । शिवभक्ति अद्वैतसिद्धान्तप्रदर्शनप्रधानेयं गीता दशोपनिषदामर्थञ्च प्रतिपादयति ।

1. कृष्णानन्दकृता—चित्प्रकाशिनी

ब्रह्मगीताव्याख्यापरनामायं ग्रन्थः नासिकसूच्यां 136 दृश्यते । अस्य कर्ता कैवल्यानन्दकृष्णानन्दयोःशिष्यः वाराणसीवासी एकोनविंशतिशतकीयः (1800–1900 A.D.) कृष्णानन्दसरस्वतीति ज्ञायते ॥

2. माधवाचार्यकृता— तात्पर्यदीपिका

ब्रह्मगीताव्याख्यात्मकोऽयं ग्रन्थः मद्रासनगरे बालमनोरमामुद्रणालये मुद्रितः। अस्य कर्ता माधवाचार्यः माधवमन्त्रीत्यपरनामा आङ्गिरसगोत्रजः, चावुण्डयात् माचाम्बिकायामुत्पन्नः, काशीविलासक्रियाशक्तिशिष्यः परमशिवभक्तोऽपि अद्वैत-वेदान्ततत्ववेत्ता प्रचण्डयोद्धा शत्रुमानमर्दनकारी शौर्यसम्पन्नः, उपनिषन्मार्गप्रवर्तकाचार्यविरुदभूषितः, चतुर्दशशतकीयः (1340–1391 A.D.) इति ज्ञायते। माधवमन्त्री अयं भारद्वाजगोत्रजात्, मायणश्रीमत्योः पुत्रात्, सायणभोगनाथयोः भ्रातुः, विद्यातीर्थभारतीतीर्थश्रीकण्ठशिष्यात्, पराशरमाधवपञ्चदश्यादिकर्तुः विद्यारण्यापराभिधानात् माधवाचार्यात् भिन्न इति यपिग्राफिका कर्नाटिका (Vol. 7) शिकारपुर 281, एवं—यपिग्राफिकाकर्नाटिका (Vol. 8) प्रमाणाच्च, ज्ञायते।

3. वेङ्कटेशशास्त्रिकृता—तात्पर्यबोधिनी।

अमुद्रितोऽयं ब्रह्मगीताव्याख्याग्रन्थः मद्रासराजकीयपुस्तकालये (R. 4065 MGOML) लभ्यते। अस्य कर्ता आत्रेयगोत्रजः कोयम्पुरि (कोयम्पुत्तूर?) वासी सर्वदेवशिष्यः अय्यासुरशास्त्रीत्यपरनामा सामिशास्त्रिसामयिकः एकोनविंशतिशतकीयः (1790-1850 A.D.) वेङ्कटेश्वरशास्त्रीति ज्ञायते॥

भगवद्गीता—

अष्टादशभिरध्यायैः सप्तशतश्लोकैश्च पूर्णेयं गीता निःश्रेयसप्राप्त्युपायान् स्वभावमधुरैः पदविन्यासैः प्रतिपादयति।

श्लोकैकं धृराष्टस्य नव दुर्योधनस्तथा।
द्वात्रिंशत्सञ्जयप्रोक्तं वेदाष्टौ अर्जुनस्य च॥
तत्वाववोधो वेदाब्धिः पञ्च केशवनिर्मितम्।
एवं गीताप्रमाणञ्च श्लोकास्सप्तशतानि च"॥

इत्ययं श्लोकः गीताविषये प्रसिद्धः॥ भगवद्गीता विभिन्नदार्शनिकवादेषु निर्लिप्ता आध्यात्मिकतत्वनिरूपणपरवैदिक धर्ममात्रानुसारिणी राजते। गीतायां आत्मापरोक्षानुभूतिप्रतिपादिकानां उपनिषदां अद्वैतसिद्धान्तः, प्रकृतिपुरुषविवेकज्ञानान्मोक्ष इति प्रतिपादिका सांख्यप्रक्रिया, कर्मानुष्ठानजन्यस्वर्गादिफलदायिकर्ममीमांसासिद्धान्तः, अष्टाङ्गसाधनेन प्रकृतिबन्धनान्मुक्तस्य जीवस्य कैवल्यमिति योगसिद्धान्तः, रागात्मकभक्तिप्रधानः सर्वकर्मणां परमात्मार्पणप्रधानश्च पाञ्चरात्रसिद्धान्तश्च यत्र तत्र

प्रतिपादितः। अत एव गीताया आशयः कुत्रेति न निर्णेतुं शक्यत इति केचिद्वदन्ति। तत्तदाचार्यैः गीता प्रमाणीक्रियते। शङ्करभगवत्पादैश्च गीताप्रस्तावनाभाष्ये "तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थं" इत्युच्यते। शाङ्करभाष्यानुसारं उपक्रमोपसंहारप्रमाणात् भगवद्गीतायाः ज्ञानयोगे एव तात्पर्यं अन्ये तु तदङ्गा एवेति प्रतिपाद्यते।

भगवद्गीतायां दृश्यमाणः "पत्रं पुष्पं फलं तोयमित्यादिः श्लोकः (9-26) बोधायनगृह्यसूत्रेषु दृश्यते। बोधायनगृह्यसूत्राणां रचनाकालस्तु (400 BC) इति प्रसिद्धम्। तस्मात् तत्पूर्वतनेयं गीतेति ज्ञायते। बेलवलकरमहाशयः, दासगुप्तमहाशयाश्च बौद्धधर्मग्रन्थात् प्राचीनेयं भगवद्गीतेति वदन्ति। महाभारतादपि प्राचीनेयं भगवद्गीता। भगवद्गीतायाः प्राशस्त्यं सार्वजनीनत्वञ्च दृष्ट्वा महाभारते संयोजितेति तत्वविदः। व्याख्योपेतेयं गीता निर्णयसागर मुद्रणालयेऽन्यत्र बहुषु स्थलेषु मुद्रिता च। अस्य भाष्यादिकं एतत्सम्बद्धाः ग्रन्थाश्च—

1. शङ्कराचार्यकृतम्—भगवद्गीताभाष्यम्। मुद्रितश्चायं ग्रन्थ आनन्दाश्रमे, वाणीविलासमुद्रणालये, निर्णयसागरमुद्रणालये च।

(A) अनुभूतिस्वरूपाचार्यकृतम्—गीताभाष्यटिप्पणम्।

अमुद्रितोऽयं ग्रन्थ अडायारपुस्तकालये (33 AL), तिरुवनन्तपुरपुस्तकालये (231 DC. TCL) च लभ्यते। अस्य कर्ताऽनुभूतिस्वरूपाचार्यः द्वादशशतकीय इत्यादि उपनिषत्प्रस्थाने सूत्रप्रस्थाने चोपपादितम्।

(B) आनन्दगिरिकृतम्—गीताभाष्यविवेचनम्।

भगवद्गीताभाष्यव्याख्यात्मकोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये (ASS 34) मुद्रितः। आनन्दगिरिरयं शुद्धानन्दानुभूतिस्वरूपाचार्यशिष्यः त्रयोदशशतकीय इति सूत्रप्रस्थाने उपनिषत्प्रस्थानेऽद्वैताचार्यप्रकरणे चोपपादितम्॥

(C) केशवसाक्षिभगवत्पादकृतः—गीताभाष्यसंक्षेपः।

अमुद्रितोऽयं पूर्णग्रन्थः मद्रासराजकीयपुस्तकालये (D. 2058 MGOML) लभ्यते। केशवसाक्षिभगवतानेन विद्यारण्यः नृसिम्हभारती च ग्रन्थे निर्दिष्टौ। तस्मात्तयोरनन्तरकालिक इति परं निर्णीयते॥

(D) रामानन्दसरस्वतीकृता—गीताभाष्यव्याख्या - गीताशयः

शाङ्करभाष्यव्याख्यात्मकोऽयं ग्रन्थः दासगुप्तमहाशयेन (HIP. Vol. II Page 39) निर्दिष्टः । बरोडासूच्यां (6939 D. DC. BRD.) दृश्यते च । स्वयम्प्रकाशसरस्वती-रामभद्रानन्दसरस्वतीप्रशिष्यः, राघवानन्दशिष्यश्चायं रामानन्दस्स्वग्रन्थेषु लघुचन्द्रिकाकारं ब्रह्मानन्दसरस्वती निर्दिशन् सप्तदशशतकापरार्धादारब्धकालवासीति निश्चीयते । अनेन पञ्चदशीव्याख्या विशुद्धदृष्टिनाम्नी कृता च ॥

(E) भागवतानन्दकृतम्—भाष्यविवेचनम् ।

ग्रन्थोऽयं दासगुप्तेन निर्दिष्टः । सूर्यपण्डितकृता व्याख्या च पूना नगरे मुद्रिता । व्याख्याया नाम **परमार्थप्रभा** इति दृश्यते ।

रामरायकवि (बेलङ्कोण्डा) रचिता **अर्कप्रकाशिकानाम्नी** व्याख्या अमुद्रिता विद्यते ।

2. उपनिषद्ब्रह्मेन्द्रकृता—भगवद्गीताव्याख्या ।

अस्याः नाम अडयार सूच्यां (34. 18. म 550 AL) अर्थप्रकाशिका इति दृश्यते महीशूरसूच्यान्तु ब्रह्मतत्त्वप्रकाशिका " इति दृश्यते अमुद्रितेयं व्याख्या । अस्याः कर्ता उपनिषद्ब्रह्मेन्द्रः, वासुदेवेन्द्रप्रशिष्यः, वासुदेवेन्द्रशिष्यः रामचन्द्रेन्द्रसतीर्थ्यः कृष्णानन्दगुरुः, अष्टादशशतकीयः उपनिषदां विवरणकार इति ज्ञायते ॥

3. कल्याणभट्टकृता—भगवद्गीताटीका ।

ग्रन्थोऽयममुद्रितः मध्यप्रान्तीय बरार्ग्रन्थसूच्यां (1383 CCPB) दृश्यते

4. कृष्णकृता—भगवद्गीताभावप्रकाशिका ।

ग्रन्थोऽयं मध्यप्रन्तीयबरार्ग्रन्थसूच्यां (1390 CCPB) दृश्यते यद्यय कृष्णपण्डितः कैवल्यदीपिकाकारस्याचार्हि चोलदेशीयः कृष्णानन्दयतिशिष्य अष्टादशशतकीय इति निर्णेतु शक्यते ॥

5. कृष्णानन्दसरस्वतीकृतः—भगवद्गीतैकदेशपरामर्शः ।

गीतायाः भेदवादे तात्पर्यं निरस्य अद्वैतब्रह्मवादे तात्पर्यं वर्णयन्नयं ग्रन्थ " गवर्नमेण्ट प्रेस गोण्डारप्रेट नगरे " मुद्रितः ॥ अस्य कर्ता सच्चिदानन्दाश्रमस्य वासुदेवेन्द्रयोगिनश्च शिष्यः वाराणसीवासी एकोनविंशतिशतकीय (1825-1900

A.D.) कृष्णानन्दसरस्वतीति ज्ञायते । अदसीया अन्ये ग्रन्था अन्यत्र प्रतिपादिताः ।

6. कृष्णानन्दसरस्वतीकृतः—गीतासारोद्धारः ।

अस्य कर्ता अद्वैतसाम्राज्यकारः कैवल्यानन्दकृष्णानन्दयोः शिष्य एकोनविंशतिशतकीयः कृष्णानन्दसरस्वतीति ज्ञायते ॥

7. धनपतिसूरिकृता—गीताभाष्योत्कर्षदीपिका ।

अस्य कर्ता धनपतिसूरिः पञ्जाबान्तर्गतरावलपिण्डीनगरवासी रामकुमारसूरिपुत्रः सारस्वतब्राह्मणः, प्रत्यक्तत्वचिन्तामणिकारस्य सदानन्दव्यासवरस्य जामाता बालगोपालतीर्थशिष्यः, अष्टादशशतकापरार्धादारब्धे (1750-1850 A.D.) काले आसीदिति ज्ञायते । अदसीयाः वेदान्तपरिभाषाव्याख्या अर्थदीपिकाद्याः अन्यत्र प्रतिपादिताः ॥

8. नीलकण्ठतीर्थकृतः—गीतार्थप्रकाशकः

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (D. 2031 MGOML) लभ्यते । अस्य कर्ता नीलकण्ठतीर्थः गोविन्दसूरिसूनुः बालतीर्थशिष्यः आत्मयोगिनीगुरुः केरलवासी अष्टादशशतकीय (1775--1875 A.D.) इति ज्ञायते ॥ मुद्रितश्च निर्णयसागरमुद्रणालये ।

9. भारद्वाजकृता—भगवद्गीतासङ्गतिमाला

135 पद्यैः पूर्णोऽयं ग्रन्थः भगवद्गीतायाः ज्ञानयोगे एव तात्पर्यमिति वर्णयति । अज्ञातकर्तृनामधेया व्याख्याप्यस्ति । अमुद्रितोऽयं ग्रन्थ मद्रासराजकीयपुस्तकालये (R. 5336 MGOML) लभ्यते ।

(A) अज्ञातकर्तृनामधेया — भगवद्गीतासङ्गतिमालाव्याख्या

अमुद्रितोऽयंः ग्रन्थ मद्रासराजकीयपुस्तकालये (R. 533 E. MGOML) लभ्यते ।

10. मधुसूदनसरस्वतीकृता—गूढार्थदीपिका

मुद्रितोऽयं ग्रन्थः निर्णयसागरमुद्रणालये । अस्य कर्ता मधुसूदनसरस्वती कमलजनयनापराभिधः, राममिश्रवंशोत्पन्नः, पुरन्दराचार्यपुत्रः, श्रीनाथ-यादवानन्द-

वागीशगोस्वामिभ्राता, श्रीरामविश्वेश्वरमाधवशिष्यः, पुरुषोत्तम-बलभद्र-शेषगोविन्द-गुरुः, हिन्दीभाषाकवितुलसीदास–भारतसम्राडक्बरसामयिकः षोडशसप्तदशशतकवासी (1565–1665 A.D.) इति विस्तरेणोपपादितं अद्वैताचार्यप्रकरणप्रस्तावे ॥

11. धर्मदत्तबच्चाशर्मकृता—गूढार्थतत्त्वालोकः

निर्णयसागरमुद्रणालये मुद्रितोऽयं ग्रन्थः। नव्यनैयायिकशैलीबद्धेयं व्याख्या। अस्याः कर्ता बच्चाशर्मा इति प्रसिद्धः धर्मदत्तः मैथिल एकोनविंशतिशतकीय व्युत्पत्तिवादव्याख्याता च (1850–1920 A.D.) इति ज्ञायते ॥

12. रघुनाथसूरिकृतम्—पदभूषणम्

शङ्करपदभूषणमित्यपरनामायं भगवद्गीताव्याख्यात्मकः ग्रन्थः कुत्रत्य इति न ज्ञायते। परन्तु शङ्करशास्त्रिमारुलकारेण ब्रह्मसूत्रवृत्तिशङ्करपादभूषणभूमिकायां Page 101 निर्दिश्यते। ग्रन्थकारोऽयं रघुनाथसूरिः ब्रह्मसूत्रव्याख्याशङ्करपादभूषणकारः रामचन्द्रसूरिपुत्रः रामशास्त्रिपिता राघवाचार्यशिष्यः, एकोनविंशतिशतकीय (1850 A.D.) इति ज्ञायते ॥

13. राघवानन्दकृता—तत्त्वार्थचन्द्रिका।

अमुद्रितोऽयं ग्रन्थ तिरुवनन्तपुरसूच्यां (282 DC. TCD) महीशूर पुस्तकालये (443) च दृश्यते। अस्य कर्ता राघवानन्दस्स्वयम्प्रकाशप्रशिष्यः, कृष्णानन्दरामभद्रानन्दशिष्यस्सप्तदशशतकीयः (1685 A.D.) परमार्थसारव्याख्याता चेति ज्ञायते ॥

14. रामचन्द्रानन्दसरस्वतीकृता—तत्त्वदीपिका।

पदयोजना इत्यपरनामायं ग्रन्थ अमुद्रितः मद्रासराजकीय पुस्तकालये (D. 2068, R. 1921 MGOML) बरोडा - तिरुपति - महीशूर - अडयारपुस्तकालयेषु च लभ्यते। अस्य कर्ता रामचन्द्रानन्दः नारायणानन्दसरस्वतीप्रशिष्यः लघुचन्द्रिकाकर्तुः ब्रह्मानन्दसरस्वत्याः शिष्यः, बालकृष्णानन्दसतीर्थ्यस्सप्तदशशतकापरार्धारब्धकालवासीति (1650-1920 A.D.) ज्ञायते ॥

15. रामानन्दसरस्वतीकृतः—गीताशयः।

भगवद्गीताभाष्यसंग्रहात्मकोऽयं ग्रन्थः व्याख्यारूपश्चामुद्रितः विद्यारण्यपुर सूच्यां (137) दृश्यते। एष एव ग्रन्थः भाष्यव्याख्यात्मक इति बरोडा सूच्यां निर्दिष्ट इति ज्ञायते। रामानन्दोऽयं स्वयम्प्रकाशकृष्णानन्दरामभद्रानन्दानां प्रशिष्यः, राघवानन्दशिष्यः गौडब्रह्मानन्दादर्वाचीन इति पूर्वमुपपादितम्।

16. लिङ्गोजीपण्डितकृता – व्यासभावप्रकाशिका।

भगवद्गीताव्याख्यात्मकोऽयं ग्रन्थ मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2294 MGOML) लभ्यते ॥

17. वासुदेवशास्त्री अभ्यङ्करकृतः—अद्वैताङ्कुरः।

भगवद्गीतायाः प्रथमद्वितीयाध्यायव्याख्यात्मकोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये (ASS 109) मुद्रितः।

अस्य कर्ता वासुदेवशास्त्री अभयङ्करः नागोजीभट्टप्रशिष्यस्य भास्कराचार्यस्य पौत्रः प्रशिष्यः शिष्यश्च, रामशास्त्रिशिष्यः पुण्यनगरवासी एकोनविंशतिशतकीयः (1850–1920 A. D.) अद्वैतामोदकर्ता चेति ज्ञायते ॥

18. वासुदेवशिष्यकृताः—कुमारकारिकाः।

भगवद्गीतार्थसंग्राहकोऽयं ग्रन्थ तिरुवनन्तपुरपुस्तकालये (280 DCTCD लभ्यते। अस्य कर्ता पुरुषोत्तमवासुदेवयोरिशष्यः विवेकसारादिकर्ता इति परं ज्ञायते।

19. वेङ्कटनाथकृता—ब्रह्मानन्दगिरिः।

भगवद्गीताव्याख्यात्मकोऽयं ग्रन्थ द्वैतविशिष्टाद्वैतखण्डनपरः शाङ्करभाष्यानुसारी वाणीविलासमुद्रणालये (VVSS. 12) मुद्रितः। ग्रन्थेऽस्मिन् "अद्वैतवज्रपञ्जर" तैत्तरीयोपनिषट्टीका च निर्दिष्टे। अस्य कर्ता वेङ्कटनाथः अभिनवशङ्कराचार्यापरनामकरामब्रह्मानन्दसरस्वतीशिष्य इति परं ज्ञायते। यद्ययं वेङ्कटनाथः धर्मराजाध्वरिणा निर्दिष्टः वेङ्कटनाथस्स्यात् तर्हि वेलाङ्गुडिवासी धर्मराजाध्वरिगुरुष्षोडशशतकवासीति (1550-1650 A.D.) परं निर्णेतु शक्यते ॥

20. श्रीधरस्वामिकृता—सुबोधिनी।

भगवद्गीताशाङ्करभाष्यानुसारिणीयं व्याख्या निर्णयसागरमुद्रणालये आनन्दाश्रममुद्रणालये च मुद्रिता। अस्य कर्ता श्रीधरस्वामी "परमानन्दपादाब्जरजः

श्रीधारिणामुना" इति वदन् आत्मानं परमानन्दतीर्थशिष्यं निर्दिशति। यद्ययं परमानन्दः गुरुचन्द्रिकाकर्तुः गौडब्रह्मानन्दस्य गुरोः परमानन्दात् न भिन्नः, यदि च रत्नप्रभाकारस्य रामानन्दसरस्वत्यास्सतीर्थ्यात् स्वयम्प्रकाशगोविन्दानन्दयोश्शिष्यात् परमानन्दात् न भिन्नस्तर्हि अस्य कालः (1550-1650 A. D.) इति वक्तुं शक्यते। अस्य प्रतिलिपिकालः (1668 सं 1612 A. D.) इति पञ्चाबसूच्यां दृश्यते। एवञ्च सप्तदशशतकपूर्वार्धात् प्राचीन इति परं निर्णेतुं शक्यते॥

21. शङ्करानन्दकृता—तात्पर्यद्योतिनी।

भगवद्गीताव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरमुद्रणालये मुद्रितः। अस्य कर्ता शङ्करानन्द आनन्दात्मशिष्य आत्मपुराणादिविविधग्रन्थकर्ता विद्यारण्यगुरुस्त्रयोदशशतकापरार्धारम्भकालवासी (1275-1350 A.D.) इति निश्चीयते। अस्यैव विद्यातीर्थः, विद्याशङ्कर इति नामान्तरमिति, शङ्करानन्दस्य शिष्यः प्रथमसदानन्द इत्यादिविविधसिद्धान्तः प्रकरणग्रन्थप्रस्तावे प्रतिपादितः।


22. सदानन्दव्यासवरकृतः—गीताभावप्रकाशः।

भगवद्गीताया शाङ्करभाष्यानुसारिणीयं व्याख्या पद्यमयी चौखाम्बामुद्रणालये मुद्रिता। अस्याः कर्ता सदानन्दव्यासवरः प्रत्यक्तत्वचिन्तामणिकारः, सारस्वतब्राह्मणकुलोत्पन्नः, पञ्चाबदेशान्तर्गत रावलपिण्डी जिलान्तर्गतः, नानकसम्प्रदायानुगतबाबारामदयालु प्रेमपात्रमपि शाङ्करसिद्धान्तपक्षपाती शिवलाल प्रेम पात्रं, धनपति सूरिश्वशुरः वासुदेवयोगिनः प्राप्तदीक्षः, अष्टादशशतकीय (1740–1810 A.D.) इति निश्चयः। अभिनवगुप्ताचार्यकृतः "गीतार्थसंग्रहः"श्च मुद्रितः। अभिनवगुप्तश्च काश्मीरी भट्टेन्दुराज शिष्यः। अस्य जीवनकालः (993–1015 A.D.)

23. हनूमत्कृतम्—पैशाचभाष्यम्। ग्रन्थोऽयं चौखाम्बामुद्रणालये मुद्रितः।

24. अज्ञातकर्तृकः—गीतासारः। भगवद्गीतासारोऽयं ग्रन्थः विद्यारण्यपुरसूच्यां (118) दृश्यते।

25. अष्टादशश्लोकी भगवद्गीता—ग्रन्थोऽयं सरस्वतीमहालये (8939 DC. TSML) दृश्यते।



रामगीता—

तैत्तरीयोपनिषदः, वाजसेनेयश्रुतिश्च प्रमाणयन्तीयं रामगीता तत्वसारायणान्तर्गता आत्मविद्याग्रन्थमालायां (1) आष्टेकर कम्पनिमुद्रितगीतासंग्रहे च मुद्रिता। रामलक्ष्मणसंवादशैल्या प्रवृत्तोऽयं ग्रन्थः ज्ञानादेव मोक्ष अज्ञाननिवृत्तिश्चेति प्रतिपादयति।

रुद्रगीता—

बृहद्ब्रह्मसंहितान्तर्गतेयं गीता रुद्रभद्रबाहुसंवादमुखेन प्रवृत्ता अद्वैतवेदान्तविषयिणी आनन्दाश्रममुद्रितायां बृहद्ब्रह्मसंहितायां द्रष्टव्या।

वासिष्ठगीता—

निर्णयसागरमुद्रणालयमुद्रितयोगवासिष्ठोत्तरार्धगतनिर्वाणप्रकरणान्तर्गता आत्मविश्रान्तिस्वभावविश्रान्तिविषणीयं वासिष्ठगीतेति ज्ञायते॥

शिवगीता—

षोडशभिरध्यायैः पूर्णेयं गीता अगस्त्योपदेशमुखेन प्रवृत्ता आष्टेकरकम्पनी-मुद्रणालये मुद्रिता ॥ अस्या व्याख्याः—

1. परमशिवेन्द्रसरस्वतीकृता—शिवगीतातात्पर्यप्रकाशिका ।

मुद्रितोऽयं ग्रन्थः वाणीविलासमुद्रणालये अस्य कर्ता परमशिवेन्द्रः ज्ञानेन्द्र-सरस्वतीप्रशिष्यः अभिनवनारायणेन्द्रशिष्यः, सदाशिवब्रह्मेन्द्रगुरुः सप्तदशशतकीय इति (1600–1700 A. D.) इति ज्ञायते ॥

2. ब्रह्मानन्दसरस्वतीकृता शिवगीताव्याख्या ।

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये (R. 926 A. MGOML) लभ्यते । अस्याः कर्ता ब्रह्मानन्दस्समराज सरस्वत्याः सदाशिवतीर्थस्य च शिष्य इति परं ज्ञायते ॥

3. लक्ष्मीनरहरिसूनुकृता—बालानन्दिनी ।

शिवगीताव्याख्यात्मकोऽयममुद्रितग्रन्थः सरस्वतीमहालये (9022 DC. TSML) दृश्यते । अस्य कर्ता भट्टोजीदीक्षितादर्वाचीन इति परं ज्ञायते ॥

4. शङ्करानन्दकृता—शिवगीताव्याख्या ।

अमुद्रितोऽयं ग्रन्थः अडयारपुस्तकालये (9 B 42 क 3 AL) लभ्यते । अस्य कर्ता शङ्करानन्दः भगवद्गीताव्याख्यावसरे प्रतिपादितः ॥

शिवरामगीता

सुखोदयापरनामकाद्वैतसुधारसान्तर्गतेयं गीताऽमुद्रिता मद्रासराजकीयपुस्त-कालये (R. 140 MGOML) अडयारपुस्तकालये (24 F 15 आ AL) मही-शूरसूच्यां च दृश्यते शिवरामसंवादसरण्यां प्रवृत्तोऽयं ग्रन्थः योग-अद्वैतसिद्धान्तान् प्रतिपादयति ॥

श्रुतिगीता—भागवतदशमस्कन्धान्तर्गतेयं गीता ब्रह्मस्तुतिरूपा ।

1. शङ्करानन्दकृता—श्रुतिगीताव्याख्या । अमुद्रितोऽयं ग्रन्थः अडयारपुस्त-कालये (20 E. 25 म 151 AL) लभ्यते । शङ्करानन्दः उपपादितपूर्वः ।

1. श्रीधरस्वामिकृता—श्रुतिगीताव्याख्या ।

2. अज्ञातकर्तृकः—भावबोधः । श्रुतिगीताव्याख्यामूतोऽयं ग्रन्थ अडयार-पुस्तकालये (19 DI म 100 AL), सरस्वतीमहालये च (8990 DC. TSML) लभ्यते ॥

सिद्धगीता—

योगवासिष्ठोपशमप्रकरणान्तर्गतेयं गीता निर्णयसागरमुद्रणालये मुद्रिता ।

सिद्धान्तगीता—

अथर्वणवेदरहस्यान्तर्गतेयं गीताऽमुद्रिता अडयारपुस्तकालये (9 H. 24, 13 AL), सरस्वतीमहालये (9025 DC. TSML) लभ्यते ॥

सूतगीता—

सूतसंहितान्तर्गतेयं गीता आनन्दाश्रममुद्रणालये (ASS 25) बालमनोरमा-मुद्रणालये च मुद्रिता ।

1. माधवमन्त्रिकृता—तात्पर्यदीपिका ।

मुद्रिताचेयं व्याख्या पूर्वोक्तस्थले । ग्रन्थकारोऽयं काशीविलासक्रियाशक्ति-शिष्यः प्रसिद्धविद्यारण्यापराभिधमाधवाचार्याद्भिन्न उपनिषन्मार्गप्रवर्तकाचार्यविरुद्-भागिति ब्रह्मगीताव्याख्याप्रकरण उपपादितम् ।

सूर्यगीता—

वासिष्ठतत्वसारायणान्तर्गतेयं गीता सूर्यारुणसंवादमुखेन प्रवृत्ता अद्वैत-वेदान्तसिद्धान्तप्रतिपादिका आष्टेकरकम्पनिमुद्रितगीतासंग्रहे प्रकाशिता ।

हंसगीता—

कृष्णोद्धवसंवादमुखेन प्रवृत्तेयं गीता आष्टेकरगीतासंग्रहे प्रकाशिता ।

ब्रह्मसूत्रप्रस्थानम्

सर्वकारणकारणं एकमेवाद्वितीयं सत्यज्ञानानन्दस्वरूपं अनन्तं असङ्गं नित्यं ब्रह्म, तज्ज्ञानान्मोक्ष इत्यादिकं सर्वं अलौकिकविषयान्तर्गतम्। एतादृशेऽलौकिके विषये अनाद्यपौरुषेयश्रुतिरेव प्रमाणम्। श्रुतिश्चात्यन्तं दुरवबोधा, यतः श्रुतिवाक्यं संक्षिप्तम्। सङ्गतिप्रदर्शकवाक्यैः प्रायशो विरहितञ्च। भाषा चातिपुरातनी। लोकाश्चोत्तरोत्तरं मन्दबुद्धयः। एवञ्च श्रुतिप्रदर्शितो मार्गः मीमांसकादिविविधदर्शनकारैः कलुषीकृत आसीत्। "उपनिषद्भागोऽयं न श्रुतिशिरोभूतः। किन्तु जीवात्मनोऽविनाशित्वप्रतिपादनेन स्वर्गादिपारलौकिके सुखे विश्वासोत्पादनद्वारा यज्ञादिकर्मकाण्डस्यैवोपोद्बलकस्तदङ्गभूतश्चे'ति लोकानां मतिरभवत्। एतादृशं लोकप्रत्ययं निराकरिष्णुः भगवान् बादरायणः ब्रह्मसूत्राणि प्रणिनाय। ब्रह्मसूत्राणि च श्रुतिमीमांसामुखेनैव तत्त्वोपदेशाय प्रवृत्तानि। श्रुत्यर्थनिर्णयार्थं यो लोकवेदसाधारणो नियमः मीमांसकैराविष्कृत अवधारितश्च तेनैव नियमेन श्रुत्यर्थ अद्वैतमते निरूप्यते। स एव वेदान्तसिद्धान्तः। सोऽयं सिद्धान्त एव ब्रह्मसूत्रैः प्रतिपाद्यते च। अत एव "वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणा' मिति 1-1-2 सूत्रभाष्य उपवर्णितम्। प्रायेण वेदान्तमतविरोधिनस्सर्वेऽपि वेदान्तमतखण्डनायाद्वैतमतमेव खण्डितवन्त इति "व्यासतात्पर्यनिर्णये" अप्पय्यादीक्षितेन प्रदर्शितम्। एतेनेदं स्पष्टं ज्ञायते यत्—"प्राचीना ऋषयः वेदान्तशब्देन अद्वैतमेव बुबुधिरे" इति। शाण्डिल्यभक्तिसूत्रेऽपि "आत्मैकपरां बादरायण" (30) इति सूत्रेण बादरायणमतस्याद्वैत एव ऐदम्पर्यमुक्तं ज्ञायते। बौद्ध-जैना अपि अद्वैतमेव खण्डयन्ति। तस्मात् बादरायणव्यासनिर्मितानि ब्रह्मसूत्राणि अद्वैतमतमूलभूतानि अद्वैतवेदान्ते तृतीयप्रस्थानं सूत्रप्रस्थानमिति विशिष्यते। तस्माद् प्रकरणेऽस्मिन् ब्रह्मसूत्राणि तेषां वृत्त्यादयः ग्रन्थाः, भाष्यं, भाष्यव्याख्या इत्यादयस्सर्वेऽपि ग्रन्थाः यथाक्रमं निरूप्यन्ते।

ब्रह्मसूत्राणि—

"वेदान्तसूत्राणि" "शारीरकसूत्राणि" "ब्रह्ममीमांसासूत्राणि" "उत्तरमीमांसासूत्राणि" इति नाम्ना प्रसिद्धानि ब्रह्मसूत्राणि व्यासरचितानीति प्रसिद्धिः। सूत्राण्येतानि निखिलोपनिषदामर्थसङ्ग्राहकानि। महाभारतादिपुराणानां कर्ता व्यास एवैतेषामपि सूत्राणां कर्ता इति सम्प्रदायविदो वदन्ति। पाणिनेरपि बाद-

रायणव्यासोऽयं प्राक्तन इति "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयो"रिति सूत्रात् ज्ञायते। पाराशर्य-बादरायण-कृष्णद्वैपायन-द्वैपायन-सत्यवतीसुतादि नाम व्यासस्यैवेति महाभारतादिग्रन्थाद् ज्ञायते। ब्रह्मसूत्राणां रचनाकालः द्वापरयुगान्ते कलेरादौ वा प्रायः पञ्चसहस्रवर्षेभ्यः पूर्वमिति सम्प्रदायसिद्धान्तः। "ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्। ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥ (13–3) इति भगवद्गीतायां दर्शनात् सूत्राणामेषां प्राचीनतमत्वं सुसिद्धमेव।

गीतायां निर्दिष्टानि ब्रह्मसूत्राणि किं बादरायणकृतानि? उतान्यानि? इति कर्माकरमहाशयेन "अनालस आफ भण्डार कार" पत्रिकायास्तृतीये भागे (A.B I. Val. III Page 73) विमृष्टम्। विमर्शकैस्तु गीतायां निर्दिष्टानि नैतानि सूत्राणि, तानि नष्टानि, एतानि तु अन्यान्येवेति कथ्यते। ब्रह्मसूत्राणां कालनिर्णये न वयं शक्ताः। परं तु हिरियण्णामहाशयाः क्रैस्तवीयचतुर्थशतकमिति (400 A. D.) वदन्ति। क्रिस्तोः पूर्वं षष्ठशतकात्प्रागिति तु प्रसिद्धिः।

समन्वय - अविरोध - साधन - फलाख्यैश्चतुर्भिरध्यायैः पूर्णोऽयं ग्रन्थः। प्रत्यध्यायं चत्वारः पादाः। प्रतिपादं बहूनि अधिकरणानि। प्रत्यधिकरणं भिन्नविषयाः। शाङ्करमतेन सूत्राणां समष्टिसंख्या 555, अधिकरणानि 191, मुद्रितश्चायं ग्रन्थः निर्णयसागरादिषु बहुषु मुद्रणालयेषु। अस्य व्याख्या भाष्यं वृत्यादि च —

I. शङ्कराचार्यकृतम्—ब्रह्मसूत्रभाष्यम्।

शारीरकमीमांसाभाष्यमित्यपरनामायं ग्रन्थः निर्णयसागर मुद्रणालयेऽन्यत्र च मुद्रितः। उमामहेश्वरेण तत्त्वचन्द्रिकायां शङ्करभगवत्पादैः स्वीये सूत्रभाष्ये एकोनशतं ब्रह्मसूत्रव्याख्याः खण्डिता इत्युक्तम्। भाष्यमिदं स्वीयया रचनाशैल्या गूढतमानां अर्थानां सरससरलभाषया प्रतिपादयत् प्रसन्नगम्भीरमिति प्रसिद्धम्। भाष्येऽस्मिन् वृत्तिकाराः भेदवादिनो नैय्यायिकवैशेषिकसांख्याश्च खण्डिताः। बुद्धमतञ्च खण्डितम्। भाष्येऽस्मिन् ब्रह्मसूत्राणि 191 विभिन्नविषयकेषु अधिकरणेषु विभज्य चतुर्भिरध्यायैरुपवर्णितानि।

अस्य कर्ता विद्याधिराजपौत्रः, शिवगुरुपुत्रः, आत्रेयगोत्रजः, गौडपादप्रशिष्यः, गोविन्दभगवत्पादशिष्यः शङ्करभगवत्पाद इति प्रसिद्धिः। राजशेखर-

राजेन पालिते केरलदेशान्तर्गते कालटिक्षेत्रे लब्धजन्मान एते शङ्कराचार्याः पद्म-पाद-सुरेश्वर-हस्तामलक-तोटकाचार्याणां गुरव अष्टमशतकापरार्धार्धादारभ्य नव-मशतकारम्भान्ते च (788-820 A. D.) काले आसन्निति ज्ञायते। द्विसहस्रेभ्यः वर्षेभ्यः पूर्वमिति साम्प्रदायिकाः। श्री कुप्पुस्वामिशास्त्रिणस्तु स्वीयब्रह्मसिद्धिभूमिकायां शङ्कराचार्यकालं (628-664 A. D.) इति प्रतिपादयन्ति। बालकृष्णपिल्लै महा-शयस्तु "इण्डियन आण्टिक्वैरि" पत्रिकायाः पञ्चाशत्तमे भागे (I. A. Vol. 50, Page 136) शङ्कराचार्याः दशमशतकादिमे भागे आसन्निति वर्णयति। शङ्कराचार्यकालमधिकृत्य विभिन्नाभिसिद्धान्ताः शङ्कराचार्यकृतप्रकरणग्रन्थप्रस्तावे प्रतिपादिताः॥

(क) सूत्रभाष्यव्याख्या—शारीरकन्यायनिर्णयः।

सूत्रभाष्यव्याख्यात्मकोऽयं शारीरकन्यायनिर्णयाख्यः ग्रन्थः निर्णयसागर-मुद्रणालयेऽन्यत्र च मुद्रितः। अस्य कर्ता आनन्दज्ञानापराभिध आनन्दगिरिः। अस्यैव सन्यासस्वीकारात्पूर्वं जनार्दन इति नाम। गुजरातप्रान्तजोऽयं द्वारकास्थ-शाङ्करपीठाधीश आसीत्। आन्ध्रदेशजोऽयमिति साम्प्रदायिकाः। अनुभूति-स्वरूपाचार्यशुद्धानन्दयोशिश्ष्योऽयं आनन्दगिरिः तत्वदीपनकारस्य अखण्डानन्द-सरस्वत्याः, तत्वालोकव्याख्यातुः तत्वप्रकाशिकाकर्तुश्च प्रज्ञानानन्दस्य गुरुः, कलिङ्गदेशाधिपतेर्नृसिम्हदेवस्य सामयिकस्त्रयोदशशतकीयः (1260-1320 A.D.) इति ज्ञायते। आनन्दगिरिणा रचितास्सर्वे ग्रन्था अन्यत्रोपवर्णिताः॥

(ख) सूत्रभाष्यव्याख्या—ब्रह्मविद्याभरणम्।

सूत्रभाष्यव्याख्यात्मकोऽयं ग्रन्थः समग्रचतुरध्यायीभामतीनिगूढभावप्रकाश-नपर अद्वैतमतस्याभरणमेव। ग्रन्थोऽयं अद्वैतमञ्जरीग्रन्थमालायां कुम्भघोणे मुद्रितः।

अस्य कर्ता चिद्विलास इत्यपरनामा अद्वैतानन्दबोधेन्द्रः। अस्यैव पूर्वाश्रमे सीतापतिरिति नाम। प्रेमनाथपार्वतीपुत्रोऽयं द्रविडदेशस्थपञ्चनदक्षेत्रवासीति ज्ञायते। भूमानन्दापरनामभिश्चन्द्रशेखरसरस्वतीभिर्दीक्षितोऽयं रामानन्दसरस्वत्या लब्धविद्य इति च ज्ञायते। (1168-1201 A. D.) द्वादशतमे शतके अद्वैतानन्दबोध आसीदिति साम्प्रदायिकाः। परन्तु सप्तदशशतकस्यादिमे भागे आसीदिति विमर्शकाः। अनेन "शान्तिविवरण" मिति ग्रन्थोऽपि कृतः॥

(ग) सूत्रभाष्यव्याख्या—प्रकटार्थविवरणम्।

पञ्चपादिकाविवरणस्य गूढार्थत्वेन व्याख्यापेक्षतां प्रकटार्थविवरणस्य तदन-पेक्षताञ्च प्रकटीकुर्वन्नयं ग्रन्थः "वाचस्पतिस्तु मण्डनपृष्ठसेवीत्यादिना" भामती-खण्डनपर उदयनसुन्दरपाण्ड्याचार्यब्रह्मप्रकाशिकाः प्रमाणयति। ग्रन्थोऽयं मद्रास-विश्वविद्यालयसंस्कृतग्रन्थमालायां मुद्रितः।

यद्यपि मुद्रितपुस्तके प्रकटार्थकारस्य नाम न निर्दिष्टम्। नापि कल्पतर्वादौ प्रकटार्थविवरणखण्डनावसरे नाम निर्दिश्यते, नैव च दासगुप्तमहाशयेन प्रकटार्थ-विवरणस्य द्वादशशतकापरार्धकालिकत्वं वदता ग्रन्थकर्तुर्नाम निर्दिश्यते, तथापि मद्रासविश्वविद्यालयसंस्कृतविभागभूतपूर्वाध्यक्षेण राघवमहाशयेन अनुभूतिस्वरूपा-चार्यः प्रकटार्थविवरणकार इति भण्डारकाररजतजयन्तीस्मारकपत्रिकायां सिद्धा-न्तितम्।

दक्षिणदेशजोऽपि न्यायवेदान्ताध्ययनाय गुजरातप्रान्तीयकठियावारद्वारका-दिक्षेत्रवासी अनुभूतिस्वरूपाचार्योऽयं आनन्दगिरेः, तत्वालोकव्याख्यातुः प्रज्ञानान-न्दस्य सारस्वतप्रक्रियाव्याख्यातुर्नरेन्द्रनगर्याश्च गुरुः, खण्डनखण्डखाद्यव्याख्याने शिष्यहितैषिण्याख्ये श्रीहर्षं प्रणमन्नयं श्रीहर्षशिष्य इति च ज्ञायते। अदसीया अन्ये ग्रन्था व्याख्यारूपा बहवस्सन्ति। ते तत्तत्प्रकरणे अद्वैताचार्यप्रकरणे च प्रतिपादिताः॥

(घ) सूत्रभाष्यव्याख्या—भाष्यभावप्रकाशिका।

सूत्रभाष्यव्याख्यारूपोऽयं ग्रन्थ अध्यासभाष्यान्त अमुद्रितः मद्रासराजकीय-हस्तलिखितपुस्तकालये (R. 3020, R. 5140 MGOML) अडयार - महीशूर हस्तलिखितपुस्तकालययोश्च लभ्यते।

अस्य कर्ता चित्सुखाचार्यः। चित्सुखाचार्योऽयं नित्यबोधघनज्ञानघनापर-नाम्नः बोधघनस्य प्रशिष्यः, न्यायसुधाज्ञानसिद्धिकारस्य ज्ञानोत्तमस्य शिष्यः, श्वेताश्वतरोपनिषद्दीपिकाकर्तुर्विज्ञानात्मनस्सतीर्थ्यः, सुखप्रकाशाचार्यस्य, आनन्द-गिरिगुरोश्शुद्धानन्दस्य च गुरुरिति ज्ञायते। सुखप्रकाशशिष्य अमलानन्दः शुद्धा-नन्दशिष्य आनन्दगिरिश्च चित्सुखाचार्य प्रशिष्याविति चार्थात् सिध्यति। त्रयोदश-

शतकापरार्धकालिकेन वेदान्तदेशिकेन निर्दिश्यमानोऽयं चित्सुखाचार्यः द्वादशशतकापरार्धसामयिकस्य (1187 A.D.) खण्डनखण्डखाद्यस्य व्याख्यां कुर्वन् द्वादशशतकीय इति (1120 1220 A.D.) निश्चेतुं शक्यते । अनेनान्येऽपि व्याख्याग्रन्थाः तत्त्वप्रदीपिकाख्याः प्रकरणग्रन्थाश्च विरचिताः । ते चान्यत्रोपवर्णिताः ॥

(ङ) सूत्रभाष्यव्याख्या—भाष्यदीपिका–टीकायोजना ।

ग्रन्थोऽयं गोविन्दानन्देन अथवा रामानन्देन कृतायां रत्नप्रभायां निर्णयसागरमुद्रितायां पञ्चमे पुटे (Page 5. NSP Edn.) "आश्रमचरणास्तु टीकायोजनायामेवमाहुः" इति निर्दिष्टः । दासगुप्तमहाशयेन स्वीये भारतीयदर्शनसाहित्येतिहासे (HIP Vol. II Page 103) ग्रन्थस्यास्य भाष्यदीपिका इति नाम निर्दिश्यते ।

अस्य कर्ता नृसिंहाश्रमिणां विद्यागुरुर्जगन्नाथाश्रमः । दक्षिणदेशीयोऽयं पञ्चदशशतकापरार्धादारब्धे काले (1475-1573 A.D.) आसीदिति ज्ञायते ॥

(च) सूत्रभाष्यव्याख्या—विद्याश्रीः ।

अनादिरनन्तोऽयं सूत्रभाष्यव्याख्यात्मकः ग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 3783 MGOML) लभ्यते । अस्य कर्ता ज्ञानघनशिष्यो ज्ञानोत्तमभट्टारक इति ग्रन्थादर्शनात् ज्ञायते । कोऽयं ज्ञानोत्तमः ? किं नैष्कर्म्यसिद्धिव्याख्याता मङ्गलग्रामवासी चोलदेशीयः ज्ञानोत्तमः ? आहोस्वित् गौडेश्वराचार्यापराभिधः गौडदेशवासी न्यायसुधाकारः चित्सुखाचार्यगुरुर्ज्ञानोत्तम इति विशिष्य निर्णेतुं न शक्यते । दासगुप्तेन तु ज्ञानोत्तममिश्र इति नाम निर्दिश्यते । मिश्रान्त नाम निर्दिष्टं नैष्कर्म्यसिद्धिव्याख्यातुरेव । अमुद्रितग्रन्थे तु भट्टारकान्तनाम दृश्यते । भट्टारकान्तनामश्रवणात् आनन्दबोधभट्टारकादिवत् अयमपि द्वादशशतकीयो भवितुमर्हतीति ज्ञायते । सर्वथा द्वादशशतकात्पूर्ववर्तीति निश्चयः ॥

(छ) सूत्रभाष्यटिप्पणी—प्रदीपः

शारीरकभाष्यटिप्पणीत्यपरनामायं ग्रन्थः कलकत्तासंस्कृतग्रन्थमालायां मुद्रितः । अस्य कर्ता महामहोपाध्यायबिरुदभूषितः पालक्काडन्तर्गतनूरणिग्रामवासी सुब्रह्मण्योपाध्यायपुत्र अनन्तकृष्णशास्त्री विंशतिशतकीयः (1886-1965 A. D.) न केवलं

जन्मना शतभूषणीकारः (नूरणिकारः) परन्तु ग्रन्थकरणेनापि शतभूषणीकारः । अदसीया अन्ये ग्रन्थास्समुचितस्थानेषु प्रतिपादिताः ॥

(ज) सूत्रभाष्यार्थप्रदीपिका—

ग्रन्थोऽयं चौखाम्बामुद्रणालये मुद्रितः । अस्य कर्ता गोविन्दानन्दगिरिरिति परं ज्ञायते ॥ वेल्लङ्कोण्डा - रामरायकविकृतो विमर्शाख्यः सूत्रभाष्यार्थसंग्राहक ग्रन्थो विद्यते ।

(झ) सूत्रभाष्यटीका—सुबोधिनी ।

चतुस्सूत्र्यन्तोऽयं ग्रन्थ अद्वैतसभापत्रिकायां मुद्रितः । अस्य कर्ता शिवरामतीर्थशिष्य रामचन्द्रतीर्थ इति ज्ञायते ।

(ञ) सूत्रभाष्यव्याख्या—सुबोधिनी ।

अमुद्रितोऽयं भाष्यव्याख्यात्मकः ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2201 MGOML) अडयारपुस्कालये च लभ्यते । अस्य कर्ता पञ्चीकरणवार्तिकव्याख्यायाः विवरणदीपिकायाः (7306 TSML) कर्ता शिवरामानन्दतीर्थशिष्यः शिवनारायणानन्दतीर्थ इति ज्ञायते । यद्यस्य गुरुश्शिवरामानन्द अद्वैतसिद्धिव्याख्याकारेण ब्रह्मानन्दसरस्वत्या निर्दिष्टात् शिवरामाख्यवर्णिन रत्नप्रभाकर्तुः प्राचार्यात् शिवरामान्नान्यस्तर्हि सुबोधिनीकारोऽयं शिवनारायणानन्दतीर्थः गोपालसरस्वत्यास्सतीर्थ्यष्षोडशशतकादिमे भागे (1550 A. D.) आसीदिति ज्ञायते । परन्त्वस्मिन् प्रबलतरप्रमाणान्वेषणेऽपि ग्रन्थात् तत्र किमपि लभ्यते ॥

(ट) सूत्रभाष्यवार्तिकम्—शारीरकमीमांसाभाष्यवार्तिकम् ।

गद्यमयोऽयं वार्तिकग्रन्थः भाष्यस्य व्याख्यानरूपः । वार्तिकशब्देन व्यवहारेऽपि भाष्ये दुरुक्तचिन्तनं भाष्यखण्डनं वा न दृश्यते । मुद्रितश्चायं ग्रन्थ आशुतोषमुखर्जीग्रन्थमालायां कलकत्तानगरे । अस्य कर्ता नारायणतीर्थापराभिधः नारायणसरस्वती । गोविन्दानन्दसरस्वत्याशिश्यः, लघुचन्द्रिकाकारस्य गौडब्रह्मा-

नन्दसरस्वत्याः गुरू रत्नप्रभाकारस्य रामानन्दसरस्वत्यास्सतीर्थ्यस्सप्तदशशतकीयः (1600–1700 A. D.) इति ज्ञायते। अनेनान्येऽपि अद्वैतामृतकन्दादिग्रन्थाः प्रणीता ये च प्रकरणग्रन्थप्रस्तावे निरूपिताः॥

(ठ) सूत्रभाष्यवार्तिकम्— शारीरकमीमांसाभाष्यवार्तिकम्।

पद्यमयोऽयं भाष्यवार्तिकग्रन्थस्सर्वत्र सुरेश्वरवार्तिकं प्रमाणयन्, भामतीकाराणां अवच्छेदवादं, ईश्वरभावापत्तिरेव मुक्तिरिति, अनेकजीववादे सर्वमुक्तिरिति विवरणकारमतञ्च, अज्ञाननिवृत्तिरेव जीवानां मुक्तिरिति प्रकटार्थकारमतञ्च प्रतिपादयति। सिद्धान्तलेशसंग्रहादिषु प्रतिपादितान् प्रक्रियाविशेषान् भाष्यारोपणप्रयत्नं कुर्वन्नयं ग्रन्थ आशुतोषग्रन्थमालायां कलकत्तानगरे मुद्रितः।

अस्य कर्ता काञ्चीमण्डलान्तर्गतवेदपुरीवासी अभिनवद्राविडाचार्यविरुद्भूषितः श्रीधारानन्दसरस्वत्याः प्राप्तदीक्षः गौडब्रह्मानन्दस्य शिष्यः महादेवकैलासेशगुरुः सप्तदशशतकीय (1600–1700 A. D.) इति निश्चीयते। स्वग्रन्थे "गौणमिथ्यात्मनोऽसत्वे" इत्यादि पद्यं शङ्कराचार्यनिर्दिष्टं द्रविडाचार्यकर्तृकमिति प्रतिपादयन्नयं ग्रन्थकारः बालकृष्णानन्दसरस्वती - श्वेतगिरिप्रारब्धां श्रीधरान्ताञ्च अद्वैताचार्यपरम्परां निर्दिशति। अस्य व्याख्यापि मूलकृतैव कृता मुद्रिता च।

(ड) सूत्रभाष्यसंग्रहः — शारीरकभाष्यसंग्रहः।

अमुद्रितोऽयं शाङ्करभाष्यार्थसंग्राहकः ग्रन्थ उज्जैनसूच्यां दृश्यते। अस्य कर्ता भास्करशर्माभिध आधुनिक विंशतिशतकीय इति ज्ञायते।

(ढ) सूत्रभाष्यसिद्धान्तसंग्रहः—ब्रह्मसूत्रसिद्धान्तसंग्रहः।

शाङ्करभाष्यस्य प्रत्यधिकरणसारार्थं प्रतिपादयति। ग्रन्थकृता प्रथमद्वितीयतृतीयाध्यायानां यथाक्रमं विराट्-विश्व-बीजतुर्याख्या समाख्याता। ग्रन्थोऽयं अडयारग्रन्थालयपुस्तिकामालायां मुद्रितः। अस्य कर्ता रामचन्द्रेन्द्र इत्यपरनामा उपनिषद्ब्रह्मेन्द्रः। प्रथमवासुदेवेन्द्रप्रशिष्यः द्वितीयवासुदेवेन्द्रशिष्यः रामचन्द्रेन्द्रसतीर्थ्यः कृष्णानन्दगुरुश्चायं उपनिषद्ब्रह्मेन्द्रः अष्टादशशतकापरार्धारब्ध एकोनवि-

ंशतिशतकपूर्वान्ते च काले (1760–1850 A. D.) आसीत्। अदसीया अन्ये ग्रन्था अन्यत्र प्रतिपादिताः॥

(ण) सूत्रभाष्यसिद्धान्तसंग्रहः —

ग्रन्थोऽयं चौखम्बामुद्रणालये मुद्रितः। अस्य कर्ता विश्वेश्वरानन्दशिष्यः ब्रह्मानन्द इति परं ज्ञायते॥

(त) ब्रह्मसूत्रभाष्यार्थरत्नमाला —

पद्यमयोऽयं भाष्यार्थसंग्राहकः ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः। अस्य कर्ता सुब्रह्मण्यसूरिः मिण्डिसोमयाजिवंशजः शोणाद्रिसूरिणः वेङ्कटपण्डितस्य च शिष्यस्सर्वेश्वरसूरिणः पुत्रश्चेति परं ज्ञायते॥

(थ) सूत्रभाष्यगाम्भीर्यनिर्णयः —

अनुभाष्यगाम्भीर्यमित्यपरनामायं ग्रन्थः सूत्रभाष्यसारभूतश्शाङ्करभाष्योपरि कथितानां दूषणानां खण्डनपरः। भागवतादिपुराणेभ्य अद्वैतमतस्य श्रैष्ठ्यत्वप्रतिपादनाय बह्व्यः युक्तयः प्रतिपादिताश्च। ग्रन्थोऽयमानन्दाश्रममुद्रणालये मद्रासनगरे मुद्रितश्च। अस्य कर्ता महामहोपाध्यायविरुद्भूषितः अश्वत्थनारायणशास्त्रिपौत्रः रामशङ्करशास्त्रिपुत्रः चोलदेशान्तर्गतशाहजग्रामवासी (तिरुविशनल्लूर) श्रीवत्सगोत्रोत्पन्नः शिवरामशास्त्रिशिष्यः रामसुब्रह्मण्यशास्त्री चन्द्रिकाचार्यभिक्षुसामयिक एकोनविंशतिशतकीय (1850-1920 A. D.) इति ज्ञायते। अदसीया अन्येऽपि बहवः ग्रन्था अन्यत्रोपवर्णिताः॥

(i) सूत्रभाष्यगाम्भीर्यार्थनिर्णयखण्डनम् —


रामसुब्रह्मण्यशास्त्रिकृतस्य भाष्यगाम्भीर्यार्थनिर्णयाख्यग्रन्थस्य खण्डनपरः तत्तद्दर्शितपद्धत्यवहेलनात्मक अद्वैतग्रन्थः वाणीविलासमुद्रणालये मुद्रितः। अस्य कर्ता स्वामिनाथशास्त्रिपौत्रः नृसिंहशास्त्रिपुत्रः शाण्डिल्यगोत्रजः, बन्दरपुरवासी सच्चिदानन्दसरस्वतीशिष्यः गौरीनाथशास्त्री एकोनविंशतिशतकीयः (1850–1920 A. D.) इति ज्ञायते॥

(ii) सूत्रभाष्यगाम्भीर्यार्थनिर्णयमण्डनम्—

गौरीनाथशास्त्रिकृतस्य भाष्यगाम्भीर्यनिर्णयखण्डनग्रन्थस्य खण्डनात्मकः रामसुब्रह्मण्यशास्त्रिकृतभाष्यगाम्भीर्यनिर्णयग्रन्थस्य मण्डनात्मकोऽयं ग्रन्थः ब्रह्मवादिनीमुद्रणालये मद्रासनगरे मुद्रितः । अस्य कर्ता रामसुब्रह्मण्यशास्त्रिशिष्यः कृष्णशास्त्रिनारायणशास्त्रिसतीर्थ्यः वेङ्कटराघवशास्त्री एकोनविंशतिशतकापरार्धादारब्धे काले उवासेति (1850-1920 A. D.) ज्ञायते ॥

(द) ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायमणिमाला —

ग्रन्थोऽयं दासगुप्तमहाशयेन (HIP. Vol. II, Page 82) उद्धृतः । अस्य कर्ता पञ्चपादिकाविवरणकारस्य प्रकाशात्मनः गुरुर्द्वादशशतकीय (1200 A.D.) अनन्यानुभव इति ज्ञायते । (1) गोविन्दविष्णुकृता शाङ्करभाष्यटिप्पणी च मुद्रिता (Bombay, 1867). (2) अनन्तानन्दगिरिकृतः सारसंग्रहनामा भाष्यार्थसंग्राहकः ग्रन्थः मुद्रितः (Benaras, 1900).



(घ) सूत्रभाष्यव्याख्या—पञ्चपादिका —

शाङ्करभाष्यस्य व्याख्यासु बह्वीषु विषयगाम्भीर्यदृष्ट्या अद्वैतसिद्धान्तप्रतिपादनदृष्ट्या महत्त्वेन कालेन च प्राथमिकीयं व्याख्या अद्वैतवेदान्तशास्त्रे विशिष्टप्रस्थानस्य मूलम् । एतस्य ग्रन्थस्य व्याख्योपव्याख्यामुखेन बहवःग्रन्थास्समायाताः । ग्रन्थोऽयं चतुस्सूत्र्यन्त एवोपलभ्यते । नवभिर्वर्णकैः पूर्णोऽयं ग्रन्थः विजयनगरसंस्कृतग्रन्थमालायां निर्णयसागरमुद्रणालये वाणीविलासमुद्रणालये कल्कत्तासंस्कृतग्रन्थमालायां च मुद्रितः । ग्रन्थस्यास्य नाम्नः पर्यालोचनायां पञ्चभिः पादैर्भाव्यम् । परन्तु प्रथमेऽध्याये प्रथमे पादे चतुस्सूत्री एव सर्वत्रोपलभ्यते । ततोऽप्यधिकं पद्मपादेन लिखितः परन्तु नष्ट इति साम्प्रदायिका वदन्ति ।

अस्य कर्ता पद्मपादाचार्यः शङ्कराचार्यशिष्येष्वन्यतमः । आश्रमस्वीकारात् पूर्वं सनन्दनापरनामा विमलनामकस्य विप्रस्य पुत्रः । नद्या उत्तरतीरवर्ती अयं गुरुणाऽऽहूतः सत्वरमागमनाय नदीजले पद्मेषु च पादौ निक्षिप्याजगाम । तादृशीं गुरुभक्तिं दृष्ट्वा शङ्करभगवान् तस्य पद्मपाद इति नाम व्यतानीदिति कथापि प्रसिद्धा । शङ्करभगवच्छिष्योऽयं (800 A.D.) अष्टमशतके आसीदिति निश्चयः । कुप्पुस्वामिशास्त्रिणस्तु ब्रह्मसिद्धिभूमिकायां (625–705 A.D.) इति वदन्ति । पद्मपादाचार्यमधिकृत्य विस्तरत अन्यत्रोपवर्णितम् ।

(i) पञ्चपादिकाव्याख्या—कण्ठीरवः —

ग्रन्थोऽयं पञ्चावसूच्यां 666 दृश्यते । अस्य कर्ता विज्ञानवासोयतिः । विज्ञातवरयतिरितिनामान्तरमपि श्रूयते । मद्रासराजकीयहस्तलिखितपुस्तकालये च (R. 5387 MGOML) लभ्यते ॥

(ii) पञ्चपादिकाव्याख्या – पदयोजनिका —

अमुद्रितोऽयमपूर्णग्रन्थः महीशूरपुस्तकालये (आ. 237) विद्यते । अस्य कर्ता अद्वैतवेदान्तपरिभाषाकारः नृसिम्हाश्रमिप्रशिष्यः वेङ्कटनाथशिष्यः वेङ्कटनाथपुत्रः रामकृष्णदीक्षितस्य पिता त्रिवेदीनारायणदीक्षितस्य भ्राता कौण्डिन्यगोत्रजः ऋग्वेदाध्यायी चोलदेशीयकण्डरमाणिक्यग्रामवासी सप्तदशशतकीयः (1500–1650 A. D.) धर्मराजाध्वरीति ज्ञायते ॥

(iii) पञ्चपादिकाव्याख्या—प्रबोधपरिशोधनी —

अमुद्रितोऽयं पञ्चपादिकाव्याख्यात्मकः ग्रन्थः मद्रासराजकीयहस्तलिखित ग्रन्थालये (R. 3225 MGOML) लभ्यते ।

अस्य कर्ता नृसिम्हस्वरूपशिष्य आत्मस्वरूपः । अनेन द्वादशशतकीयस्यानन्दानुभवीयस्य पदार्थतत्त्वनिर्णयस्य व्याख्या (R. 4219 MGOML) कृता । प्रबोधपरिशोधिन्यां विवरणकारः आचार्यसुन्दरपाण्डयः, गौडाचार्यः, प्रभाकरः, भाट्टाश्च निर्दिष्टाः । (Page 31–37) पर्यन्तं अनिर्वचनीयख्यातिस्सम्यङ्निरूपिता । न तत्र खण्डनखण्डखाद्यादिः ग्रन्थ उल्लिखितः । पदार्थतत्त्वनिर्णयटीकायां उदयनः, न्यायसारः, भूषणम्, ब्रह्मसिद्धिः, प्रमाणमाला, इष्टसिद्धिश्च प्रमाणीकृताः । प्रमाणमालाकारस्तु (1050-1150 A.D.) इति द्वादशशतकीयो भवति । तस्मादस्मादर्वाचीन इति परं ज्ञायते । चित्सुखाचार्यः आनन्दगिरिर्वा नैव निर्दिष्टौ । तस्मात् तयोः पूर्वतनः, अनुभूतिस्वरूपादिवत् स्वरूपान्तनामा चायं द्वादशशतकादारभ्य त्रयोदशशतकपूर्वार्धावधिके काले उवासेति परं ज्ञायते ॥

(iv) पञ्चपादिकाव्याख्या—वक्तव्यप्रकाशिका —

पञ्चपादिकाव्याख्यात्मकोऽयं ग्रन्थः शृङ्गगिरिसूच्यां (56 A) दृश्यते । अस्य कर्ता तत्त्वशुद्धिव्याख्याता चित्सुखाचार्यविज्ञानात्मगुरोः न्यायसुधादिग्रन्थप्रणेतुः ज्ञानोत्तमस्य शिष्य उत्तमज्ञयतिः । अस्य कालः (910-953 A.D.) इति शृङ्गगिरिगुरुपरम्परासूच्यां दृश्यते । श्रीकण्ठशास्त्रिणा तु स्वीये प्रबन्धे (IHQ Vol. XIV) ज्ञानघनकाल एव प्रकाशात्मकाल इति प्रतिपाद्यते । ज्ञानघनश्च ज्ञानोत्तमगुरुरिति ज्ञानघनप्रशिष्यस्य ज्ञानोत्तमस्य शिष्यस्य उत्तमज्ञयतेः कालः दशमशतकान्तादारब्धः एकादशशतकपूर्वार्धावधिकः (958-1038 A.D.) इति सिध्यति । मतान्तरे (1100-1200 A.D.) इति च । अनेन कृता तत्त्वशुद्धिव्याख्या प्रकरणग्रन्थप्रस्तावे लिखितेति नेह प्रतन्यते ।

(v) पञ्चपादिकाव्याख्या—वेदान्तरत्नकोशः —

पञ्चपादिकाव्याख्यात्मकोऽयं ग्रन्थ अमुद्रित अपूर्णश्च मदरासराजकीयहस्तलिखितपुस्तकालये (R. 2626 MGOML,) तञ्जपुर सरस्वतीमहालये, महीशूरराजकीयपुस्तकालये च लभ्यते । अस्य कर्ता अद्वैतदीपिकातत्त्वविवेकादिकर्ता जगन्नाथाश्रमि–गीर्वाणेन्द्रसरस्वतीशिष्यः, धर्मराजाध्वरिगुरोर्वेङ्कटनाथस्य, भट्टोजिदीक्षितकनीयसः भ्रातुः रङ्गोजीभट्टस्य च गुरुः, काञ्चीमण्डलान्तर्गतपुरुषोत्तमपुरवासी सच्चिदानन्दशास्त्रीत्यपरनामा नृसिम्हाश्रमीति ज्ञायते । अद्वैतदीपिकानेन "वेदवियद्रसेन्दुगुणिते" (1603-1547 A.D.) काले रचितेति कालोऽस्य (1500-1600 A.D.) इति निश्चीयते । अदसीयाः प्रकरणग्रन्था अन्यत्रोपपादिताः ॥

(vi) पञ्चपादिकाव्याख्या —

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 4336 MGOML) लभ्यते । अस्य कर्ता ज्ञानोत्तमशिष्यः, ज्ञानघनप्रशिष्यः चित्सुखाचार्यसतीर्थ्यः परमानन्दशङ्करीत्यपरनामा विज्ञानात्मा इति ज्ञायते । अस्य कालः द्वादशशतकम् (1100-1200 A.D.) । शृङ्गगिरिसूच्यांतु ज्ञानोत्तमकालः दशमशतकमिति ज्ञायते । "तात्पर्यद्योतनिका" इति नामेति केचित् ॥

(vii) पञ्चपादिकाव्याख्या —

अमुद्रितोऽयं ग्रन्थः लन्दननगरस्थ भारतकार्यालयपुस्तकालये (2261 D. C. IOL London Vol. IV) दृश्यते । ग्रन्थेऽस्मिन् "प्रकाशात्मयतिष्टीकां विवृतिं कृतवान् पराम् । आनन्दपूर्णमुनिना भावस्तस्याः प्रकाश्यते" ॥ इति दर्शनात् पञ्चपादिकाविवरणानुसारी स्वतन्त्रव्याख्यात्मकः ग्रन्थ इति ज्ञायते । अस्य कर्ता खण्डनखण्डखाद्यव्याख्याता विद्यासागर इति प्रसिद्धः, श्वेतगिर्यभयानन्दयोः शिष्यः पुरुषोत्तमानन्दसरस्वतीगुरुरानन्दपूर्ण इति ज्ञायते । अनेन कृतायां बृहदारण्यकोपनिषद्व्याख्यायां न्यायकल्पलतिकायां प्रतिलिपिकालः (1499 सं. 1443 A.D.) इति (R. 5283) ज्ञायते । तस्मात्तत्कालात् पूर्वतन इति तु निश्चयः । राघवमहोदयास्तु स्वीये प्रबन्धे (AOR Madras Vol IV Part I) कामदेवभूपालकालिकोऽयं विद्यासागर (1350 A.D.) काल आसीदिति प्रतिपादयन्ति ॥

(viii) पञ्चपादिकाव्याख्या—तत्त्वप्रदीपिका —

अज्ञातकर्तृनामधेयोऽयं ग्रन्थः पञ्चाबसूच्यां 668 लभ्यते ।

(ix) पञ्चपादिकाव्याख्या—पञ्चपादिकाविवरणम् —

वेदान्तशास्त्रे प्रस्थानद्वयस्य प्रचारे प्रकाशात्मनः पञ्चपादिकाविवरणम्, भामती च कारणम् । अनयोः प्रस्थानयोः भेदस्य कारणं एकेश्वरवादाविद्याश्रयादिवादयोरङ्गीकारानङ्गीकार एवेति च प्रसिद्धम् । पञ्चपादिकाव्याख्यात्मकोऽयं ग्रन्थः विजयनगरसंस्कृतग्रन्थमालायां कलकत्तासंस्कृतग्रन्थमालायाञ्च मुद्रितः ।

अस्य कर्ता स्वयम्प्रकाशानुभवापरनामा अनन्यानुभवशिष्यः प्रकाशात्मा तत्वशुद्धिकारस्य ज्ञानघनस्य सामयिकः दशमशतकीय (1000 A. D.) इति निश्चीयते । अस्य गुरुणा अनन्यानुभवेन "आत्मतत्व"मिति ग्रन्थः कृतः यश्च ज्ञानघनेन तत्वशुद्धौ उद्धृत इति श्रीकण्ठशास्त्री (IHQ Vol. XIV) प्रतिपादयति । अनन्यानुभवेन शारीरकन्यायमणिमालाख्यः ग्रन्थः कृतः इति दासगुप्तः (HIP Vol. II Page 82) प्रतिपादयति । प्रकाशात्मा त्रयोदशशतकीय इति, श्रीकण्ठशास्त्री दशमैकादशशतकान्तरालवर्तीति च विभिन्नाः मतभेदाः दृश्यन्ते । दासगुप्तस्तु (1200–1300 A.D.) इति । श्रीकण्ठशास्त्री तु (950–1050 A.D.) इति ॥

1. पञ्चपादिकाविवरणोज्जीविनी —

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 592) लभ्यते । वादिराजाख्येन द्वैतमतावलम्बिना पञ्चपादिकाविवरणव्याख्या —"विवरणविवरण"—निर्माणव्याजेन विवरणोपरि उद्भावितानां दूषणानां खण्डनपरोऽयं ग्रन्थः । अस्य कर्ता काश्यपगोत्रजः बह्वृचशाखाध्यायी, चर्कूरिवंश्यः, यज्ञेश्वरपुत्रः, कोण्डुभट्टोपाध्यायगङ्गाम्बिकयोः पुत्रः तिरुमलैदीक्षितकनीयान् भ्राता, यज्ञेश्वरकृष्णाश्रमयोः शिष्यः यज्ञेश्वरदीक्षित इति एतद्ग्रन्थपरिशीलनात् ज्ञायते । "नृसिम्हाश्रमियोगीन्द्र ग्रन्थ शाणनिकषातः । क्षुद्रग्रन्थानुपेक्ष्याहं करोमि विमलां वियम् ।" इति पञ्चपादिकाविवरणोज्जीविन्यां दर्शनात् नृसिम्हाश्रमादर्वाचीन इति (1600–17000 A. D.) ज्ञायते । दक्षिणदेशवासी शाहेन्द्रकालिकोऽयं ईश्वरगीताया अपि व्याख्याता शास्त्रदीपिकाव्याख्याप्रभामण्डलकारश्चेति निश्चीयते ॥

2. पञ्चपादिकाविवरणव्याख्या—ऋजुविवरणम्

पञ्चपादिकाविवरणव्याख्यात्मकोऽयं ग्रन्थ कलकत्तानगरे मुद्रितः । अमुद्रितादर्शग्रन्थास्तु मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2957 MGOML) अड्यारपुस्तकालये तिरुवनन्तपुरं पुस्तकालये च लभ्यते । अस्य कर्ता त्रिणेत्रपौत्रः जनार्दनपुत्रः हरिहरबुक्करायपालितस्य विजयनगरवासिनः तर्कभाषाव्याख्याकारस्य चतुर्दशशतकान्तवासिनः चेन्नुभट्टस्य (चिन्नभट्टस्य) पिता स्वामीन्द्रपूर्णशिष्यः सर्वशास्त्रविशारदः चतुर्दशशतकपूर्वार्धवासी (1280–1350 A.D.) सर्वज्ञविष्णुभट्टोपाध्याय इति ज्ञायते ।

आनन्दगिरेरेव सन्यासस्वीकारात्पूर्वं जनार्दन इति नामेति प्रसिद्धम् । विष्णुभट्टोपाध्यायपितुर्जनार्दनस्य जनार्दनापरनामकानन्दगिरेश्च यदि ऐक्यं तर्हि आनन्दगिरिपुत्रः विष्णुभट्टोपाध्याय इति सिध्यतीति तर्कसंग्रहभूमिकायां त्रिपाठीमहाशयः । एवञ्चायं गुजरातप्रान्तज इति सिध्यति । आन्ध्रदेशाभिजन इति तु साम्प्रदायिकाः ।

विष्णुभट्टशिष्येण सर्वदर्शनसंग्रहकर्त्रा माधवाचार्येण शाङ्करदर्शनप्रतिपादनावसरे ऋजुविवरणं निर्दिष्टम् । एवञ्चायं सायणमाधवगुरुरिति "इण्डियन् अण्टिक्वैरि" पत्रिकायां (1916, Page 2) प्रतिपादितम् ।

श्रीकण्ठशास्त्रिणस्तु भारतीयैतिहासिकत्रैमासिकपत्रिकाया चतुर्दशतमे भागे (IHQ. Vol. XIV) एवं वर्णयन्ति ।

विद्याशङ्करश्शार्ङ्गपाणिपुत्रः बिल्वारण्यजश्च । अस्य आश्रमस्वीकारात्पूर्वं सर्वज्ञविष्णुरिति नाम । स च कामकोटिपीठाधीशात् चन्द्रशेखरसरस्वत्याः प्राप्ताश्रमः कामकोटिपीठाधीशश्चासीत् । अत्र प्रमाणम्—

"बिल्वारण्यज शार्ङ्गपाणितनयः सर्वज्ञविष्णुश्श्रयन्
सन्यासं गुरुचन्द्रशेखरमुनेरास्थाय पीठं गुरोः ।
योगेशस्य च चक्रराजवसतेः देव्याश्च सक्तोऽर्चने
श्रीमन्माधवबुक्कभूपतियति (भारतियति) श्रेष्ठैः-मेहिष्ठैर्वृतः ॥"

इति कामकोटिपरम्परा । एवञ्च शार्ङ्गपाणि-जनार्दनौ यद्यभिन्नौ तर्हि ऋजुविवरणकारस्सर्वज्ञविष्णुभट्टः विद्याशङ्करान्न भिन्न इति ॥

विद्यातीर्थस्यैव विद्याशङ्कर इति नामान्तरमपीति प्रसिद्धिः। एवञ्च विद्यातीर्थविद्याशङ्करः सर्वज्ञविष्णुभट्टविद्याशङ्कराद्भिन्नो वा उताभिन्न इत्यस्माकं संशय उदेति ॥

क. ऋजुविवरणव्याख्या—अत्यन्तभावदीपिका—

अमुद्रितोऽयं ऋजुविवरणव्याख्यात्मको ग्रन्थः मद्रासराजकीयहस्तलिखित-पुस्तकालये (R. 2956 MGOML) लभ्यते। अस्य कर्ता वैय्यासिकन्यायमाला-दृग्दृश्यविवेककारस्य भारतीतीर्थस्य शिष्यः रामानन्दतीर्थः चतुर्दशशतकीयः (1300–1400 A D.) इति ज्ञायते ॥

ख. अज्ञातकर्तृनामधेया—ऋजुविवरणव्याख्या। ग्रन्थोऽयं अनन्तशयन-पुस्तकालये लभ्यते ॥

3. पञ्चपादिकाविवरणव्याख्या—टीकारत्नम्—

अमुद्रितोऽयं पञ्चपादिकाविवरणव्याख्याग्रन्थः मद्रासराजकीयहस्तलिखित-पुस्तकालये (R. 3406 MGOML) लभ्यते। अस्य कर्ता विद्यासागर इति प्रसिद्धः श्वेतगिर्यभयानन्दयोगिशिष्यः पुरुषोत्तमसरस्वतीगुरुः चतुर्दशशतकीयः (1350 A.D.) आनन्दपूर्ण इति ज्ञायते ॥

4. पञ्चपादिकाविवरणव्याख्या—तत्वदीपनम् —

पञ्चपादिकाविवरणव्याख्यात्मकोऽयं ग्रन्थश्चतुस्सूत्र्यन्तः वाराणस्यां, कल्कत्तायां विजयनगरसंस्कृतग्रन्थमालायाञ्च मुद्रितः। अस्य कर्ता अखण्डानुभूति-आनन्दगिर्योर्शिष्यः विष्णुभट्टोपाध्यायसतीर्थ्यः त्रयोदशचतुर्दशशतकमध्यवासी (1250–1350 A.D.) अखण्डानन्दमुनिरिति ज्ञायते। अनेन आनन्दगिरिर्बोध-पृथ्वीधरशब्देन निर्दिष्टः। महामहोपाध्याय अनन्तकृष्णशास्त्रिणः स्वसम्पादिते ब्रह्म-सूत्रभाष्यग्रन्थे (CSSI) तत्वदीपनकारस्य अखण्डानन्दमुनेः भामतीव्याख्या ऋजु-प्रकाशिकाकर्तुः अखण्डानन्दसरस्वत्याश्च ऐक्यं सम्भावयन्ति। ऋजुप्रकाशिकाकर्तुः गुरोस्स्वयम्प्रकाशाख्यता गौणीति आनन्दगिरिरेव नमस्कृत इति च प्रतिपादयन्ति।

परन्तु इम्मिडिजगदेकरायकालिकात् षोडशसप्तदशशतकवर्तिनः ऋजुप्रका-शिकाकारात् अखण्डानन्दसरस्वत्या तत्वदीपनकारोऽयं अखण्डानन्दमुनिर्भिन्न एवेति

प्रतीयते। केशवमिश्रकृतायाः तर्कभाषायाः व्याख्या गोवर्धनेन कृता। गोवर्धन-कृतायाः व्याख्यायाः व्याख्या ऋजुप्रकाशिकाकारेण अखण्डानन्देन रचिता। गोव-र्धनकालस्तु (1560 A.D.) इति प्रसिद्धम्। तस्माच्च ऋजुप्रकाशिकाकारात् तत्वदीपनकारः भिन्न इति प्रतीयते। ऋजुप्रकाशिकाकारस्तत्वानुसन्धानकारस्य महा-देवसरस्वत्यास्सतीर्थ्यः। महादेवसरस्वती च षोडशशतकापरार्धादारब्धे समये आसीत्। तस्माच्च तत्वदीपनकारः ऋजुप्रकाशिकाकारात् भिन्न इति प्रतीयते। रङ्गनाथापरनाम्ना ऋजुप्रकाशिकाकारेण अखण्डानन्दसरस्वत्या नृसिम्हाश्रमीयस्य अद्वैतरत्नकोशस्य व्याख्या रत्नकोशप्रकाशिका (भावप्रकाशिका) नाम्नी लिखिता या च मैसूरपुस्तकालये लभ्यते। नृसिम्हाश्रमिणस्तु कालः 1547 A.D. इति प्रसिद्धम्। तस्मादपि कारणात् तत्वदीपनकारः ऋजुप्रकाशिकाकारात् भिन्न इति प्रतिभाति ॥

(A) पञ्चपादिकाविवरणतत्वदीपनसारः

अमुद्रितोऽयं विवरणतत्वदीपनसंग्राहकः ग्रन्थः बरोडासूच्यां (1955) दृश्यते। अस्य कर्ता राघवानन्दयोगिशिष्यः केरलवर्मसामयिकः विनायक इति ज्ञायते। यद्ययं विनायकगुरू राघवानन्दः परमार्थसारव्याख्याता स्यात् तर्हि विनायकस्यापि कालः (1600-1700 A. D.) सप्तदशशतकमिति निर्णेतुं शक्यते। नान्यदत्र प्रमाणं लभ्यते ॥

5. पञ्चपादिकाविवरणव्याख्या—भावद्योतनिका

"तात्पर्यदीपिका" इत्यपरनामायं ग्रन्थ अमुद्रितः मद्रासराजकीयहस्त-लिखितपुस्तकालये (R. 4305) लभ्यते। तत्रैव मुद्रितश्च। अस्य कर्ता ज्ञानघनप्रशि-ष्यः न्यायसुधाकारस्य ज्ञानोत्तमस्य शिष्यः विज्ञानात्मनस्सतीर्थ्यः सुखप्रकाशशुद्धानन्द-योर्गुरुः अमलानन्दानन्दगिर्योः प्राचार्यः द्वादशशतकीयः चित्सुखाचार्य इति ज्ञायते।

6. पञ्चपादिकाविवरणभावप्रकाशिका

प्रथमवर्णकमात्रोऽयं ग्रन्थः पञ्जाबसूच्यां (900) दृश्यते। अस्य कर्ता परि-व्राजकाचार्य इति निर्दिष्टः। नृसिम्हाश्रमिकृता भावप्रकाशिका स्यादिति संशयः ॥

7. पञ्चपादिकाविवरणव्याख्या—भावप्रकाशिका

मुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये । अस्य कर्ता अद्वैतदीपिकातत्वविवेकादिग्रन्थकर्ता जगन्नाथाश्रमगीर्वाणेन्द्रसरस्वतीशिष्यः नारायणाश्रमिवेङ्कटनाथरङ्गोजिभट्टगुरुः काञ्चीमण्डलान्तर्गतपुरुषोत्तमपुरवासी सच्चिदानन्दशास्त्रीत्यपरनामा नृसिंहाश्रमः षोडशशतकीय (1500–1600 A. D.) इति ज्ञायते ॥

8. पञ्चपादिकाविवरणव्याख्या—विवरणदर्पणम्

अपूर्णं अमुद्रितश्चायं ग्रन्थः सरस्वतीमहालये (7064 TSML) लभ्यते । अस्य कर्ता अद्वैतविद्यामुकुरकर्ता भारद्वाजगोत्रोत्पन्नः, काञ्चीपुरान्तर्गतअडयप्पलग्रामवासी प्रसिद्धतराप्पय्यदीक्षितपिता वक्षस्थलाचार्यापरनामकाचार्यदीक्षितस्य तोतारम्बायाश्च पुत्रः बोम्मराजसभापण्डितः षोडशशतकपूर्वार्धान्तकालवासी (1500–1550 A. D.) रङ्गराजाध्वरीति ज्ञायते ॥

9. पञ्चपादिकाविवरणोपन्यासः—

पञ्चपादिकाविवरणतात्पर्यसङ्ग्राहकोऽयं ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः । गद्यात्मकविवरणेन साकं अर्थसङ्ग्राहकश्लोका अपि विद्यन्ते । अस्य कर्ता शिवरामगोपालानन्दसरस्वत्योः प्रशिष्यः गोविन्दानन्दशिष्यः, स्वयम्प्रकाशानन्दसरस्वत्याश्च शिष्यः रत्नप्रभाकारः षोडशशतकापरार्धवासी रामानन्दसरस्वतीति ज्ञायते ॥

10. विवरणप्रमेयसङ्ग्रहः—

पञ्चपादिकाविवरणगतानर्थान् सङ्गृह्णन्नयं ग्रन्थः विजयनगरसंस्कृतग्रन्थमालायां मुद्रितः । सिद्धान्तलेशसंग्रहे "विवरणोपन्यासे भारतीतीर्थवचनम्" (Page 68) इति दर्शनात् अस्यैव विवरणोपन्यास इति नामान्तरं स्यादित्यूह्यते । अस्य विवरणप्रमेयसंग्रहस्य कर्ता भारद्वाजगोत्रजः, माधवाचार्यापरनामा, सङ्गमराजमहामन्त्रिणः मायणस्य श्रीमत्याश्च पुत्रः सायणभोगनाथयोः सिङ्गलायाश्च भ्राता, अद्वैतमकरन्दकारस्य लक्ष्मीधरस्य मातुलः, विजयनगराधीशबुक्कणक्ष्मापतिसामयिकः विद्यातीर्थभारतीतीर्थ-श्रीकण्ठाचार्य-शङ्करानन्दानां शिष्यः, विद्यातीर्थ-नृसिंहतीर्थप्रशिष्यः, कृष्णानन्दभारती - ब्रह्मानन्दभारती - रामकृष्णानां गुरुः, अमलानन्दसामयिकः त्रयोदशचतुर्दशशतकमध्यवासी (1296-1386 A. D.) विद्यारण्य इति ज्ञायते ॥

11. पञ्चपादिकाविवरणसंग्रहः—अद्वैतभूषणम्

विवरणप्रस्थानानुसारी ग्रन्थोऽयं पञ्चपादिकाविवरणगतानर्थान् सङ्गृह्णाति । विवरणप्रमेयसंग्रह इत्यपि क्वचिदादर्शपुस्तकेष्वस्य नाम दृश्यते । मुद्रितश्चायं ग्रन्थ ब्रह्मविद्यापत्रिकायाम् । अस्य कर्ता गीर्वाणेन्द्रसरस्वतीशिष्यः विश्वाधिकसरस्वतीशिष्यः नृसिंहाश्रमिसतीर्थ्यः चोलदेशीयतञ्जाऊरसमीपस्थगोविन्दपुरवासी नामामृतरसायनात्मबोधव्याख्याकारः बोधेन्द्रसरस्वती पञ्चदशशतकापरार्धान्तारम्भकालवासी (1450-1550 A. D.) इति ज्ञायते । साम्प्रदायिकास्तु बोधेन्द्रगुरुर्गीर्वाणेन्द्रः नीलकण्ठदीक्षितगुरुर्गीर्वाणेन्द्र एवेति वदन्ति । एवञ्चास्य काल (1650-1750 A. D.) इति सिध्यति ॥

(A) अद्वैतभूषणव्याख्या—आनन्ददीपिका

बोधेन्द्रसरस्वतीकृतस्य पञ्चपादिकाविवरणसङ्ग्राहकस्य अद्वैतभूषणस्य व्याख्यात्मकोऽयं ग्रन्थः आनन्ददीपिकानामा अमुद्रितः मैसूरपुस्तकालये लभ्यते । अस्य कर्ता रामचन्द्रेन्द्रापरनामानां उपनिषद्ब्रह्मेन्द्राणां शिष्येष्वन्यतमः, कृष्णानन्दसतीर्थ्यः वासुदेवप्रशिष्यः एकोनविंशतिशतकीय (1800-1900 A. D.) वासुदेवेन्द्र इति ज्ञायते ॥

12. पञ्चपादिकाविवरणव्याख्या

ग्रन्थोऽयं दासगुप्तमहाशयेन स्वीयभारतीयदर्शनसाहित्यचरिते (HIP Vol. II Page 52) निर्दिष्टः । अस्य कर्ता संक्षेपशारीरकव्याख्यानान्वयार्थप्रकाशिकाकारः, कृष्णतीर्थशिष्यः, सिद्धान्ततत्त्वकर्तुरनन्तदेवप्रथनस्य संक्षेपशारीरकव्याख्यासुबोधिनीकारस्य पुरुषोत्तममिश्रस्य च गुरुः नृसिंहाश्रमिसामयिक रामतीर्थ इति ज्ञायते । अनेन कृतायां पञ्चीकरणविवरणव्याख्यायां "जगन्नाथाश्रमाद्या ये गुरवो मे कृपालवः" इति नृसिंहाश्रमिगुरुर्जगन्नाथाश्रमोऽपि स्वगुरुत्वेन निर्दिष्टः । अनेन मानसोल्लासव्याख्या (1630 सं 1574 A. D.) काले कृत इति रायल आसियाटिकसोसाइटि बम्बईस्थात् आदर्शग्रन्थात् (120 R.A.S Bombay) ज्ञायते । तस्मादयं रामतीर्थः षोडशसप्तदशशतकान्तरालवर्तीति (1570-1670 A. D.) निश्चीयते ॥


13. **पञ्चपादिकाविवरणव्याख्या—**

ग्रन्थोऽयमपि दासगुप्तमहाशयेन भारतीयदर्शनेतिहासे (Hip vol II Page 103) निर्दिष्टः । अस्य कर्ता श्रीकृष्णाख्यः यश्चाधुनिक इति निश्चीयते ।

14. **पञ्चपादिकाविवरणव्याख्या** — ग्रन्थोऽयं कुत्रास्तीति न ज्ञायते। परन्तु अस्य कर्ता नरेन्द्रपुरीति कामकोटिसूच्या अवगम्यते ।

15. **विवरणतात्पर्यम्**— अज्ञातकर्तृनामायं ग्रन्थ अडयारपुस्तकालये (470 AL) लभ्यते ॥

पञ्चपादिकाविवरणप्रस्थानम्



(न) सूत्रभाष्यव्याख्या—भामती

शङ्करभाष्यव्याख्यात्मकोऽयं अद्वैतवेदान्तशास्त्रे विशिष्टप्रस्थानस्य भामती-प्रस्थानाख्यस्य मूलं महान् ग्रन्थः सव्याख्यः निर्णयसागरमुद्रणालये कलकत्तायां अन्यत्र बहुत्र स्थलेषु मुद्रितः । अस्य कर्ता ब्रह्मतत्त्वसमीक्षा–न्यायवार्तिकटीकादि-

ग्रन्थकर्ता षड्दर्शिनीटीकाकृत् मण्डनमिश्रमतानुसारी तत्त्वचिन्तामणिप्रकाश–न्याय-सूत्रोद्धारादिकर्तुर्वाचस्पतेर्भिन्न आचार्यवाचस्पतिमिश्रः । सोऽयं वाचस्पतिमिश्रः मिश्रान्तनामसम्बन्धात् मुरारिमिश्रपार्थसारथिमिश्रादिवत् मैथिल इति ज्ञायते । केचित्तु नेपालप्रान्ते भामा नामकः कश्चन ग्रामः । तत्रधिवसन् वाचस्पतिमिश्रः तद्देशप्रसिध्यै तद्देशस्मरणाय वा भामतीग्रन्थं चकारेति वदन्ति । सम्प्रदायसमागता तु कथा—

वाचस्पतिमिश्रस्य भामतीनाम्न्या श्रीमत्या सह विवाह आसीत् । विवाहकाले काचन पण्डितपरिषत्सञ्जाता । वेदान्तशास्त्रे वादस्समजनि । वेदान्तेतरविदुषां वादः युक्तयश्च प्रबला अद्वैतवादिनां युक्तय दुर्बलाश्चासन् । ततः प्रभृति अद्वैतवेदान्त-युक्तीः सबलास्सप्रमाणाश्च कर्तुं यत्नं कुर्वतः ग्रन्थस्यास्य रचयितुर्वाचस्पतिमिश्रस्य गतं नवीनं वय । ग्रन्थनिर्माणे मग्नस्यास्यापरे वयसि काचन नातिवृद्धा नष्टप्राययौव-ना स्त्री समायाता । ताञ्च स्वपत्नीं अक्षतयोनिं असञ्जातसन्ततिं स्वं ग्रन्थनिर्माणे मग्नञ्च ज्ञात्वा स्वरचितग्रन्थस्य भामतीति स्वपत्न्याः नाम चकारेति । अपरे तु वाचस्पतिमिश्रस्य कन्या भामतीनाम्नी यस्यास्स्मृत्यै स्वग्रन्थस्य तन्नाम चकारेति वदन्ति । परन्तु ग्रन्थात् एतादृशवादानां किमपि प्रमाणं नास्ति ।

तात्पर्यटीकायां वाचस्पतिमिश्रैः "त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखैः" इति कथनात् वाचस्पतिमिश्रगुरोर्नाम त्रिलोचनमिश्र इति ज्ञायते । केचित्तु "मार्ता-ण्डतिलकस्वामिमहागणपतीन्वयम्" इति भामत्यां मङ्गलाचरणात् तिलकस्वामी अस्याचार्य इति वदन्ति । परन्तु अमलानन्देन समस्तशब्दोऽयं मार्ताण्डतिलक-स्वामिशब्दः देवतापर इति व्याख्यातम् । एवञ्च तिलकस्वामी नास्याचार्य इति भवति । उदयनाचार्येण न्यायवार्तिकतात्पर्यपरिशुध्यां वाचस्पतिमिश्रः त्रिलोचनशिष्य इत्येव प्रतिपाद्यते । दासगुप्तमहाशयस्तु विद्यातरुरपि अस्य गुरुरिति (HIP Vol. II 107) प्रतिपादयति ।

वाचस्पतिमिश्रेण "न्यायसूचीनिबन्धः" वस्वङ्कवसुवत्सरेषु निर्मितः । यदि वयं वस्वङ्कवसुवत्सरान् 898 शकाब्दान् स्वीकुर्मस्तर्हि अस्य काल 898-976 A.D. इति दशमशतकमस्य काल इति सिध्यति । यदि विक्रमाब्दान् स्वीकुर्मस्तर्हि अस्य कालः 898 सं. 842 A. D. इति सिध्यति । सर्वथा नवमशतकवर्तीति तु निश्चयः ॥

(न) I. भामतीव्याख्या—कल्पतरुः

भामती व्याख्यात्मकोऽयं ग्रन्थः यत्र तत्र प्रकटार्थकारं खण्डयन् भामती-पक्षमक्षुण्णं साधयति । मुद्रितश्चायं ग्रन्थः वाणीविलासमुद्रणालये निर्णयसागर मुद्राणालये च । अस्य कर्ता दीक्षाग्रहणे आनन्दात्मप्रशिष्यः अनुभवानन्दशिष्यः विद्यायां चित्सुखाचार्यप्रशिष्यः सुखप्रकाशशिष्यश्चायं व्यासाश्रम इत्यपरनामा अमलानन्दः त्रयोदशशतकापरकालिकः 1247-1317 A. D. इति निश्चीयते । देवगिरिराजः कृष्णः तद्भ्राता महादेवश्च ग्रन्थेऽस्मिन् निर्दिष्टौ ।

1. कल्पतरुव्याख्या —परिमलः

कल्पतरुव्याख्यात्मकोऽयं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः । अस्य कर्ता वक्षस्थलाचार्यापरनामकस्य आचार्यदीक्षितस्य पौत्रः, विवरणदर्पणकारस्य रङ्गराजाध्वरिणः पुत्रः, पितुरेव प्राप्तविद्यः, सच्चिदानन्दशास्त्रीत्यपरनामकात् नृसिम्हाश्रमिणः प्राप्ताद्वैतमतपक्षपातः, काञ्चीमण्डलान्तर्गताडयप्पलग्रामवासी, आचार्यदीक्षितस्य भ्राता रत्नखेटश्रीनिवासदीक्षितजामाता, मङ्गलनायिकायाः भर्ता, नीलकण्ठ-उमामहेश्वर-चन्द्रावतंसानां पिता, चतुरधिकशतग्रन्थप्रणेतृत्वेन प्रसिद्धः षोडशशतकवासी (1520-1593 A.D.) अप्पय्यदीक्षितः ।

(A) परिमलसंग्रहः

अप्पय्यदीक्षितकृतं परिमलं संगृह्णात्ययं ग्रन्थः । अमुद्रितोऽयं ग्रन्थः प्रथमाध्यायतृतीयपादान्तं मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2811) लभ्यते । अस्य कर्ता दक्षिणदेशीयः उपनिषद्ब्रह्मेन्द्रपरम्परागतः रामचन्द्राश्रमिशिष्यः अष्टादशशतकीयः 1700-1800 तारकब्रह्माश्रमीति ज्ञायते । अनेनोपनिषदामपि सारस्सङ्गृहीतः ।

2. कल्पतरुव्याख्या—आभोगः

अप्पय्यदीक्षितीयपरिमलार्थानुसारिणीयं कल्पतरुव्याख्या आभोगनाम्नी मद्रासराजकीयहस्तलिखितपुस्तकालयग्रन्थमालायां मुद्रिता । अस्य कर्ता कोण्डुभट्टरमाम्बयोः पुत्रः महीश्वरवंशजः नारायणेन्द्रसरस्वतीशिष्यः सप्तदशशतकापरार्धवासी (1650-1750 A. D.) लक्ष्मीनृसिम्हः । यद्ययं कोण्डुभट्टः रङ्गोजिभट्टस्य पुत्र

भट्टोजिदीक्षितस्य भ्रात्रीयस्स्यात्तर्हि लक्ष्मीनृसिम्हः रङ्गोजिभट्टपौत्र इति भवेत् । तिरुविशनल्लूर रामसुब्रह्मण्यशास्त्रिकृते "न्यायेन्दुशेखर दोषयोगघटन" ग्रन्थे तु लक्ष्मीनृसिम्हः कोट्टयूर्ग्रामवासीति निर्दिश्यते । एवञ्चायं दाक्षिणात्यो भवति । अनेन व्याकरणशास्त्रेऽपि सिद्धान्तकौमुदीव्याख्या विकासनामा ग्रन्थो विरचितः ।

(A) आभोगटिप्पणी

आभोगार्थं सङ्गृह्णन् आभोगार्थं मन्दाधिकारिबोधार्थं विशदयत्ययं ग्रन्थः मद्रासराजकीयहस्तलिखितग्रन्थमालायां मुद्रितः । अस्यः कर्ता शास्त्ररत्नाकरबिरुद्-भूषितः द्रविडात्रेयदर्शन-चतुर्मतसामरस्यादिग्रन्थप्रणेता अद्वैतवेदान्तनिष्णातः मद्रपुरीसंस्कृतकलाशालावेदान्तप्राध्यापकः विंशतिशतकीयः पोलकग्रामाभिजनः श्रीरामशास्त्रीति ज्ञायते ।

3. कल्पतरुव्याख्या—कल्पतरुमन्दारमञ्जरी

कल्पतरुव्याख्यात्मकः परिमलसंग्राहकश्चायं ग्रन्थ अमुद्रितः लन्दननगरस्थ-भारतकार्यालयपुस्तकालये (2249 IOL) लभ्यते । अस्य कर्ता पदवाक्यप्रमाणाभिज्ञः रामचन्द्रतत्सदाख्यस्य पुत्रः वैद्यनाथपायुगुण्डे इत्यपरनामा भट्टवैद्यनाथः । अनेन शास्त्रदीपिकायाः व्याख्या प्रभानाम्नी (1767 सं 1711 A. D.) काले कृता इति हालसूच्यां (Page 174 XV) दृश्यते । वेदान्तकल्पतरुमन्दारमञ्जर्याः प्रतिलेखनावसरः (1778 सं 1722 A. D.) इति दृश्यते । तस्मादस्य कालः (1650 1750 A. D.) भवितुमर्हति ।

4. कल्पतरुव्याख्या— अज्ञातकर्तृनामधेया । इयं व्याख्या हरप्रसादशास्त्रिसंस्कृतहस्तलिखितग्रन्थसूच्यां निर्दिश्यते ॥

(न) II. भामतीव्याख्या—ऋजुप्रकाशिका

भामतीव्याख्यारूपाया ऋजुप्रकाशिकायाश्शैली अतिसरला बालसुबोधाऽर्थपूर्णा च । प्रतिपदव्याख्यारूपोऽयं ग्रन्थः कलकत्तासंस्कृतग्रन्थमालायां मुद्रितः । ग्रन्थेऽस्मिन् अद्वैतरत्नकोशप्रकाशिका निर्दिष्टा । अस्य कर्ता सन्यासस्वीकारात्पूर्वं रङ्गनाथनामा अद्वैतरत्नकोशव्याख्यातुः भेदधिक्कारविवृतिकर्तुश्च कालहस्तीशयज्वनः (1550–1620 A. D.) पुत्रः यज्ञाम्बायाः गर्भजः नलगन्तुवंशजः स्वयम्प्र-

काशानन्दसरस्वत्याश्शिष्य अखण्डानन्दसरस्वतीति ज्ञायते । अस्याश्रयदाता सामयिकश्च इम्मिडिजगदेकरायः (जगदेकरायद्वितीयः) । अस्य राज्यशासनकालः क्रैस्तवीयषोडशशतकात् सप्तदशशतकमिति S. कृष्णस्वाम्यय्यङ्गार्कृतविजयनगरेतिहासग्रन्थात् ' यफिग्राफिका कर्नाटिका आफ मैसूर पार्ट I (Page 27—23) भूमिकायाश्च ज्ञायते । तस्मादयं षोडशसप्तदशशतकवासी तत्त्वदीपनकाराद्भिन्न इति च निश्चीयते ।

III. भामतीव्याख्या—भामतीतिलकम्

भामतीव्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 4190 MGOML) मैसूर–बरोडासरस्वतीमहालयादिषूपलभ्यते । अस्य कर्ता कोटिकलग्रामवासी नागमाम्बात्रिविक्रमाचार्ययोः पुत्रः अनन्तार्यप्रज्ञानारण्ययोश्शिष्य अल्लालसूरिः । अनेन स्वग्रन्थे व्यासाश्रमशब्देन अमलानन्दः निर्दिष्टः । चित्सुखाचार्यश्च प्रमाणीकृतः । "अक्षुण्णायामरण्यान्यां भामत्यां वर्त्म यो व्यधात् । सुगमं प्रणमाम्यस्तं व्यासाश्रममुनीश्वरम् " इति पद्ये व्यासाश्रमशब्द अमलानन्दमेव बोधयति । भामतीव्याख्यानेषु तस्यैव व्याख्यानस्य प्राथम्यात् । केचित्तु व्यासाश्रमामलानन्दौ भिन्नावित्यभ्युपगच्छन्ति । तेषां मतेन सुगम इति काचन भामतीव्याख्या आसीद्या च नाममात्रप्रसिद्धेदानीमिति वक्तव्यमापतति ।

यदि व्यासाश्रमामलानन्दावभिन्नौ तर्हि अल्लालसमयः (1300 A. D.) कालादर्वाचीन अप्पय्यदीक्षितनामाग्रहणात् अप्पय्यदीक्षितात् प्राचीन इति सिध्यति । बरोडाहस्तलिखितपुस्तकालयस्थे भामतीतिलकादर्शपुस्तके तस्य प्रतिलिपिकालः (1335 A. D.) इति दृश्यते । तस्मात् कालात्प्राचीनः चित्सुखाचार्यकालात् (1120–1220 A. D.) अर्वाचीन इति तु निश्चयः । केचित्तु (1600–1756 A D.) कालमध्यवर्ती अल्लालसूरिरिति वदन्ति ॥

IV. भामतीव्याख्या— भावदीपिका

कल्पतरुपरिमलसंग्रहरूपेयं भामतीव्याख्या अमुद्रिता अडयारहस्तलिखितपुस्तकालये (39. E. 9. AL) लभ्यते । अस्य कर्ता तैत्तरीयशाङ्करभाष्यव्याख्यावनमालाकारः स्वयम्प्रकाशाद्वैतानन्दसरस्वत्योश्शिष्यः रामानन्दस्य प्रशिष्यः सप्तदशशतकापरार्धादारब्धे अष्टादशशतकपूर्वार्धान्ते काले वसन् अच्युतकृष्णानन्दतीर्थ इति ज्ञायते ॥

V. भामतीविवरणम्—

ग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रितः । अस्य कर्ता रामस्वामिशर्मणः पुत्रः पालक्काडन्तर्गत काविशेरिग्रामाभिजनः अङ्गाडिपुरसुब्रह्मण्यशास्त्रिणः प्राप्तन्यायशास्त्रः व्याकरणे छन्दश्शास्त्रे च निष्णातः (1879-1947 A. D.) कालवासी सुब्रह्मण्यशास्त्रीति ज्ञायते ।

VI. भामतीटीकाप्रकाशः—भामतीविकासश्च ।

चतुस्सूत्रीभामतीटीकाप्रकाशकाविमौ ग्रन्थौ चौखाम्बामुद्रणालये मुद्रितौ । अनयोः कर्ता लक्ष्मीनथझा इति ज्ञायते । आधुनिकोऽयं (1952 A. D.) वाराणसीवासी ।


VII. भामतीयुक्तार्थसंग्रहः—

अज्ञातकर्तृनामायं ग्रन्थः "हूलषरिपोर्ट आफ सान्स्क्रट् मानस्क्रिप्ट्स" ग्रन्थे दृश्यते ।

VIII. भामतीविलासः—

ग्रन्थोऽयं दासगुप्तमहाशयेन स्वीयदर्शनसाहित्यचरिते (HIP Vol II Page 108) निर्दिष्टः । अज्ञातकर्तृनामायं ग्रन्थः कुत्रत्य इत्यादि न ज्ञायते । श्रीरङ्गनाथकृता काचन भामतीव्याख्यापि अस्तीति Rice महाशयो निर्दिशति ।

भामतीप्रस्थानम्



(५) सूत्रभाष्यव्याख्या—रत्नप्रभा—

शाङ्करभाष्यव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरमुद्रणालये चौखाम्बा-मुद्रणालये च मुद्रितः । ग्रन्थेऽस्मिन् (Page 5) जगन्नाथाश्रमिकृता सूत्रभाष्यव्याख्या "भाष्यदीपिका" निर्दिष्टा । अस्य कर्ता द्रविडदेशवासी श्वेतगिरि-अभयानन्द (सत्यानन्द) - आनन्दपूर्ण - पुरुषोत्तम - शिवरामानन्द - गोपालानन्द - सरस्वतीपरम्परागतः गोविन्दानन्दस्य स्वयम्प्रकाशानन्दस्य च शिष्यः ब्रह्मविद्याभरण-कारस्याद्वैतानन्दस्य गुरुष्षोडशशतकापरार्धवासी (1550-1650 A. D.) रामानन्द-सरस्वतीति ज्ञायते । मुद्रितपुस्तके तु गोविन्दानन्दकृतत्वेनैव निर्दिष्टम् । परन्तु "गोविन्दानन्दवाणीचरणकमलगो निर्वृतोऽहं यथालिः" इति दर्शनात् गोविन्दानन्द-शिष्य एवास्य कर्ता भवितुमर्हति । गुरुकृतत्वेन निर्देशस्तु आदरातिशयेनेति निर्णीयते । अत एव रत्नप्रभाया रामानन्दीयमिति व्यवहारोऽपि सङ्गच्छते । केचित्तु साम्प्रदायिकाः गोविन्दानन्दकृत इत्येव वदन्ति । रामानन्देन विवरणोपन्यासादय अन्येऽपि ग्रन्था विरचिताः ।

I. रत्नप्रभाभागव्याख्या — रत्नप्रभाभागदीपिका—

"जिज्ञासासूत्रमारभ्य प्रागानन्दमयोक्तितः । भाष्यरत्नप्रभाव्याख्यां व्याकुर्वे भक्तितः कृतिम् ॥" इति ग्रन्थकृतैव प्रतिज्ञातत्वेनामुद्रितोऽयं ग्रन्थ ईक्षत्यधिकरणान्त एव अडयारपुस्तकालये मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2792) लभ्यते । अस्य कर्ता स्वयम्प्रकाशाद्वैतानन्दयोश्शिष्यः रामानन्दप्रशिष्यः दाक्षिणात्यः भामती-व्याख्याभावदीपिका-वनमालादिकारः सप्तदशशतकापरार्धवासी (1650-1750A.D.) अच्युतकृष्णानन्दतीर्थ इति ज्ञायते ।

II. रत्नप्रभाव्याख्या—पूर्णानन्दीया—


चतुस्सूत्र्यन्तोऽयं ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः । अस्य कर्ता ब्रह्म-विद्याभरणकारस्य अद्वैतानन्दस्य शिष्यः रामानन्दस्य प्रशिष्यः, अच्युतकृष्णानन्द-सतीर्थ्यः, सप्तदशशतकीयः (1650–1750 A.D.) पूर्णानन्दसरस्वतीति ज्ञायते । अनेन समन्वयसूत्रे "अस्मद्गुरुभिः ब्रह्मविद्याभरणे" इति ब्रह्मविद्याभरणं निर्दिश्यते ।

III. रत्नप्रभाव्याख्या—

अमुद्रितोऽयं ग्रन्थः मैसूरपुस्तकालये लभ्यते । अस्य कर्ता ब्रह्मविद्याभरण-कारस्य अद्वैतानन्दस्य ज्ञानानन्दस्य च शिष्यः प्रकाशानन्दः नानादीक्षितगुरुः रत्न-

प्रभाकर्तुः रामानन्दस्य सामयिकश्च षोडशशतकापरार्धकालवासी (1550–1650 A.D.) ति निश्चीयते ।

IV. रत्नप्रभाव्याख्या—अभिव्यक्ता । अज्ञातकर्तृनामायममुद्रितग्रन्थः अड-यारपुस्तकालये लभ्यते ॥



अन्याश्च काश्चन विश्ववेदकृता ब्रह्मसूत्रभाष्यव्याख्या, रघुनाथभट्टाचार्य-कृता सिद्धान्तार्णवब्रह्मसूत्रभाष्यव्याख्याद्या विद्यन्त इति ज्ञायते ।

ब्रह्मसूत्रवृत्तिग्रन्थाः

1. अद्वैतकामधेनुः

शाङ्करभाष्यानुसारी ब्रह्मसूत्रवृत्तिरूपोऽयं ग्रन्थः नागरीलिप्याममुद्रितस्सर-स्वतीमहालये (7526 TSML) लभ्यते । तेलुगुलिप्यां मुद्रितश्च । अस्य कर्ता तत्त्व-चन्द्रिका—विरोधवरूथिनीग्रन्थकारः, वेल्लकुलरत्नजन्मा, अक्कय्य इत्यपरनाम्नः अक्षयशास्त्रिणश्शिष्यः वेङ्कटरायपुत्रः समारञ्जनकारकविकुञ्जरगुरुः, तप्तमुद्राविद्रावण-कारस्य भास्करदीक्षितस्य पिता चोलदेशीयः मोक्षकुण्ड (मुडिकोण्डान्) ग्रामवासी अभिनवकालिदास इत्यपरनामा उमामहेश्वरः । एतेन तत्त्वचन्द्रिकायां "मध्वविध्वं-सन—मध्वन्यक्कराभ्यां मध्वमतस्य खण्डितत्वेन श्रीकण्ठरामानुजमते एवात्र खण्ड्-येते इति प्रतिपादितम् । एवं रत्नतूलिका—तप्तमुद्राविद्रावणादिकर्त्रा उमामहेश्वर-पुत्रेण भास्करदीक्षितेन आत्मनः नृसिम्हाश्रमि—कृष्णानन्दसरस्वत्योश्शिष्यत्वं प्रति-पादितम् । एवञ्चाप्पय्यदीक्षितस्य अन्तिमसामयिकोऽयमुमामहेश्वर इति सिध्यति । T.R. चिन्तामणिमहोदयास्तु स्वसम्पादितसाहित्यरत्नाकरभूमिकायां भास्करदी-क्षितं रघुनाथनायकसामयिकं वर्णयन्ति । रघुनाथनायकशासनकालस्तु (1600–16-50 A.D.) इति P.P. शास्त्रिणः । एवञ्च भास्करदीक्षितपिता उमामहेश्वरः (1550–1650 A.D.) काले आसीदिति निर्णेतुं शक्यते ॥

2. अद्वैतप्रकाशः—

नवभिः भागैः पूर्णोऽयं ब्रह्मसूत्रवृत्त्यात्मक अमुद्रितः ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये R. 4208 लभ्यते । नारायणीया वृत्तिरित्यपि नामान्तरम् । अस्य कर्ता नारायणप्रिययतिरित्यपरनामा गोविन्दाश्रमशिष्यः दुर्गाप्रसादयतिः स्वग्रन्थे रामतीर्थं प्रणमति । तस्मादयं उत्तरदेशवासी सप्तदशशतकवासी (1700 A. D.) इति परं ज्ञायते ॥

3. अद्वैतमञ्जरी—

पञ्चचत्वारिंशद्भिस्स्तबकैः पूर्णोऽयं सूत्रवृत्तिरूपस्स्वतन्त्रग्रन्थः नासिकसूच्यां 27–2 लभ्यते । अस्य प्रणेता परमानन्दयोगिशिष्य इत्येव ज्ञायते ॥ अस्य प्रणेतुर्नाम ज्ञानेन्द्रस्वामीति स्यात् इति (A BORI XXI P. 145) ज्ञायते । मुद्रितश्चायम् (Bombay 1914) ।

4. अद्वैतरत्नाकरः—

ब्रह्मसूत्रवृत्तिग्रन्थोऽयं मैसूरराजकीयपुस्तकालये लभ्यते । अस्य कर्ता शारीरकमीमांसाभाष्यगद्यमयवार्तिककर्ता रत्नप्रभाकर्तृत्वेन प्रसिद्धस्य गोविन्दानन्दसरस्वत्याश्शिष्यः गौडब्रह्मानन्दसरस्वत्या गुरुः, नारायणतीर्थापराभिधः नारायणसरस्वती सप्तदशशतकीय (1600–1700 A. D.) इति ज्ञायते ॥

5. अद्वैतसुधा—

उत्तरमीमांसासारार्थसुधा—उत्तरमीमांसासारार्थसुधानिधि–वेदान्तार्थसारसंग्रह–वेदान्तसारचिन्तामणि — वेदान्तकौस्तुभादिनाम्ना प्रसिद्धोऽयं ब्रह्मसूत्रवृत्तिग्रन्थ अमुद्रित अड्यारपुस्तकालये (33. L. 25 AL,) मद्रासराजकीयहस्तलिखितप्राचीनपुस्तकालये, तिरुपतिवेङ्कटेश्वरालयपुस्तकालये, तिरुवनन्तपुरराजकीयपुस्तकालये, विश्वभारतीशान्तिनिकेतनसूच्यां च लक्ष्यते । अस्य कर्ता कौण्डिन्यगोत्रज उत्तरमायूरदक्षिणास्योपसेवी चोलदेशीयस्सीतारामशास्त्रीति ज्ञायते । अस्य कालः षोडशशतकापरार्ध इति (1560-1750 A. D.) दासगुप्तः (HIP. Vol. II, Page 82) ।

6. अद्वैतसूत्रार्थपद्धतिः—

अमुद्रितोऽयं सूत्रवृत्तिग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 5727 MGOML) लभ्यते । अस्य कर्ता षड्भाषासरसकविरिति विश्रुतः गुहपुरवासी मतत्रयेऽपि ग्रन्थप्रणेता कृष्णावधूतपण्डितः ।

7. अद्वैतामृतम्—

सूत्रवृत्तिरूपोऽयं ग्रन्थः प्रथमपरिच्छेदान्तं भारतकार्यालयपुस्तकालये लन्दननगरे (2405 IOL.) रायल आषियाटिक सोसाइटि बेङ्गालनगरे च लभ्यते । अस्य कर्ता देवेन्द्रसरस्वतीशिष्यः वाणीगीरित्यपरनामा ब्रह्मेन्द्रसरस्वतीति ज्ञायते । यद्यस्य गुरुर्देवेन्द्रसरस्वती "स्वानुभूतिप्रकाश" कर्ता नृसिंहाश्रमिसामयिकस्स्यात् तर्हि तच्छिष्यस्य ब्रह्मेन्द्रसरस्वत्या अपि कालष्षोडशशतकमिति (1500-1.00 A. D.) निर्णेतुं शक्यते ।

8. अधिकरणकौमुदी—

ग्रन्थोऽयं कुत्रास्ति ? किं मुद्रितः ? इत्यादिकं न ज्ञायते । परन्तु कात्रकोटिसूच्यां दृश्यते । अस्य कर्ता रामकृष्ण इति परं ज्ञायते । पूर्वमीमांसाग्रन्थ इति प्रतिभाति ।

9. अधिकरणचतुष्टयी—

आनन्दमयाधिकरण- यथाश्रयभावाधिकरण-ऐहिकाधिकरण-लिङ्गभूयस्त्वाधिकरणानां विषयविचारात्मकोऽयं ग्रन्थः बालमनोरमामुद्रणालये मद्रासनगरे मुद्रितः । अस्य कर्ता महामहोपाध्यायबिरुदभूषितः कृष्णतटाक (करुङ्गुलम्) ग्रामवासी श्रीशालिवाटिनगरा(तिरुनेल्वेली)भिजनः हरिहरशास्त्रिशिष्यः, मद्रपुरीसंस्कृतकलाशालाप्रधानाध्यापकः अपरे वयसि प्राप्तसन्यासाश्रमः विंशतिशतकीय (1870-1937 A.D.) कृष्णशास्त्रीति ज्ञायते ।

10. अधिकरणमञ्जरी—

"रामग्रहेन्दुसंख्याता (193) न्यायाश्शारीरकाश्रया" इत्यादिना अधिकरणसंख्याः भाष्यानुसारं अधिकरणार्थञ्च पद्यबद्धोऽयं सङ्गृह्णाति । ग्रन्थोऽयं प्राच्य-

भाषाशोधनपत्रिकायाः पञ्चमे भागे (J. O. R. Madras Vol. V) मुद्रितः। अस्य कर्ता ज्ञानघनप्रशिष्यः, न्यायसुधाकारस्य ज्ञानोत्तमस्य शिष्यः, विज्ञानात्मसतीर्थ्यः, सुखप्रकाशशुद्धानन्दयोर्गुरुः, अमलानन्दानन्दगिर्योः प्राचार्यः द्वादशशतकीयश्चित्सुखाचार्य इति ज्ञायते।

11. अधिकरणरत्नमाला—

सूत्रवृत्तिग्रन्थोऽयं मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2902 MGOML) अमुद्रित उपलभ्यते। अस्य कर्ता चित्सुखाचार्यशिष्यः, आनन्दात्मशिष्यः अमलानन्दगुरुः, श्रीकण्ठशास्त्रिणां प्रबन्धप्रमाणात् (IHQ XIV) आनन्दगिरेरपि गुरुः, त्रयोदशशतकीयः (1200–1310 A.D.) सुखप्रकाशः। अनेन तत्त्वदीपिकाया व्याख्या भावद्योतनिका कृता या त्वन्यत्र निरूपयिष्यते। अस्या भारतीतीर्थकृता व्याख्यापि काचन तिरुवनन्तपुरे लभ्यते॥

12. अधिकरणसङ्गतिः—

भाष्यवर्णितानां अधिकरणानां सङ्गतिं प्रदर्शयन्नयं ग्रन्थस्स्वतन्त्रः, न तु व्याख्यारूपः। प्रकाशितश्चायं ग्रन्थः जर्नल आफ ओरियण्टलपत्रिकायास्सप्तमे भागे (JOR Madras Vol VII)। अस्य कर्ता ज्ञानघनप्रशिष्यः न्यायसुधाकारस्य ज्ञानोत्तमस्य शिष्यः, विज्ञानात्मसतीर्थ्यः सुखप्रकाशशुद्धानन्दयोर्गुरुः, अमलानन्दानन्दगिर्योः प्राचार्यः द्वादशशतकीयश्चित्सुखाचार्य इति ज्ञायते॥

13. अधिकरणार्थसंग्रहः।

ग्रन्थोऽयं कामकोटिकोशस्थाने मद्रासनगरे मुद्रितः। अस्य कर्ता श्रीसाधनयोगीति परं ज्ञायते।

14. अर्थप्रकाशिका—

वृत्तिग्रन्थोऽयं ब्रह्मसूत्रार्थप्रकाशिकापरनामा पञ्चाबविश्वविद्यालयग्रन्थसूच्यां (231) अमुद्रित उपलभ्यते। अस्य कर्ता नागरवंशजः जयरामपण्डितः। अनेन रचितस्य महावाक्यादर्शस्य प्रतिलेखनकालः (1773 सं 1717 A.D.) इति बरोडास्थमहावाक्यदर्शग्रन्थात् (12424 DCBRD) ज्ञायते। एवञ्चास्य कालस्सप्तदशशतकापरार्धादारभ्यस्यादिति (1650–1750 A.D.) निश्चीयते॥

15. अर्थदीपिका—

ब्रह्मसूत्रदीपिकापरनामायं ग्रन्थ अमुद्रितः भाष्यतद्व्याख्यादिसारसंग्रहरूपः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 3481 MGOML) लभ्यते। अस्य कर्ता शिवरामगौरीपुत्रः वेङ्कटपण्डित इति परं ज्ञायते।

अर्थसंग्रहनाम्नी काचन ब्रह्मसूत्रवृत्तिः ब्रह्मानन्दतीर्थकृता मुद्रिता (I.H.Q. 13, 1937. Suppliment।

16. ऋजुव्याख्या।

अमुद्रितोऽयं ग्रन्थः पञ्चाबविश्वविद्यालयसूच्यां (722) दृश्यते। अस्य कर्ता विज्ञानभिक्षुरिति परं ज्ञायते।

17. चन्द्रिका—

अमुद्रितोऽयं सूत्रवृत्तिग्रन्थः लन्दननगरस्थभारतकार्यालयपुस्तकालये (2270 DC IOL) चोपलभ्यते। अस्य रचयिता महामहोपाध्यायविरुदभूषितः सन्मिश्रभवदेवापरनामा मिथिलावासिनः कृष्णदेवसन्मिश्रस्य पुत्रः "पाटना" नगरवासी, शाहजहाँख्यमोगलसम्राजस्सामयिकः, सठक्कुरभवदेवशिष्यस्सप्तदशशतकवासी (1600-1650 A.D.) भवदेवमिश्र इति ज्ञायते। अनेनायं ग्रन्थः (1571 श 1649 A. D.) काले निर्मितः।

तत्त्वप्रबोधिनी—

अद्वैतसिद्धान्तावलम्बिनी इयं वृत्तिः गिरीन्द्रनाथवेदान्तरत्नविरचिता (1922 A.D.) मुद्रिता विद्यते।

18. तात्पर्यबोधिनी—

शङ्करसिद्धान्तानुसारिणी सुलभबोधा चेयं सूत्रवृत्तिः आनन्दाश्रममुद्रणालये मुद्रिता। अस्य प्रणेत्रा शङ्करानन्देन अन्यापि काचन "दीपिका" नाम्नी वृत्तिः रारचिता। तस्या अयं भिद्यते। अस्य कर्ता आनन्दात्मशिष्यः विद्यारण्यगुरुः कावेरीतीरवासीति एतत्कृतग्रन्थदर्शनात् ज्ञायते। पञ्चदश्यादिविद्यारण्यग्रन्थाश्चात्र प्रमाणानि। अयं आनन्दात्मविद्यातीर्थयोश्शिष्यः, विद्यारण्यगुरुः, चोलदेशीयमध्यार्जुनग्रामवासी (तिरुविडैमरुदूर), पूर्वाश्रमे वाञ्छेशवेङ्कटसुब्बाम्बयोः पुत्र इति सम्प्रदायागता जनश्रुतिः। सूर्यनारायणशास्त्री तु विद्यातीर्थस्यैव विद्याशङ्करतीर्थ इति

शङ्करानन्द इति च नामान्तरमिति वदति। दासगुप्तस्तु विद्यारण्यामलानन्दयोर्गुरुश्शङ्करानन्द इति वदति। शृङ्गगिरिमठीयपरम्परायान्तु विद्यारण्यः विद्यातीर्थशिष्य इति दृश्यते। यदि विद्यातीर्थ एव शङ्करानन्दस्स्यात् तर्हि नृसिम्हतीर्थस्यैव आनन्दात्मा इति नाम भाव्यम्। अथवा आनन्दात्मा विद्यागुरुर्नृसिम्हतीर्थः दीक्षागुरुरिति वक्तव्यं भवति। "आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरु" मिति अमलानन्दकथनात् आनन्दात्मप्रशिष्य अमलानन्द इति सिध्यति। "यथार्थानुभवानन्दपदगीतं गुरुं नुम" इति दर्शनात् अनुभवानन्दोऽपि अमलानन्दगुरुरिति सिध्यति। किमयममलानन्द अनुभवानन्दशिष्यः? उत शङ्करानन्दशिष्य इति स्थिरीभवति संशयः। "सुखप्रकाशयतिनं तं "नौमि विद्यागुरुं" इति दर्शनात् अमलानन्दस्य विद्यागुरुस्सुखप्रकाश इति तु निश्चितम्। सर्वथा शङ्करानन्दसामयिक अमलानन्द इति तु निश्चयः। शङ्करानन्दशिष्यः सदानन्दप्रथमः। सदानन्दप्रथमस्य शिष्य अद्वैतानन्दसरस्वती। अद्वैतानन्दसरस्वत्याश्शिष्यस्सदानन्दद्वितीय इति "अनाल्स आफ ओरियण्टल रिसर्च" पत्रिकायाः षष्ठे भागे (AOR Madras Vol VI Part I) प्रतिपादितम्। सर्वथा त्रयोदशशतकादारब्धे काले (1275–1350 A.D.) शङ्करानन्द आसीदिति निश्चीयते।

तात्पर्यविवरणम्। शाङ्करभाष्यानुसारी सूत्रवृत्तिग्रन्थोऽयं भैरवतिलकक्कृतः (1800 A.D.) वाराणस्यां मुद्रितः 1917।

19. त्र्यम्बकवृत्तिः (भाष्यभानुप्रभा)—

भाष्यभानुप्रभापरनामायं शाङ्करभाष्यार्थसंग्राहकः कोडपत्रात्मक अमुद्रित अपूर्णश्चायं ग्रन्थ अड्यारपुस्तकालये (41. C. 90 AL) शृङ्गगिरिमठपुस्तकालये च लभ्यते। अस्य कर्ता त्र्यम्बकशास्त्री त्र्यम्बकभट्टनाम्ना प्रसिद्धः, भारद्वाजगोत्रोत्पन्नः, बाबाजीयज्वनः पौत्रः गङ्गाधराध्वरिकृष्णाम्बिकयोः पुत्रः, नरसिम्हयज्वनः कनीयान् भ्राता परमार्थसारव्याख्यातृ राघवानन्दस्य लघुचन्द्रिकाकारस्य ब्रह्मानन्दसरस्वत्याश्च शिष्यः, शाहजीशरभोजीशासनकाले चोलदेशवासी पश्चात् महीशूर–पूनादिनगरवासी सप्तदशशतकापरार्धारब्धकालवासी (1650–1700 A.D.) ति ज्ञायते। अस्य शिष्यस्स्थाणुशास्त्रीति प्रसिद्धः "घृतशौचदीपिका" कर्ता इति मद्रासराजकीयहस्तलिखितपुस्तकालयस्थात् (R. 3854) पुस्तकात् ज्ञायते।

20. दीपिका—

सूत्रवृत्तिरूपोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः। ग्रन्थोऽयं तात्पर्यबोधिन्याश्शङ्करानन्दकृतायाः भिद्यते च। अस्य कर्ता आनन्दात्मशिष्यः विद्यारण्यगुरुरमलानन्दसामयिकस्सदानन्दगुरुस्त्रयोदशशतकापरार्धवासी (1275–1350 A.D.) शङ्करानन्द इति ज्ञायते।

21. निर्मलकृष्णवृत्तिः—

निर्मलकृष्णभाष्यमित्यपरनामायं ग्रन्थः लन्दननगरस्थभारतकार्यालयपुस्तकालयसूच्यां दृश्यते। अस्य कर्ता निर्मलकृष्ण इति परं ज्ञायते।

22. न्यायरक्षामणिः—

शारीरकन्यायरक्षामणिरिति प्रसिद्धोऽयं वृत्तिग्रन्थः भाष्यं भामतीञ्चानुसरति। ग्रन्थेऽस्मिन् प्रत्यधिकरणं पूर्वपक्षसिद्धान्तौ मीमांसान्यायानुसारं सविस्तरमुपवर्णितौ। प्रतिसूत्रं दलप्रयोजनोपवर्णनमस्य ग्रन्थस्य महान् विशेषः। प्रथमाध्यायान्तमुपलभ्यमानः भाष्यस्य क्रोडपत्ररूपोऽय ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः। अस्य कर्ता वक्षस्थलाचार्यापरनामकस्य आचार्यदीक्षितस्य पौत्रः विवरणदर्पणकारस्य रङ्गराजाध्वरिणः पुत्रः, पितुरेव प्राप्तविद्यः, नृसिम्हाश्रमिप्रेरणया प्राप्ताद्वैतमतपक्षपाती काञ्चीमण्डलान्तर्गत अडयप्पलग्रामवासी आचार्यदीक्षितस्य भ्राता, रत्नखेटश्रीनिवासदीक्षितजामाता मङ्गलनायिकाभर्ता नीलकण्ठ-उमामहेश्वर-चन्द्रावतंसानां पिता चतुरधिकशतग्रन्थप्रणेतृत्वेन प्रसिद्धः षोडशशतकवासी (1520-1593 A. D.) अप्पय्यदीक्षित इति ज्ञायते।

23. न्यायसंग्रहः—

अमुद्रितोऽयं ग्रन्थः बम्बई विश्वविद्यालयहस्तलिखितपुस्तकालयसूच्यां (644 DC. BUL.) दृश्यते। अस्य कर्ता छान्दोग्योपनिषदां व्याख्यायाः मिताक्षरायाः कर्ता नित्यानन्दाश्रमीति ज्ञायते।

24. पुरुषार्थसुधानिधिः—

अस्यैव ग्रन्थस्य सर्ववेदान्तश्रुतिसारसंग्रहः, ब्रह्मसूत्रविषयवाक्यवृत्तिः, वैय्यासिकब्रह्ममीमांसासारसंग्रहः, वैय्यासिकब्रह्ममीमांसासूत्रभाष्यसारसंग्रह इति

नामान्तराणि दृश्यन्ते । भाष्यानुसारी सूत्रवृत्तिरूपोऽयं ग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2471 MGOML) सरस्वतीमहालये अडयार पुस्तकालये, तिरुवनन्तपुरपुस्तकालये बरोडापुस्तकालये, लन्दननगरस्थभारतकार्यालयपुस्तकालये शङ्कराचार्यमठपुस्तकालये च लभ्यते ।

"वासुदेवेन्द्रचरणाम्बुरुहद्वयम् । प्रणम्य व्याससूत्राणां विवृतिः क्रियतेऽधुना ।" इति पुरुषार्थसुधानिधौ ज्ञानेन्द्रसरस्वत्या वासुदेवेन्द्रः नमस्कृतः । अद्वैतरत्नकोशपूरणीकर्त्रा अग्निहोत्रभट्टेन "ज्ञानेन्द्रापरनामानं दक्षिणामूर्तिदैवतम् । वासुदेवादिसच्छिष्य" इत्यादिना ज्ञानेन्द्रवासुदेवेन्द्रौ नमस्कृतौ । एवञ्चाग्निहोत्रभट्टः वासुदेवेन्द्रज्ञानेन्द्रयोश्शिष्य इति सिध्यति । अग्निहोत्रभट्टेन स्वकृते मैसूरपुस्तकालयमुद्रिते अद्वैतरत्नकोशपूरणीग्रन्थे (Page 49) "अस्मत्परमगुरुचरणमतमेव सम्यक्" इति, जिज्ञासाशब्दार्थविचारे (Page 72) "परमगुरुचरणास्तु जिज्ञासापदं तन्त्रेणोपात्तमित्याहु" रित्यादिना ज्ञानेन्द्रसरस्वतीग्रन्थ अनूद्यते । एवञ्चास्य पुरुषार्थसुधानिधेः कर्ता वासुदेवेन्द्रशिष्यः वासुदेवेन्द्रगुरुः अग्निहोत्रभट्टप्राचार्यः गुरुश्च ज्ञानेन्द्रसरस्वती षोडशशतकापरार्धारब्धकालवासीति (1550–1650 A. D.) ज्ञायते ।

25. ब्रह्मतत्त्वप्रकाशिका -

शाङ्करभाष्यार्थानुसारिणीयं संक्षिप्ता वृत्तिस्सूत्रार्थावबोधसुलभा भवति । मुद्रिता चेयं वृत्तिर्वाणीविलासमुद्रणालये । अस्य कर्ता मधुरानगरवासिनस्सोमनाथावधानिनः पार्वत्याश्च पुत्रः, पूर्वाश्रमे शिवरामकृष्णनामा दहरविद्याप्रकाशिकाकर्तुः परमशिवेन्द्रस्य शिष्यः, अद्वैतरसमञ्जरीकारस्य नल्लादीक्षितस्य गुरुः, तिरुविशनल्लूरग्रामवासिन अय्यावालिति प्रसिद्धस्य श्रीधरवेङ्कटेशशास्त्रिणः, महाभाष्य-गोपालकृष्णशास्त्रिणश्च सतीर्थ्यः, शरभोजिप्रथमस्य सामयिकः अष्टादशशतकीयः (1700–1800) सदाशिवब्रह्मेन्द्रसरस्वती । अस्य समाधिस्त्रिशिरपुर्यन्तर्गतनेरूर्ग्रामे अद्याप्यस्तीति ज्ञायते । कृष्णाचार्यकृते संस्कृतसाहित्येतिहासे सदाशिवब्रह्मेन्द्रकालष्षोडशशतकमिति दृश्यते ॥

26. ब्रह्ममीमांसासंग्रहः—अज्ञातकर्तृनामायं ग्रन्थः अडयारपुस्तकालये लभ्यते ॥

27. ब्रह्मसूत्रकुतूहलम्—

ग्रन्थस्यास्यावतरणिकायां अद्वैतसिद्धान्ताः विशदीकृताः । "अथातो ब्रह्मजिज्ञासा" इति सूत्रादारभ्य 'ज्योतिश्चरणाभिधानात्' इत्यन्तानां चतुर्विंशति-

सूत्राणां अद्वैतमतपोषिणी काचित् वृत्तिरियम् । मुद्रितश्चायं ग्रन्थः राजराजेश्वरीमुद्रणालये वाराणसीनगरे । अस्य कर्ता सच्चिदानन्दाश्रमवासुदेवेन्द्रयोश्शिष्यः वाराणसीवासी कृष्णानन्दसरस्वती रामदुर्गाख्यविप्रप्रेरणया वेदेन्दुवसुभूमिते 1814 श 1890 A.D. काले शास्त्राकूतप्रकाशग्रन्थं चकारेति ज्ञायते । तस्मादयं एकोनविंशतिशतकवासी (1825–1900 A. D.) इति निश्चीयते ॥

28. ब्रह्मसूत्रतात्पर्यदीपिका—

ग्रन्थोऽयं तेलुगुलिप्यां मुद्रितः । अस्य व्याख्या तात्पर्यविमर्शिनीनाम्नी गुरुमूर्तिकृतापि मुद्रिता । अस्य कर्ता दक्षिणदेशवासी श्रीरङ्गचिदम्बरादिपुण्यक्षेत्रवासी सदानन्दतीर्थशिष्य अद्वैतानन्दतीर्थः । अस्य पूर्वाश्रमे पितुर्नाम माधवसूरिरिति । मातुर्नाम महालक्ष्मीरिति । हरीतगोत्रजोऽयम् । ब्रह्मसूत्रतात्पर्यदीपिकाव्याख्यातुर्गुरुमूर्तिशास्त्रिणः कालः (1850–1901 A. D.) इति ज्ञायते । तस्मात् मूलग्रन्थकर्तुः अद्वैतानन्दस्यापि काल एकोनविंशतिशतकमिति परं ज्ञायते ।

(A) ब्रह्मसूत्रतात्पर्यदीपिकाव्याख्या—तात्पर्यविमर्शिनी—

अद्वैतानन्दतीर्थकृतायाः ब्रह्मसूत्रदीपिकायाः व्याख्यात्मकोऽयं ग्रन्थः तेलुगुलिप्यां मुद्रितः । अस्य कर्ता गुरुस्वामिशास्त्री एकोनविंशतिशतकापरार्धारब्धकालवासी (1850-1910 A. D.) ति ज्ञायते ।

29. ब्रह्मसूत्रतात्पर्यप्रकाशः—

सदानन्दसरस्वतीकृतोऽयं ग्रन्थः । ग्रन्थस्यास्य प्राप्तिस्थानादि न ज्ञायते । परन्तु कामकोटिमठस्थाद्वैतग्रन्थकोशे दृश्यते ।

30. ब्रह्मसूत्रतात्पर्यविवरणम्—

शाङ्करभाष्यभावनावदिदं विवरणं पण्डितनूतनग्रन्थमालायां (पंडिट न्यूसीरीज़ बनारस) मुद्रितम् । अस्य तिलकोपनामा भैरवशर्मा वेदाक्षिवसुचन्द्रेऽब्दे (1824 श. 1788 A.D.) स्वग्रन्थं कृतवानिति ज्ञायते । तस्मादस्य काल अष्टादशशतकापरार्धादारब्ध (1750-1850 A. D.) इति निश्चीयते ॥

31. ब्रह्मसूत्रभाष्यान्वयार्थसूत्रवृत्तिः—

अमुद्रितोऽयं ग्रन्थ रामभद्रकृत इति पञ्जाबविश्वविद्यालयसूच्यां दृश्यते ।

32. ब्रह्मसूत्रविषयवाक्यविवरणम्—

अमुद्रितोऽयं ग्रन्थः महीशूरराजकीयपुस्तकालये दृश्यते । अस्य कर्ता रामचन्द्रेन्द्रापरनाम्नाम् उपनिषद्ब्रह्मेन्द्राणां शिष्येष्वन्यतमः कृष्णानन्दसतीर्थ्यः, वासुदेवेन्द्रप्रशिष्यः, एकोनविंशतिशकीय (1800-1900) बोधेन्द्रसरस्वतीकृताद्वैतभूषणव्याख्या—आनन्ददीपिकाकारः वासुदेवेन्द्र इति ज्ञायते ।

33. ब्रह्मसूत्रविषयवाक्यवृत्तिः—

अमुद्रितोऽयं वृत्तिग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2471 MGOML) लभ्यते । अस्य कर्ता विवरणोपन्यासरत्नप्रभाकारश्शिवरामानन्दगोपालानन्दसरस्वत्योः प्रशिष्यः गोविन्दानन्दप्रकाशानन्दयोश्शिष्यः षोडशशतकापरार्धादारब्धकालवासी (1550—1650 A. D.) रामानन्दसरस्वतीति ज्ञायते ।

34. ब्रह्मसूत्रव्याख्या—

अमुद्रितोऽयं ग्रन्थः जयपुरसूच्यां दृश्यते । अस्य कर्ता जयपुरराज्यस्थापकः जयसिम्ह इति ज्ञायते ॥

35. ब्रह्मसूत्रविवरणम्—

अमुद्रितोऽयं ग्रन्थः कुत्र लभ्यत इति न ज्ञायते । परन्तु कामकोटिसूच्यां दृश्यते । अस्य कर्ता परमानन्दघन इति परं ज्ञायते ॥

36. ब्रह्मसूत्रतत्त्वार्थविलासः—

ब्रह्मसूत्रसद्वृत्तिरित्यपरनामायं ग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R 1808 MGOML) लभ्यते । ब्रह्मसूत्रविवरणमिति कश्चन ग्रन्थ एतद्ग्रन्थकर्तृकृतत्वेन न्यायरक्षामणिभाष्योक्तिविरोधग्रन्थे निर्दिष्टः । किं स एवायं ग्रन्थ उतान्य इति तु न ज्ञायते । ब्रह्मसूत्रविवरणग्रन्थस्यानुपलम्भात् । अस्य कर्ता महामहोपाध्यायबिरुदभूषितः अश्वत्थनारायणशास्त्रिपौत्रः रामशङ्करशास्त्रिपुत्रः चोलदेशान्तर्गतशाङ्जग्रामवासी (तिरुविशनल्लूर) श्रीवत्सगोत्रोत्पन्नः, शिवरामशास्त्रिशिष्यः चन्द्रिकाचार्यभिक्षुसामयिकः एकोनविंशतिशतकीयः (1850-1920 A. D.) रामसुब्रह्मण्यशास्त्रीति ज्ञायते ॥

37. ब्रह्मसूत्ररत्नावली—

शाङ्करभाष्यार्थमानुष्टुभैः पद्यैः प्रतिपादयन्नयं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः । अस्य कर्ता सुब्रह्मण्यशास्त्री आधुनिक इति ज्ञायते ॥

38. ब्रह्मसूत्रसारसङ्ग्रहः—

ब्रह्ममीमांसासूत्रसारसंग्रहापरनामायं ग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 399 C. MGOML) लभ्यते । अस्य कर्ता वासुदेवेन्द्रशिष्यस्सप्तदशशतकीयः 1700 A. D. प्रज्ञातापरनामा प्रज्ञानेन्द्रमुनिरिति ज्ञायते । स्थानादिनिरूपणप्रमाणं नोपलभामहे ॥

39. ब्रह्मसूत्रसारार्थः—

ग्रन्थोऽयं श्लोकसहस्रात्मकः ब्रह्मसूत्राणां सारभूतान् अर्थान् प्रतिपादयति । ग्रन्थोऽयं गौडपादेन कृत इति वाराणस्यां जगन्नाथपण्डितगृहे आसीदिति च वैशेषिकदर्शनसम्पादको विन्ध्येश्वरीप्रसादद्विवेदी निर्दिशति । परमन्यत्र न दृश्यते ।

40. ब्रह्मसूत्रसिद्धान्तमुक्तावलिः—

ग्रन्थोऽयं चौखाम्बामुद्रणालये मुद्रितः । अस्य कर्ता वनमालिमिश्रनामा एकोनविंशतिशतकीय इति ज्ञायते ।

41. ब्रह्मसूत्राधिकरणन्यायानुक्रमणिका—

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 3305 (C) MGOML) लभ्यते । अस्य कर्ता आनन्दानुभूतिशिष्यः, विबुधेन्द्रयोगीत्यपरनामा केरलदेशजः राजराजवर्मसामयिकः नृसिम्हाश्रमिगुरुगीर्वाणेन्द्रसरस्वतीभक्तः पञ्चदशशतकीयः कृष्णानुभूतियतिरिति ज्ञायते ॥

42 ब्रह्मसूत्रानुगुण्यसिद्धिः—

ग्रन्थोऽयं भाष्यभावसंग्रहात्मकः सूत्राणां संक्षिप्तभावमावेदयति । मुद्रितश्चायं ग्रन्थः गोपालविलासमुद्रणालये कुम्भघोणनगरे । अस्य कर्ता महामहोपाध्यायबिरुदभूषितः कृष्णतटाकग्रामवासी श्रीशालिपुराभिजनः हरिहरशास्त्रिशिष्य अद्वैत-

सभापण्डितः मद्रपुरीसंस्कृतकलाशालाप्रधानाध्यापकः स्वीकृतसन्यासाश्रमः विंशति-शतकीयः (1870-1939 A. D.) कृष्णशास्त्रीति ज्ञायते ।

43. ब्रह्मसूत्रार्थचिन्तामणिः सङ्ख्याख्यः—

सङ्ख्याख्योऽयं ग्रन्थ अमुद्रितः कुम्भघोणशङ्करमठे मैसूरपुस्तकालये मद्रास राजकीयहस्तलिखितपुस्तकालये च लभ्यते । अस्य कर्ता चोलदेशवासी शाहज-ग्रामाभिजनः महिषशतकव्याख्यातुर्वाञ्छेश्वरस्य प्रपितामहः नरसिम्हस्य पितामहः, महादेवपिता तञ्जपुरशासकस्य प्रतापसिम्हस्य राजसभापण्डित अष्टादशशतकापरा-र्धारब्धकालवासी (1780 A. D.) वाञ्छेश्वर इति ज्ञायते ।

44. ब्रह्मसूत्रोपन्यासः—

वैयासिकसूत्रोपन्यासापरनामायं ग्रन्थः महीशूरपुस्तकालये लभ्यते । अस्य कर्ता भारतीतीर्थशिष्यश्चतुर्दशशतकीय (1400 A. D.) परमेश्वरभारतीति ज्ञायते । अनेन निजतत्त्वामृतरसाख्यः कश्चन प्रकरणग्रन्थोऽपि कृतः ।

45. ब्रह्मसूत्रार्याद्विशतिका—

"ब्रह्मसूत्रार्याद्विशतिका" "शारीरकसूत्रार्याद्विशतिका"परनामायं ग्रन्थः द्विशतैः पद्यैः पूर्ण अडयारपुस्तकालये निर्णयसागर मुद्रणालये च मुद्रितः । अस्य कर्ता रामचन्द्रेन्द्र इत्यपरनामा उपनिषद्ब्रह्मेन्द्रः । प्रथमवासुदेवेन्द्रस्य प्रशिष्यः द्वितीयवासुदेवेन्द्रस्य शिष्यः, रामचन्द्रेन्द्रसतीर्थ्यः, कृष्णानन्दगुरुश्चायं उपनिषद्ब्र-ह्मेन्द्रः अष्टादशशतकापरार्धारब्धे एकोनविंशतिशतकपूर्वान्ते काले (1750–1820 A.D.) आसीदिति ज्ञायते । कुत्रचिदयमेव ग्रन्थ आत्मारामकृत इति निर्दिश्यते च ।

46. ब्रह्मानन्दप्रकाशिका—

सूत्रवृत्तिरूपोऽयं ग्रन्थ अमुद्रितः नासिकपुस्तकालयसूच्यां दृश्यते । अस्य कर्ता वाराणसीवासी अच्युताश्रमशिष्यः अद्वैताश्रमप्रशिष्यः जगज्जीवनविद्वान् अष्टा-दशशतकापरार्धकालवासी (1775–1850 A.D.) इति ज्ञायते । अयमेव वेदान्त-साररत्नावलीकारश्च ॥

47. ब्रह्मामृतवर्षिणी—

ब्रह्मसूत्रवृत्तिरूपोऽयं ग्रन्थस्सूत्राणां सङ्गतिं संशयं पूर्वपक्षसिद्धान्तान्, विवरण-भामतीकृतांश्च मतभेदान् प्रदर्शयन् शाङ्करभाष्यमनुसरति । मुद्रितश्चायं ग्रन्थः

वाराणसीग्रन्थमालायां आनन्दाश्रममुद्रणालये च । ग्रन्थोऽयं तेलुगुलिप्यामपि मुद्रितः । तेलुगुलिप्यां मुद्रितस्य ग्रन्थस्य कर्तुर्नाम धर्मभट्ट इति दृश्यते । चौखा-म्बामुद्रिते तु मुकुन्दगोविन्दशिष्य अस्य कर्ता इति दृश्यते । आनन्दाश्रममुद्रित-ग्रन्थे तु रामकिङ्करधर्मे अस्य कर्ता इति दृश्यते । अडयार पुस्तकालयस्थादर्शपुस्त-केऽपि (10 E. 41 AL) रामकिङ्करधर्मे अस्य कर्ता इत्येव दृश्यते । बरोडा—नासिक—पुस्तकालयसूचीष्वपि रामकिङ्करधर्मे एवास्य कर्तेति दृश्यते । मद्रास-राजकीयहस्तलिखितपुस्तकालयपुस्तके तु (D. 4689 MGOML) धर्मभट्ट इति दृश्यते । ग्रन्थेषु भेदोऽपि नैव दृश्यते । यद्यस्य कर्ता धर्मभट्टस्स्यात्तर्हि—धर्मभट्टः तिरुमलाचार्यसूनुः मुकुन्दाश्रमस्य मन्त्रवादिरामचन्द्रार्यस्य च शिष्यः अन्न-म्भट्टादिवत् सप्तदशशतकापरार्धकालिकः (1650—1750 A.D.) इति निश्चीयते । अन्नम्भट्टपितुर्धर्मभट्टपितुश्च नामसादृश्यमपि अवधेयार्हो विषयः ॥ यद्यस्य कर्ता रामानन्दसरस्वती स्यात्तर्हि रामानन्दसरस्वती मुकुन्दगोविन्दाचार्यशिष्य एकोनविं शतिशतकपूर्वार्धात्प्राक्तन इति निश्चीयते । यतः बम्बई युनिवर्सिटीहस्तलिखित पुस्तकालयस्थे आदर्शपुस्तके (1877 सं 1821 A.D.) इति प्रतिलेखनावसरः परिलक्ष्यते । तस्मात्तत्प्राक्तन इति निश्चयः । रामकिङ्करधर्मस्यैव रामानन्द इत्यपि स्यान्नाम । अथवा रामानन्दस्यैव रामकिङ्करधर्म इति स्यान्नाम । उभयोरपि आचार्यनामसादृश्यमपि अवधेयार्हः विषयः ॥ यद्यस्य कर्ता रामकिङ्करस्स्यात् स च रामानन्द इति व्यवहाराद्भिन्न स्स्यात्तर्हि रामकिङ्करोऽयं हरिनाथरामनाथयोः प्रशिष्य मुकुन्दगोविन्दशिष्यः षोडशसप्तदशशतकीयः (1600-1700 A.D.) अद्वैततत्त्व-सुधाकार इति न्यूकाटलागस काटलागरप्रमाणात् ज्ञायते ॥

48. ब्रह्मामृतवर्षिणी—

पदयोजनापरनामायं ग्रन्थः अमुद्रितः लन्दननगरस्थभारतकार्यालयपुस्त-कालयसूच्यां (2268 DC. IOL) दृश्यते । धर्मभट्टरामानन्दरामकिङ्करकृतायाः ब्रह्मामृतवर्षिण्याः भिद्यतेऽयं ग्रन्थः । अस्य कर्ता स्वयम्प्रकाशशिष्यस्सदाशिवानन्द-सरस्वतीति ज्ञायते । सप्तदशशतकीयोऽयं सदाशिवानन्द इति निर्णयः ।

49. मिताक्षरा—

भामतीकल्पतरुवैयासिकन्यायमालादिप्रदर्शितदिशा ब्रह्मसूत्राणां वृत्ति-रूपोऽयं ग्रन्थ आनुपूर्व्या क्वचित् वाक्यविन्यासेन क्वचित् कल्पतरुवैयासिक-

न्यायमालादीननुसरति। मुद्रितश्चायं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालयग्रन्थमालायाम्। अस्य कर्ता तर्कसंग्रहतर्कसंग्रहदीपिका अष्टाध्यायीव्याख्यामिताक्षरा कैयटकृतमहाभाष्यप्रदीपव्याख्या—'उद्योतन'कर्ता पदवाक्यप्रमाणपारावारपारीणः आन्ध्रदेशजः कृष्णानदीतीरोपन्तचित्तूरग्रामवासी अद्वैतविद्याचार्यराघवसोमयाजिकुलोत्पन्नः, तिरुमलाचार्यसूनुः कौशिकगोत्रजः, सिद्धान्तकौमुदीव्याख्यासिद्धान्तरत्नाकरग्रन्थप्रणेतू रामकृष्णभट्टस्य, सर्वदेवस्य च कनीयान् भ्राता, व्याकरणाचार्यस्य शेषकृष्णपुत्रस्य शेषविश्वेशस्य शिष्यः, वेदान्ते ब्रह्मानन्दसरस्वत्याश्शिष्यः अन्नम्भट्ट इति एतदीयग्रन्थपरिशीलनात् ज्ञायते। अयं काश्यां शास्त्राण्यधीती उवासेति विश्वेश्वरध्यानादवगम्यते। अन्नम्भट्टप्रशंसनपरा "काशीगमनमात्रेण नान्नम्भट्टायते द्विजः" इति किंवदन्ती च प्रसिद्धा। अस्य शिष्यः वेदाद्रिसूरिरिति प्रसिद्धः वेदान्तपरिभाषाव्याख्यातत्वबोधिनीकारः। न्याये व्याकरणे मीमांसायाञ्चादसीयाः ग्रन्था प्रसिद्धाः। सप्तदशशतकीयोऽयं (1600–1700) अन्नम्भट्टः। नृसिंहाश्रमिकृतस्य तत्वविवेकदीपनस्यापि व्याख्यानेन कृता॥

50. ब्रह्मसूत्ररत्नप्रकाशिका—

ग्रन्थोऽयं कलकत्तायां मुद्रिते ब्रह्मसूत्रव्याख्याने (Page 844) निर्दिष्टः। अस्य कर्ता अखण्डानुभूतिरिति च नाम निर्दिष्टम्। ग्रन्थोऽयं कुत्र लभ्यत इति न ज्ञायते।

51. लघुवार्तिकम्—

वेदान्तसूत्रलघुवार्तिकनामायं ग्रन्थ आनुष्टुभेण छन्दसा विरचितः कुत्रचिदेकेन पादेन एकैकस्याधिकरणस्य कुत्रचिदेकेन श्लोकेन अधिकरणार्थस्य च संग्राहकः चौखाम्बामुद्रणालये मुद्रितः। अस्य व्याख्यापि मूलकृतैव कृता न्यायसुधाख्या। लघुवाक्यसुधा इत्यपि व्यवहारः। अस्य कर्ता उत्तमश्लोक इति शुद्धानन्दशिष्यस्स इति च ग्रन्थात् ज्ञायते। शुद्धानन्दस्य शिष्य आनन्दगिरिरिति च प्रसिद्धम्। यदि स एवायं शुद्धानन्दस्स्याचार्हि उत्तमश्लोक आनन्दगिरिसामयिकस्सतीर्थ्यश्चेति त्रयोदशशतकापरार्धादारभ्यकालवासीति (1250–1350 A.D.) निश्चेतुं शक्यते। श्रीकण्ठशास्त्री तु "लक्ष्मीधरगुरोर्नाम अनन्तानन्दगिरिरिति, स आनन्दगिरिरिति व्यवह्रियते। लक्ष्मीधरशिष्येषु शुद्धानन्दः कश्चन आसीत्। तस्य च स्वयम्प्रकाशश्शिष्यः।" इति भारतीयत्रैमासिकैतिहासिकपत्रिकायाश्चतुर्दशतमे

भागे (IHQ Vol. XIV) प्रतिपादयति। यद्येवं शुद्धानन्दशिष्यौ स्वयम्प्रकाशउत्तमश्लोकौ इति स्वीक्रियते तर्हि चतुर्दशशतकीयोऽयमिति (1400 A. D.) सिध्यति। वाराणसीवासी चायमुत्तमश्लोकः।

(A) लघुवार्तिकव्याख्या—लघुन्यायसुधा—

लघुवार्तिकस्य व्याख्यात्मकोऽयं ग्रन्थः वाराणसीसंस्कृतग्रन्थमालायां मुद्रितः। अस्य कर्ता मूलग्रन्थकार उत्तमश्लोकश्शुद्धानन्दशिष्यस्त्रयोदशशतकीय इति प्रपञ्चितं पुरस्तात्।

52. विद्वज्जनमनोहरी—

अमुद्रितोऽयं ग्रन्थः लन्दननगरस्थभारतकार्यालयपुस्तकालये (2267 DC. Vol. IV IOL) बन्दरगार ओरियण्टलरिसर्च इन्स्टिट्यूट पुस्तकालये, कलकत्तासंस्कृतकलाशालापुस्तकालये च लभ्यते। अस्य कर्ता आनन्दाश्रमशिष्यः रङ्गनाथ इति ज्ञायते। "विद्यातीर्थकृतैश्श्लोकैर्नृसिंहाश्रमिसूक्तिभिः। सन्दृब्धा व्याससूत्राणां वृत्तिर्भाष्यानुसारिणी।" इति दर्शनात्तयोरर्वाचीन इति सिध्यति। आनन्दाश्रमोऽयमस्य गुरुर्यदि आनन्दरससागरकर्ता आनन्दाश्रमस्स्यात् तर्हि अस्य कालष्षोडशशतकादर्वाचीनः (1600–1700 A.D) इति निश्चेतुं शक्यते। भट्टोजिदीक्षितस्य भ्रातुः अद्वैतचिन्तामणिकर्तृ रङ्गोजिभट्टस्यापि गुरोर्नाम आनन्दाश्रमइत्येव। तस्मात् रङ्गोजिभट्ट एव रङ्गनाथो वेति संशय उदेति॥

53. विद्वन्मुखभूषणम् सव्याख्यम्—

शाङ्करभाष्यानुसारिणी अधिकरणार्थप्रदर्शिनीयं ब्रह्मसूत्रवृत्तिस्सव्याख्याऽमुद्रिता प्रथमाध्यायान्तं मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2325 MGOML) लभ्यते। अस्या व्याख्यापि मूलकृतैव कृता। अस्य कर्ता प्रयागकुलोत्पन्नः नरसिंहार्यपुत्रः वेङ्कटाद्रिभट्टारक इत्यपरनामा वेङ्कटाद्रिसूरिरिति परं ज्ञायते।

54. वेदान्तकौस्तुभः—

अमुद्रितोऽयं सूत्रवृत्तिग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 4143 MGOML) लभ्यते। अस्य कर्ता कौण्डिन्यगोत्रजश्चोलदेशीयस्सीतारामः षोडशशतकापरार्धकालवासीति ज्ञायते।

55. वेदान्तदीपिका—

विषयविदग्धा इत्यपरनामायं ग्रन्थ अमुद्रितस्तिरुवनन्तपुरपुस्तकालये (356 TCD Vol III) दृश्यते। पद्यबद्धोऽयं ग्रन्थः भाष्यार्थसंग्राहकः चौखाम्बामुद्रणालये च मुद्रितः । अस्य कर्ता सभानाथसर्वक्रतुरित्यपरनामा अग्निहोत्रभट्टपितामहः नारायणशास्त्रिगणपत्यम्बयोः पुत्रः, नारायणसुब्रह्मण्यस्य वैद्यनाथस्य द्वादशाहयाजिबालपतञ्जलिरित्यपरनाम्नः बालचन्द्रदीक्षितस्य च पिता सुन्दरेश इत्यपरनामा चोलदेशीयः चोक्कनाथदीक्षितः। अस्य जामाता रामभद्रमखी। सप्तदशशतकीयोऽयं (1600–1700 A. D.) नल्लादीक्षितधर्मराजाध्वरीन्द्रसामयिकश्चेति ज्ञायते। वेङ्कटेश्वरदीक्षितशिष्योऽयं प्रसिद्धवैय्याकरणोऽपीति ज्ञायते।

56. वेदान्तनयभूषणम्—

भामतीप्रस्थानानुयायी भामतीब्रह्मविद्याभरणार्थानां संग्राहकस्सूत्रवृत्तिरूपोऽय ग्रन्थ अमुद्रितः रायलआसियाटिक्सोसाइटि कल्कत्तानगरे, शङ्करमठपुस्तकालये च लभ्यते। अस्य कर्ता विवरणोपन्यासकारस्य रामानन्दसरस्वत्याः प्रशिष्यः ब्रह्मविद्याभरणकारस्य अद्वैतानन्दस्य शिष्यः रत्नप्रभाभागव्याख्यातुरच्युतकृष्णानन्दस्य मानमालकारस्य रामानन्दस्य च गुरुस्स्वयम्प्रकाशानन्दस्सप्तदशशतकीयः (1700–1800 A. D.) इति निश्चीयते।

57. वेदान्तनवमालिका—

लघुवृत्तिरित्यपरनामायं ग्रन्थ "ओरियण्टलपब्लिषिङ् हाउस" मद्रासनगरे मुद्रितः। अस्य कर्ता चोलदेशीयः तिरुविशनल्लूरग्रामाभिजनरामसुब्रह्मण्यशास्त्रिणश्शिष्य एकोनविंशतिशतकीय (1850-1910 A. D.) नीलमेघशास्त्रीति ज्ञायते।

58. वेदान्तन्यायरत्नावलिः—

ब्रह्माद्वैतप्रकाशिकापरनामायं ग्रन्थ पुरुषोत्तमतीर्थकृत इति परं ज्ञायते। एनमधिकृत्य नान्यत्किमपि श्रूयते। ग्रन्थोऽयं शङ्करमठसूच्यां दृश्यते।

59. वेदान्तभाष्यप्रतिपाद्यानि—

शाङ्करभाष्यानुसार्ययं ग्रन्थ अमुद्रित उज्जैनसूच्यां दृश्यते। अस्यैव वेदान्तभाष्यपदीपोद्योतनमित्यपि नामेति केचिद्वदन्ति। अस्य कर्ता महाराष्ट्रविप्रकुलोत्पन्न-

शिवभट्टसतीदेव्योः पुत्रः, भट्टोजिदीक्षितपौत्रस्य हरिदीक्षितस्य शिष्यः वैद्यनाथपायुगुण्डे इत्याख्यस्य बालशर्मणः गुरुः, शृङ्गिबेरपुराधीशात् रामतो लब्धजीवकः अपरे वयसि प्राप्तसंन्यासाश्रमः प्रसिद्धः वैय्याकरणः सप्तदशशतकापरार्धारम्भकालवासी (1674–1754 A.D.) नागेशभट्ट इति ज्ञायते।

60. वेदान्तशोधनम्— अमुद्रितोऽयं वृत्तिग्रन्थ उज्जैनसूच्यां दृश्यते। अस्य कर्ता विट्ठलबुधभण्डारक इति परं ज्ञायते।

61. वेदान्तसूत्रभाष्यम्— ग्रन्थोऽयं विश्वनाथसिम्हदेवेन कृत इति परं ज्ञायते।

62. वेदान्तसूत्रमुक्तावलिः—

सूत्रवृत्तिरूपोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः। ग्रन्थेऽस्मिन् निर्णयदर्पणाख्यः ग्रन्थः निर्दिष्टः। अस्य कर्ता गद्यमयशारीरकमीमांसाभाष्यवार्तिककर्तुर्नारायणतीर्थस्य परमानन्दतीर्थस्य च शिष्यः शिवरामानन्दगोपालानन्दगोविन्दानन्दसरस्वतीनां प्रशिष्यः बालकृष्णानन्दसरस्वत्याश्शास्त्रारम्भसमर्थनकारस्य त्र्यम्बकभट्टस्य वेदान्तसारव्याख्यातुः रामचन्द्रानन्दसरस्वत्याश्च गुरुः गौडदेशीयस्सप्तदशशतकवासी (1600–1700 A.D.) गुरुचन्द्रिकाकारः ब्रह्मानन्दसरस्वतीति ज्ञायते।

63. वेदान्तसूत्रार्थचन्द्रिका— ग्रन्थोऽयं केशवदेवकृत अमुद्रित अडयारपुस्तकालये लभ्यते।

64. वैयासिकन्यायमाला—

व्यासनिर्मितेषु ब्रह्मसूत्रेषु शङ्कराभिमतानां अधिकरणानां वर्णनपरोऽयं ग्रन्थः प्रत्यधिकरणं श्लोकद्वयमिति सरणिमनुगच्छति। अस्या व्याख्यापि न्यायमालाविस्तराख्या मूलकृतैव कृता। अधिकरणरत्नमाला इत्यपि नामान्तरं दृश्यते। मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये। अस्य कर्ता विद्यातीर्थशिष्यः, विद्यारण्य–ब्रह्मानन्दभारती-कृष्णानन्दभारतीनां गुरुस्त्रयोदशशतकापरार्धकालवासी (1230–1350 A.D.) भारतीतीर्थ इति ज्ञायते।

(A) वैयासिकन्यायमालाव्याख्या—वैयासिकन्यायमालाविस्तरः

ग्रन्थोऽयं आनन्दाश्रममुद्रणालये मुद्रितः। अस्य कर्ता मूलग्रन्थकार भारतीतीर्थ इति ज्ञायते।

65. वैय्यासिकसूत्रोपन्यासः —

शाङ्करभाष्य-तट्टीकादिसारसंग्रहभूतोऽयं ग्रन्थ अमुद्रितः मद्रासराजकीयपुस्तकालये (D. 4693 MGOML) तिरुवनन्दपुरपुस्तकालये अडयारपुस्तकालये सरस्वतीमहालये मैसूरपुस्तकालये च लभ्यते । व्याससूत्रदीपिका वेदान्तसूत्रोपन्यास इति नामान्तराण्यस्यैव ग्रन्थस्य । अस्य कर्ता विद्याशङ्करप्रशिष्यः भारतीशिष्यः रामेश्वरभारतीति ज्ञायते । विद्याशङ्करस्यैव विद्यातीर्थ इति शृङ्गगिरिपीठारोहणात्पूर्वं प्रसिद्धिरासीत् । पीठारोहणादनन्तरं " शङ्करानन्दः " विद्याशङ्कर इति च प्रसिद्धिः श्रूयते । यदि स एवायं विद्याशङ्करस्स्यात्तर्हि विद्याशङ्करपीठारोहणकालः (1280 A. D.) इति शृङ्गगिरिगुरुपरम्परया ज्ञायते । एवञ्चायं विद्याशङ्करप्रशिष्यः रामेश्वरभारती चतुर्दशशतकावसाने (1320–1400 A. D.) स्यादिति निर्णेतुमर्हते ।

66. शारीरकचतुस्सूत्रीविचारः —

ग्रन्थोऽयं नाशशरापेट गुण्टूरनगरे मुद्रितः । अस्य कर्ता बेल्लङ्कोण्ड–रामराय आधुनिक इति अद्वैताचार्यप्रकरणे प्रतिपादयिष्यते ।

67. शारीरकन्यायनिर्णयः —

" शारीरकमीमांसाभाष्यनिर्णयः " " भाष्यन्यायनिर्णयः " " भाष्यन्यायसंग्रह " इत्याद्यपरनामायं ग्रन्थः मद्रासविश्वविद्यालयसंस्कृतग्रन्थमालायां मुद्रितः । अस्य कर्ता स्वयम्प्रकाशानुभवापरनामक–अनन्यानुभवशिष्यः तत्त्वशुद्धिकारस्य ज्ञानघनस्य सामयिकः दशमशतकीयः (1000 A. D.) प्रकाशात्मा इति ज्ञायते । अधिकं एनमधिकृत्य अन्यत्र निरूपितम् ।

68. शारीरकमीमांसाशास्त्रसंग्रहः—

जीवब्रह्मणोरैक्यप्रतिपादकोऽयं वृत्तिग्रन्थ अमुद्रितः मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 2905) अडयारपुस्तकालये तिरुवनन्तपुर पुस्तकालये विश्वभारतीशान्तिनिकेतनपुस्तकालये च लभ्यते । अस्य कर्ता आनन्दानुभूतिशिष्यः विबुधेन्द्रयोगीत्यपरनामा कृष्णानुभूतियतिरिति ज्ञायते । केरलदेशजोऽयं कृष्णानुभूतियतिस्स्वसामयिकौ राजराजरविवर्मनामानौ स्वग्रन्थे निर्दिशति । केरलीयः वासुदेवकविनामा प्रसिद्धः रविवर्मणस्सभायामासीत् । यस्य च कालः पञ्चदशशतकमध्यभाग (1450 A. D.) इति कृष्णाचार्यरचितसंस्कृतसाहित्यचरिते 262 पुटे दृश्यते ।

यदि कृष्णानुभूतिनिर्दिष्ट एव रविवर्मा अयं स्यात्तर्हि अस्यापि कृष्णानुभूतियतेः कालः पञ्चदशशतकमिति (1450–1550 A. D.) निर्णेतुं शक्यते । मद्रासराजकीयहस्तलिखितपुस्तकालयस्थे (R. 3305) ग्रन्थान्तरे विद्यमानं " गीर्वाणेन्द्रसरस्वत्याः पादाब्जं हृदि बिभ्रतः " इति पदं नृसिम्हाश्रमिगुरुं गीर्वाणेन्द्रं स्मारयति ।

69. शारीरकमीमांसासूत्रसिद्धान्तकौमुदी—

पद्यमयीयं वृत्तिः अमुद्रिता मद्रासराजकीयहस्तलिखितपुस्तकालये (R. 3734 MGOML) लभ्यते । अस्यैव ग्रन्थस्य " तात्पर्यप्रकाशिका " " तात्पर्यार्थप्रकाशिका " " भाष्यार्थन्यायमाला " इति नामान्तराणि दृश्यते । ग्रन्थेऽस्मिन् विद्यारण्यः वैय्यासिकन्यायमाला चोद्धृतौ । अस्य कर्ता सुब्रह्मण्याग्निचिन्मखीन्द्र इति परं ज्ञायते । अस्य कालादिनिर्णये प्रमाणं नोपलभ्यते । चतुर्दशशतकादर्वाचीन इति तु निश्चयः ।

70. शारीरकरहस्यार्थप्रकाशिका—

शारीरकरहस्यार्थवस्तुतत्त्वप्रकाशिकापरनामायं अध्यायचतुष्टयैः पूर्णः शाङ्करभाष्यसारभूत अमुद्रितः वृत्तिग्रन्थः रायल आसियाटिक सोसाइटि बाम्बे पुस्तकालये बन्दरकार ओरियण्टलरिसर्च पुस्तकालये च लभ्यते । अस्य कर्ता उपदेशसाहस्रीव्याख्याता कृष्णतीर्थशिष्य अनन्तदेवप्रथमस्य पुरुषोत्तममिश्रस्य च गुरुर्नृसिम्हाश्रमिसामयिकः षोडशशतकीयः (1570–1670 A. D.) रामतीर्थ इति ज्ञायते । अस्यैव ग्रन्थस्य शारीरकशास्त्रसंग्रह इति नामान्तरं श्रूयते ।

71. शारीरकार्थसंक्षेपः—

ग्रन्थोऽयममुद्रित अडयारपुस्तकालये लभ्यते । अस्य कर्ता राघवार्य इति परं ज्ञायते ।

72. शास्त्रदर्पणम्—

अधिकरणरचनासु भामतीमतमनुसरन् भाष्यभावयुक्तार्थसंग्राहकोऽयं वृत्तिग्रन्थः वाणीविलासमुद्रणालये मुद्रितः । अस्य कर्ता दीक्षाग्रहणे आनन्दात्म-अनुभवानन्दशिष्यः विद्यायां पुत्रप्रकाशशिष्यश्चित्सुखाचार्यप्रशिष्यः व्यासाश्रमापरनामा त्रयोदशशतकापरार्धकालिकः (1247–1347 A. D.) कल्पतरुकार अमलानन्द इति ज्ञायते ।

73. शङ्करपादभूषणम्—

व्याससूत्राणां प्रथमाध्यायस्य प्रथमः पादः, द्वितीयाध्यायस्य आद्यःपादश्च व्याख्यातः। प्रतिसूत्र शाङ्करमतं प्रदर्श्य आनन्दतीर्थीयद्वैतमतमनूद्य तदुद्भावितानि दूषणानि दूरीकृतानि शतशः कणशश्चैव खण्डितानि। नव्यतर्कशैल्या सम्पूर्णः वेदान्तार्थप्रतिपादक अद्वैतरत्नरक्षाकरण्डकोऽयं ग्रन्थ आनन्दाश्रमे मुद्रितः। अस्य कर्ता वासिष्ठगोत्रोत्पन्नः बह्वृचशाखाध्यायी आश्वलायनसूत्री रामचन्द्रसूरिपुत्रः रामशास्त्रिपिता महाराष्ट्रदेशान्तर्गत वरङ्गदेशीयः मीमांसान्यायपञ्चास्यराघवाचार्यशिष्यः एकोनविंशतिशतकीयः (1850 A. D.) रघुनाथसूरिः। अस्य गुरु राघवाचार्यः न मध्वमतानुयायी वैय्याकरणः नापि गजेन्द्रगड्करकुलोत्पन्न सतारापुरवासी, परन्त्वन्य इति बोध्यम्। ग्रन्थकारोऽयं रघुनाथसूरिः पुण्य(पूना)पत्तने राजकीयाङ्गलअधिकारि प्रार्थनावशात् न्यायाधीशपदमलञ्चकार। अस्य पुत्र रामशास्त्री अपि भोर राजधान्यां राजाश्रितः नीतिवक्ता वकीलः आसीत्। ग्रन्थकारोऽयं अपरे वयसि नीरातीरसमीपस्थ "भोर" राजधान्यन्तर्गतशासितुः अधीश्वरात् पण्डितनानासाहेबपन्तसचिवात् प्राप्ताश्रयः ग्रन्थञ्चकारेति ज्ञायते। अनेन भगवद्गीताया अपि शङ्करपदभूषणमिति व्याख्या कृता।

74. शङ्कराशङ्करभाष्यविमर्शः—

ग्रन्थोऽयं तेलुगुलिप्यां मुद्रितः। अस्य कर्ता आन्ध्रदेशज एकोनविंशतिशतकीय (1875 A. D.) रामशास्त्रिसुब्रह्मण्यशास्त्रिशिष्यः वेलङ्कोण्डरामराय कविरिति ज्ञायते।

75. समन्वयसूत्रवृत्तिः—

ब्रह्मसूत्रसमन्वयापरनामायं ग्रन्थः "हल्चरिपोर्ट आफ सान्स्क्रुट मानस्क्रिप्ट्" निर्दिश्यते। अस्य कर्ता अनूपनारायणतर्कशिरोमणिरिति परं ज्ञायते।

76. सिद्धान्तार्णवशाङ्करब्रह्मसूत्रभाष्यव्याख्या— ग्रन्थोऽयं काञ्चीकामकोटिसूच्यां दृश्यते। अस्य कर्ता रघुनाथभट्टाचार्य इति परं ज्ञायते।

77. सुबोधिनी—

शारीरकसूत्रसारार्थचन्द्रिकापरनामायं ग्रन्थ अमुद्रितः लन्दननगरस्थभारतकार्यालयपुस्तकालये, उज्जयिन्यां च लभ्यते। अस्य कर्ता अग्निहोत्रिवीरेश्वर-

सूरिपौत्रः सदाशिवभट्टपुत्रः, महाड्करित्युपनामायं गङ्गाधरभगवद्भक्तकिङ्करः वत्सर्षिगोत्रज अष्टादशशतकीयः (1780–1880 A. D.) इति ज्ञायते। अस्य नाम्ना स्वाराज्यसिद्धि–वेदान्तसिद्धान्तसूक्तिमञ्जरीकारस्य गङ्गाधरेन्द्रसरस्वत्याश्शिष्य इति ज्ञायते।

78. सूत्रभाष्यसारसंग्रहः—

अमुद्रितोऽयं ग्रन्थ अड्यारपुस्तकालये (37 D. 27 AL) लभ्यते। अस्य कर्ता वासुदेवेन्द्रशिष्यः कृष्णानन्द–उपनिषद्ब्रह्मेन्द्र–रामचन्द्रेन्द्राणां सतीर्थ्यश्चन्द्रिकाचार्यगुरुः अष्टादशशतकीय (1800–1900 A. D.) रामब्रह्मेन्द्रसरस्वतीति ज्ञायते।

79. सूत्रसंक्षिप्तवृत्तिः—

अमुद्रितोऽयं ग्रन्थ पञ्जाबसूच्यां (718) दृश्यते। अस्य कर्ता रामधनाख्यः। अनेन (1753 A. D.) काले ग्रन्थोऽयं कृत इति ज्ञायते। एतद्रीत्या ब्रह्मसूत्राणि शाङ्करभाष्यवत् (555) संख्यया संख्यातानि।

80. सूत्रार्थामृतलहरी—सव्याख्या

अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यते। अस्य कर्ता कृष्णावधूतपण्डित इति ज्ञायते। अस्य व्याख्यापि मूलकारेणैव कृता वरीवर्ति।

81. सूत्रवृत्तिः— अमुद्रितेयं वृत्तिः मैसूरसूच्यां दृश्यते। अस्य कर्ता कौण्डिन्य इति ज्ञायते कौण्डिन्यवृत्तिरित्यपि नामान्तरम्।

82. सूत्रवृत्तिः—

ग्रन्थोऽयं दासगुप्तमहाशयेन (H. I. P. vol. II Page 81) निर्दिष्टः। शाङ्करभाष्यानुसारिण्या वृत्या अस्याः कर्ता वैद्यनाथ इति नाम निर्दिश्यते। कोऽयं वैद्यनाथ परिभाषासंग्रहकार वैय्याकरणस्स्याचर्हि अस्य मातुलः रामभद्रदीक्षितः, वाधूलगोत्रजः, रामभद्रदीक्षितशिष्यः, कण्डरमाणिक्यग्रामवासी चोलदेशीयस्सप्तदशशतकापरार्धवासी (1650–1700 A. D.) इति निश्चीयते।

83. सूत्रवृत्तिः — ग्रन्थोऽयं मैसूरपुस्तकालये लभ्यते । अस्य कर्ता वेङ्कामात्यापरनामा चिन्मयमुनिरिति परं ज्ञायते ।

84. सूत्रवृत्तिः —

अमुद्रितोऽयं ग्रन्थः बरोडापुस्तकालये (12717 BRD) लन्दननगरस्थभारतकार्यालयसूच्याञ्च दृश्यते । अस्य कर्ता रामगोविन्दशिष्यः वासुदेवतीर्थशिष्यः ब्रह्मानन्दसरस्वतीगुरुः सप्तदशशतकवासी (1600–1700 A. D.) नारायणतीर्थ इति ज्ञायते ।

85. सूत्रवृत्तिः— ग्रन्थोऽयं भारतकार्यालयपुस्तकालये लन्दननगरे लक्ष्यते । अस्य कर्ता प्रकाशात्मा इत्यपि ज्ञायते ।

86. सूत्रवृत्तिः —

ग्रन्थोऽयं आनन्दाश्रमुद्रणालये मुद्रितः । अस्य कर्ता लक्ष्मीनरहरिदीक्षितपुत्रः रामरायगुरुः हरिदीक्षितः । अनेन (1658 श 1736 A. D.) काले ग्रन्थोऽयमारचित इति अष्टादशशतकीय इति ज्ञायते ।

87. सूत्रवृत्तिः —

ग्रन्थोऽयं अद्वैतमञ्जरी ग्रन्थमालायां कुम्भघोणनगरे मुद्रितः । अस्य कर्ता शङ्कराचार्यशिष्यः, सुरेश्वर इति च केषाञ्चिन्मतम् ।

88. सूत्रवृत्तिः —

ग्रन्थोऽयं दासगुप्तमहाशयेन (H. I. P. Vol. II Page 81) निर्दिष्टः । अस्य कर्ता देवरामभट्ट इति च प्रतिपादितम् ।

89. सूत्रवृत्तिः —

ब्रह्ममीमांसात्रिशत्यपरनामायं ग्रन्थ अज्ञातकर्तृकः सूत्रार्थसंग्राहकः चौखम्बामुद्रणालये मुद्रितः ।

90. सूत्रवृत्तिः—

ग्रन्थोऽयममुद्रितः पञ्चावसूच्यां 719 दृश्यते । अस्य कर्ता शुकभगवत्पाद इति च निर्दिश्यते । कोऽयं शुकभगवत्पाद इति निर्णये विशिष्टं प्रमाण किमपि न दृश्यते ।

91. सूत्रवृत्तिः—

यामुनाचार्येण सिद्धित्रये अनुपादेयत्वेन प्रदर्श्यमानोऽयं ग्रन्थः भर्तृहरिकृतः अद्वैतमतपोषकस्स्यादित्यूह्यते । ग्रन्थोऽयं यद्यपि नोपलभ्यते तथापि शब्दाद्वैतवादी भर्तृहरिरिति प्रसिद्धब्रह्मसूत्राणां वृत्तिरचनायास्सम्भवः । भर्तृहरेः कालष्षष्ठशतकात् पञ्चमशतकाद्वा प्राचीन इति ज्ञायते । अधिकं भर्तृहरिप्रकरणे निरूपितम् ।

एवं सूत्रप्रस्थाने—गणपतिशास्त्रिकृत अद्वैतमतावलम्बी "अथ शब्दार्थविचारः", कौण्डिन्यकृता रामभद्रविद्वत्कृता, नृसिम्हाश्रमिशिष्यरामाश्रमिकृताश्च सूत्रवृत्तयः भारतकार्यालयस्थपुस्तकालये लन्दननगरस्थे दृश्यन्ते । एवं नारायणकृता न्यायनिर्णयसंग्रहनाम्नी वृत्तिः, अज्ञातकर्तृनामानौ "अद्वैतरत्नकोश"—'आमोद'-नामानौ द्वौ वृत्तिग्रन्थौ च मैसूरसूच्यां दृश्येते । शान्तिनिकेतनपुस्तकालये कृष्णेन्द्रानुभूतिकृता ब्रह्मसूत्रभाष्यव्याख्या काचन विद्यते । "काटलागस काटलागर" मिति ग्रन्थे ज्ञानेन्द्रयतिकृता "दीपिका" नागेशभट्टकृतः "सूत्रेन्दुशेखरः" रामानन्दतीर्थकृतं "वेदान्तसूत्ररत्नं" आनन्दपूर्णकृता "सामान्यसूत्रवृत्तिश्च" दृश्यन्ते । एतेषां ग्रन्थानां प्राप्तिस्थानादिकं न ज्ञातुं पार्यते ।

—:*:—

प्रकरणग्रन्थाः

प्रस्थानत्रयान्तर्गतास्सर्वे ग्रन्था व्याख्योपव्याख्यासहिताः निरूपिताः। प्रस्थानत्रयानन्तर्गता अद्वैतसिद्धान्तप्रतिपादकाश्च मार्कि पञ्चशताधिकाः सव्याख्याः निर्व्याख्याश्च विभिन्नाचार्यकृता ग्रन्था उपलभ्यन्ते। ते च सिद्धान्तमात्रप्रदर्शनपराः, खण्डनमण्डनपराः, अनुभवात्मकभावाविष्करणपराः काव्यशैल्या सिद्धान्तप्रदर्शनपराश्चेति चतुर्धा विभज्यन्ते। एते सर्वेऽपि ग्रन्थाः —

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥

इति लक्षणलक्षिता इति प्रकरणप्रस्थान एव प्रतिपादिताः। चतुर्विधा एते ग्रन्था असंख्या इति प्रकरणेऽस्मिन् प्रकरणग्रन्थानां प्रकरणग्रन्थकर्तॄणाञ्च नामनिर्देशः परं क्रियते। तत्तत्प्रकरणग्रन्थप्रतिपादिता विषयाः, प्रकाशिताः? उत अप्रकाशिता इत्यादय इतरे विषया अद्वैताचार्यपरिच्छेदे प्रतिपादयिष्यन्ते।

	ग्रन्थाः	कर्तारः
1.	अज्ञानतिमिरदीपकः	कृष्णानन्दसरस्वती
2.	अज्ञानध्वान्तचण्डभास्करः	अमरेश्वरशास्त्री
3.	अणुवेदान्तः	रामशास्त्री
4.	अद्वैतग्रन्थः	अप्पय्यदीक्षितः
5.	अद्वैतग्रन्थः	महादेवसरस्वती
6.	अद्वैतचन्द्रिका (वाराणस्यां मुद्रिता)	सुदर्शनाचार्यः
7.	अद्वैतचिन्तामणिः	कुमारभवस्वामी
8.	अद्वैतचिन्तामणिः	रङ्गोजिभट्टः
9.	अद्वैतचिन्तामणिः	श्रीदेवः
10.	अद्वैतचिन्तामणिः	सुन्दरेशः
11.	अद्वैतचूडामणिः	चिद्घनानन्दगुरुशिष्यः
12.	अद्वैतजलजातः	पाण्डुरङ्गः
13.	अद्वैतजलजातम्	अच्युतशर्मामोडकः
14.	अद्वैततत्त्वदीपः	नित्यानन्दाश्रमः

	ग्रन्थाः	कर्तारः
15.	अद्वैततत्त्वप्रबोधिनी	साधुशान्तिनाथः
16.	अद्वैततरङ्गिणी	रामेश्वरभट्टः
17.	अद्वैतदर्पणम्	अप्पकविः
18.	अद्वैतदर्पणम्	भजनानन्दः
19.	अद्वैतदर्पणव्याख्या-भावप्रकाशिका	भजनानन्दः
20.	अद्वैतदीपिका	कामाक्षी
21.	अद्वैतदीपिका (वाराणस्यां मुद्रिता)	गोपालशास्त्री
22.	अद्वैतदीपिका	रामेश्वरभट्टः
23.	अद्वैतदीपिका	नृसिंहाश्रमी
24.	अद्वैतदीपिकाव्याख्या-विवरणम्	नारायणाश्रमः
25.	अद्वैतदीपिकाव्याख्या	सदानन्दव्यासः
26.	अद्वैतदीपिकाव्याख्या प्रकाशः	सुन्दरराजः
27.	अद्वैतनवनीतम्	कृष्णावधूतः
28.	अद्वैतनिर्णयः	अच्युतमुनिः
29.	अद्वैतनिर्णयसंग्रहः	रामानन्दतीर्थः
30.	अद्वैतपद्यभाष्यम्	सोमनाथव्यासः
31.	अद्वैतपारिजातम्	नीलकण्ठतीर्थः
32.	अद्वैतपञ्चरत्नम् (सोपानपञ्चकम्)	शङ्कराचार्यः
33.	अद्वैतपञ्चरत्नव्याख्या	विमलभूधरः
34.	अद्वैतपञ्चरत्नव्याख्या-किरणावली	बालकृष्णानन्दः
35.	अद्वैतपञ्चरत्नविवृतिः निर्वाणपञ्चकविवृतिरित्यपरनामायं ग्रन्थः वाराणस्यां मुद्रितः।	नित्यानन्दसरस्वती
36.	अद्वैतप्रकाशः	दुर्गाप्रसादयतिः
37.	अद्वैतप्रकाशः	महादेवसरस्वती
38.	अद्वैतप्रकाशकः	वासुदेवज्ञानयतिः
39.	अद्वैतप्रकाशिका	सोमनाथव्यासः
40.	अद्वैतब्रह्मतत्त्वप्रकाशिका ग्रन्थोयं नेल्लूर नगरे तेलुगुलिप्यां मुद्रितः।	वीरराघवयज्वा

ग्रन्थाः	कर्तारः
41. अद्वैतब्रह्मसुधा	योगीन्द्रशान्ताश्रमशिष्यः
42. अद्वैतमतप्रकाशः	अय्यण्णादीक्षितः
43. अद्वैतमतसर्वस्वम्	वेङ्कटेशशास्त्री
44. अद्वैतबोधदीपिका	चिदम्बरयोगी
45. अद्वैतबोधदीपिका	नृसिम्हभट्टः
46. अद्वैतब्रह्मसुधाकारिका	गोविन्दानन्दसरस्वती
47. अद्वैतभूषणम्	महादेवसरस्वती
48. अद्वैतभूषणव्याख्या-आनन्ददीपिका	वासुदेवेन्द्रः
49. अद्वैतमकरन्दः	लक्ष्मीधरः
50. अद्वैतमकरन्दव्याख्या–रसाभिव्यञ्जिका	स्वयम्प्रकाशः
51. अद्वैतमकरन्दः	सदाशिवब्रह्मेन्द्रसरस्वती
ग्रन्थोऽयं कुम्भघोणस्थशाङ्करमठे उपलभ्यते । अस्या व्याख्यापि विज्ञानदीपिकानाम्नी अमुद्रिता विद्यते ॥	
52. अद्वैतमतैक्यप्रकाशः	ऐयणाचार्यः
53. अद्वैतमार्ताण्डः	ब्रह्मानन्दतीर्थस्वामी
मुद्रितोऽयं ग्रन्थः । अस्य कर्ता पेरुमङ्गलग्रामवासी दक्षिणदेशीयः आधुनिकश्चेति ज्ञायते ॥	
54. अद्वैतमुक्तासरः	लोकनाथाध्वरी
55. अद्वैतमुक्तासरव्याख्या-कान्तिः	लोकनाथाध्वरी
56. अद्वैतरत्नप्रकाशः	अमरेश्वरशास्त्री
57. अद्वैतरत्नाकरः	अनन्तभट्टः
58. अद्वैतरत्नाकरः	नारायणतीर्थः
59. अद्वैतरत्नाकरव्याख्या–रत्नप्रभा	अमरदासः
60. अद्वैतरसमञ्जरी	नल्लासुधीः
61. अद्वैतरहस्यम्	रामानन्दतीर्थः
62. अद्वैतवाक्यार्थः	त्र्यम्बकभट्टः
63. अद्वैतवादः	जगन्नाथसरस्वती
64. अद्वैतविद्यातिलकम्	समरपुङ्गवदीक्षितः

ग्रन्थाः	कर्तारः
65. अद्वैतविद्यातिलकव्याख्या–दर्पणम्	धर्मय्यदीक्षितः
66. अद्वैतविद्यामुकुरः	रङ्गराजाध्वरी
67. अद्वैतविद्याविजयः	कृष्णशास्त्री
68. अद्वैतशतकम्	गङ्गाधरः
69. अद्वैतशास्त्रार्थविचारः	हरियशश्शर्मा
ग्रन्थोऽयं पञ्चापसूच्यां दृश्यते	
70. अद्वैतशास्त्रोद्धारः	रङ्गोजिभट्टः
71. अद्वैतसाम्राज्यम्	कृष्णानन्दसरस्वती
72. अद्वैतसारः	सुन्दरमूर्तिः
73. अद्वैतसिद्धान्तगुरुचन्द्रिका	चन्द्रिकाचार्यः
74. अद्वैतसिद्धान्तगुरुचन्द्रिकाव्याख्या अमृतरसझरी	चन्द्रिकाचार्यः
75. अद्वैतसिद्धान्तगुरुचन्द्रिकासारबोधः	माधवतीर्थः
76. अद्वैतसिद्धान्तविद्योतनम्	ब्रह्मानन्दसरस्वती
77. अद्वैतसिद्धान्तवैजयन्ती	त्र्यम्बकभट्टः
78. अद्वैतसिद्धान्तसारसंग्रहः	नारायणाश्रमः
79. अद्वैतसुधा	नारायणसरस्वती
80. अद्वैतसुधाबिन्दुः	कृष्णः
81. अद्वैतसुधासारः	ज्ञानानन्दः
82. अद्वैतसंग्रहः	रामभद्रदीक्षितः
83. अद्वैतस्तवः	रघुनाथसूरिः
84. अद्वैतस्तवव्याख्या-ज्ञानाञ्जनशलाका	पाण्डुरङ्गशास्त्री
सव्याख्योयं ग्रन्थः मध्यप्रान्तीयवराग्रन्थसूच्यां दृश्यते ।	
85. अद्वैतविद्याविनोदः	अच्युतशर्मा
86. अद्वैतागमहृदयसंग्राहकश्लोकाः	शान्त्यानन्दः
87. अद्वैतानन्दलहरी	अद्वैतानन्दतीर्थः
88. अद्वैतानन्दसागरः	रघूत्तमतीर्थः

ग्रन्थाः	कर्तारः

ग्रन्थोऽयं जयपुरपोटीकानासूच्यां (223 Vol- II) दृश्यते। अस्य कर्ता पुरुषोत्तमतीर्थ - ब्रह्मानन्दसरस्वती - स्वयम्प्रकाशतीर्थशिष्यः रघूत्तमतीर्थ इति ज्ञायते। अस्य प्रतिलेखनकालः 1605 श 1683 A D. इति ज्ञायते ॥

89. अद्वैतनन्दानुभूतिः	सीतारामशास्त्री
90. अद्वैतानुभवोल्लासः	सुब्रह्मण्येन्द्रः
91. अद्वैतानुभूत्यष्टकम्	जीवन्मुक्तभिक्षुः

92. अद्वैतानुभूत्यष्टकव्याख्या भावार्थदीपिका-जीवन्मुक्तभिक्षुः
सव्याख्योऽयं ग्रन्थः लन्दननगरस्थभारतकार्यालयमुद्रितग्रन्थसूच्यां (IOL, Vol. I दृश्यते) ॥

93. अद्वैतानुभूतिः	शङ्कराचार्यः
94. अद्वैतानुसन्धानम्	नृसिम्हाश्रमी
95. अद्वैतानुसन्धानम्	रामब्रह्मेन्द्रशिष्यः

ग्रन्थोऽयं सरस्वतीमहालयग्रन्थसूच्यां दृश्यते ॥

96. अद्वैतामृतम्	जगन्नाथसरस्वती
97. अद्वैतामृतव्याख्या-तरङ्गिणी	जगन्नाथसरस्वती
98. अद्वैतामृतमञ्जरी	अच्युतशर्मा
99. अद्वैतामृतसारः	द्विजेन्द्रलालपुरकायस्थः
100. अद्वैतामृतसारकम्	आदिनारायणः
101. अद्वैतामोदः	वासुदेवशास्त्री अभ्यङ्करः
102. अधिकरणकुञ्चिका	अप्पय्यदीक्षितः
103. अधिकरणमञ्जरी	चित्सुखाचार्यः
104. अधिकरणसङ्गतिः	चित्सुखाचार्यः
105. अधिष्ठानविवेकः	पूर्णप्रकाशः
106. अधिष्ठानविवेकः	प्रकाशानन्दः
107. अध्यात्मवासुदेवः	रमणीदासः

ग्रन्थोऽयमुद्रितः रायल आसियाटिक सोसाइटि बम्बई पुस्तकालयसूच्यां दृश्यते ॥

ग्रन्थाः	कर्तारः
108. अध्यात्मोपदेशविधिः	शङ्कराचार्यः
109. अध्यारोपणम्	वासुदेवशिष्यः
110. अध्यारोपणप्रकरणम्	पुरुषोत्तमसरस्वतीशिष्यः
111. अनात्मश्रीविगर्हणम्	शङ्कराचार्यः
112. अनुभवामृतम्	ज्ञानदेवः
113. अनुभवामृतम्	बालकृष्णानन्दः
114. अनुभवविलासः	हरिहरपरमहंसः
115. अनुभववेदान्तप्रकरणम्	हस्तामलकः
116. अनुभूतिप्रकाशः	विद्यारण्यः
117. अनुभूतिलेशः	वामनपण्डितः
118. अनुभूतिविवरणम् सव्याख्यम्	भास्करानन्दः
119. अपरोक्षानुभूतिः	शङ्कराचार्यः
120. अपरोक्षानुभूतिविवरणम्	नित्यानन्दशिष्यः
121. अपरोक्षानुभूतिदीपिका	विद्यारण्यः
122. अवधूतसम्प्रदायपञ्चरत्नावली	शुकानन्दयोगी

ग्रन्थोऽयं बरोडापुस्तकालये लभ्यते

123. अविदितसुखदुःखेतिपद्यटीका	नन्दीशः
124. असङ्गात्मप्रकरणम्	शङ्करभारतीतीर्थः
125. असङ्गात्मप्रकाशिका	गोविन्देन्द्रः
126. आत्मज्ञानप्रकरणम्	शङ्कराचार्यः
127. आत्मज्ञानप्रकरणदीपिका	पूर्णानुभवः

128. आत्मज्ञानविवरणव्याख्या-सम्प्रदायतिलकम् अनन्तराममुनिः

129. आत्मज्ञानोपदेशविधिः	शङ्कराचार्यः
130. आत्मज्ञानोपदेशविधिटीका	रामचन्द्रसरस्वती

ग्रन्थोऽयं रायल आसियाटिक सोसाइटी कलकत्ता पुस्तकालये (3.G.67) लभ्यते।

131. आत्मज्ञानोपदेशविधिटीका	आनन्दगिरिः
132. आत्मतत्त्वम्	राघवः

ग्रन्थाः	कर्तारः

ग्रन्थोऽयं बम्बई विश्वविद्यालयपुस्तकालयसूच्यां दृश्यते ।

133. आत्मतत्त्वविवेकसारः	रामानन्दसरस्वती
134. आत्मदर्शनयोगः	सच्चिदानन्दस्वामी
135. आत्मपरीक्षा	भास्करदीक्षितः
136. आत्मपुराणम्	शङ्करानन्दः
137. आत्मपुराणव्याख्या	रामकृष्णः
138. आत्मपञ्चकम्	नीलकण्ठः

ग्रन्थोऽयं लन्दननगरस्थपुस्तकालये लभ्यते ।

139. आत्मप्रकाशिका	नन्दरामतर्कवागीशः
140. आत्मप्रकाशिकाव्याख्या	काशीरामः
141. आत्मबोधः (ग्रन्थोऽयं उज्जैन् सूच्यां दृश्यते)	ईश्वरकृष्णः
142. आत्मबोधः	शङ्कराचार्यः
143. आत्मबोधव्याख्या-दीपिका	विश्वेश्वरपण्डितः
144. आत्मबोधटीका	चित्सुखशिष्यः
145 आत्मबोधव्याख्या	पद्मपादाचार्यः
146. आत्मबोधव्याख्या	बोधेन्द्रसरस्वती
147. आत्मबोधव्याख्या	ब्रह्मानन्दयोगी
148. आत्मबोधव्याख्या-बालबोधिनी	स्वयम्प्रकाशनारायणः

अमुद्रितोऽयं आत्मबोधिन्यपरनामायं ग्रन्थः जयपुर पोटीखानासूच्यां दृश्यते ।

149. आत्मबोधव्याख्या	सच्चिदानन्दयोगी
150. आत्मबोधव्याख्या	मधुसूदनसरस्वती
151. आत्मबोधप्रकरणम्	वासुदेवयतिः
152 आत्मबोधलहरी	चिदानन्दयोगी
153. आत्मलाभः (अद्वैतसारः)	त्यागराजदीक्षितः
154. आत्मविद्याविलासः	सदाशिवब्रह्मेन्द्रः
155. आत्मविवेचनिका	कुबेरानन्दवर्णिः
156. आत्मसोपानम्	केशवशास्त्री
157. आत्मानात्मविवेकः	शङ्कराचार्यः

ग्रन्थाः	कर्तारः
158. आत्मानात्मविवेकः	विश्वेश्वरः
159. आत्मानात्मविवेकः	सदाशिवब्रह्म
160. आत्मानात्मविवेकः	स्वयम्प्रकाशयोगी
161. आत्मानात्मविवेकप्रकाशिका	सदाशिवब्रह्म
162. आत्मानात्मविवेकसंग्रहः	परमहंसः
163. आत्मानात्मविवेचनम्	महेश्वरानन्दः
164. आत्मानुसन्धानम्	सदाशिवब्रह्म
165. आत्मानुभवस्तुतिः	बालब्रह्मानन्दः
166. आत्मार्कबोधः	गोविन्दभट्टः
167. आनन्ददीपिकाव्याख्या विशुद्धदृष्टिः	रामनाथविद्वान्
168. आनन्ददायिनी	नरसिम्हभट्टः
169. आनन्दरससागरः	आनन्दाश्रमः
170. आनन्दलहरी चन्द्रिका-व्याख्यासहिता	अप्पय्यदीक्षितः
171. ईश्वरप्रतिपत्तिप्रकाशः	मधुसूदनसरस्वती

172. उदासीनसाधुस्तोत्रम् देवतीर्थस्वामी । ग्रन्थोऽयं निर्णयसागरमुद्रणालये बम्बई-नगरे मुद्रितः ।

173. उपदेशसारः	विश्वनाथः

174. उपदेशपञ्चदशीव्याख्या सत्यनारायणशर्मा । ग्रन्थोऽयं चौखाम्बा मुद्रणालये मुद्रितः ।

175. उपदेशसाहस्री	शङ्कराचार्यः
176. उपदेशसाहस्रीव्याख्या पदयोजनिका	रामतीर्थः
177. उपदेशसाहस्रीव्याख्या-विवरणम्	बोधनिधिः
178. उपदेशसाहस्रीव्याख्या-गूढार्थदीपिका	अखण्डधामा
179. उपदेशसाहस्रीव्याख्या	आनन्दगिरिः
180. उपदेशशिखामणिः	त्यागराजः
181. उपनिषत्सारसंग्रहः	सुब्रह्मण्यसूरिः
132. उपासनाप्रयोगः	वेङ्कटेश्वरदीक्षितः

ग्रन्थोऽयममुद्रितः तिरुविडमरुदूरदेवालयपुस्तकालये लभ्यते ।

ग्रन्थाः	कर्तारः
183. एकश्लोकः	शङ्कराचार्यः
184. एकश्लोकव्याख्या स्वात्मदीपनम्	स्वयम्प्रकाशानन्दः
185. एकश्लोकप्रकरणम्	लीलाविभूतिः
अमुद्रितोऽयं ग्रन्थः लन्दननगरपुस्तकालये लभ्यते ।	
186. कप्यासकौमुदी	रामशास्त्री
187. कर्माकर्मविवेकः	रामचन्द्रेन्द्रः
188. कर्माकर्मविवेकनौका	वासुदेवेन्द्रः
189. काशीपञ्चकम्	शङ्कराचार्यः
190. कैवल्यगाथा	कृष्णानन्दसरस्वती
191. कैवल्यदीपिका	कृष्णः
192. कैवल्यदीपिकाव्याख्या	कृष्णः
193. कैवल्यदीपिका	बोधानन्दः
194. कैवल्यदीपिकाव्याख्या—स्नेहः	नारायणप्रियः
195. कैवल्यनवनीतम्	शङ्कुकविः
ग्रन्थोऽयं कल्पात्तिमुद्रणालये मुद्रितः ।	
196. कैवल्यरत्नम्	वासुदेवज्ञानमुनिः
197. कौपीनपञ्चकम्	शङ्कराचार्यः
198. गुणत्रयविवेकः	स्वयम्प्रकाशः
199. ख्यातिवादः	शङ्करचैतन्यभारती
200. चतुर्ग्रन्थिसंग्रहः	अनन्तकृष्णशास्त्री
201. चतुर्मतसारसङ्ग्रहः	अप्पय्यदीक्षितः
202. चतुर्वेदमहावाक्यचिन्तामणिः	आदिनारायणः
203. चित्सुधार्या (स्वाराज्यसर्वस्वम्)	नीलकण्ठतीर्थः
204. चिदचिद्ग्रन्थिविवेकः	स्वयम्प्रकाशः
205. चिदद्वैतकल्पतरुः	चिन्मयमुनिः
206. चिदद्वैतकल्पतरुव्याख्या—परिमल	चिन्मयमुनिः
207. चिदचिच्छरीरकब्रह्मसिद्धिः	जगदीश्वरशास्त्री
208. चैतन्यप्रकरणम्	ब्रह्मवित्प्रवरदासः

ग्रन्थाः	कर्तारः
209. जगन्मिथ्यात्वदीपिका	रामचन्द्रबुधः
210. जगन्मिथ्यात्वदीपिका	रामेन्द्रयोगी
211. जीवन्मुक्ततरङ्गिणी	देवदत्तशर्मा
ग्रन्थोऽयममुद्रितः लन्दननगरपुस्तकालये लभ्यते ।	
212. जीवन्मुक्तलक्षणम्	दत्तात्रेयः
ग्रन्थोऽयं सरस्वतीमहालयवर्णनात्मकपुस्तकसूच्याः त्रयोदशे भागे (D.C TSML Vol XIII) मुद्रितः ।	
213. जीवन्मुक्तिकल्याणम्	नल्लाध्वरिः
ग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रितः ।	
214. जीवन्मुक्तिविवेकः	विद्यारण्यः
215. जीवन्मुक्तिविवेकव्याख्या पूर्णानन्दकौमुदी	अच्युतशर्मा
216 जीवन्मुक्तिविवेकव्याख्या—दीपिका	पूर्णानन्दः
ग्रन्थोऽयममुद्रितः बन्दरकारप्राच्यभाषासंशोधनालयपुस्तकालये (B. O. R.I) लभ्यते ।	
217. जीवन्मुक्तिविवेकसारसंग्रहः	सदेकानन्दः
218. ज्ञानतारावलिः	चिद्रूपानन्दनाथः
ग्रन्थोऽयममुद्रितः मद्रासराजकीयपुस्तकालये (MGOML) लभ्यते ॥	
219. ज्ञानबोधः	शुकयोगी
ग्रन्थोऽयं सरस्वतीमहालये अडयारपुस्तकालये च लभ्यते ॥	
220. ज्ञानविलासकाव्यम्	जगन्नाथः
ग्रन्थोऽयममुद्रितस्सरस्वतीमहालये लभ्यते ॥	
221. ज्ञानाङ्कुरम्	कैपल्लक्ष्मीनृसिम्हः
मद्रासराजकीयकोशागारे लभ्यते (MGOML) ।	
222. ज्ञानाङ्कुशम्	शङ्कराचार्यः
223. ज्ञानाङ्कुशः सव्याख्यः	नीलकण्ठदीक्षितः
224. तत्त्वत्रयनिरूपणम्	नारायणाश्रमः

	ग्रन्थाः	कर्तारः
225.	तत्वदीपः	वल्लभदीक्षितः
226.	तत्वदीपनम्	नृसिम्हाश्रमी
227.	तत्वनिरूपणम्	त्र्यम्बकभट्टः
228.	तत्वप्रदीपिका	चित्सुखाचार्यः
229.	तत्वप्रदीपिकाव्याख्या-मानसनयनप्रसादिनी	प्रत्यक्स्वरूपः
230.	तत्वप्रदीपिकाव्याख्या—भावद्योतनिका	सुखप्रकाशः
231.	तत्वबोधः	लक्ष्मीनारायणदासः

ग्रन्थोऽयं कल्कत्तासंस्कृतकलाशालापुस्तकालये लभ्यते ।

232.	तत्वबोधः	वासुदेवेन्द्रः
233.	तत्वबोधः	मुकुन्दमुनिः
234.	तत्वबोधः	महादेवसरस्वती
235.	तत्वबोधः	तत्वबोधभगवान्
236.	तत्वबोधप्रकरणम्	रामचन्द्रबुधः
237.	तत्वमस्यखण्डार्थनिरूपणम्	रामानन्दसरस्वती
238	तत्वमुक्तावलिः	स्वयम्प्रकाशः
239.	तत्वशुद्धिः	ज्ञानघनः
240.	तत्वशुद्धिव्याख्या	उत्तमज्ञयतिः
241.	तत्वसुधा (दक्षिणामूर्त्यष्टकव्याख्या)	स्वयम्प्रकाशः
242.	तत्वसिद्धान्तबिन्दुः	अनन्तरामः
243.	तत्वम्पदार्थविवेकः	पूर्णानन्दः
244.	तत्वम्पदार्थविवेकः	पूर्णप्रकाशः
245.	तत्वम्पदार्थशोधनप्रकारः	नृसिम्हाश्रमी
246.	तत्वम्पदार्थलक्ष्यैकशतकम्	रामचन्द्रेन्द्रः
247.	तत्वम्पदार्थलक्ष्यैकशतकव्याख्या-तरङ्गः	रामचन्द्रेन्द्रः
248.	तत्वानुभवः	गोविन्देन्द्रः
249.	तत्वानुसन्धानम्	महादेवसरस्वती
250.	तत्वानुसन्धानव्याख्या—अद्वैतचिन्ताकौस्तुभः	महादेवसरस्वती
251.	तत्वानुसन्धानव्याख्या	स्वयम्प्रकाशयोगी

	ग्रन्थाः	कर्तारः
252.	तत्वालोकः	आनन्दगिरिः
253.	तत्वालोकव्याख्या—तत्वप्रकाशिका	प्रज्ञानानन्दः
254.	तर्कसङ्ग्रहः	आनन्दगिरिः
255.	तात्पर्यदीपिका	राघवानन्दः

ग्रन्थोऽयं अण्णामलैविश्वविद्यालये मुद्रितः ।

256.	तिमिरोद्घाटनम्	कृष्णानन्दसरस्वती
257.	त्रिपात्तत्वविवेकः	रामचन्द्रेन्द्रः
258.	त्रिपात्तत्वादिसप्तप्रकरणी	उपनिषद्ब्रह्म
259.	दशहंससूत्रटीका	विट्ठलबुधः
260.	दशश्लोकी	शङ्कराचार्यः
261.	दशश्लोकीव्याख्या - सिद्धान्तबिन्दुः	मधुसूदनसरस्वती
2.2.	दशश्लोकीव्याख्या सिद्धान्तबिन्दुसारः	तारानाथशर्मा
263.	दशश्लोकी-सिद्धान्तबिन्दुलघुटीका	नारायणयतिः
264.	दशश्लोकी-सिद्धान्तबिन्दुसन्दीपनम्	पुरुषोत्तमसरस्वती
265.	दशश्लोकी-सिद्धान्तबिन्दु-तत्वम्पदार्थविवेकः	पूर्णानन्दसरस्वती
266.	दशश्लोकी-सिद्धान्तबिन्दु-न्यायरत्नावली	ब्रह्मानन्दसरस्वती
267.	दशश्लोकी-न्यायरत्नावलीप्रदीपिका	कृष्णकान्तः
268.	दशश्लोकी-सिद्धान्तबिन्दुव्याख्या	सच्चिदानन्दः
269.	दशश्लोकीसिद्धान्तबिन्दुव्याख्या	शिवलालशर्मा
270.	दशोपनिषद्रहस्यम्	रामचन्द्रपण्डितः
271.	दहरविद्याप्रकाशः	परमशिवेन्द्रः
272.	दृग्दृश्यविवेकः (वाक्यसुधा)	भारतीतीर्थः
273.	दृग्दृश्यविवेकव्याख्या	ब्रह्मानन्दभारती
274.	दृश्योन्मार्जनिकाप्रकरणम्	शङ्कुशास्त्री
275.	दुर्जनोक्तिनिरासः	त्यागराजशास्त्री

राजुशास्त्रीत्यपरनामायं त्यागराजशास्त्री । ग्रन्थोऽयं श्रीविद्यामुद्रणालये कुम्भघोणे मुद्रितः ।

ग्रन्थाः	कर्तारः
276. देहचतुष्टयम्	साक्षात्कारप्रकाशः

ग्रन्थोऽयममुद्रितः बरोडा ओरियण्टल पुस्तकालये (BRD.) लभ्यते ।

277. द्वादशमञ्जरिकास्तोत्रम्	शङ्कराचार्यः
278. द्वादशमञ्जरिकाव्याख्या मकरन्दः	स्वयम्प्रकाशानन्दः
279. द्वादशमहावाक्यसिद्धान्तः	आनन्दः

अमुद्रितोऽयं ग्रन्थः कलकत्ता संस्कृतकलाशालापुस्तकालये लभ्यते ।

280. नयमञ्जरी	अप्पय्यदीक्षितः
281. नवमणिमाला	सदाशिवब्रह्म
282. नामविवेकः	लीलाविभूतिः
283. नामविवेकव्याख्या	उपनिषद्ब्रह्मेन्द्रः

समूलग्रन्थोऽयं व्याख्याग्रन्थः बरोडापुस्तकालये उपनिषद्ब्रह्मेन्द्रमठे च लभ्यते ।

284. निगमान्तार्थचन्द्रिका	नारायणाश्रमः
285. निजतत्वामृतसारः (रसः)	परमेश्वरभारती
286. निर्वाणाष्टकम्	शङ्कराचार्यः
287. निर्वाणाष्टकव्याख्या	गङ्गाधरेन्द्रः
288. नृसिम्हविज्ञापना	नृसिम्हाश्रमी
289. नैष्कर्म्यसिद्धिः	सुरेश्वराचार्यः
290. नैष्कर्म्यसिद्धिविवरणम्	अखिलात्मा
291. नैष्कर्म्यसिद्धिभावप्रकाशिका	चित्सुखाचार्यः
292. नैष्कर्म्यसिद्धिचन्द्रिका	ज्ञानोत्तमः
293. नैष्कर्म्यसिद्धिव्याख्या-विद्यासुरभिः	ज्ञानामृतयतिः
294. नैष्कर्म्यसिद्धिसारार्थः	रामतीर्थः
295. नैष्कर्म्यसिद्धिव्याख्या-सारथिः	रामदत्तः

ग्रन्थोऽयं बन्दरकारप्राच्यभाषासंशोधनालयमुद्रिते नैष्कर्म्यसिद्धिग्रन्थे निर्दिष्टः ।

296. न्यायचूडामणिः	माधवसरस्वती

ग्रन्थाः	कर्तारः
297. न्यायचूडामणिव्याख्या वेदान्तमन्दाकिनी	नारायणसरस्वती
298. न्यायप्रमाणमञ्जरी सव्याख्या	राघवेन्द्रशिष्यः
299. पञ्चकोशविमर्शिनी	त्यागराजः
300. पञ्चकोशविवेकः	भारतीतीर्थः
301. पञ्चदशी	विद्यारण्यः
302. पञ्चदशीव्याख्या—तात्पर्यबोधिनी	रामकृष्णः
303. पञ्चदशीव्याख्या—कल्याणपीयूषः	लिङ्गनसोमयजी
304. पञ्चदशीव्याख्या–पूर्णानन्देन्दुकौमुदी	अच्युतशर्मा
305. पञ्चदशीव्याख्या–वृत्तिप्रभाकरः	निश्चलदासः
306. पञ्चदशीव्याख्या—विशुद्धदृष्टिः	रामानन्दसरस्वती
307. पञ्चदशी	रामब्रह्मेन्द्रः
308. पञ्चप्रकरणी	रामदासः
309. पञ्चप्रक्रिया	सर्वज्ञात्मा
310. पञ्चप्रक्रियाव्याख्या	आनन्दगिरिः
311. पञ्चप्रक्रियाव्याख्या	पूर्णविद्यः
312. पञ्चब्रह्माख्यविवरणम्	लीलानन्दः

ग्रन्थोऽयममुद्रितस्सरस्वतीमहालये लभ्यते ।

313. पञ्चरत्नमालिका	शङ्कराचार्यः
314. पञ्चरत्नकारिकाः	सदाशिवः
315. पञ्चरत्नव्याख्या प्रकाशः	पाण्डुरङ्गः
316. पञ्चरत्नव्याख्या कल्पवल्ली	अभिनवनारायणेन्द्रः
317. पञ्चरत्नप्रकाशः	सुब्रह्मण्यः
318. पञ्चरत्नविवृतिः	वासुदेवेन्द्रशिष्यः

ग्रन्थोऽयं बरोडा ओरियण्टल इन्स्टिट्यूट पुस्तकालये लभ्यते—

319. पञ्चावस्थाविवेकः	वासुदेवयतिः
320. पञ्चीकरणम्	अभिनवसदाशिवः
321. पञ्चीकरणम्	शङ्कराचार्यः

ग्रन्थाः		कर्तारः
322.	पञ्चीकरणवार्तिकम्	सुरेश्वराचार्यः
323.	पञ्चीकरणवार्तिकव्याख्या—वार्तिकाभरणम्	अभिनवनारायणः
324.	पञ्चीकरणवार्तिकविवरणदीपिका	शिवनारायणानन्दः
325.	पञ्चीकरणवार्तिकम्	गौडपादः
326.	पञ्चीकरणवार्तिकपाठः	उपेन्द्रदत्तः
327.	पञ्चीकरणव्याख्या · अद्वैतागमहृदयम्	शान्त्यानन्दः
328.	पञ्चीकरणविवरणम्	आनन्दगिरिः
329.	पञ्चीकरणविवरणव्याख्या	आनन्दगिरिः
330.	पञ्चीकरणविवरणम्	स्वयम्प्रकाशः
331.	पञ्चीकरणविवरणम्	प्रज्ञानानन्दः
332.	परब्रह्मतत्वनिरूपणम्	एकोजीराजः
333.	परमसिद्धान्तसारः	स्वयम्प्रकाशानन्दः
334.	परमसिद्धान्तसारः	स्वयम्प्रकाशशिष्यः
335.	परमहंसचर्या	सदाशिवब्रह्म
336.	परमहंससंहिता	लक्ष्मणपण्डितः
337.	परमाक्षरविवेकः	रामचन्द्रबुधः
338.	परमाद्वैतदर्शनम्	रामचन्द्रबुधः
339.	परमाद्वैतदर्शनम्	लीलाविभूतिः
340.	परमाद्वैतदर्शनव्याख्या	उपनिषद्ब्रह्म
	समूलग्रन्थोऽयं व्याख्याग्रन्थः बरोडापुस्तकालये लभ्यते ।	
341.	परमाद्वैतसिद्धान्तपरिभाषा	उपनिषद्ब्रह्म
	ग्रन्थोऽयं मद्रासराजकीयपुस्तकालयेऽमुद्रित उपलभ्यते ।	
342.	परमार्थबोधः	मुकुन्दमुनिः
343.	परमार्थसारः	आदिशेषः
344.	परमार्थसारव्याख्या— विवरणम्	राघवानन्दः
345.	परमार्थसारप्रकाशिका	वासुदेवयतिः
346.	परमामृतम्	महादेवसरस्वती
347.	परमामृतम्	मुकुन्दराजः

ग्रन्थाः		कर्तारः
348.	पुरुषार्थबोधः	ब्रह्मानन्दसरस्वती
349.	पुरुषार्थरत्नाकरः	पुरुषोत्तमतीर्थः
	ग्रन्थोऽयं मद्रासराजकीयप्राचीनपुस्तकालये लभ्यते ।	
350	पुरुषार्थरत्नाकरः	रङ्गनाथसूरिः
351.	पूर्णपुरुषार्थचन्द्रोदयः	जातवेदस्
	ग्रन्थोऽयं मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यते ॥	
352.	प्रचण्डराहूदयम्	घनश्यामः
353.	प्रणवकल्पप्रकाशः	गङ्गाधरेन्द्रः
354.	प्रणवदीपिका	ब्रह्मानन्दयोगी
355.	प्रणवार्थकारिकाः	सुरेश्वराचार्यः
356.	प्रणवार्थप्रकाशिका	विज्ञानात्मा
357.	प्रणवार्थप्रकाशिका	ब्रह्मानन्दयोगी
358.	प्रणवार्थप्रकाशिका सव्याख्या	कैवल्यानन्दः
359.	प्रत्यक्तत्वचिन्तामणिः	सदानन्दव्यासः
360.	प्रत्यक्तत्वप्रकाशिका	वासुदेवेन्द्रः
361.	प्रत्यक्त्वस्वप्रकाशवादः	कृष्णः
362.	प्रपञ्चमिथ्यात्वम्	गौतमशङ्करः
	ग्रन्थोऽयं बन्दरकार ओरियण्टलपुस्तकालये लभ्यते ।	
363.	प्रबोधचन्द्रिका	ब्रह्मेन्द्रसरस्वती
364.	प्रबोधचन्द्रोदयः	कृष्णमिश्रः
365.	प्रबोधचन्द्रोदयव्याख्या	चण्डिदासः
	ग्रन्थोऽयं मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यते ॥	
366.	प्रबोधचन्द्रोदयव्याख्या प्रबोधप्रकाशः	सुब्रह्मण्यपाण्डरिः
	ग्रन्थोऽयं सरस्वतीमहालये मद्रासराजकीयपुस्तकालये च लभ्यते ।	
367.	प्रबोधचन्द्रोदयव्याख्या सञ्जीविनी	घनश्यामः
	ग्रन्थोऽयं सरस्वतीमहालये मद्रासराजकीयपुस्तकालये च लभ्यते ।	

	ग्रन्थाः	कर्तारः
368.	प्रबोधचन्द्रोदय-प्रकाशः	रामदासः
	ग्रन्थोऽयं लन्दननगरस्थभारतकार्यालयपुस्तकालये, सरस्वतीमहालयपुस्तकालये रायल आसियाटिक सोसाइटि बाम्बेनगरे च लभ्यते। निर्णयसागरमुद्रणालये मुद्रितः।	
369.	प्रबोधचन्द्रोदयव्याख्या चन्द्रिका	नन्दिल्लगोपमन्त्रिशेखरः
	ग्रन्थोऽयं निर्णयसागरमुद्रणालये मुद्रितः।	
370.	प्रबोधचन्द्रोदयी चिच्चन्द्रिका	गणेशः
371.	प्रबोधचन्द्रोदयव्याख्या	महेश्वरन्यायालङ्कारः
	ग्रन्थोऽयं रायल आसियाटिक सोसाइटि कलकत्तानगरे लभ्यते।	
372.	प्रबोधचन्द्रोदयव्याख्या नाटकाभरणम्	गोविन्दामृतः
	अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयहस्तलिखितप्राचीनपुस्तकालये लभ्यते।	
373.	प्रबोधशतकम्	ब्रह्मानन्दसरस्वती
374.	प्रबोधसुधाकरः	शङ्कराचार्यः
375.	प्रबोधसुधाकरः	सूर्यसूरिः
376.	प्रबोधामृतम्	श्रीरामः
	ग्रन्थोऽयं शङ्कराचार्यमठपुस्तकालये लभ्यते।	
377.	प्रमाणतत्वम्	त्र्यम्बकभट्टः
378.	प्रमाणमाला (प्रमाणरत्नमाला)	आनन्दबोधः
379.	प्रमाणरत्नमालाव्याख्या निबन्धनम्	अनुभूतिस्वरूपः
380.	प्रमाणरत्नमाला सम्बन्धोक्तिः	चित्सुखाचार्यः
	तात्पर्यदीपिका इत्यपि नामान्तरमस्य दृश्यते ॥	
381.	प्रमाणलक्षणम्	सर्वज्ञात्मा
382.	प्रमाणविभागश्लोकाः	स्वयम्प्रकाशयोगी
383.	प्रमाणप्रवृत्तिनिर्णयः	विमुक्तात्मा
384.	प्रमेयरत्नावली	बलदेवविद्याभूषणः
385.	प्रश्नावलिः	जडभरतः
	बन्दरकार ओरियण्टलपुस्तकालये लभ्यते।	

	ग्रन्थाः	कर्तारः
386.	प्रश्नोत्तररत्नमालिका	शङ्कराचार्यः
387.	प्रस्थानभेदः	मधुसूदनसरस्वती
388.	प्रौढानुभूतिप्रकरणम्	शङ्कराचार्यः
389.	बिम्बदृष्टिः	अमरेश्वरशास्त्री
390.	बृहद्वाक्यवृत्तिः	वेदोत्तमभट्टारकः
391.	बृहद्वाक्यवृत्तिवाक्यदीपिका	आनन्दस्वरूपः
392.	बृहद्वाक्यवृत्तिव्याख्या	आनन्दज्ञानः
393.	बोधसारः	नरहरिः
394.	बोधसारव्याख्या	दिवाकरः
395.	बोधार्या	सदाशिवबोधेन्द्रः
396.	बोधार्याव्याख्या-स्वात्मानन्दप्रकाशिका	प्रज्ञानाश्रमः
397.	बोधैक्यसिद्धिः	अच्युतशर्मा
398.	बोधैक्यसिद्धि व्याख्या	अच्युतशर्मा
399.	ब्रह्मतत्वसुबोधिनी	कृष्णानन्दसरस्वती
400.	ब्रह्मतत्वसुबोधिनी	वेङ्कटस्वामी
401.	ब्रह्मतत्वसुबोधिनी	गोपालानन्दाश्रमः
402.	ब्रह्मतारकषोडशसमाधिः	रामचन्द्रेन्द्रः
403.	ब्रह्मप्रणवदीपिका	रामचन्द्रेन्द्रः
404.	ब्रह्मभावनानिर्णयः	पूर्णानन्दः
405.	ब्रह्मविचाराधिकार निरूपणम्	रामाशास्त्री
406.	ब्रह्मविदाशीर्वादपद्धतिः	विद्यारण्यः
407.	ब्रह्मविद्यातरङ्गिणी	नारायणयोगी
408.	ब्रह्मविद्यातरङ्गिणीव्याख्या	त्यागराजदीक्षितः
409.	ब्रह्मविद्यासुधार्णवः	परमानन्दतीर्थः
410.	ब्रह्मविन्निधिः	वेङ्कटयोगी
411.	ब्रह्मसिद्धान्तः	कात्यायनः
412.	ब्रह्मसिद्धान्तव्याख्या– तत्वबोधिनी	कात्यायनः
413.	ब्रह्माद्वैतप्रकाशिका	भावयागीश्वरः

	ग्रन्थाः	कर्तारः
414.	ब्रह्मानन्दप्रकाशिका	जगज्जीवनः
415.	ब्रह्मानन्दप्रदीपिका	नारायणः
416.	ब्रह्मानन्दविलासः	शाश्वतानन्दः
417.	ब्रह्मानन्दविलासः	स्वामियतिः
418.	ब्रह्मानुचिन्तनम्	शङ्कराचार्यः
419.	ब्रह्मामृतम्	जयकृष्णतीर्थः
420.	ब्रह्मावबोधः	मुकुन्दमुनिः
421.	ब्रह्माह्निकम्	वासुदेवब्रह्मेन्द्रसरस्वती

सङ्कलनात्मकोऽयं ग्रन्थः आनन्दसागरमुद्रणालये मायूरक्षेत्रेव मुद्रितः ।

422.	ब्रह्मोत्तरतत्त्वमाला	शङ्करमिश्रसुकविः
423.	भावनापुरुषोत्तमनाटकम्	रत्नखेट - श्रीनिवासः

अमुद्रितोऽयं ग्रन्थः सरस्वतीमहालये लभ्यते ।

424	भावाज्ञानप्रकाशिका	शिवरामः
425.	भावाज्ञानप्रकाशिका	नृसिंहाश्रमी
426.	भिक्ष्वष्टकम्	सच्चिदानन्दस्वामी
427.	भेदतमोमार्ताण्डशतकम्	रामचन्द्रेन्द्रः
428.	मतत्रितयसर्वस्वम्	वेङ्कटेशशास्त्री

ग्रन्थोऽयं मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यते ।

429.	मनीषापञ्चकम्	शङ्कराचार्यः
430.	मनीषापञ्चकतात्पर्यदीपिका	सदाशिवब्रह्म
431.	मनीषापञ्चकव्याख्या	सदाशिवब्रह्मशिष्यः
432.	मनीषापञ्चकव्याख्या	शिवयोगीन्द्रशिष्यः
433.	मनीषापञ्चकमधुमञ्जरी	गोपालबालयतिः
434.	मनीषापञ्चकव्याख्या मधुमञ्जरी	नृसिंहाश्रमी
435.	मनीषापञ्चकव्याख्या पञ्चरत्नविवृतिः	वासुदेवेन्द्रः
436.	मनीषापञ्चकव्याख्या	विमलबुधाकरः

सिद्धान्तपञ्चकव्याख्या इत्यपरनामायं ग्रन्थः पञ्चनदविश्वविद्यालये लभ्यते ।

	ग्रन्थाः	कर्तारः
437.	मनोनियमनम्	सदाशिवब्रह्म

वाणीविलासमुद्रणालये श्रीरङ्गक्षेत्रे मुद्रितः ।

438.	महावाक्यनिरूपणप्रक्रिया	सुब्रह्मण्यनेरीकरः
439.	महावाक्यार्थमञ्जरी	महेश्वरानन्दः
440.	महावाक्यार्थमञ्जरीव्याख्या परिमलः	महेश्वरानन्दः
441.	महावाक्यप्रकरणम्	विज्ञानेश्वरः
442.	महावाक्यादर्शः	जयरामः
443.	महावाक्यार्थदर्पणम्	कृष्णानन्दभारती
444.	महावाक्यरत्नावलिः	रामचन्द्रेन्द्रः
445.	महावाक्यरत्नावली प्रभा	रामचन्द्रेन्द्रः
446.	महावाक्यरत्नावली प्रभा	त्रिलोकीनाथमिश्रः

ग्रन्थोऽयं वाराणस्यां मुद्रितः ।

447.	महावाक्यरत्नावलीप्रभालोचनम्	उपनिषद्ब्रह्मेन्द्रः
448.	महावाक्यरत्नावलीव्याख्या	देवकीनन्दनः

ग्रन्थोऽयं भारतकार्यालयपुस्तकालये लन्दननगरे लभ्यते ।

449.	महावाक्यविवरणम्	विद्यारण्यः
450.	महावाक्यवृत्तिदीपः	अद्वैतयोगी

ग्रन्थोऽयममुद्रितः रायलआसियाटिककलकत्तापुस्तकालये लभ्यते ।

451.	महावाक्यरत्नावली किरणावलिः	उपनिषद्ब्रह्मेन्द्रः
452.	महावाक्यरत्नावलीविवरणम्	उपनिषद्ब्रह्मेन्द्रः
453.	महावाक्यार्थमञ्जरी	अच्युतशर्मा
454.	मानदीपिका	बालब्रह्मानन्दः
455.	मानदीपिकास्मृतिसारसंग्रहः	बालब्रह्मानन्दः
456.	मानमाला	अच्युतकृष्णानन्दः
457.	मानमालाविवरणम्	रामानन्दभिक्षुः
458.	मानसोल्लासः	सुरेश्वराचार्यः
459.	मनसोल्लासवृत्तान्तविलासः	रामतीर्थः

ग्रन्थाः	कर्तारः
460. मायापञ्चकम्	शङ्कराचार्यः
461. मिथ्यापवादविध्वंसनम्	चन्द्रशेखरसूरिः
ग्रन्थोऽयं अडयारपुस्तकालये लभ्यते ।	
462. मुक्तिपरिणयनाटकम्	सुन्दरदेवः
अमुद्रितोयं ग्रन्थः सरस्वतीमहालये लभ्यते ।	
463. मुक्तिस्वयंवरनाटकम्	शेषाश्रयपण्डितः
अमुद्रितोऽयं ग्रन्थस्सरस्वतीभवनपुस्तकालये वाराणसीनगरस्थे लभ्यते ।	
464. मुक्तोपदेशः	हरिभास्करः
465. मूलाविद्यानिरासः	सुब्रह्मण्यशर्मा
466. मोक्षधर्मदीपिका	नन्दनार्यः
4.7. मोक्षनिर्णयः	सुरेश्वराचार्यः
468. मोक्षसिद्धिः	कृष्णगिरिः
469. मोक्षोपायः	अभिनन्दः
निर्णयसागरमुद्रणालये मुद्रितः ।	
470. लघुवाक्यवृत्तिप्रकरणम्	शङ्कराचार्यः
471. लघुवाक्यवृत्ति प्रकाशिका	रामानन्दसरस्वती
472. लघुवार्तिकम्	उत्तमश्लोकः
473. लघुवार्तिकव्याख्या—न्यायसुधा	उत्तमश्लोकः
74. लघुवासुदेवमननम्	वासुदेवेन्द्रः
475. लिङ्गभङ्गमुक्तिशतकम्	उपनिषद्ब्रह्म
476. वाक्यप्रकरणम्	अवधूतशिवयोगी
477. वाक्यवृत्तिः	शङ्कराचार्यः
478. वाक्यवृत्तिव्याख्या	आनन्दगिरिः
479. वाक्यवृत्तिप्रकाशिका	विश्वेश्वरपण्डितः
480. वाक्यसुधाव्याख्या	भीमदाससूपालः
481. वाक्यसुधाटीका	रामचन्द्रयतिः
482. वाक्यसुधाव्याख्या	विश्वेश्वरः

ग्रन्थाः	कर्तारः
483. वाक्यामृतम्	विश्वेश्वरः
484. वाक्यार्थदर्पणम्	रामतीर्थः
485. वाक्यार्थप्रकाशिका	विश्वनाथः
486. वाचारम्भणप्रकरणम्	नृसिम्हाश्रमी
487. वासुदेवमननम्	वासुदेवपरमहंसः
488. वासुदेवमननसंग्रहसारः	वासुदेवशिष्यः
489. विज्ञानदीपिका	पद्मपादः
490. विज्ञाननौका (स्वरूपानुसन्धानम्)	शङ्कराचार्यः
491. विज्ञाननौका पदव्याख्या	श्रीकुरः
492. विज्ञानामृतम्	विज्ञानयतिः
अमुद्रितोऽयं ग्रन्थस्सरस्वतीभवनपुस्तकालये वाराणसीनगरे लभ्यते ।	
493. विद्वदनुभवः	शङ्करानन्दसरस्वती
अमुद्रितोऽयं ग्रन्थस्सरस्वतीभवनपुस्तकालये वाराणसीनगरस्थे लभ्यते ।	
494. विद्वन्मोदतरङ्गिणी	चिरञ्जीविभट्टाचार्यः
495. विदेहमुक्तिप्रकरणम्	रामचन्द्रेन्द्रः
496. विद्यापरिणयनाटकम्	आनन्दरायमखी
निर्णयसागरमुद्रणालये मुद्रितोऽयं ग्रन्थः ।	
497. विद्याप्रकाशः (उपनिषत्कारिकाः)	विद्यारण्यः
498. विभ्रमविवेकः	मण्डनमिश्रः
499. विवेकचूडामणिः	शङ्कराचार्यः
500. विवेकचूडामणिः	वासुदेवेन्द्रः
501. विवेकमञ्जरी	हस्तामलकः
502. विवेकमञ्जरीव्याख्या	आनन्दप्रकाशः
503. विवेकमञ्जरीभाष्यम् हस्तामलकीयभाष्यम्	शङ्कराचार्यः
504. विवेकमञ्जरीव्याख्या हस्तमलकीयव्याख्या	स्वयम्प्रकाशमुनिः
505. विवेकमार्ताण्डः	विश्वरूपदेवः
506. विवेकमुकुरः	नृसिम्हसरस्वती

ग्रन्थाः	कर्तारः
507. विवेकसारः	वासुदेवशिष्यः
508. विवेकसिन्धुपरमार्थबोधः	मुकुन्दमुनिः

अमुद्रितोऽयं ग्रन्थस्सरस्वतीमहालये बरोडापुस्तकालये लन्दननगरपुस्तकालये च लभ्यते ।

509. विवेकामृतम्	गोपालः
510. वृत्तिदीपिका	कृष्णभट्टः
511. वेदान्तकतकः	नीलकण्ठतीर्थः
512. वेदान्तकौमुदी	रामाद्वयः
513. वेदान्तकौमुदी व्याख्या	रामाद्वयः
514. वेदान्तकल्पलतिका	मधुसूदनसरस्वती
515. वेदान्तडिण्डिमः	नृसिंहसरस्वती
516. वेदान्ततत्वसारः	विद्येन्द्रसरस्वती

अमुद्रितोऽयं ग्रन्थस्सरस्वतीमहालये लभ्यते ।

517. वेदान्ततत्वोदयः	नित्यानन्दः

अमुद्रितोऽयं ग्रन्थः भारतकार्यालयपुस्तकालये लन्दननगरे लभ्यते ।

518. वेदान्ततात्पर्यनिवेदनम्	गोविन्दभट्टः
519. वेदान्ततात्पर्यनिवेदनव्याख्या	मुकुन्दः
520. वेदान्तार्थविभावना	मुकुन्दः
521. वेदान्तार्थविभावना	नारायणतीर्थः

ग्रन्थोऽयं बरोडापुस्तकालये लभ्यते ।

521. वेदान्तवादार्थः	कृष्णानन्दः

ग्रन्थोऽयं बरोडापुस्तकालये लभ्यते ।

523. वेदान्ततात्पर्यविचारः	हरियशोमिश्रः
524. वेदान्तदीपिका	वासुदेवशिष्यः
525 वेदान्तदीपिका	चोक्कनाथदीक्षितः
526. वेदान्तनामरत्नसहस्रव्याख्या	परमशिवेन्द्रः
527. वेदान्तन्यायसंग्रहः (अद्वैतचिन्तामणिः)	सुन्दरेशः

ग्रन्थाः	कर्तारः
528. वेदान्तपरिभाषा	ब्रह्मेन्द्रसरस्वती
529. वेदान्तपरिभाषा	काशीनाथशास्त्री
530. वेदान्तपरिभाषा	धर्मराजाध्वरिः
531. वेदान्तपरिभाषाव्याख्या प्रकाशिका	पेद्दादीक्षितः
532. वेदान्तपरिभाषाव्याख्या प्रकाशिका	अनन्तकृष्णशास्त्री
533. वेदान्तपरिभाषाव्याख्या शिखामणिः	रामकृष्णदीक्षितः
534. वेदान्तपरिभाषाव्याख्या अर्थदीपिका	शिवदत्तः
535. वेदान्तपरिभाषाव्याख्या भूषणम्	नारायणविद्वान्
536. वेदान्तपरिभाषाव्याख्या अर्थदीपिका	धनपतिसूरिः
537. वेदान्तपरिभाषाव्याख्या अर्थदीपिका	जीवानन्दविद्यासागरः
538. वेदान्तपरिभाषाव्याख्या तत्वबोधिनी	वेदाद्रिसूरिः
539. वेदान्तपरिभाषाव्याख्या आशुबोधिनी	कृष्णनाथः
540. वेदान्तपरिभाषाव्याख्या मणिप्रभा	अमरदासः
541. वेदान्तपरिभाषासङ्ग्रहः	रामवर्मा
542. वेदान्तप्रकरणम्	वासुदेवयतिः
543. वेदान्तमञ्जरी	अद्वैतेन्द्रसरस्वती
544. वेदान्तमननम्	रामचन्द्रेन्द्रशिष्यः
545. वेदान्तरत्नमाला	देवनारायणः
546. वेदान्तरहस्यम्	वेदान्तवागीशभट्टः
547. वेदान्तलहरी	सच्चिदानन्दस्वामी
548. वेदान्तवार्तिकम्	योगस्फुरणानुभवः
549. वेदान्तवादसंग्रहः	त्यागराजशास्त्री
550. वेदान्तसप्तशती	विश्वानुभवः
551. वेदान्तसारः	शङ्कराचार्यः
552. वेदान्तसारसङ्ग्रहः	अद्वयानन्दः

अमुद्रितोऽयं ग्रन्थ अडयार पुस्तकालये लभ्यते ।

553. वेदान्तसारसङ्ग्रहः	शिवरामभट्टः
554. वेदान्तसारसङ्ग्रहव्याख्या आत्मबोधामृतम्	शिवरामभट्टः

ग्रन्थाः — कर्तारः

555. वेदान्तसारसङ्ग्रहप्रकरणम् — सीतारामः

अमुद्रितोऽयं ग्रन्थः बरोडापुस्तकालये लभ्यते ।

556. वेदान्तसारपञ्चीकरणम् — कैवल्याश्रमी

557. वेदान्तसारसद्रत्नावलिः — जगज्जीवनः

558. वेदान्तसारसङ्ग्रह मननम् — चिद्घनभारती

559. वेदान्तसारः — सदानन्दसरस्वती

560. वेदान्तसारव्याख्या बालबोधिनी — आपदेवः

561. वेदान्तसारव्याख्या सुबोधिनी — नृसिंहसरस्वती

562. वेदान्तसारव्याख्या विद्वन्मनोरञ्जिनी — रामतीर्थः

563. वेदान्तसारव्याख्या ब्रह्मबोधिनी — रामचन्द्रानन्दः

564. वेदान्तसारव्याख्या भावबोधिनी — रामशरणशास्त्री

565. वेदान्तसारसर्वस्वम् — माधवसरस्वती

566. वेदान्तसारसङ्ग्रहः — पापयाराध्यः

567. वेदान्तसारवार्तिक राजसङ्ग्रहः — सुरेश्वराचार्यः

568. वेदान्तसिद्धान्तकारिकामञ्जरी — चित्सुखाचार्यः

569. वेदान्तसिद्धान्तकल्पवल्ली — सदाशिवब्रह्म

570. वेदान्तसिद्धान्तकल्पवल्ली व्याख्या केसरावली — सदाशिवब्रह्म

571. वेदान्तसिद्धान्तचन्द्रिका — रामानन्दसरस्वती

मुद्रितोऽयं ग्रन्थः गोपालनारायणमुद्रणालये बाम्बे नगरे ।

572. वेदान्तसिद्धान्तचूडामणिः — शिवरामानन्दशिष्यः

573. वेदान्तसिद्धान्तनिःश्रेणिः — विट्ठलबुधाकरः

574. वेदान्तसिद्धान्तरत्नमाला — विश्वनाथः

575. वेदान्तसिद्धान्तरहस्यम् — रामचन्द्रः

576. वेदान्तसिद्धान्तरहस्यप्रकाशः — कल्याणरामः

577. वेदान्तसिद्धान्तसारः — उमामहेश्वरः

578. वेदान्तसिद्धान्त सारसङ्ग्रहः — सदानन्दः

579. वेदान्तसिद्धान्तसूक्तिमञ्जरी — गङ्गाधरेन्द्रः

580. वेदान्तसिद्धान्तादर्शः — मोहनलालः

ग्रन्थाः — कर्तारः

581. वेदान्तसङ्ग्रहः — स्वयम्प्रकाशानन्दः

582. वेदान्तसङ्ग्रहः — अच्युताश्रमी

583. वेदान्तसङ्ग्रहव्याख्या — महादेवः

584. वेदान्तसंज्ञाप्रकरणम् — आदित्यपूर्णः

गुजराती मुद्रणालये बाम्बे नगरे मुद्रितः ।

585. वेदान्तहृदयम् — वरदपण्डितः

586. वेदान्तामृतम् — गोपालानन्दः

587. वेदान्तार्थनिरूपणम् — श्रीवत्सशर्मा

588. वेदान्तार्थविवेचन भाष्यम् — मुकुन्दः

589. वेदान्तार्थविभावना — नारायणतीर्थः

590. वेदान्तार्थसारसङ्ग्रहः — सीतारामः

591. वेदार्थतत्वनिर्णयः — लिङ्गाध्वरी

592. वैदिकसिद्धान्तसङ्ग्रहः — सुखचिद्घनभारती

593. वैदिकसिद्धान्तसङ्ग्रहः — नृसिम्हाश्रमी

594. वैराग्यतरङ्गम् — श्रीनाथः

595. वैराग्यपञ्चकम् — वासुदेवेन्द्रः

596. व्यामोहविद्रावणम् — रामसुब्रह्मण्यशास्त्री

597. शतप्रश्नोत्तरी — अयोध्याप्रसादः

ग्रन्थोऽयं बरोडापुस्तकालये लभ्यते ।

598. शतश्लोकी — शङ्कराचार्यः

599. शतश्लोकी — ईश्वरतीर्थः

शाङ्करदर्शनम् (सर्वदर्शनसङ्ग्रहान्तर्गतम्) सायणमाधवाचार्यः (विद्यारण्यः)

600. शाब्दनिर्णयः — प्रकाशात्मा

601. शाब्दनिर्णयव्याख्या — आनन्दबोधः

अमुद्रितोऽयं ग्रन्थः तिरुवनन्तपुरपुस्तकालये मद्रासराजकीयहस्तलिखितपुस्तकालये च लभ्यते ।

602. शारीरक संक्षेपविवृतिः — महादेवसरस्वती

	ग्रन्थाः	कर्तारः
603.	शारीरक भाष्यवार्तिकम् (एकेनद्वे इत्यादिपद्यव्याख्या)	दिव्यसिंह मिश्रः
604.	शारीरकव्याख्याप्रस्थानानि	गुरुस्वामिशास्त्री
605.	शास्त्रसिद्धान्तलेशसङ्ग्रहः	वासुदेवब्रह्मेन्द्रः
606.	शास्त्राकूतप्रकाशः	कृष्णानन्दसरस्वती
607.	शास्त्रारम्भः	राजचूडामणिदीक्षितः
608.	शास्त्रारम्भसमर्थनम्	त्र्यम्बकभट्टः
609.	शुकाष्टकम्	शुकाचार्यः
610.	शुकाष्टकव्याख्या	गङ्गाधरेन्द्रः
611.	श्रुतिमतप्रकाशः	त्र्यम्बकभट्टः
612.	श्रुतिसारः	पूर्णप्रकाशः
613.	श्रुतिसारसमुच्चयः	पूर्णानन्दः
614.	श्रुतिसारसमुच्चयः	ब्रह्मनिराकारयोगी
615.	श्रुतिसारसमुद्धरणम्	तोटकाचार्यः
616.	श्रुतिसारसमुद्धरणव्याख्या 'तत्वदीपिका'	सच्चिदानन्दः
617.	श्रुतिसारसमुद्धरण व्याख्या	पूर्णात्मकृष्णः
618	श्रुतिसारोद्धारः	परमहंसः
619.	श्रुतिस्मृतिसारसंग्रहः	बालब्रह्मानन्दः
620.	श्लोकत्रयम्	रामचन्द्रेन्द्रः
621.	श्रौताखण्डार्थसिद्धिः	रामानन्दसरस्वती
622.	षट्त्रिंशदद्वैततत्वमालिका	आदिनारायणः
623.	षट्पदी	शङ्कराचार्यः
624.	षट्पदीव्याख्या	कविसरोजभिक्षुः
625.	षट्पदीव्याख्या	वैकुण्ठशिष्यः
626.	षट्पदीव्याख्या मञ्जरी	शङ्करानन्दतीर्थः
627.	सच्चिदनुभवप्रकाशिका	वासुदेवब्रह्म
628.	सत्सुखानुभवः	इच्छारामस्वामी
629.	सत्तासाम्यविवेकः	रामचन्द्रबुधः

	ग्रन्थाः	कर्तारः
630.	सदाचारप्रकरणम्	शङ्कराचार्यः
631.	सदाचारप्रकरणव्याख्या शुद्धधर्मपद्धतिः	अच्युतशर्मा
632.	सद्विद्याविलासः	त्यागराजशास्त्री
633.	सप्तदशप्रकरणम्	महेश्वरानन्दः
634.	समन्वयसाम्राज्यसमर्थनम्	हरिहरानन्दसरस्वती

श्रीकरपात्रीजीति प्रसिद्धेनानेन कृतः ग्रन्थोऽयं "एम् एल जे" मुद्रणालये मद्रासनगरे मुद्रितः।

635.	समाधिप्रक्रिया	अनन्तराममुनिः
636.	सर्वसिद्धान्तसङ्ग्रहः	बोधनिधिः

ग्रन्थोऽयं तिरुवनन्तपुरपुस्तकालये लभ्यते ।

637.	सर्वसिद्धान्तसङ्ग्रहदीपिका	विट्ठलबुधाकरः
638.	सिद्धान्तचन्द्रिका	रामभद्रानन्दः
639.	सिद्धान्तचन्द्रिकाव्याख्या उद्गारः	गङ्गाधरेन्द्रः
640.	सिद्धान्ततत्वम्	अनन्तदेवः
641.	सिद्धान्ततत्वव्याख्या सम्प्रदायनिरूपणम्	अनन्तदेवः
642.	सिद्धान्तदीपः	हयग्रीवाश्रमी

वेदान्तसिद्धान्तदीपापरनामायं ग्रन्थः रायल आसियाटिक सोसाइटि पुस्तकालये कलकत्ता नगरस्थे लभ्यते ।

643.	सिद्धान्तदीपिका	भवानीशङ्करः

ग्रन्थोऽयं मद्रासहस्तलिखितराजकोयपुस्तकालये लभ्यते ।

644.	सिद्धान्तपञ्जरम्	विनायकः
645.	सिद्धान्तपरिभाषानिरुक्तिः	श्रीनिवासः

ग्रन्थोऽयं मद्रासराजकीयपुस्तकालये लभ्यते ।

646.	सिद्धान्तमुक्तावलिः	प्रकाशानन्दः
647	सिद्धान्तमुक्तावलीव्याख्या सिद्धान्तदीपिका	नानादीक्षितः
648.	सिद्धान्तरत्नम्	बलदेवविद्याभूषणः
649.	सिद्धान्तरत्नमाला	श्रीवत्सलाञ्छनशर्मा

ग्रन्थाः		कर्तारः
	ग्रन्थोऽयं जयपुरसूच्यां मद्रासराजकीयपुस्तकालये च लभ्यते ।	
650.	सिद्धान्तलेशसङ्ग्रहः	अप्पय्यदीक्षितः
651.	सिद्धान्तलेशसङ्ग्रहव्याख्या—कृष्णलङ्कारः	अच्युतकृष्णानन्दः
652.	सिद्धान्तलेशसङ्ग्रह—सिद्धान्तकौमुदी	राघवानन्दः
653.	सिद्धान्तलेशसङ्ग्रह सिद्धान्तसूक्तिमञ्जरी	रामचन्द्रपूज्यपादः
	वेदान्तसिद्धान्तसूक्तिमञ्जर्यपरनामायं ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः ।	
654.	सिद्धान्तलेशसङ्ग्रहव्याख्या	विश्वनाथः
655.	सिद्धान्तलेशसङ्ग्रहसारः	वासुदेवब्रह्म
	ग्रन्थोऽयं हिन्दीप्रचारसभामुद्रणालये मद्रासनगरे मुद्रितः ।	
656.	सिद्धान्तश्लोकत्रयम्	रामचन्द्रेन्द्रः
	ग्रन्थोऽयं मद्रासराजकीयपुस्तकालये लभ्यते ।	
657.	सिद्धान्तसर्वस्वम्	लक्ष्मणपण्डितः
658.	सिद्धान्तसङ्ग्रहः	रामः
659.	सिद्धान्तसङ्ग्रहः	रुचिकरः
660.	सिद्धान्तामृतम्	व्यङ्कटनाथः
661.	सुज्ञानविंशतिः	मुकुन्दः
662.	सोपाधिकब्रह्मविद्यादर्पणम्	स्वयम्प्रकाशब्रह्मानन्दः
	ग्रन्थोऽयं मद्रासनगरे मुद्रितः ।	
663.	सर्ववेदान्ततात्पर्यसारसङ्ग्रहः	सुन्दररामशास्त्री
664.	सर्ववेदान्तसङ्ग्रहः	सच्चिदानन्दस्वामी
665.	सर्ववेदान्तसिद्धान्तसारसंग्रहः	शङ्कराचार्यः
666.	सर्वसिद्धान्तसंग्रहव्याख्या	शेषगोविन्दः
	अमुद्रितोऽयं ग्रन्थ मद्रासराजकीयपुस्तकालये लभ्यते ।	
667.	स्वप्नोदितम्	सदाशिवब्रह्म
	ग्रन्थोऽयं सरस्वतीमहालयसूच्यास्त्रयोदशे भागे DCTSML Vol. XIII मुद्रितः ।	
668.	स्वरूपदर्शनसिद्धाञ्जनम्	रामब्रह्मेन्द्रः

ग्रन्थाः		कर्तारः
669.	स्वरूपब्रह्मभावना	स्वयम्प्रकाशः
670.	स्वरूपविमर्शिनी सव्याख्या	चिदानन्दस्वामी
671.	स्वरूपानुभवः	पद्मपादः
	ग्रन्थोऽयं ब्रह्मानन्दचिद्घननाम्ना शङ्कराचार्यकृतत्वेन वाणीविलासमुद्रणालये श्रीरङ्गक्षेत्रे मुद्रितः ।	
672.	स्वरूपानुसन्धानम्	गौरीशङ्कर ओझा
	भारतीयकार्यालयमुद्रितपुस्तकसूच्यां दृश्यतेऽयं ग्रन्थः लन्दन नगरे ।	
673.	स्वरूपानुसन्धानम् (विज्ञाननौका)	शङ्कराचार्यः
674.	स्वरूपविवरणम्	आनन्दगिरिः
675.	स्वात्मनिरूपणम्	शङ्कराचार्यः
676.	स्वात्मनिरूपणव्याख्या	सच्चिदानन्दस्वामी
677.	स्वात्मप्रकाशकम्	सदानन्दः
	ग्रन्थोऽयं रायल असियाटिक सोसाइटि कलकत्तानगर पुस्तकालये अमुद्रित उपलभ्यते ।	
678.	स्वात्मयोगप्रदीपः	अमरानन्दः
679.	स्वात्मयोगप्रदीप प्रबोधिनी	अमरानन्दः
680.	स्वात्मस्फूर्तिविलासः	त्यागराजदीक्षितः
681.	स्वात्मस्फूर्तिविलास व्याख्या	त्यागराजशास्त्री
682.	स्वात्मादर्शः	शिवानन्देन्द्रः
683.	स्वात्मानन्दचन्द्रिका	स्वानन्दयोगी
684.	स्वात्मानन्दस्तोत्रम्	विमलब्रह्म
685.	स्वानुभवतरङ्गम्	अद्वैतेन्द्रः
	ग्रन्थोऽयं बरोडापुस्तकालये लभ्यते ।	
686.	स्वानुभवविवेकसारमननम्	शिवरामयतिः
687.	स्वानुभवादर्शः	माधवाश्रमः
688.	स्वानुभवादर्श-अर्थप्रकाशिका	माधवाश्रमः
689.	स्वात्मानुभूतिमणिदर्पणः	वेङ्कटेशशास्त्री

ग्रन्थाः		कर्तारः
690.	स्वानुभूतिप्रकाशः	सदाशिवब्रह्म
691.	स्वानुभूतिविलासः	कृष्णानन्दसरस्वती
692.	स्वाराज्यसिद्धिः	गङ्गाधरेन्द्रः
693.	स्वाराज्यसिद्धि कैवल्यकल्पद्रुमः	गङ्गाधरेन्द्रः
694.	स्वाराज्यसिद्धि कैवल्यकल्पद्रुम-परिमलः	कृष्णशास्त्री
695.	स्वाराज्यसिद्धिव्याख्या	भास्करानन्दः
696	संक्षेपशारीरकम्	सर्वज्ञात्मा
697.	संक्षेपशारीरकव्याख्या सुबोधिनी	अग्निचित्पुरुषोत्तमः
698.	संक्षेपशारीरक तत्त्वबोधिनी	नृसिंहाश्रमी
699.	संक्षेपशारीरक विद्यामृतवर्षिणी	राघवानन्दः
700.	संक्षेपशारीरक अन्वयार्थप्रकाशिका	रामतीर्थः
701.	संक्षेपशारीरक सिद्धान्तदीपः	विश्ववेदः
702.	संक्षेपशारीरक सम्बन्धोक्तिः	वेदानन्दः
703.	संक्षेपशारीरकव्याख्या	प्रत्यग्विष्णुः
704.	संक्षेपशारीरकसारसङ्ग्रहः	मधुसूदनसरस्वती
705.	हरिहराद्वैतभूषणम्	बोधेन्द्रसरस्वती

"हरिहरभेदधिक्कारः," "हरिहराद्वैत भूषणकारिका" इत्यपि नामान्तराण्यस्यैव ग्रन्थस्य दृश्यन्ते। अस्य कर्ता कुत्रचित् विश्वाधिकगुरुशिष्य इति दृश्यते। परन्तु विश्वाधिकगुरुशिष्यःबोधेन्द्रसरस्वत्येवेति ज्ञेयम्।

खण्डनमण्डनपरा वादप्रधानाश्च प्रकरणग्रन्थाः

706.	अद्वैततरणिः	नटेशार्यः
707.	अद्वैतदीपिका	अनन्तकृष्णशास्त्री
708.	अद्वैतब्रह्मसिद्धिः	सदानन्दकाश्मीरकः
709.	अद्वैतब्रह्मसिद्धिविनियोग सङ्ग्रहः	आनन्दपूर्णमुनिः।

अमुद्रितोऽयं ग्रन्थ रायल आसियाटिक सोसाइटि कल्कत्तानगरस्थ पुस्तकालये लभ्यते। कोऽयमानन्दपूर्णः ? ब्रह्मसिद्धिव्याख्याकारः भावशुद्धिकारो न भवितुमर्हति। सदानन्दकाश्मीरकादतिप्राचीनत्वात्। तस्मादन्योऽयमानन्दपूर्ण इत्येव निर्णीयते। अथवा ब्रह्मसिद्धेरेवाद्वैतब्रह्मसिद्धिरिति नामान्तरमिति स्वीकृत्य तस्याः व्याख्याया एव "विनियोगसङ्ग्रह" इति नामान्तरमिति निर्देशस्सम्भाव्यते। परन्तु अस्य निश्चयः न कर्तुं पार्यते। समग्रग्रन्थस्य द्रष्टुमशक्तेः।

ग्रन्थाः		कर्तारः
710.	अद्वैतमार्तण्डः	अनन्तकृष्णशास्त्री
711.	अद्वैतरत्नरक्षणम्	मधुसूदनसरस्वती
712.	अद्वैतसिद्धान्तदीपिका	भवानीशङ्करानन्दः
713.	अद्वैतसिद्धिः	मधुसूदनसरस्वती

अद्वैतसिद्धिचन्द्रिका—धर्मदत्तबच्चा झा Ref. P. 205 of History of Navya - Nyaya - in Mithila

714.	अद्वैतसिद्धिव्याख्या गुरुचन्द्रिका	ब्रह्मानन्दसरस्वती
715.	अद्वैतसिद्धिव्याख्या लघुचन्द्रिका	ब्रह्मानन्दसरस्वती
716.	अद्वैतसिद्धिसाधकः	पुरुषोत्तमः
717.	अद्वैतसिद्धि अद्वैतचन्द्रिका	बलभद्रः
718.	अद्वैतसिद्धिसिद्धान्तसारः सव्याख्यः	सदानन्दव्यासः
719.	अभेदरत्नम्	मल्लनाराध्यः
720.	अवैदिकमततिरस्कारः	अच्युतशर्मामोडकः
721.	इष्टसिद्धिः	विमुक्तात्मा
722.	इष्टसिद्धिविवरणम्	अनुभूतिस्वरूपः
723.	इष्टसिद्धिविवरणम्	आनन्दानुभवः
724.	इष्टसिद्धिविवरणम्	ज्ञानोत्तमः
725.	उपाधिखण्डनम्	पुरुषोत्तमसरस्वती
726.	खण्डनखण्डखाद्यम्	श्रीहर्षः
727.	खण्डनखण्डखाद्यव्याख्याः आनन्दवर्धिनी	शङ्करमिश्रः
728.	खण्डनखण्डखाद्य व्याख्या	चित्सुखाचार्यः
729.	खण्डनखण्डखाद्यटीका	पद्मनाभपण्डितः
730.	खण्डनमण्डनम्	भवनाथः
731.	खण्डनमण्डनम्	परमानन्दः

ग्रन्थाः — कर्तारः

732. खण्डनमण्डनम् — वरदपण्डितः

ग्रन्थोऽयं अनन्तशयनपुस्तकालये, अडयारपुस्तकालये, भारतकार्यालयपुस्तकालये लन्दननगरे च लभ्यते ।

733. खण्डनमण्डनव्याख्या

अज्ञातकर्तृकेयं व्याख्या अडयारपुस्तकालये मद्रास राजकीयहस्तलिखित पुस्तकालये च लभ्यते ।

734. खण्डनमहातर्कः — चरित्रसिंहः
735. खण्डनखण्डनम् — प्रगल्भमिश्रः
736. खण्डनकुठारः — गोकुलनाथः
737. खण्डनोद्धारः — वाचस्पतिः
738. खण्डनदीधितिः — रघुनाथशिरोमणिः
739. खण्डनप्रकाशः — वर्धमानः
740. खण्डनखाद्य विद्याभरणी — विद्याभरणः
741. खण्डनखण्डखाद्य विद्यासागरी — आनन्दपूर्णः
742. खण्डनखाद्य शिष्यहितैषिणी — अनुभूतिस्वरूपः
743. खण्डनखाद्य श्रीदर्पणम् — शुभङ्करमिश्रः
744. खण्डनखण्डखाद्य अद्वैतबोधामृतम् — अज्ञातम्
745. खण्डनखण्डखाद्यव्याख्या शारदा — शङ्करचैतन्यः
746. खण्डनखण्डखाद्यसारः खण्डनरत्न ।लिका — सूर्यनारायणः
747. खण्डनपरिशिष्टम् — ताराचरणशर्मा
748. तत्वकौस्तुभम् — भट्टोजिदीक्षितः
749. तत्वचन्द्रिका — उमामहेश्वरः
750. तत्वविवेकः — नृसिंहाश्रमी
751. तत्वविवेकव्याख्या वाक्यमाला — भट्टोजिदीक्षितः
752. तत्वविवेकदीपनम् अद्वैतरत्नकोशः — नृसिंहाश्रमी
753. तत्वविवेकदीपन भावप्रकाशिका — अखण्डानन्दः
754. तत्वविवेकदीपनव्याख्या — अनन्तभट्टः

ग्रन्थाः — कर्तारः

अमुद्रितोऽयं ग्रन्थःमद्रासराजकीयपुस्तकालये लभ्यते ।

755. तत्वविवेकदीपन भावप्रकाशिका — कालहस्तीशः
756. तत्वविवेकदीपन कोशरत्नप्रकाशः — अनुभवानन्दः
757. तत्वविवेकदीपनभावार्थप्रकाशिका — शाश्वतानन्दतीर्थः
758. तत्वविवेकदीपन तत्वविवेचनी अद्वैतरत्नकोशपूरणी — अग्निहोत्रभट्टः
759. तत्वविवेकदीपनव्याख्या अद्वैतरत्नकोशपालनी — रामाध्वरी
760. तत्वसंख्यान खण्डनम् — त्र्यम्बकभट्टः
761. तप्तचक्राङ्कविध्वंसनम् — गरुडाचलयज्वा

अमुद्रितोऽयं ग्रन्थः लन्दननगर भारतकार्यालयपुस्तकालये लभ्यते ।

762. तप्तमुद्राविद्रावणम् — भास्करदीक्षितः
763. दशकोटिः — अप्पय्यदीक्षितः

ग्रन्थोऽयमडयारपुस्तकालये लभ्यते ।

764. दृग्दृश्यसम्बन्धानुपपत्तिप्रकाशः — त्र्यम्बकभट्टः
765 दृश्यविषयताखण्डनम् — अच्युतशर्मा
766. ध्वान्तानुबन्धविकारः — रामेश्वरभट्टः
767. नवकोटिः — रामाशास्त्री
768. न्यायचन्द्रिका — आनन्दपूर्णः
769 न्यायचन्द्रिकाव्याख्या — स्वरूपानन्दः
770. न्यायदीपावलिः — आनन्दबोधः
771. न्यायदीपावलीव्याख्या तात्पर्यटीका — सुखप्रकाशः
772. न्यायदीपावली चन्द्रिका — अनुभूतिस्वरूपः
773. न्यायदीपावली न्यायविवेकः — अमृतानन्दः
774. न्यायदीपावली वेदान्तविवेकः — आनन्दगिरिः
775. न्यायभास्कर खण्डनम — रामसुब्रह्मण्यशास्त्री

न्यायभास्कर खण्डनम्

ग्रन्थोऽयं मद्रपुरीसंस्कृतकलाशालाप्रधानाध्यापकेन म. म. अनन्तकृष्णशास्त्रि-गुरुणा पञ्चापगेशशास्त्रिणा कृतः। ग्रन्थोऽयं "ब्रह्मानन्दीयभावप्रकाशिका"

ग्रन्थाः		कर्तारः

नाम्ना पण्डितराज सुब्रह्मण्यशास्त्रिभिः (अण्णामलै विश्वविद्यालय) गोश्री-महाराजरामवर्मणा च परिष्कृतः। प्रकाशिता च गोश्रीमहाराजेन। ग्रन्थोऽयं रामसुब्रह्मण्यशास्त्रिकृतात् भिन्नो वा नवेति न ज्ञायते।

776.	न्यायमकरन्दः	आनन्दबोधः
777.	न्यायमकरन्दटीका	चित्सुखः
778.	न्यायमकरन्द विवेचनी	सुखप्रकाशः
779.	न्यायरत्नदीपावलिः	आनन्दानुभवः
485. शारीरकभाष्यसारः— बालकृष्णानन्दसरस्वती ।

486. शारीरकमीमांसोपयोगि श्रुतिवाक्यसंग्रहः—नृसिंहाश्रमिशिष्यः ।

487. शारीरकमीमांसोपयोगि श्रुतिवाक्यसंग्रहव्याख्या—नृसिंहाश्रमिशिष्यः ।

488. शारीरकार्थसंक्षेपः—महादेवः ।

489. शारीरकार्थसंक्षेपविवृतिः—महादेवः ।

490. सच्चिदानन्दानुभवदीपिका— वासुदेवब्रह्म ।

491. स्वानुभूतिनाटकम्—ग्रन्थोऽयमनन्तपण्डितेन कृतः । प्रबोधचन्द्रोदयवत् आध्यात्मिकवस्तुप्रधानमिदं नाटकम् । ग्रन्थोऽयं जयपुरपोटीकानासूच्यां (vol XXVII 2/12) दृश्यते । अपरे केचन ग्रन्थाः अद्वैतसिद्धान्तं पोषयन्तः समीक्षापद्धत्यां लिखिताः मुद्रिताश्च वर्तन्ते । ते चात्र वर्ण मालाक्रमेण निरूप्यन्ते

492. द्रविडात्रेयदर्शनम्—श्रीरामशास्त्री ।
ग्रन्थोऽयं शङ्करभगवत्पादेभ्यः प्राचीनानां द्रविडाचार्याणां ब्रह्मनन्दिनाञ्च मतवादादिकं विविच्य दर्शयति । ग्रन्थोऽयं मद्रासनगरे मुद्रितः ।

493. ब्रह्मसूत्रभाष्यनिर्णयः— चिद्घनानन्दपुरी ।

494. भगवद्गीता भारतीयदर्शनानि च—अनन्तकृष्णशास्त्री ।

495. सुरेश्वरहृदयम्—गणेशशर्मा ।

द्वितीयो भागः

अद्वैताचार्याः, अद्वैतग्रन्थप्रणेतारश्च ।

अद्वैताचार्याः अद्वैतमतप्रतिपादकग्रन्थविशेषप्रणेतारश्च कालभेदेन द्वेधा विभक्तुं शक्यन्ते—"शङ्करभगवत्पादेभ्यः प्राचीनाः, शङ्करभगवत्पादेभ्य अर्वाचीनाश्चेति ।" तेष्वपि शङ्करभगवत्पादेभ्यः प्राचीनेषु आचार्येषु 1. ब्रह्मसूत्रकारात् शङ्करभगवत्पादेभ्यश्च प्राचीनाः, 2. ब्रह्मसूत्रकारात् अर्वाचीनाः शङ्करभगवत्पादेभ्यः प्राचीनाश्चेति विभागोऽपि कर्तुं शक्यते । अद्वैतमतसिद्धान्तस्य प्राचीनतमत्वात् ब्रह्मसूत्रेषु बहूनां वृत्तिग्रन्थानां सत्वानुमानाच्च । शङ्करभगवत्पादकृतभाष्यप्रभावात् बौद्धप्रभावाच्च प्राचीनं वृत्त्यादिकं विनष्टम् । अथवा शाङ्करभाष्येण तेषां सम्पूर्णतया गतार्थत्वात् तेषां संरक्षणे औदासीन्यवशाच्च विनष्टं जातम् । तत्वचन्द्रिकाकारेणोमामहेश्वरेण तत्वचन्द्रिकायां (R· 5156 MGOML) "शङ्करभगवत्पादैः स्वीये भाष्ये एकोनशतं सूत्रवृत्तिग्रन्थाः परामृष्टाः, केचित् खण्डिताश्चेति" निर्दिश्यते । शाङ्करभाष्यदर्शकाणां सर्वेषाञ्च मनसि ईदृशी चिन्ता स्वाभाविकी यत् 'शाङ्करभाष्ये शङ्कराचार्येण ततोऽपि प्राचीनवृत्तिकारस्य व्याख्यानं बहुषु स्थलेषु खण्डितम् । तदर्थं तत्र तत्र युक्तिरपि प्रदर्शिता । परन्तु तासां वृत्तीनां नाम, वृत्तिकारादीनां नाम वा न कुत्रापि निर्दिष्टम् । परन्तु व्याख्यानादिकर्तृभिः तेषां नाम तत्र तत्र निर्दिष्टं क्वचित् क्वचित् । शाङ्करभाष्ये पूर्वपक्षत्वेन गृहीता एव भास्कररामानुजादिभिः सिद्धान्तत्वेन स्वीकृता वर्तन्ते । तस्मात् शङ्करभाष्ये पूर्वपक्षत्वेनोपन्यस्तानां मतवादानां मध्ये कियन्तो मतवादाः पूर्वैरुद्भाविताः ? कियन्तो वा बोधायनादिभिः प्रकल्पिताः ? कति वा शङ्करभगवता स्वयं समुद्भाविताः ? किं ते शाङ्करभाष्यानुगाः ? उत शङ्करसिद्धान्तेन अंशतस्सदृशाः ? इत्यादिविषया न निर्णेतुं शक्यन्ते । तथा च बोधायनोपवर्षादिभिस्सह भास्कररामानुजादीनां सम्बन्धो यथा दुर्निर्णेयस्तथा वृत्तिकारादीनामपीत्येवावगम्यते । एवमपि बोधायनोपवर्षभर्तृप्रपञ्चभर्तृहरिब्रह्मनन्दिसुन्दरपाण्डयद्रविडाचार्यब्रह्मदत्तादिवेदान्ताचार्याः ब्रह्मसूत्रेषु वृत्तिग्रन्थान् प्राणैषुरिति परं ज्ञायते । व्याख्यानपरम्परैवात्र प्रमाणम् । एतेषां ग्रन्थानामिदानीमनुपलम्भात् ।

एवं ब्रह्मसूत्रेष्वपि बादरायणव्यासेन केचनाचार्याः नाम्ना निर्दिष्टाः । तेषाञ्च ग्रन्था नोपलभ्यन्ते । तथापि तेषां मतवादादिकं विविधपत्रिकादिप्रमाणानुसारं

यथाकथञ्चित् विवृणीतुं प्रयतामहे । तेषु आचार्येषु "अष्टावक्र - आत्रेय - आश्मरथ्य - उपवर्ष - औडुलोमि - काशकृत्स्न - कार्ष्णाजिनि - जैमिनि - बादर्यादयः व्यासात्प्राचीनाचार्यविभागे, आचार्यसुन्दरपाण्ड्य द्रविडाचार्य ब्रह्मदत्त ब्रह्मनन्दि भर्तृप्रपञ्च भर्तृहरि बादरायणपरव्यासाचार्याः शङ्करात्प्राचीनाचार्यविभागे, च विभक्तुं शक्यन्ते। एवं निर्णीताः अज्ञातसमयाः विभिन्नविचारलक्ष्यीभूता अपरे अध्यात्मरामायणकार-आदिशेषकाश्यपजाम्बवतदत्तात्रेययोगवासिष्ठ नारदशुकसनत्सुजातादयश्च वर्तन्ते । तेषां सर्वेषां इतिहासादिकं प्रकरणेऽस्मिन् वर्णमालाक्रमेण निरूप्यते ॥

1. अष्टावक्रः

अष्टावक्रोऽयं महर्षिः सुजाताकहोलयोः पुत्रः, उद्दालकस्य दौहित्रः, श्वेतकेतोस्स्वस्रीयः, वदान्यजामाता, सुप्रभाभर्तेति ज्ञायते । उद्दालकनामा महान् ऋषिः कहोलाय स्वशिष्याय स्वकन्यां सुजातानाम्नीं वैवाहिकेन विधिना ददौ । शिष्यमध्ये अधीयानं स्वपितरं कहोलं सुजातागर्भस्थः अग्निकल्पशिशुः रात्रिन्दिवं कहोलस्याध्ययनशीलतां च प्रति अधिचिक्षेप । क्रुद्धः मातामह उद्दालकस्स्वदौहित्रं "यस्मात् त्वं कुक्षौ वर्तमानोऽधिक्षिपसि तस्मात् त्वं अष्टकृत्वः वक्रो भवितासि" इति शशाप । तथा स वक्र एवाभ्यजायत अष्टावक्र इति प्रथितश्च । स्वपत्नीप्रेरणया वित्तार्जनार्थं जनकपुरं गत अष्टावक्रपिता कहोलः जनकपुरद्वारपालेन बन्दिना वादे पराजितः जले निमज्य मृतश्च । मातृसकाशात पितृवृत्तान्तं श्रुत्वा मातुलेन श्वेतकेतुना सह अष्टावक्रः जनकपुरं गतः, वादेषु द्वारपालं जनकञ्च जित्वा "समङ्गा"रनाम्नीं मधुविलानदीं स्नात्वा अष्टावक्रदेहं समीकृत्य जरतरूपधारिण्या उत्तरदिगभिमानिदेवतायाः धर्मो देशं स्वीकृत्य वदान्यकन्यां सुप्रभानाम्नीं विधिनोपयेमे । इति कथा महाभारतादिप्रसिद्धा । अनेन कृतः ग्रन्थः—

(क) अष्टावक्रगीता

अष्टावक्रसूक्तम्, अवधूतानुभूतिः, इत्यादिनाम्ना प्रसिद्धोऽयं ग्रन्थः एकविंशतिभिः अध्यायैः पूर्णः अष्टावक्रजनकसंवादरूपेण अद्वैतवेदान्तसिद्धान्तान् ब्रह्मणोऽद्वितीयत्वं चिन्मयत्वञ्च प्रतिपादयति । ग्रन्थोऽयं आनन्दाश्रमकम्पनि पूनानगरे मुद्रितश्च । अस्य व्याख्याः विश्वेश्वरकृता—दीपिकाख्या, पूर्णानन्दतीर्थकृता काचन व्याख्या, मुकुन्दमुनिकृता अन्या व्याख्या, भासुरानन्दकृता अपरा व्याख्या इत्येवं चतस्रः व्याख्या उपलभ्यन्ते ।

2. आचार्य सुन्दरपाण्ड्यः (600 A.D.)

शङ्करभगवत्पादेभ्यः प्राचीनोऽयं सुन्दरपाण्ड्याचार्यः दक्षिणद्रविडदेशीयः, मधुरानगरवासीति ज्ञायते । पूर्वोत्तरमीमांसयोः प्रकाण्डपण्डितेनानेन ब्रह्मसूत्राणां वार्तिकं विरचितमिति, कैस्तवीय षष्ठशतकात् प्राचीनः, षष्ठशतकीयो वा इति निश्चीयते । अत्रेमानि कारणानि—

स्वर्गीयमहामहोपाध्याय कुप्पुस्वामिशास्त्रिणः "जर्नल् आफ् ओरियण्टल् रिसर्च मद्रास" पत्रिकायाः प्रथमे भागे (J.O.R.I.) एवमभिनयन्ति । शङ्करभगवत्पादैस्स्वीये ब्रह्मसूत्रभाष्ये समन्वय-अधिकरणभाष्यान्ते अपि वाहुः—

> "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् ।
> सद्ब्रह्मात्माहमित्येवं बोधकार्यं कथं भवेत् ॥
>
> अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
> अन्विष्टस्स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥
>
> देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
> लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ॥" इति

श्लोकत्रयमुदाहृतम् । अत्र भामतीकारैः "अत्रैव ब्रह्मविदां गाथामुदाहरति" इत्यवतारितम् । पञ्चपादिकाकारैः "प्रसिद्धमेतत् ब्रह्मविदां पूर्वोक्तं न्यायं संक्षेपतः श्लोकैस्संगृह्णाति" इत्यवतारितम् । पञ्चपादिकाव्याख्यात्रा नरसिंहस्वरूपशिष्येण आत्मस्वरूपेण स्वीयप्रबोधपरिशोधिन्यां 'श्लोकत्रयं सुन्दरपाण्ड्याचार्यप्रणीतं प्रमाणयति" इत्यवतारितम् ।

माधवमन्त्रिणा विरचितायां सूतसंहितायाः व्याख्यायां तात्पर्यदीपिकाख्यायां "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मनिश्चयात् ।" इत्ययं श्लोक उद्धृतः । एतच्छ्लोकविवरणावसरे तथा सुन्दरपाण्ड्यवार्तिकमपीति अवतारिका कृता ।

एवं त्रयोदशशतकीयेनामलानन्देन स्वरचिते कल्पतरुग्रन्थे 3 - 3 - 25 Page 755 N. S. P. Edn.) "आह चात्र निदर्शनमाचार्यसुन्दरपाण्ड्यः" इति—

नि:श्रेण्यारोहणप्राप्यं प्राप्तिमात्रोपपादि च ।
एकमेव फलं प्राप्तुं उभावारोहतो यदा ॥

एकसोपानवर्त्येको भूमिष्ठश्चापरस्तयोः ।
उभयोश्च जवस्तुल्यः प्रतिबन्धश्च नान्तरा ॥

विरोधिनोस्तदैको हि तत्फलं प्राप्नुयात्तयोः ।
प्रथमेन गृहीतेऽस्मिन् पश्चिमोऽवतरेन्मुधा ॥ इति

श्लोकत्रयमुपपादितम् । एतदेव श्लोकत्रयं कुमरिलभट्टैर्बलाबलाधिकरणे तन्त्रवार्तिके (BSS Page 852-853) आह चेत्यादिना प्रतिपादितम् । एवञ्च शङ्करभगवत्पादेभ्यः कुमरिलभट्टाच्च प्राचीन इति सिध्यति ।

आचार्यसुन्दरपाण्ड्यकृतः नीतिद्विषष्टिकाख्यः ग्रन्थः कश्चन नीतिपरः मद्रपुर्यां प्रकाशितः । तत्रस्थाः बहवः श्लोकाः त्रयोदशशतकीयेन जल्हणेन सूक्तिमुक्तावल्यां, पञ्चदशशतकीयेन वल्लभदेवेन सुभाषितावल्यां, पञ्चदशशतकीयेन शार्ङ्गधरेण स्वीयशार्ङ्गधरपद्धत्यां, पोतयार्येण प्रसङ्गरत्नावल्यां, पेद्दिभट्टेन सूक्तिवारिधौ, द्वादशशतकीयेन कलिङ्गराजापरनाम्ना सूर्यपण्डितेन कुलशेखरसूक्तिहाराख्ये ग्रन्थे चोदाहृताः । विशेषतः सूर्यपण्डितेन "आचार्यसुन्दरपाण्ड्यकृता" इति निर्दिष्टाश्च । पञ्चतन्त्रकर्ता विष्णुशर्मा कैस्तवीयषष्ठशतकादर्वाचीन इति विमर्शकसिद्धान्तः । तेनापि नीतिद्विषष्टिकास्थाः 29. 30, 48, श्लोकाः स्वीये ग्रन्थे उद्धृताः । एवं नीतिद्विषष्टिकाग्रन्थावसाने कश्चन श्लोकः—"इमां काञ्चनपीठस्थां समेत्य कवयो भुवि । आर्यां सुन्दरपाण्ड्यस्य स्नापयन्ति वधूमिव ।" दृश्यते । कैस्तवीय षष्ठशतकादारभ्य द्रविडदेशे मधुरायां द्रविडसङ्घस्स्थापितः । अभ्यर्हितं कविं तत्कृतिञ्च तत्सङ्घस्थाः विद्वांसः सङ्घपूजिते काञ्चनपीठे निवेश्य कनकाभिषेकमकुर्वन्निति तमिलसाहित्ये प्रसिद्धम् । तादृशसत्कारः ग्रन्थस्यास्य-नीतिद्विषष्टिकाख्यस्यापि प्रवृत्त इत्येवास्मात् पद्यात् ज्ञायते ।

"श्रीमच्छकाब्देऽब्धिशशिसायकसम्मिते । राजा माधववर्माभूत् विख्यातो धरणीतले ॥" इति प्रसङ्गरत्नावल्याख्ये पोतयार्यकृते ग्रन्थे दर्शनात्, पेण्डयाल सुब्रह्मण्यशास्त्रिभिः प्रकाशितात् पुलिवूरुशिलाशासनप्रमाणाच्च 514 शके 592 A. D. काले विष्णुकुण्डिनवंश्यः माधववर्मापरनामा जनाश्रयाख्यः कृष्णानदीतीरान्ध्रदेशाधीश आसीदिति ज्ञायते । तेन राज्ञा कृता कृतिः जानाश्रयीति च प्रसिद्धा । तस्मिन् जानाश्रयीत्यपरनामके छन्दोग्रन्थे नीतिद्विषष्टिकायाः चतुर्विंशतितमः "चारित्रनिर्मल जलः सत्पुरुषनदोऽक्षयो भवतु नित्यम् । यस्य विभवारविन्दे विद्वद्भ्रमराः कृतविनोदाः ॥" इति श्लोक उद्धृतः ।

तस्मात्—कुमरिलभट्टेन, शङ्कराचार्येण, विष्णुशर्मणा, जनाश्रयेण, माधवमन्त्रिणा च प्रमाणीकृतोऽयं सुन्दरपाण्ड्याचार्यः कैस्तवीयषष्ठशतकात् प्राचीनः, षष्ठशतकीयो वेति निश्चप्रचमभ्युपगम्यते ।

स्वर्गीय महामहोपाध्याय कुप्पुस्वामिशास्त्रिण आचार्यसुन्दरपाण्ड्यमेनं कैस्तवीयाष्टमशतकीयं प्रवदन्ति । तमिलसाहित्ये प्रसिद्धः அழ்கேசரி (अष्केसरी) एवायमिति जर्नल आफ् ओरियण्टल पत्रिकायाः प्रथमे भागे J. O. R. I. निरूपयन्ति । इतिहासनिपुणाः K. A. नीलकण्ठशास्त्रिणस्तु जर्नल आफ ओरियण्टलरिसर्चपत्रिकायाः प्रथमे भागे (J. O. R. Madras-1) सप्तमशतकमध्यकाले सुन्दरपाण्ड्याचार्य आसीदिति प्रतिपादयन्ति । सर्वथापि शङ्करभगवत्पादेभ्यः प्राचीनोऽयमित्येवास्मत्सिद्धान्तः । "श्रीमान् सुन्दरपाण्ड्यः श्रुति स्मृति प्रसृत सत्पदार्थज्ञ" इति नीतिद्विषष्टिकायां दर्शनात् आचार्यसुन्दरपाण्ड्योऽयं पूर्वोत्तरमीमांसादिषु निष्णात इति ज्ञायते । शाङ्करभाष्ये उद्धृत्य प्रमाणीकृतत्वात् वेदान्तेऽनेन ब्रह्मसूत्राणां किमपि वार्तिकं पद्यबद्धं कृतं स्यादिति निश्चीयते । कुमरिलभट्टैरुद्धृतोऽयं पूर्वमीमांसायामपि ग्रन्थप्रणेता इत्यभ्यूह्यते ।

अस्यैवाचार्यसुन्दरपाण्ड्यस्य द्रविडाचार्य इत्यपि नामान्तरम्, व्यावहारिकनाम वा स्यादित्यूह्यते । अत्रेदं कारणं भवति—अभिनवद्रविडाचार्यापरनाम्ना अष्टादशशतकीयेन बालकृष्णानन्दसरस्वत्या विरचिते पद्यबद्धे शारीरकमीमांसाभाष्यवार्तिके आशुतोषग्रन्थमालामुद्रिते शङ्करभाष्यस्थस्य 'अपिचे'ति ग्रन्थस्यावतरणसमये "कथितार्थपरां द्रविडार्यकृतां अपिचेति गुरुर्वदतीह कथाम्" (ASI Page 403) निर्दिष्टम् । तस्मात् आचार्यसुन्दरपाण्ड्योऽयं द्रविडाचार्य इत्यपि व्यवहृतस्स्यादिति निश्चीयते ।

3. आत्रेयः

व्यासात्पूर्वतनेषु वेदान्ताचार्येषु अन्यतमोऽयमात्रेयः । बादरायणव्यासनिर्मितेषु ब्रह्मसूत्रेषु स्वामिनः फलश्रुतेरित्यात्रेयः 3-4-44 इति आत्रेयोऽयं निर्दिष्टः ।

यज्ञे अङ्गाश्रितोपासना यज्ञस्वामिना एवं ऋत्विग्भिश्च कर्तव्या । अत्र फलविषये संशयः । किं उपासनाजन्यफलभाक् यजमानः ? उत ऋत्विक् ? इति । अत्रात्रेयमतन्तु अङ्गाश्रितोपासनाफलभाग्यजमान एवेति । अदसीयः वेदान्तग्रन्थस्तु नोपलभ्यते ।

4. आदिशेषः (परमार्थसारकारः)

"वेदान्तशास्त्रमखिलं विलोक्य शेषस्तु जगदाधार" इति परमार्थसारे दृश्यते । राघवानन्दकृतायां व्याख्यायां "भगवता जगदाधारेण आदिशेषेण" इति दृश्यते । तस्मात् सकलफणामणिमण्डल आदिशेष एवास्य परमार्थसारस्य कर्तेति साम्प्रदायिकविश्वासः । परन्तु विधुशेखरभट्टाचार्यास्सम्पादिते "गौडपादीयं आगमशास्त्र" मिति ग्रन्थे गौडपादाचार्यकालात् भास्कराचार्यकालस्य च मध्यवर्तिना केनापि आदिशेषनाम्ना ग्रन्थरचना कृतेति परमार्थसारग्रन्थकारकालः 500-800 A. D.) इति प्रवदन्ति ।

परमार्थसारः—(TSS 12)

आर्यावृत्तघटितैः पद्यैरद्वैतपरमार्थसारान् शिष्योपदेशशैल्यां प्रतिपादयन्नयं ग्रन्थः अभिनवगुप्ताचार्यकृतात् परमार्थसाराद्भिन्नः मुद्रितश्च चौखाम्बामुद्रणालये । अनन्तशयनग्रन्थावल्याञ्च सव्याख्योऽयं मुद्रितः । अस्य व्याख्याः— 1 राघवानन्दमुनिकृता विवरणनाम्नी काचन 2 वासुदेवयतिकृता अन्या प्रकाशिकानाम्नी व्याख्या अमुद्रिता (R. 4149 C. MGOML) लभ्यते ।

5. आश्मरथ्यः

ब्रह्मसूत्रकारात् बादरायणव्यासात् पूर्वतनोऽयं आश्मरथ्यः ब्रह्मसूत्रेषु वैश्वानराधिकरणे "अभिव्यक्तेरित्याश्मरथ्यः 1-2-29, एवं वाक्यान्वयाधिकरणे प्रतिज्ञासिद्धेर्लिङ्गमित्याश्मरथ्यः" 1-4-20 इति वारद्वयं निर्दिष्टः ।

उपनिषत्सु ईश्वरः प्रादेशमात्रः प्रतिपादितः । अस्य उपपत्तिरनेनैवं क्रियते "परमेश्वर अनन्तः । भक्तानुग्रहार्थं प्रादेशमात्रादुद्भवति । हृदयादिषु उपलब्धियोग्येषु प्रदेशेषु उपलभ्यमानोऽयमिति प्रादेशमात्र इति च । भेदाभेदवादयम् । कार्यावस्थायां विज्ञानात्मा परमात्मनः भिन्नः । कारणावस्थायान्तु अभिन्न इत्यस्य सिद्धान्त इति ज्ञायते ।

6. उपवर्षाचार्यः (100 BC — 200 AD)

उपवर्षाचार्योऽयं पूर्वोत्तरमीमांसयोर्वृत्तिकारः, शङ्करभगवत्पादेभ्यः शबरस्वामिनोऽपि प्राक्तन इति ज्ञायते । शङ्करभगवत्पादैस्स्वीये सूत्रभाष्ये ऐकात्म्याधिकरणे 3-3-53 सूत्रे "अत एव च भगवतोपवर्षेण प्रथमतन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम" इत्युद्धारः कृत इति सबहुमानमुपवर्षाचार्य आवेदितः । प्रकटार्थकारैरपि "अतएवेत्यादि" भाष्यव्याख्यानावसरे 'वृत्तिकारवचनं गमकमित्याह इत्येव शाङ्करभाष्यमवतारितम् । एवमानन्दमयाधिकरणे शङ्कराचार्यैः प्रथमं वृत्तिकारमतानुसारेण सूत्राणि व्याख्यातानि । अनन्तरं 'इदं त्विह वक्तव्यम्' इत्यादिना अधिकरणान्ते वृत्तिकारमतं पूर्वपक्षीकृत्य सिद्धान्तविधया स्वीयसिद्धान्तः प्रदर्शितः । एवमन्यत्रापि 'अन्ये त्वाहुः' 'अपरे त्वाहुः' इत्यादिना शङ्करभगवत्पादैर्वृत्तिकारमतमनूदितम् ।

शबरस्वामिना च "वर्णा एव तु शब्दाः" इति भगवानुपवर्ष इति उपवर्षाचार्यः प्रमाणीकृतः । एवञ्च ब्रह्मसूत्राणां वृत्तिकार उपवर्षाचार्य अद्वैतमतैकदेशी प्राचीन इति निर्णीयते । तादृशी उपवर्षीया वृत्तिस्तु नोपलभ्यते कुत्रापीदानीम् ।

ग्रन्थानुपलब्धेरेव विशिष्टाद्वैतिनः उपवर्षाचार्यस्यैव बोधायनकृतकोटिरित्यपि नामान्तरमिति वर्णयन्तस्स्वमतसंरक्षकबोधायनवृत्तिसत्यत्वसंरक्षणाय मणिमेखलादि द्रविडभाषाग्रन्थअवन्तिसुन्दरीग्रन्थप्रपञ्चहृदयग्रन्थमुखेन बोधायनकृतकोटिउपवर्षयोरस्य अभिन्नतां साधयितुं प्रकटप्रयत्नमकुर्वन् । परन्तु तेषां प्रयत्नो विफल इति बोधायनकृतकोटिउपवर्षाचार्यौ भिन्ना एवेति बोधायनवृत्तिस्तु नास्त्येवेति ब्रह्मश्री पोलकं श्रीरामशास्त्रिभिरस्मद्गुरुचरणैः स्वीये द्रविडाम्नायदर्शने प्रतिपादितम् ।

आचार्य भगवद्दत्तैस्तु स्वीये "भारतवर्ष का बृहद् इतिहास" नामके ग्रन्थे प्रथमभागे 84 पुटे शबरस्वामिनां कालः विक्रम चतुर्थशतकात् प्राचीन इति प्रतिपादितम् । तस्मादुपवर्षकालः 200 A. D. कालात् प्राक्तन इति तु निर्णीयते ॥

उपवर्षः वर्षोपाध्यायस्य कनिष्ठभ्राता पाणिनीयवृत्तिकृत् कात्यायनस्य श्वशुरः, उपकोशाया जनकः, महापद्मनन्दस्य प्रधानमन्त्रीति 500 A. D. काले आसीदिति च "वृद्धत्रय्यां" गुरुपादशर्मकालन्दारः ।

7. औडुलोमिः

व्यासात्पूर्वतनेषु आचार्येषु औडुलोमिरप्यन्यः। औडुलोमिरयं ब्रह्मसूत्रेषु वाक्यान्वयाधिकरणे "उत्क्रमिष्यत एवं भावादौडुलोमिः" 1-4-21 इति, स्वाम्यधिकरणे "आर्त्विज्यमौडुलोमिस्तस्मै हि परिक्रीयते" 3-4-45 इति, ब्राह्माधिकरणे "चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः" 4-4-6 इति च स्थलत्रये निर्दिष्टः।

संसार-मोक्षकालभेदेन जीवब्रह्मणोर्भेदाभेदवादी अयमौडुलोमिः। दृश्य-प्रपञ्चेऽज्ञानवशात् जीवब्रह्मणोर्भेदः। मुक्तावस्थायान्तु उभयोरप्यभेद इत्यस्य मतं स्यादित्यूह्यते। भामतीकारोऽपि मतमेतदीयं प्रतिपादयति।

8. काशकृत्स्नः

अविकृतः परमेश्वरो जीवः, नान्य इति सिद्धान्तवाक्यं काशकृत्स्नः ब्रह्म-सूत्रेषु वाक्यान्वयाधिकरणे "अवस्थितेरिति काशकृत्स्नः" 1-4-22 निर्दिष्टः॥

9. काश्यपः

नायं ब्रह्मसूत्रकारैर्निर्दिष्टः। परन्तु "शाण्डिल्यभक्तिसूत्रे "तामैश्वर्यपरां काश्यपः परत्वात्" No. 29 इति निर्दिष्टः।

10. कार्ष्णाजिनिः

छान्दोग्योपनिषदां पञ्चमाध्याये श्रूयमाणस्य "रमणीयचरणा" इति ग्रन्थस्य व्याख्यानावसरे कार्ष्णाजिनिमतं ब्रह्मसूत्रे निर्दिष्टम्। कृतात्ययाधिकरणे "चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः" 3-1-9 सूत्रेण निर्दिष्टः॥

11. जाम्बवान्

एतत्कृतत्वेन प्रसिद्धस्य प्रणवमहाभाष्याख्यग्रन्थस्य उपान्त्यवाक्यात् रामचन्द्रभक्तो भगवान् जाम्बवानेवायमिति प्रतीयते। यद्येवं तर्हि प्रजापति पुत्रोऽयं त्रेतायुगादारभ्य वर्तमानश्चिरञ्जीवी जाम्बवतीपिता भगवतः कृष्णस्य श्वशुरश्चेति निर्णेतुं शक्यते।

प्रणवमहाभाष्यम्—

प्रणवार्थप्रकाशकोऽयं ग्रन्थः माण्डूक्योपनिषदन्तर्गतं ओङ्कारोपासनार्थं प्रदर्शयति। आह्निकत्रयपूर्णे अमुद्रितोऽयं ग्रन्थः तिरुवनन्तपुरपुस्तकालये 306 TCD दृश्यते॥

12. जैमिनिः

जैमिनिरयं ब्रह्मसूत्रेषु वैश्वानराधिकरणे देवताधिकरणे बालाक्यधिकरणे फलाधिकरणे पुरुषार्थाधिकरणे परामर्शाधिकरणे तद्भूताधिकरणे कार्याधिकरणे ब्रह्माधिकरणे अभावाधिकरणे च निर्दिष्टः। बादरायणस्य साक्षाच्छिष्यः 300 B.C कालात्पूर्वतन इति च सिद्धान्तः।

13. दत्तात्रेयः

पातिव्रत्यधर्मपरायणा अनसूया स्वपतिं अत्रिमुनिं स्वशिरसि वहन्ती निशीथे स्वाश्रमात् देशान्तरं जगाम। सूचिभेद्ये तमसि मध्येमार्गं गच्छन्ती सा शूलारोपितं माण्डव्यमबुध्वा स्वपतिं माण्डव्यशरीरे घर्षितवती। निष्कारणं पीडामुत्पादयन्तं कमित्यज्ञात्वा माण्डव्यः "सूर्योदयादनन्तरं पीडोत्पादकस्य मृतिर्भवतु" इति शशाप। पतिपरायणाऽनसूया "सूर्योदय एव मा भूदिति" शशाप। अन्ध-कारावृते च जगति, सूर्ये च अनुदिते यज्ञक्रियादिकर्मलोपात् भीताः देवाः ब्रह्मणा प्रेरितास्सूर्योदयाय अनसूयां प्रार्थयामासुः। उदिते च सूर्ये अनसूयायाः पातिव्रत्य-धर्मेण तुष्टेन इन्द्रेण प्रार्थितः भगवान् विष्णुरनसूयायां अत्रेः पुत्रत्वेनावततार। सोऽयं पुत्रः दत्तात्रेयः। दत्तात्रेयस्य प्रसादेन कार्तवीर्यार्जुनस्सचराचरं भूमण्डलं शशास। दत्तात्रेयः निमिनामकस्य पिता श्रीमतः पितामहश्चेति कथा महाभारते सभापर्वणि अनुशासनपर्वणि च प्रसिद्धा।

(क) वेदान्तसारः—

क्वचित् क्वचित् अयमेव अवधूतगीता इति नामान्तरमिति च दृश्यते। दत्तात्रेयकार्तिकेयसंवादरूपेऽस्मिन् ग्रन्थे प्रथमपरिच्छेदे अद्वैतब्रह्मवर्णना, द्वितीया-दारभ्य सप्तमपरिच्छेदान्तं स्वात्मसंवित्युपदेशश्च दृश्यते। अमुद्रितोऽयं सम्पूर्णग्रन्थः सरस्वतीमहालये (7589 TSML) दृश्यते।

(ख) अवधूतगीता—

दत्तगीता, जीवन्मुक्तिगीता, इत्यादिकं नाम अस्यैव ग्रन्थस्य दृश्यते। गोरक्षदत्तात्रेयसंवादरूपेऽस्मिन् ग्रन्थे जीवन्मुक्तस्य स्वरूपं सम्यगुपवर्णितम्। मुद्रितश्चायं ग्रन्थ अष्टेकरकम्पनि पूनानगरे गीतासङ्ग्रहे। अस्याः व्याख्या परमानन्दतीर्थकृता अमुद्रिता वर्तते।

(ग) प्रबोधचन्द्रिका—

ग्रन्थोऽयं मध्यप्रान्तीयवरार्ग्रन्थसूच्यां दृश्यते।

(घ) स्वात्मसंवित्युपदेशः—

ग्रन्थोऽयममुद्रितः बरोडापुस्तकालये (996 BRD) लभ्यते। जीवन्मुक्तलक्षणमप्यस्य कृतिरिति ज्ञायते।

14. द्रविडाचार्याः

अद्वैतसम्प्रदायप्रवर्तकेषु पूर्वाचार्येषु अन्यतमा एते द्रविडाचार्या एतद्युगारम्भ एव सम्भूताः। एते भाष्यकारा इति प्रसिद्धाः। छान्दोग्योपनिषदां अर्थविवरणात्मकं सूत्ररूपवाक्यनिचयमण्डितं वाक्यनामकं ग्रन्थं ब्रह्मनन्दिनः प्राणैषु। द्रविडाचार्यैः स्वव्याख्येयवाक्यग्रन्थानुसारं सविशेषनिर्विशेषभेदेन द्विरूपं ब्रह्म न्यरूपि।

बृहदारण्यकोपनिषद्भाष्ये द्वितीयाध्यायप्रथमब्राह्मणविवरणे शङ्कराचार्यैः द्रविडाचार्याः प्रमाणीकृताः। "अत्र हि सम्प्रदायविदः आख्यायिकां सम्प्रचक्षते" इति। आनन्दगिरिणापि "तत्वमस्यादिवाक्यमैक्यपरं, तच्छेषस्सृष्ट्यादिवाक्यम्" इत्युक्तेऽर्थे द्रविडाचार्यसम्मतिमाह — "अत्र चेति" इत्यवतारिका प्रदीयते। बृहदारण्यकवार्तिकेऽपि— "आचक्षते तथाचात्र केचिदाख्यायिकां शुभाम्। यथाभिलषितार्थोऽयं यथा सम्भाव्यते स्फुटः।" इति। अत्राप्यानन्दगिरिणा "द्रविडाचार्यप्रणीतामाख्यायिकामवतारयति" इत्यवतारिता। एवं तोटकाचार्यैः श्रुतिसारसमुद्धरणे विषयेऽस्मिन्नेव द्रविडाचार्यान् निर्दिशति—"द्रविडोऽपि च तत्त्वमसीति वचो विनिवर्तकमेव निरूपितवान्। शबरेण विवर्धितराजशिशोर्निजजन्मविदुक्तिनिदर्शनतः।" इति। एवं छान्दोग्योपनिषद्शाङ्करभाष्योपक्रमे

एवं दृश्यते — "ओमित्येतदक्षरमित्यष्टाध्यायी छान्दोग्योपनिषत्। तस्याः संक्षेपतः अर्थजिज्ञासुभ्यः ऋजुविवरणं अल्पग्रन्थमिदं आरभ्यते। इति। आनन्दगिरिणा "अथ पाठक्रममाश्रित्यापि द्राविडं भाष्यं प्रणीतम्, तत्किमनेन इत्याकाङ्क्षायामाह अल्पग्रन्थ" मिति अवतरणिका प्रदत्ता। मधुसूदनसरस्वत्या कृतायां संक्षेपशारीरकटीकायां ब्रह्मनन्दिविरचितवाक्यानां सूत्ररूपाणां भाष्यकर्ता द्रविडाचार्य इति निर्दिश्यते। नृसिम्हाश्रमिकृतायां संक्षेपशारीरकटीकायां "भाष्यकृद्द्रविडाचार्यवचनात्" इति निर्दिश्यते। रामतीर्थेनापि नन्दिकृतग्रन्थभाष्यकारः द्रविडाचार्य इति निर्दिश्यते। छान्दोग्यभाष्ये तृतीयाध्याये मधुविद्याविवरणे शङ्कराचार्यैः "अत्रोक्तः परिहार आचार्यैः" इति आचार्यशब्देन द्रविडाचार्यः निर्दिष्टः। आनन्दगिरिणाऽपि द्रविडाचार्योक्तं उपपादयतीत्यवतारिका दीयते। सूत्रभाष्ये ज्योतिश्चरणाधिकरणे "व्याचक्षत" इति शब्देन द्रविडाचार्याः निर्दिश्यन्ते। भामत्यां समन्वयाधिकरणे "यथाहुर्द्रविडाचार्या इति द्रविडाचार्याः प्रमाणीकृताः। सूत्रभाष्ये समन्वयाधिकरणभाष्यान्ते "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्" इत्यादि श्लोकत्रयमुद्धृत्य प्रमाणीकृतम्। बालकृष्णानन्दसरस्वत्या प्रकाशिते शारीरकमीमांसाभाष्यवार्तिके पूर्वोक्तभाष्यस्यावतारिकाप्रदानसमये "कथितार्थपरां द्रविडार्यकृतां अपि चेति गुरुर्वदतीह कथाम्॥" इति निर्दिश्यते। गौणमिथ्यात्मन इत्यादि पद्यं द्रविडाचार्यकृतमिति निर्दिष्टम्। म. म. कुप्पुस्वामि शास्त्रिभिश्च प्राच्यभाषासंशोधनपत्रिकायाः प्रथमे भागे J. O. R. Vol I Madras पूर्वोक्तपद्यत्रयं आचार्यसुन्दरपाण्ड्यकृतमिति निरूपितम्। द्रविडाचार्यस्यैव सुन्दरपाण्ड्य इति स्यान्नाम।

एवञ्चाद्वैताचार्यैः निर्दिष्टाः द्रविडाचार्याः नूतनसम्प्रदायप्रवर्तकत्वेन प्रसिद्धाः गौडपादसामयिकाः तत्समानमेव पूज्याः गौडपादाचार्या इव इमेऽपि सन्यासपरम्परायाः प्रवर्तका आसन्। स च सम्प्रदायश्शङ्कराचार्यैः स्वान्तेवासिषु केषुचन उरीकृत एव परन्तु भगवत्पादादिक्रमेण नोरीकृतः। किन्तु सम्प्रदायान्तरद्वारा। अत एव गौडपादानारभ्य सङ्कलितासु स्वाचार्यपरम्परासु द्रविडाचार्यः न निर्दिष्टः इति प्रतिभाति। एतैः 1 बृहदारण्यकवाक्यभाष्यं 2 छान्दोग्यभाष्यमपि कृतं स्यात्॥

15. बादरिः

ब्रह्मसूत्रेषु वैश्वानराधिकरणे, कृतात्ययाधिकरणे कार्याधिकरणे अभावाधिकरणे च निर्दिष्टोऽयं बादरिः। वैदिककर्मणि सर्वेषामधिकारं प्रादेशमात्रे हृदये वर्तमानत्वात् प्रादेशमात्र ईश्वर इति सिद्धान्तं, "रमणीयचरणा" इति छान्दोग्यवाक्यस्थस्य चरणशब्दस्य कर्मपरत्वं, छान्दोग्यस्थ 4-15-5 य एनान् ब्रह्म गमयतीति वाक्यस्थब्रह्मशब्दस्य कार्यब्रह्मवाचकत्वं ईश्वरभावापन्नस्य विदुषश्शरीरेन्द्रियमनसां असत्वञ्च वदन् अयं बादरिर्व्यासात्प्राचीनेषु प्रसिद्धाचार्येषु अन्यतमः॥

16. ब्रह्मदत्तः

जीवाः ब्रह्मण उत्पद्यन्ते मोक्षपर्यन्तावस्थायिनश्चेति ब्रह्मदत्तः। वेदान्तेषु अस्य मतं औपनिषदाभासशब्देन व्यवहारार्हं भवति। ज्ञानकाण्डब्रह्मकाण्डयोर्मुख्यं फलमेकमेवेति ब्रह्मदत्तसिद्धान्तः। "अहं ब्रह्मास्मि" इति वाक्यार्थज्ञानमेव मोक्षोपयोगीति ब्रह्मदत्तः। ब्रह्मदत्तमते उपनिषदः ध्याननियोगप्रधानाः। अद्वैतिनां मते मोक्षो दृष्टफलः। ब्रह्मदत्तमते मोक्ष अदृष्टफलः। ब्रह्मदत्तमते 'तत्वमसि' वाक्यात् "आत्मा वारे द्रष्टव्य" इति वाक्यमेवोपादेयार्हम्।

ज्ञानकर्मसमुच्चयवादी अयं ब्रह्मदत्तः ब्रह्मसूत्राणां ज्ञानकर्मसमुच्चयपरां व्याख्यां कृतवान् स्यात्। ब्रह्मदत्तश्च यामुनाचार्येण सिद्धित्रयेऽनुपादेयत्वेन निर्दिष्टः। सुरेश्वराचार्यकृतनैष्कर्म्यसिद्धेः ज्ञानामृतकृतायां विद्यासुरभिनाम्न्यां व्याख्यायां मद्रासराजकीयहस्तलिखित पुस्तकालयस्थायां (R. 3354 MGOML) ब्रह्मदत्त. निर्दिष्टः। आनन्दगिरिणापि बृहदारण्यकसम्बन्धवार्तिकव्याख्यानावसरे (P. 220 ASS 16) ब्रह्मदत्तः निर्दिष्टः।

किमयं ब्रह्मदत्तः ज्ञानकर्मसमुच्चयवादी? उत न? इति हिरियण्णामहाशयैः (J. O. R. Vol. 12 Madras) पत्रिकायां विमृष्टम्॥

17. ब्रह्मनन्दी

एते ब्रह्मनन्द्याचार्या अद्वैताचार्येषु प्राचीनेषु अन्यतमाश्शङ्करात् पूर्वमासन्निति ज्ञायते। अदसीयाः ग्रन्था नोपलभ्यन्ते। तथापि अद्वैताचार्यैश्शङ्करादर्वाक्तनैः प्रमाणीकृताः।

भामतीव्याख्याने कल्पतरौ "इयञ्चोपादानपरिणामादिभाषा न विकाराभिप्रायेण" इत्यादि भामतीग्रन्थस्य व्याख्यानावसरे (Page 421 VVS Edn) ब्रह्मनन्दी निर्दिष्टः। संक्षेपशारीरके तृतीयपरिच्छेदे (श्लोक संख्या 217–221) "आत्रेय वाक्यमपि संव्यवहारमात्रम्" इत्यादिना आत्रेय अत्रिगोत्रजः ब्रह्मनन्दी अनूदितः। मधुसूदनसरस्वत्या स्वटीकायां "छान्दोग्यवाक्यकारेण ब्रह्मनन्दिना" इत्यवतारितम्। "सिद्धन्तु निवर्तकत्वात्" इति वाक्यं शङ्कराचार्यैः माण्डूक्योपनिषदां भाष्ये वैतथ्यप्रकरणे "न निरोधो न चोत्पत्तिः" इति कारिकाविवरणावसरे निर्दिष्टम्। इष्टसिद्धौ (Page 72) "सिद्धन्तु निवर्तकत्वादिति चोक्तं वाक्यं ज्ञानोत्तमकृतायां इष्टसिद्धिटीकायां ब्रह्मनन्दीयमिति निर्दिष्टम्। आनन्दगिरिणा योगवासिष्ठव्याख्यात्रा आनन्दबोधेन च द्रविडशब्देन ब्रह्मनन्दी निर्दिश्यते। पञ्चपादिकाविवरणेऽष्टमवर्णके "सिद्धन्तुनिवर्तकत्वात्" इति वाक्यं प्रमाणत्वेन स्वीकृतम्। खण्डनखण्डखाद्यव्याख्यायां विद्यासागर्यां सिद्धन्तु निवर्तकत्वादितिवाक्यं उदाहृतम्। नृसिंहाश्रमिकृतायां संक्षेपशारीरकटीकायां "ब्रह्मनन्दिनापि छान्दोग्यषष्ठव्याख्यानावसरे उक्तम्" इति निर्दिष्टम्। रामतीर्थकृतायां संक्षेपशारीरकटीकायां "ब्रह्मनन्दिनाप्याचार्येण छान्दोग्य भाष्ये उक्तम्" नन्दिकृत भाष्यकारः द्रविडाचार्य इति च निर्दिश्यते। यामुनाचार्येण "आत्मसिद्धौ" "आचार्यटङ्क - भर्तृप्रपञ्च - भर्तृमित्र - भर्तृहरि ब्रह्मदत्त - शङ्कर - श्रीवत्साङ्क - भास्करादि विरचितसितासितविविधनिबन्धनश्रद्धाविप्रलब्धबुद्धयः न यथावत् अन्यथा च प्रतिपद्यन्ते।" इति टङ्क अपरिग्राह्यत्वेन निर्दिष्टः। टङ्क एव ब्रह्मनन्दीति श्रुतप्रकाशिकाचार्येण वेङ्कटनाथेन तात्पर्यदीपिकायां "अत्र भाष्यकारः ब्रह्मनन्दिवाक्यव्याख्याता द्रविडाचार्यः" इति द्रविडाचार्यव्याख्येयग्रन्थकर्ता टङ्काख्यः ब्रह्मनन्दीत्युक्तम्॥

तस्मात् ब्रह्मनन्द्यभिन्नः टङ्काख्योऽयं अपरिग्राह्यत्वेन यामुनाचार्येण निर्दिष्टः विवर्तवादावलम्बी नाद्वैतमतविरोधीति स्पष्टं प्रतीयते। अनेन निर्मितः छान्दोग्यवाक्यनामा ग्रन्थस्तु न कुत्रापि लभ्यते॥

18. भर्तृप्रपञ्चः

भर्तृप्रपञ्चोऽयं वेदान्तसाहित्ये शनैश्शनैर्ज्ञानयशास्सञ्जातः। शङ्कराचार्यसिद्धान्तात् भर्तृप्रपञ्चसिद्धान्तो भिद्यते। भर्तृप्रपञ्चः भेदाभेदवादी। शङ्कर अभेद-

वादी । भर्तृप्रपञ्चः ज्ञानकर्मसमुच्चयवादी । शङ्कराचार्यः ज्ञानवादी । मतस्य दर्शनग्रन्थानाञ्च जीवेश्वराणां आत्मनश्च प्रतिपादने एव तात्पर्यमिति भर्तृप्रपञ्चः । भर्तृप्रपञ्चसिद्धान्तः प्रमाणसमुच्चयनाम्नापि व्यवहर्तुं शक्यते । भर्तृप्रपञ्चः भोग एव मोक्षहेतुः न वैराग्यम्, वस्तुतत्त्वानुभव एव विरक्तेस्सुगमः पन्था इति चाभिप्रैति । "तत्त्वमसि" वाक्यात् "आत्मानमेवलोकमुपासीत" इति वाक्यमेव भर्तृप्रपञ्चमते उपादेयतरमिति ज्ञायते ।

ज्ञानकर्मसमुच्चयवादी भर्तृप्रपञ्चोऽयं द्वैताद्वैतवादीति च निश्चयः । शङ्करभगवत्पादैरयं बृहदारण्यकभाष्ये "औपनिषदम्मन्य" इति नाम्नानूद्य खण्डितः । आनन्दगिरिणापि भाष्यव्याख्यायां तत्र तत्र निर्दिष्टः । तस्मात् नायं विशुद्धाद्वैतवादी परन्तु अद्वैतैकदेशीति परं वक्तुं अर्हः । अनेन कठोपनिषदां बृहदारण्यकस्य च भाष्यमारचितं स्यादिति ज्ञायते ।

एनमधिकृत्य "इण्डियन् आण्टिक्वैरिपत्रिकायां (I. A. Part 53 Page 77. 1924) हिरियण्णामहाशयेन सविस्तरं प्रतिपादितम् ।

19. भर्तृहरिः

वेदविदामलङ्कार इति प्रसिद्धोऽयं भर्तृहरिः "नचागमादृते धर्मस्तर्केण व्यवतिष्ठते" इति वाक्यपदीयब्रह्मकाण्डे वदन् स्वस्य वैदिकधर्मावलम्बित्वं प्रकटयति । वाक्यपदीयकर्ता भर्तृहरिः वसुरातशिष्य इति ज्ञायते । "ईत्सिङ्ग् भारत यात्रा" ग्रन्थानुसारं भर्तृहरिसमयस्सप्तमशतकापरार्धावधिक (600–700 A. D.) इति निर्णीयते । भारतपण्डितमण्डलेप्रसिद्धा तु कथा–"भर्तृहरिः विक्रमादित्यभ्राता" इति । तन्त्रवार्तिके कुमारिलभट्टः वाक्यपदीयं वाक्यं खण्डयति (1 - 3 - 871) काशिकायां (4 - 3 - 88) वाक्यपदीयः निर्दिष्टः । तस्मात् ताभ्यां पूर्वतन इति न संशयः । कुन्हन राजामहाशयस्तु (I. H. Q. Vol. XIV) भर्तृहरि पञ्चमशतकीयं वदन्ति । म. म. कुप्पुस्वामि शास्त्रिणः ब्रह्मसिद्धि भूमिकायां षष्ठशतकापरार्धादारब्धे सप्तमशतकापरार्धावधिके काले भर्तृहरिरासीदिति प्रवदन्ति । शबरस्वामिनोऽपि प्राचीनोऽयमिति भगवद्दत्तजीकृत वैदिकवाङ्मयेतिहासे दृश्यते ।

यामुनाचार्येण सिद्धित्रये भर्तृहरिकृतस्य सूत्रव्याख्यानस्य अनुपादेयत्व प्रदर्शनात् भर्तृहरिणापि ब्रह्मसूत्रवृत्तिः कृतासीद् इति ज्ञायते । केचित्तु शब्दाद्वैतवादिनमेनं वदन्ति । वाक्यपदीयब्रह्मकाण्डमेव भर्तृहरिणः वेदान्तित्वे प्रमाणम् ।

20. वाल्मीकिः (योगवासिष्ठकारः)

अध्यात्मविद्यायाः अद्वैतवेदान्तसिद्धान्तस्य च प्राचीनतमोऽयं ग्रन्थः योगवासिष्ठमिति मतिरस्माकम् । रामतीर्थस्वामिनः ग्रन्थमेनं भूमण्डलान्तर्गतेषु ग्रन्थेषु अत्युत्तमं ब्रह्मसाक्षात्कारकरञ्चेति वदन्ति । प्रस्थानत्रयी साधनावस्थोपयोगिनी । योगवासिष्ठन्तु सिद्धावस्थायामपि पठनार्हं ग्रन्थरत्नम् । ग्रन्थश्चायं अनेकदृष्टान्तोपाख्यानादिभिर्युक्तिभिश्च अद्वैतसिद्धान्तं प्रतिपादयति ।

ग्रन्थस्यास्याद्भुतस्य रचनाविषयेऽस्ति महान् विदुषां मतभेदः । चित्तशुद्धि समुत्पादनाय पूर्वरामायणम्, सञ्जातचित्तशुद्धेः पुरुषस्य जिज्ञासाशान्त्यै आत्मानात्मविवेचनपरं अद्वैतसिद्धान्तकोशभूतमिदं उत्तररामायणापराभिधं योगवासिष्ठं वाल्मीकिना प्रणीतमिति तु साम्प्रदायिकी पण्डितमण्डितवार्ता । "ऋषिभिर्बहुधागीत"मिति गीताया (XIII. 3.) ऋषिभिरित्यस्य व्याख्यानावसरे "वसिष्ठादिभिरिति" शाङ्करं भाष्यम् इति च प्रमाणं प्रवदन्ति । यदि वाल्मीकिरेवास्य कर्ता स्यात् तर्हि वाल्मीकिस्सुकन्याच्यवनयोः पुत्र इति पौराणिकी प्रसिद्धिरिति कालादिनिर्णयो न कर्तुं शक्यते ।

आधुनिकेषु प्राच्यप्रतीच्यभाषाप्रवीणेषु विमर्शकवरेषु च अस्य रचनाकाल विषये महान् मतभेद आशयभेदश्चवरीवर्ति । डाक्टर फर्कुहार प्रभृतय आधुनिकाः द्वादशत्रयोदशशतकमध्यमस्य रचनाकाल इति मन्वते । शिवप्रसाद भट्टाचार्यास्तु (900–1110 A. D.) दशमैकादशशतकमध्यमस्य रचनाकाल इति वर्णयन्ति । भारतीय साहित्येतिहासलेखकानां जर्मन पण्डितानां विण्टर्निट्ज महाशयानां नवमशतकमिति । दिवानजी महाशयास्तु योगवासिष्ठरचनास्थानं काश्मीरदेशः, योगवासिष्ठरचनाकालः दशमशतकमिति निश्चिन्वन्ति । आत्रेय महाशयास्तु कालिदासात् अर्वाचीने भर्तृहरिगौडपादशङ्करसुरेश्वरप्रभृतिभ्य अद्वैतवेदान्ताचार्येभ्यः प्राचीने च काले योगवासिष्ठं प्रणीतमिति सिद्धान्तयन्ति । डाक्टर. वे. राघवमहोदयाश्च गीतायाः योगवासिष्ठस्य च साम्यप्रतिपादकानि द्विनवतिसंख्याकानि उद्धरणानि प्रतिपाद्य राजशेखरात् अनन्तरभाविनि नवमशतकादारब्धे त्रयोदशशतकान्ते च काले योगवासिष्ठं प्रणीतमिति जर्नल आफ ओरियण्टल पत्रिकायां प्रतिपादयन्ति । दासगुप्तमहाशयस्तु नवमशतकीयेन काश्मीरिणा अभिनन्देन लघुयोगवासिष्ठनामा ग्रन्थः प्रणीत इति तत्कालपूर्वतनोऽयं ग्रन्थ इति (HIP Vol II) प्रतिपादयति ।

शङ्कराचार्यकृतविवेकचूडामणौ, विद्यारण्यस्वामिकृतपञ्चदश्यां, जीवन्मुक्तिविवेके च, भर्तृहरिकृतवाक्यपदीयवैराग्यशतकयोः, प्रकाशानन्दानां वेदान्त सिद्धान्तमुक्तावल्यां च योगवासिष्ठीयश्लोकाः दृश्यन्ते । उपनिषत्स्वपि योगवासिष्ठीयश्लोकाः दृश्यन्ते । कतिपयोपनिषदः योगवासिष्ठश्लोकसंग्रहा एवेति च आत्रेयमहाशयेन सविस्तरमुपपादितम् ।

योगवासिष्ठग्रन्थे न कोऽपि ग्रन्थः ग्रन्थकारो वा उद्धृतः प्रमाणत्वेन निर्दिष्टश्च । द्वित्रिस्थलेषु परं 'बुद्धः' जिनः इत्यादिशब्दाः (Page 33, 669, 726, Vol I NSP Edn) दृश्यन्ते । परन्तु तत्रापि व्याख्यात्रानन्दबोधेन "प्रव्रजितः" इत्येवार्थः क्रियते । प्रथमभागे 451 तमे पुटे "यत्प्राप्तं शङ्करादिभिः" इत्यादिना शङ्करः निर्दिष्टः । अत्र व्याख्यात्रा न व्याख्यातम् । कोऽयं शङ्करः ? किं शङ्करभगवत्पादः ? उत भगवान् भवानीपतिः ? प्रकरणवशात्तु शङ्करभगवत्पाद इत्येवास्माकं प्रतीयते । एकस्मिन्नेव खण्डे 714 तमे पुटे प्रथमभागे "बृहदारण्यकादिषु" इति बृहदारण्यकोपनिषत् नाम्ना निर्दिश्यते । प्रथमभागे 591 तमे पुटे "श्रीशैलाचार्यपुत्रेण" इति श्रीशैलाचार्यः निर्दिष्टः । एवमादिप्रमाणैश्शङ्करादनन्तरभावित्वमस्य ग्रन्थस्य वक्तुं शक्यते परन्तु प्रक्षिप्ता इमे श्लोका इति वज्रकुठारप्रक्षेपभीत्या न तथापि वक्तुं शक्यते ।

"अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् । अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ।" (Page 181 Vol I) इत्यादिभिरसंख्यैः पद्यैः जगन्मिथ्यात्वं जीवब्रह्मैक्यं, ब्रह्मणो नामरूपबहिर्भूतत्वं, जीवन्मुक्ति, अजातवादः, अनिर्वचनीयतावादः, इत्यादय अद्वैतसिद्धान्ताः काव्यशैल्यां प्रतिपादिता इति ग्रन्थोऽयं अद्वैतवेदान्तसाहित्यस्यादिमं महाकाव्यमित्येव मदीयसिद्धान्तः । एतादृशे अद्वैतवेदान्तशास्त्रकाव्ये आध्यात्मिकमहाकाव्यापरनामके अद्वैतसिद्धान्तवर्णना, जगन्मिथ्यात्ववर्णना च एतादृशी वर्तते यया प्रभाविताः केचन विद्वांसः योगवासिष्ठे बौद्धमतस्य सर्वशून्यवादस्य प्रभावं वर्णयन्ति । परन्तु नैतत्सत्यम् । योगवासिष्ठस्य रचयिता न साधकः । परन्तु अद्वैतानन्दानुभवी महान् सिद्धः । तादृशस्य सिद्धस्य स्वीयानुभवैकप्रमाणे ग्रन्थेऽस्मिन् अद्वैतसिद्धान्ताः सिद्धावस्थानुकूला एव प्रतिपादिता इति तु निश्चयः । ग्रन्थोऽयं तात्पर्यप्रकाशव्याख्यासहितः निर्णयसागरमुद्रणालये मुद्रितः । अस्य व्याख्याः एतत्सम्बद्धाश्च ग्रन्थाः—

(क) अद्वयारण्यकृता—योगवासिष्ठपददीपिका । ग्रन्थोऽयं कलकत्ता रायल् आसियाटिक सूच्यां दृश्यते ।

(ख) आनन्दबोधकृतः—तात्पर्यप्रकाशः । ग्रन्थोऽयं निर्णयसागरमुद्रणालये मुद्रितः ।


(ग) अभिनन्दकृतः—योगवासिष्ठसंक्षेपः (लघुयोगवासिष्ठम्) ग्रन्थोऽयं आत्मसुखेन वासिष्ठचन्द्रिकाव्याख्यया व्याख्यातः । मुम्मुडिदेवेन संसारतरणि व्याख्यया च व्याख्यातः । ग्रन्थोऽयं सव्याख्यः निर्णयसागरमुद्रणालये मुद्रितः ।

(घ) महीधरकृतः—योगवासिष्ठसारः सव्याख्यः । ग्रन्थोऽयं बरोडापुस्तकालये लन्दनपुस्तकालये बाम्बेविश्वविद्यालयहस्तलिखितपुस्तकालये च लभ्यते ।

(ङ) माधवसरस्वतीकृता—वासिष्ठपञ्चिका । ग्रन्थोऽयं अनन्तशयनपुस्तकालये लभ्यते ।

(च) काश्मीरपण्डितकृतम्—ज्ञानवासिष्ठम् ।

(छ) कृष्णय्यकृतः—ज्ञानवासिष्ठसारसमुच्चयः । इमौ द्वावपि ग्रन्थौ मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्येते ।



एतेषु केचन ग्रन्थास्तेलुगुलिप्यामेव सन्ति ।

21. शुकः

शुकाचार्यापरनामानः बहवो वेदान्तिन आसन्निति ज्ञायते । कुत्रचित् शुकभगवत्पाद इति, कुत्रचित् शुकयोगीति नामानि बहुनि श्रूयन्ते । शुकाष्टककर्ता शुक

अन्यः ब्रह्मसूत्रभाष्यकर्ता शुक अन्य इत्येव ज्ञातुं पार्यते । अत्र प्रबलतरप्रमाणानि तु नैवोपलभ्यन्ते । यदि अद्वैतसम्प्रदायप्रवर्तकाचार्येषु परिगणितश्शुकाचार्यस्स्यात् तर्हि शुकाष्टककर्ताऽयं महाभारतादिप्रसिद्धः कृष्णद्वैपायनात् शुकीरूपधारिण्यां घृताच्यां जातः महान् ज्ञानीति सिध्यति । एवञ्चास्य कालादिकथनं दुश्शकम् । इदन्तयाऽनिर्णीतत्वात् ।

(क) शुकाष्टकम्—व्यासपुत्राष्टकमित्यपरनामायं ग्रन्थः जीवन्मुक्तमहिमानं प्रदर्शयति । ग्रन्थश्चायं मुद्रितः । अस्य व्याख्यापि गङ्गाधरेन्द्रसरस्वतीकृता नासिक-सूच्यां दृश्यते ।

(ख) ज्ञानबोधः—अमुद्रितोऽयं पूर्णग्रन्थ अडयारपुस्तकालये (9. B. 23 सरस्वतीमाहालये च लभ्यते ।

(ग) ब्रह्मसूत्रवृत्तिः—अस्य कर्ता शुकभगवत्पादाचार्य इति निर्दिष्टम् । ग्रन्थोऽयमुद्रितः पञ्जाब सूच्यां 719 दृश्यते ।

22. सनत्सुजातः

ब्रह्मणो मानसः पुत्रोऽयमिति महाभारतादिषु प्रसिद्धिः । तस्मादस्य काल-निर्णयो न शक्यते । महाभारतयुद्धस्य कालः क्रिस्तोः पूर्वमिति विविधमतभेदेन विमर्शः कृतः । तस्मात् क्रिस्तोः पूर्ववर्ती युगान्तरीयस्सनत्सुजात इति परं वक्तुं शक्यते ।

(क) सनत्सुजातीयम्—मुद्रितोऽयं ग्रन्थः बहुत्र मुद्रणालयेषु । अस्य व्याख्या शङ्करभगवत्कृता च वाणीविलासमुद्रणालये आनन्दश्रममुद्रणालये च मुद्रिता ।

एवं व्यासात् शङ्करभगवत्पादाच्च प्राक्तनाः प्रायशः सर्वे वेदान्ताचार्या निरूपिताः । अद्वैतसम्प्रदायस्य प्रवर्तकाचार्याणां परम्परा नारायणादारब्धेति प्रसिद्धा । प्रसिद्धा चेयं परम्परा—

"नारायणं पद्मभुवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरञ्च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रम् ।
अथास्य शिष्यं श्री शङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकञ्च शिष्यम् ।
तं तोटकं वार्तिककारमन्यान् अस्मद्गुरून् सन्ततमानतोऽस्मि ।" इति पद्येन ।

एतेषु वेदान्ताचार्येषु पराशरशक्त्योर्विषये न किमपि ज्ञातुं शक्यते । तस्मात् इतः परं बादरायणव्यासादारब्धाः क्रैस्तवीयविंशतिशतकान्ताः अद्वैत-वेदान्तसाहित्ये प्रसिद्धतमप्रमाणभूतग्रन्थप्रणेतारः मूलग्रन्थव्याख्याग्रन्थप्रणेतारश्चा-द्वैताचार्याः कालक्रमेण निरूप्यन्ते ।

23. बादरायणव्यासः (400 A. D. कलात् प्राक्)

अष्टादशपुराणानां रचयिता कृष्णद्वैपायनापरनामा व्यास एव बादरायण व्यास इति ब्रह्मसूत्राणां रचयितेति च साम्प्रदायिकाः । केचित्तु ब्रह्मसूत्रकारः बाद-रायणव्यासोऽयं अष्टादशपुराणकर्तुः कृष्णद्वैपायनाद्भिन्न इति वर्णयन्ति । पाणि-नेरप्ययं ब्रह्मसूत्रकारः प्राक्तनः । यतः "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयो"रिति पाणिनिना ब्रह्मसूत्राणि भिक्षुसूत्रनाम्ना निर्दिष्टानि । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः (गीता. 13.4) इति बादरायणकृतान्येव ब्रह्मसूत्राणि विनिर्दिष्टानि, इति भगवद्-गीताव्याख्यातृश्रीधरस्वामिनामभिप्रायः । केचित्तु गीतायां निर्दिष्टानि ब्रह्मसूत्राणि नैतानि, परन्त्वन्यानि तानि च नष्टानीति वदन्तः पुराणादिकर्तुः व्यासात् ब्रह्मसूत्रकारमन्यं मन्वते ।

सर्वकारणकारणं एकमेवाद्वितीयं सत्यज्ञानानन्दस्वरूपं अनन्तं असङ्गम्, नित्यं च ब्रह्म, तज्ज्ञानान्मोक्ष इत्यादिकं सर्वं अलौकिकविषयान्तर्गतम् । एतादृशेऽलौकिक विषये अनाद्यपौरुषेयश्रुतिरेव प्रमाणम् । व्यासाचार्यास्तु अलौकिकविषये अनाद्य-पौरुषेयश्रुतिमेव प्रमाणमावेदयन्ति । बादरायणेन ब्रह्मसूत्रमुखेन तत्वान्युपदिश्यन्ते । तादृशं श्रुतिसम्मतमद्वैतमेवेति प्रदर्शयितुं भगवान्नारायण एव कृष्णद्वैपायनापरबाद-रायणव्यासो भूत्वा ब्रह्मसूत्राणि विरचयामास । बादरायणव्यासोऽयमद्वैतीत्यत्र प्रमा-णानि कानिचन दृश्यन्ते—शाण्डिल्यभक्तिसूत्रे 30 आत्मैकपरां बादरायणः" इति दृश्यते । एवं बादरायणव्यास एव अष्टादशपुराणानां कर्ता, स च अधिकारिभेदं मनसि कृत्वा मन्दाधिकारिणां तत्वोपदेशाय अरूपं निर्गुणं अनिर्वचनीयं च आत्म-स्वरूपं सरूपं सगुणं स्तुतिविषयं कृत्वा पुराणानि रचयामासेति वदन्त पद्यमिदं व्यासकृतत्वेन प्रसिद्धं प्रमाणयन्ति—

"रूपं रूपविवर्जितस्य भवतो ध्यानेन यत्कल्पितम्,
स्तुत्यानिर्वचनीयताखिलगुरो दूरीकृता यन्मया ।

व्यापित्वञ्च निराकृतं तु भवतो यत्तीर्थयात्रादिना
क्षन्तव्यं जगदीश तद्विकलतादोषत्रयं मत्कृतम् ॥" इति ।

तस्मात् अष्टादशपुराणादिकर्तुः ब्रह्मसूत्रकर्तुश्च बादरायणव्यासस्य कालादि निर्णेतुं न शक्यते । तथापि प्रो. हिरियण्णामहाशयास्तु ब्रह्मसूत्रनिर्माणकालः (400 A.D.) इति वदन्ति ।

(क) ब्रह्मसूत्राणि—शारीरकमीमांसासूत्रमित्यपरनामायं ग्रन्थः समन्वयाविरोधसाधनफलाख्यैश्चतुर्भिरध्यायैः पूर्णः । प्रत्यध्यायं चत्वारः पादा विद्यन्ते । प्रतिपादं बहून्यधिकरणानि । प्रत्यधिकरणं भिन्नविषयम् । एषु सूत्रेषु बादरायणेन उपनिषदां तदर्थानां च सङ्कलनं कृतम् । शङ्कराचार्यमतेन सूत्रसमष्टिसंख्या 555, अधिकरणसंख्या 192 । अस्य भाष्यं शङ्करभगवत्पादैः कृतं शारीरकमीमांसाभाष्यमित्याख्यम् । यदाधारं कृत्वा परश्शतानि ग्रन्थरत्नानि अद्वैतवेदान्तसाहित्ये प्रकाशन्ते ।

(ख) सिद्धान्तदर्शनम्—पूर्वोत्तराम्नायभेदात् द्विविधा हि मीमांसा । तत्रोत्तरमीमांसा पुनर्द्वेधा वादिबुभुत्सुप्रतिपादनभेदात् । तत्राद्या ब्रह्मसूत्राख्या, द्वितीया सिद्धान्तसूत्रात्मिका । एवञ्च "अथातो ब्रह्मजिज्ञासा" इत्यादिकं वादिप्रतिपादनाय कृतम् । इदन्तु "सिद्धान्तदर्शनं" बुभुत्सुप्रतिपादनाय कृतमिति विशेषः । सूत्ररूपेऽस्मिन् ग्रन्थे समग्राद्वैतसिद्धान्ताः प्रतिपाद्यन्ते । केचित्तु साम्प्रदायिका अपि अस्य ग्रन्थस्य बादरायणव्यासप्रणीतत्वे सन्दिह्यन्ति । ग्रन्थोऽयं आनन्दाश्रम मुद्रणालये मुद्रितः । अस्य भाष्यं विश्वदेवेन रचितं "निरञ्जनभाष्या"ख्यमपि मुद्रितम् ।

(ग) भगवद्गीता—(महाभारतान्तर्गता) एतामधिकृत्य सविस्तरं गीताप्रस्थाने प्रतिपादितमिति नेह प्रतन्यते ।

24. गौडपादाचार्यः (500 A.D.)

गौडपादाचार्या इमे शुकमुनीन्द्रशिष्या इति, अद्वैताचार्यपरम्परायां महनीयतमा इति च "नारायणं पद्मभुवमि"त्यादिश्लोकात् ज्ञायते । नृसिम्हतापनीयोपनिषदां गौडपादकृते व्याख्याने "इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुकमुनीन्द्रशिष्य गौडपादविरचिते उत्तरतापनीयोपनिषद्विवरणे प्रथमः खण्डः, नवमः खण्डः"



Śrī Gauḍapādācārya
By courtesy of the authorities of the Śriṅgeri Maṭh
R. A. puram, Madras-28.

इति (D. 581, 582 MGOML) ग्रन्थेऽमुद्रिते दृश्यते । एवं श्वेताश्वतरोपनिषदां शाङ्करभाष्ये "तथाच शुकशिष्यो गौडपादाचार्यः" (Page 30, ASS 17) इति दृश्यते । एवमेव लक्ष्मणशास्त्रिविरचिते गुरुवंशकाव्ये (12. VSS) दृश्यते । तस्मात् शुकशिष्यो गौडपादाचार्य इति निश्चीयते ।

गौडपादाचार्यस्य स्थानं नाद्यापि निश्चितम् । विषयेऽस्मिन् विभिन्ना एव विचारा दृश्यन्ते । परन्तु माण्डूक्यकारिकाशङ्करभाष्यव्याख्याने आनन्दगिरीये अलातशान्तिप्रकरणस्थस्य "तं वन्दे द्विपदां वर"मिति पद्यांशस्य व्याख्याने एवं दृश्यते—"आचार्यो हि पुरा बदरिकाश्रमे नरनारायणाधिष्ठिते नारायणं भगवन्तमभिप्रेत्य तपो महदतप्यत ।" इति (Page 157 ASS 10) दृश्यते । तस्मात् बदरिकाश्रम एव गौडपादस्य स्थानमिति ज्ञायते । सप्तदशशतकीयेन बालकृष्णानन्दसरस्वत्या स्वीये शारीरकमीमांसाभाष्यवार्तिके तु "गौडचरणाः कुरुक्षेत्रगता हीरावतीनदीतीरभवगौडजातिश्रेष्ठाः, देशविशेषभवजातिनाम्नैव प्रसिद्धाः द्वापरयुगमारभ्यैव समाधिनिष्ठत्वेन आधुनिकैरपरिज्ञातविशेषाभिधानास्सामान्यनाम्नैव लोकविख्याता" (Page 6. AS.I) इति प्रतिपादितम् । एवञ्च गौडपादः कुरुक्षेत्रवासी गौडजात्युत्पन्न इति गौडपादीयनामान्तरापरिज्ञाने च कारणं सूचितम् । केचित्तु गौडपादाचार्यं गौडदेशभवं वदन्ति । अत एव देशनाम्ना तेषां व्यवहारः । यथा-गौडब्रह्मानन्द इत्यादि । एवञ्चैतत्पक्षे गौडपादः बंगालदेशानां उत्तरभागवर्तीति सिध्यति ।

भारतीयाद्वैतवेदान्तपरम्पराप्रामाण्येन गौडपादश्शुकशिष्यः, शङ्करश्च गौडपादशिष्यः, गौडपादेनानुगृहीतश्चेति शङ्करात्पूर्वतनो वा शङ्करकालपर्यन्तजीवी वेति निश्चीयते । यदि वयं म. म. कुप्पुस्वामिशास्त्रिमहाशयानां सिद्धान्तमनुसृत्य 632-661 A.D. कालवर्तिनं शङ्करमभ्युपगच्छामस्तर्हि तैरेव प्रतिपादितसिद्धान्तमनुसृत्य गौडपादकालः (520–620 A D.) इति, इच्छामात्रशरीरत्यागिनां गौडपादाचार्याणां कालश्शङ्कराचार्यानुग्रहपर्यन्तमिति वा स्वीकर्तव्यम् । एतेन शङ्करदिग्विजयादिवचनञ्च सङ्गतं भवति । विधुशेखरभट्टाचार्यास्तु स्वसम्पादिते 'आगमशास्त्र' ग्रन्थोपोद्घाते एवं वदन्ति—"द्वितीयशतकादारभ्य चतुर्थशतकपर्यन्तानां बौद्धपण्डितानां ग्रन्थस्य गौडपादकारिकायाश्च शब्दसाम्यदर्शनात् गौडपादस्तदर्वाग्भव इति । तथाच तन्मतरीत्या गौडपादकालः (500 A.D.) इति सिध्यति । यद्येवं गौड-

पादाचार्यस्य शङ्कराचार्यप्राचार्यत्वं कथम् ? किमन्योऽयं गौडपादः ? उतान्योऽयं शङ्करः ? न वा शङ्करः गौडपादेनानुगृहीतः, नापि प्रशिष्य इत्यभ्युपगम्य शङ्करदिग्विजयादिग्रन्थानामप्रामाण्यं स्वीकर्तव्यम् ? आहोस्वित् शङ्कराचार्यानुग्रह-कालपर्यन्तजीवी गौडपादः ? इत्यादयस्संशयविशेषाः स्वतस्समुद्भवन्ति ।

गुरुपादहालदारस्तु "वृद्धत्रय्यां" (Page 307) गौडपादाचार्यः गोविन्द-भगवत्पादशिष्यः शङ्कराचार्यकामदेवभूपालयोः परमगुरुः वेदान्तसम्प्रदायप्रवर्तकः, माण्डूक्यकारिकाकृदद्वैती (700 A. D.) कालवर्तीति प्रतिपादयति ।

(क) माण्डूक्यकारिका— (ASS. 10) गौडपादकारिकाभिधेऽस्मिन् माण्डूक्योपनिषदां व्याख्यात्मके ग्रन्थे चत्वारि प्रकरणानि सन्ति । तत्र प्रथमेऽऽग-माख्यप्रकरणे एकोनत्रिंशत्, द्वितीये वैतथ्याख्ये अष्टात्रिंशत, तृतीयेऽद्वैताख्ये अष्टाचत्वारिंशत्, चतुर्थेऽलातशान्तिप्रकरणे शतमिति 215 कारिकास्सन्ति । मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये ।

आगमप्रकरणम्—इदमागमप्रकरणं माण्डूक्योपनिषदां भावार्थरूपं आगम-मूलकत्वात् अन्वर्थनाम । प्रकरणेऽस्मिन् अकारोकारमकारैः प्रतिपादितेभ्यः वैश्वानर हिरण्यगर्भ-ईश्वरेभ्यः, जाग्रत्स्वप्नसुषुप्त्यवस्थाभ्यश्च भिन्नं तदनुगतं साक्षि-रूपं च परमात्मतत्वं "तुरीय" इति नाम्ना वर्णितम् ।

वैतथ्यप्रकरणम्—द्वितीयेऽस्मिन् प्रकरणे दृश्यप्रपञ्चस्य मायामयत्वं मिथ्या-त्वञ्च सयुक्तिकं साधितम् । आत्मा एक एव नित्यः, तस्मिन् विविधकल्पनावशात प्रपञ्चस्योत्पत्तिरिव विकल्पो भवति । अस्य मूलकारणं माया । मायाकल्पितजगतः गन्धर्वनगरवत् असत्यत्वमिति प्रतिपाद्य "न निरोधोनचोत्पत्ति" रित्यादिना अखण्डचिद्घनानन्दआत्मतत्वादन्यस्यासत्वं प्रतिपादितम् ।

अद्वैतप्रकरणम्—तृतीयेऽद्वैताख्यप्रकरणेऽस्मिन् अनेकाभिस्सुदृढाभिर्युक्ति-भिरद्वैतत्वं साधितम् । आत्मनि सुखदुःखभावना नितरां असङ्गता । यथा बालाः धूलिधूमादिसंसर्गेणाकाशं मलिनमामनन्ति, वस्तुतः यथा च आकाशो मालिन्यशून्यः तथैवात्मनोऽपि सुखित्वदुःखित्वकथनं बालबुद्धिविलासतुल्यमिति प्रतिपादितम् । असङ्गोह्यात्मा । माया हि द्वैतकल्पनायाः कारणम् । अमृतस्य मर्त्यत्वं, मर्त्यस्य अमृतत्वञ्चासङ्गतम् । अत अमृतस्यात्मनः यदि उत्पत्तिस्स्वीक्रियते तर्हि मर्त्यत्व धर्म आपद्येत इति आत्मनः उत्पत्ति--जातिः नास्ति इति प्रतिपादितम् । अयमेव

गौडपादाचार्याणां अजातिवादः । एतच्च 1-17, 2-31, 32, 3-4, श्लोकेषु प्रतिपादितम् । अयमजातिवादः गौडपादात प्राचीनस्य बौद्धाचार्यस्य दिङ्नागस्य माध्यमिकवृत्तौ, पालिभाषाप्रणीतबौद्धग्रन्थेषु च समुपलब्धेस्ततो गृहीत इति केचिद्वदन्ति । पालीभाषाया अपि प्राचीनासूपनिषत्सु "अजायमानो बहुधा व्यजायत" इत्यादिदर्शनात् तेषामुक्तेरनुपपत्तौ भारतीयाः प्रमाणम् ।

"अलातशान्तिप्रकरणम्"—चतुर्थेऽस्मिन् प्रकरणे यथा अलाते भ्रमिते सति गोलाकारप्रतीतिर्जायते परन्तु सा गोलाकारभ्रमणजन्या एव न वस्तुतः, एवं जगदादि मायाकल्पितमेव । मनसो व्यापारादेव तस्योत्पत्तिः, मनसः निरोधे च स नास्त्येव । यथा च भ्रमणादिक्रियाशान्तौ गोलाकारकप्रतीतेश्शान्तिः, एवं मनस अमनीभावात् जगतश्शान्तिः । जगदुत्पत्तिलयौ प्रतीत्यप्रतीती उभावपि भ्रान्तिजनितावेव । परमार्थतः परमार्थतत्वं पारमार्थिकमिति प्रतिपादितम् । अद्वैत-वेदान्तस्य प्राणभूताऽनिर्वचनीयख्यातिरपि प्रकरणेऽस्मिन् प्रतिपादिता । "विपर्या-सात् यथा जाग्रदित्यादिना (4-41) एवं "न निर्गतास्ते विज्ञानादित्या" दिना (4-52) "उभेह्यन्योन्यं दृश्येते" इत्यादिना च (4-67) पद्येन प्रदर्शिता ।

प्रकरणस्यास्य भाषा "विज्ञप्ति" रित्यादिपारिभाषिकशब्दैः पूर्णा । एवं मङ्गलाचरणश्लोके "तं वन्दे द्विपदां वरम्" इत्यत्र द्विपदां वरशब्दश्च प्रयुक्तः । एते शब्दाः बुद्धमतग्रन्थेषु दृश्यन्त इति केचन बुद्धमतमेव गौडपादः वेदान्ताप-देशेन प्रतिपादयतीति प्रच्छन्नबौद्धा अद्वैतिन इति वदन्ति ।

परन्तु शब्दसाम्यं नात्र प्रमाणमकिञ्चित्करञ्च । यत अध्यात्मशास्त्राणां पारिभाषिकशब्दाः न केवलं बौद्धानां स्वम् । परन्तु ते सर्वदर्शनसामान्याः । तेषां प्रयोगे यथा गौडपादस्य तथा बौद्धानां यथा बौद्धानां तथा गौडपादस्येति सर्वेषामधिकारस्समस्ति । द्विपदांवर शब्दस्य पुराणादिष्वपि भूरिशः प्रयोगः दृश्यते । भारतरामायणादीनां बुद्धादपि प्राचीनत्वं प्रसिद्धमेव । नलभीमार्जुन-भीष्मादिषु शब्दोऽयं प्रयुक्तः दृश्यते । महाभारते नारायणीयपर्वाध्याये द्विपदां-वरार्थकं द्विपदां वरिष्ठपदं प्रयुक्तं दृश्यते । न वा एतत्पदं कोषग्रन्थेषु बुद्धपरत्वेन व्याख्यातम् । तस्मात् यौगिकश्शब्द एवैषः न तु योगरूढः ।

माण्डूक्यकारिकाचेयं शङ्करभगवत्पादैर्व्याख्यातम् । आनन्दगिरिव्या-ख्योपेतं भाष्यं आनन्दाश्रममुद्रणालये मुद्रितम् । स्वयम्प्रकाशानन्दसरस्वतीकृता

मिताक्षरानाम्नी माण्डूक्यकारिकाव्याख्या वाराणस्यां (BSS 48) मुद्रिता। उपनिषद्ब्रह्मकृता व्याख्या अडयारपुस्तकालये मुद्रिता। अनुभूतिस्वरूपाचार्यकृतं गौडपादीयभाष्यटिप्पणं (R. 2911 MGOML) लभ्यते। अज्ञातकर्तृकः गौडपादीयविवेकनामा ग्रन्थोऽपि (R. 3882 d MGOML) लभ्यते। गौडपादाचार्यप्रणीतत्वेन प्रसिद्धाः ग्रन्थाः—

(ख) उत्तरगीताव्याख्या—ग्रन्थोऽयं तिरुपति सूच्यां (DCVORIT) अनन्तशयनपुस्तकालये (275 TCL) जयपुर पोटीखानासूच्यां (XXXIII 74/4) च दृश्यते।

(ग) पञ्चीकरणवार्तिकम्—बरोडासूच्यां (13325 c BRD) दृश्यते।

(घ) नृसिंहतापनीयभाष्यम्—(D. 581 MGOML)

(ङ) अनुगीताभाष्यम्—ग्रन्थोऽयं नासिक सूच्यां दृश्यते।

(च) श्रीविद्यारत्नसूत्रम्—(275 TCL)

(छ) दुर्गासप्तशती व्याख्या—ग्रन्थोऽयं तन्त्रदर्शनाचार्येण भास्कररायेण दुर्गासप्तशती व्याख्याने निर्दिष्टः।

(ज) सुभगोदयः—(275 TCL)

(झ) सांख्यप्रवचन भाष्यम् ?

25. मण्डनमिश्रः (750 850 A. D.)

मण्डनमिश्रोऽयं कुमारिलभट्टस्य शिष्यश्शङ्कराचार्यकाले प्रसिद्धः पूर्वमीमांसापण्डितः कर्मनिष्ठश्चेति प्रसिद्धिः। अस्यैव विश्वरूप इति नामान्तरम्। मण्डनमिश्रस्यैव शङ्कराचार्यात् आश्रमस्वीकारपूर्वकशिष्यत्वस्वीकारादनन्तरं सुरेश्वराचार्य इति नामेति सम्प्रदायविदः। "जागोपि" महाशयेन नैष्कर्म्यसिद्धिभूमिकायां मण्डनमिश्र-विश्वरूपसुरेश्वराणां ऐक्यमङ्गीकृतम्। सप्तदशशतकीयेन बालकृष्णानन्दसरस्वत्या कृते शारीरकमीमांसाभाष्यवार्तिके च मण्डनमिश्रसुरेश्वरविश्वरूपाणामैक्यमेव वर्णितम्।

दासगुप्तमहाशयास्तु सुरेश्वरविश्वरूपावभिन्नौ मण्डनमिश्रस्तु अन्य एवेति (H. I. P. Vol. II) ग्रन्थे निर्दिशन्ति। हिरियण्णामहाशयास्तु (J. R. A. S. 1924) रायलासियाटिक सोसाइटि पत्रिकायाश्चतुर्विंशतितमे भागे सुरेश्वरः मण्डनादन्य इति निश्चिन्वन्ति। म. म. कुप्पुस्वामिशास्त्रिणश्च स्वसम्पादितब्रह्मसिद्धिभूमिकायां सुरेश्वरब्रह्मसिद्धिकारयोस्सिद्धान्तगतभेदमुपवर्ण्य सुरेश्वरादन्यं ब्रह्मसिद्धिकारं मण्डनं वर्णयन्ति स्म।

बिब्लियोथिकाइण्डिकासीरीजमुद्रितायां पराशरस्मृतिव्याख्यायां (Page 51) बृहदारण्यकवार्तिकात् उद्धृतम्। तच्चोद्धरणं विश्वरूपाचार्यकृतग्रन्थादित्युक्तम्। एवं विद्यारण्यैः विवरणप्रमेयसंग्रहे (Page 92) बृहदारण्यकवार्तिकात् (IV. 8.) उद्धरणं दत्तम्। तत्रापि सुरेश्वरः विश्वरूपशब्देनैव निर्दिष्टः। तस्मात् विश्वरूपसुरेश्वरावभिन्नौ, मण्डनस्त्वन्य इति निश्चयः।

ब्रह्मसिद्धिकारेणानेन शङ्करात्पूर्वतनाः ग्रन्थाः प्रमाणत्वेन निर्दिष्टाः। वाचस्पतिमिश्रेण च ब्रह्मसिद्धिं प्रमाणं कृत्वा ब्रह्मतत्वसमीक्षा कृता। अत एव मण्डनपृष्ठसेवी वाचस्पतिरिति च प्रसिद्धिः। तस्मात् वाचस्पतिकालिको वा, तस्मात् पूर्वतनो वा भवितुमर्हति। शङ्कराचार्यसामयिक इति तु सम्प्रदायविदः। दासगुप्तमहाशयेन नवमशतकीयोऽयमिति वर्ण्यते। कुप्पुस्वामिशास्त्रिणस्तु (615–695 A. D. इति सप्तमशतकीयं वर्णयन्ति।

ब्रह्मसिद्धिः—ग्रन्थोऽयं मद्रासराजकीय पुस्तकालये (MGOMLS 4) सव्याख्यः मुद्रितः। अस्याः व्याख्या वाचस्पतिमिश्रकृता "ब्रह्मतत्वसमीक्षा" चित्सुखाचार्यकृता "अभिप्रायप्रकाशिका" आनन्दपूर्णविद्यासागरकृता टीकारत्नापरनामा "भावशुद्धिः" शङ्खपाणिकृता ब्रह्मसिद्धिटीका चेति ग्रन्थाः वर्तन्ते।

(ख) विभ्रमविवेकः—162 पद्यैः पूर्णोऽयं ग्रन्थः पञ्चख्यातिव्याख्यात्मकः। मुद्रितश्चायं जर्नलआफ ओरियण्टल पत्रिकायां (J. O. R.) मद्रासनगरे। अन्येऽपि ग्रन्थाः मीमांसाशास्त्रे कृताः।

26. शङ्करभगवत्पादः (788–820 A. D.)

शङ्कराचार्यावतारसमये धर्मपरिस्थितिः—

सनातनकालत एव प्रबलप्रमाणपूर्वकं आत्यन्तिकनिःश्रेयसाधिगमसाधनत्वेन श्रुतिपुराणभगवद्गीतोपनिषद्भिः महद्भिराचार्यैश्च निरूपितोऽयमद्वैतसिद्धान्तः।

स च क्रैस्तवीयचतुर्थशतकात्पूर्वमुत्पन्नेन शाक्यमुन्यपरनाम्ना गौतम बुद्धेन तात्कालिकपरिस्थित्यनुसारं प्रवर्तितस्य बहूनां धारापतीनां प्रवेशात् अतिमहतीं वृद्धिमाप्तस्य बौद्धमतस्य, तच्छाखान्तरस्य जैनमतस्य च प्रसरणेन प्रसारणेन च, धर्मपाखण्डानां स्वार्थपराणां धर्मकर्मकितवानां भारतीयार्याणां केषाञ्चित् आचारेण च, निःस्वार्थधर्मप्रचारकाचार्याभावेन, कर्मनिष्ठानां निरीश्वरमीमांसकानां प्रबलप्रोत्साहनेन कर्मभरभारपीडिते च लोके, धर्मनाम्ना तत्र तत्र हिंसाप्रधानेषु कर्मसूज्जृम्भतामासेषु, बुद्धमतानुयायिनां विहारविहारिणां आहार विहारपराणां भिक्षूणां धर्माभासेन च जनतायां अनादिवैदिकमतं प्रति द्वेषे समुत्पन्ने अत्यधिकसम्पत्तिसमृद्धिवशात् अत्यधिकसुखानुभवाच्च स्थिरनित्यानन्देप्सावति च लोके विभिन्नमतप्रवर्तकाचार्योपदेशानां कर्तव्यपराणां बलेन भ्रान्ते आविले च समाजे प्राचीनोऽयं उपनिषत्प्रतिपादितसर्वधर्मसमन्वयपर अद्वैतसिद्धान्तमार्गः ह्रासोन्मुख इवाभूत् । तादृशं अद्वैतमतं परित्रातुं भगवतः परमेश्वरस्य साक्षादवतार भूताश्शङ्कराचार्या इति प्रसिद्धिः ।


शङ्कराचार्यप्रभावः—

देवप्रार्थनया शङ्करावतारभूतैश्शङ्कराचार्यैरद्वैतात्मवादः सर्वत्र प्रकाशितः प्रसारितश्च ।

"अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरत्यगादिति" ॥

प्रसिद्धाभाणकानुसारं वयस्यल्पे एव सर्वत्र शिष्यगणैस्साकं सञ्चारं कृत्वा अद्वैतात्मवादः पुनरुज्जीवितः । शङ्कराचार्यैः एकोनशतसंख्याका ब्रह्मसूत्रव्याख्याः खण्डिता इति उमामहेश्वरेण तत्त्वचन्द्रिकायां वर्णितम् । बौद्धजैनमतानि तर्कं पातञ्जलादि दर्शनानि कर्मब्रह्मवादिमतानि अन्यानि च वैदिकप्रमाणप्रबलयुक्तिभिस्सप्रमाणाभिः प्रौढाभिश्च रीतिभिस्सञ्चूर्णितानि ।

जीवब्रह्मणोरैक्यं, ब्रह्मण एव सत्यत्वं, नामरूपाणां मिथ्यात्वं, सर्वदेशकालवस्त्वपरिच्छिन्नसत्ताकत्वमेव सत्यत्वं, मिथ्यारूपस्य जगत आत्मनि कल्पितत्वं, कल्पनाप्यज्ञानेन वस्तुतः ब्रह्मव्यतिरिक्तसत्ताकं जगत नास्त्येवेत्यादीन् सर्वधर्मसमन्वयकरान् जगतश्शान्ति प्रदान् सर्वथा सर्वदा कल्याणप्रदान् कालत्रयधेष्यान्



Śrī Govindabhagavatpadācārya
By courtesy of the authorities of the Śringeri Math
R. A. Puram, Madras-28.

सिद्धान्तान् सर्वत्र सम्यगुपदिश्य अद्वैतसिद्धान्तसंरक्षणाय चतसृषु दिक्षु मठान् संस्थाप्य तत्र तत्र स्वीयान् अद्वैतवादकुशलान् शिष्यान् संयोज्य पक्षत्रेर्षिमिते शके 742—820 A.D. काले भगवान् शङ्कराचार्यस्त्वधाम प्रपेदे ।

शङ्कराचार्यपितामहः विद्याधिराज इति विश्रुतनामधेयः । राजशेखरराजेन पालिते "कालटि" नामके ग्रामेऽयमुवास । कालटिग्रामोऽयं केरलदेशान्तर्गतः । शङ्कर—भगवान् स्वावताराय कैलासात् स्वरद्भयमेवागच्छदिति वदन्तः "काल+अडि" इति तमिलभाषापदं तथैव व्यवहृतं तद्ग्रामस्यान्वर्थनाम चाभूदिति वर्णयन्ति । तद्ब्राह्मणस्य विद्याधिराजस्य पुत्रः शिवगुरुरिति प्रसिद्धः परमविद्वानासीत् ॥

शङ्कराचार्यपिता

शङ्कराचार्याणां पितुर्नाम शिवगुरुरिति । बाल्ये एवाधीतविद्योऽयं चतुर्थाश्रमाभिलाषी सञ्जातः, पितुराचार्यस्य चोपदेशेन स्वीकृतगार्हस्थ्य अन्वर्थनामासत् । तस्य पत्नी सतीनाम्नीति शङ्करविजयव्याख्याया अवगम्यते । तयोः पुत्रमुखकमल प्रेक्षणसुखं चिरेणापि नाभूत् । अत उभावपि शिवमाराधयामासतुः । तुष्टो भगवान् शङ्कर अनयोः पुत्रत्वमूरीचकार ।

शङ्कराचार्याणां गोत्रम्—

शङ्कराचार्याणां गोत्रमात्रेयगोत्रम् । बृहदारण्यकोपनिषद्वार्तिके शङ्करशिष्यसुरेश्वराचार्यकृते 'तं वन्देऽत्रिकुलोद्भवम्' इति दृश्यते ॥

शङ्कराचार्याणां गुरुः—

शङ्कराचार्याणां गुरुः गौडपादशिष्यः गोविन्दभगवत्पादः । शङ्कराचार्यरचितेषु ग्रन्थेषु "गोविन्दभगवत्पादशिष्येणेति तत्र तत्र दृश्यते । गोविन्दं परमानन्दं मद्गुरुं प्रणतोऽस्म्यहम्" इति विवेकचूडामणौ च दृश्यते । गोविन्दभगवत्पादश्च सोमोद्भवातीरे कस्याञ्चित् गुहायामुवास । शङ्करश्च दूरादेव तं दृष्ट्वा सप्रश्रयं सभक्त्युन्मेषं साञ्जलिबन्धं तुष्टाव । तदनु गोविन्दभगवत्पादश्शङ्करं शिष्यत्वेन स्वीकृत्य साम्प्रदायिकैस्तत्त्वमसीत्यादि श्रुतिवचनैः "ब्रह्मतत्त्वमाचरे"ति उपदिदेश । एवञ्च विद्यागुरुर्गोविन्दभगवत्पाद इति सिध्यति ।

" वृद्धत्रय्यां " गुरुपादहालदारस्तु हैहयराजस्य कामदेवस्य शङ्कराचार्यस्य च गुरुरयं गोविन्दभगवत्पादः परमयोगी सनातनधर्मावलम्बी वेदान्तसम्प्रदायप्रवर्तकः " रसहृदयाख्य वैद्यग्रन्थप्रणेता सप्तम नवमशतकमध्यवर्तीति प्रतिपादयति ।

शङ्कराचार्यपरमगुरुः—


गोविन्दभगवत्पादाचार्याणां आचार्यः शङ्कराचार्याणां परमाचार्यः गौडपादाचार्यः । गौडपादाचार्योऽयं गौडदेशीयः । वादप्रतिवादे गौडपादाचार्यैः गौडेया विद्वांसः पराजिताः । गौडपादाचार्योऽयं शुकाचार्यशिष्यः । शङ्कराचार्यस्य सूत्रभाष्यप्रणयने गौडपादाचार्याणां सम्मतिरनुग्रहश्चाभूतामिति शङ्करदिग्विजये श्रूयते । माण्डूक्यकारिकाभाष्येऽलातशान्तिप्रकरणे 'तं पूज्याभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि " इत्यादिना परमगुरोर्नमस्कृतिरावेदिता । " अमुम् " इत्यस्य व्याख्यानावसरे आनन्दगिरिणापि " पुरोदेशे सन्निहितत्वेनापरोक्षत्वं सूचितम् " इति व्याख्यातम् । सूत्रभाष्ये द्वितीयाध्यायस्य प्रथमपादे नवमसूत्रभाष्यावसरे गौडपादाचार्यस्य " अनादिमायया " इत्यादिनी कारिका " तदुक्तमाचार्यणेत्यादिना " परामृष्टः । एतत्सर्वं शङ्कराचार्याणां गौडपादशिष्यत्वेऽथवा अनुग्रहप्राप्तौ प्रमाणम् ॥

शङ्करशिष्याः—

पद्मपाद - हस्तामलक - तोटक - सुरेश्वराख्याश्चत्वार एतेषां शिष्याः । ते च क्रमेण पञ्चपादिका - विवेकमञ्जरी - श्रुतिसारसमुद्धरण - बृहदारण्यकोपनिषत्तैत्तरीयकवार्तिकादिकृतः ॥

शङ्कराचार्यकालः—

शङ्कराचार्याश्च खेन्दुहयमिते शालिवाहनशके प्रादुरभूवन् । ' व्योमभूवाजिसंख्याङ्के शालिवाहनके शुभे । विभवेऽब्दे शुक्लपक्षे वैशाखे दशमीतिथौ । शङ्करः प्रादुरासीत् ब्राह्मण्यस्थितिगुप्तये ।" इति परम्परागतश्च पद्यमत्र प्रमाणं भवति । बालकृष्णब्रह्मानन्दकृतशङ्करदिग्विजये " सहस्रद्वितयादूर्ध्वं एकोनविंशके शते । एकादशोनसंख्याके वत्सरे कलिमानतः । निधिनागेभवह्न्यब्दे विभवे शङ्करोदयः । कलौ तु शालिवाहस्य सखेन्दुशतसप्तके ।" इति दृश्यते एवञ्च शङ्करोत्पत्तिकालः (783 A. D.) एवं " कल्यब्दे चन्द्रनेत्राङ्कगुणसंख्ये ह्युदायने । विहारिनामके



A stone image of Śrī Śaṅkara at the temple of Goddess Kāmākṣī.

तस्मिन् वैशाख्यां शिवतामगात्।" शालिवाहशकेष्वब्धिवह्न्यसंख्ये स शङ्करः। विकारिनामके तस्मिन् वैशाख्यां शिवतामगात्। इत्यादिभिश्च प्रमाणैः (742) शके शङ्करनिर्याणमिति तेषां जीवनकालस्त्रयस्त्रिंशद्वत्सराण्येवेति निश्चीयते। द्विसहस्रवत्सरेभ्यः पूर्वमिति साम्प्रदायिकाः। किस्तोः पूर्वं पञ्चमशतकं (500 BC. जनन कालः ब्रह्मीभावश्च (476 BC.) इति नारायणशास्त्रिणः "एज आफ शङ्कर" नामके ग्रन्थे वदन्ति।

केरलोत्पत्तिनामके ग्रन्थे (400 A. D.) काले शङ्करावतारः। जीवन कालश्च 38 वर्षाणीति प्रतिपाद्यते। K. T. तेलाङ्ग महाशयस्तु (550–590 A. D.) शङ्करकाल इति (I. A. Val. XIII page 95) प्रतिपादयति। डा. बेर्नेल महाशयस्तु सामविधानब्राह्मणभूमिकायां शङ्करकालं (652–680 A. D.) इति वदति। डा. फलीटमहाशयस्तु नेपालवंशावलीनामके प्रबन्धे (Page 118-123) नेपालदेवस्य वृषदेवाख्यस्य काले शङ्कर आसीत्। वृषदेवश्च (630–655 A. D.) काले आसीदिति वर्णयति। सूर्यनारायणरावमहाशयस्तु (I. A. Vol. XLIII Page 272) अष्टमशतकीयश्शङ्कर इति प्रतिपादयति। डा. बंदरकार महाशयस्तु सूत्रभाष्ये (2-4-1, 4-3-5) बलवर्मा निर्दिष्टः। बलवर्मणश्च काल (767–785 A. D.) इति स एव शङ्करकाल इति वदति (I. A. Vol. XLI Page 200) पत्रिकायाम्। प्रो. टेलीतु (I. A. Vol. IX Page 263) शङ्करकाल (788–820 A. D.) इति वदति। वेङ्कटेश्वराचार्यस्तु (J. R. A. S. 1916 Page 153) शङ्कराचार्यकालः (805–897 A. D.) इति वदति। पताक महाशयस्तु (3889–3921) (788-820 A. D.) इति (I. A. Vol. XI page 174-175) वर्णयति। बालकृष्णपिल्लायमहाशयस्तु संक्षेपशारीरके मनुकुलादित्यः निर्दिष्टः। संक्षेपशारीरकारः सर्वज्ञात्मा शङ्करप्रशिष्यस्सुरेश्वरशिष्यश्चेति (978 A.D.) कालिकेन भास्कररविवर्मणा शिलाशासने शङ्करस्य नाम निर्दिष्टमिति शङ्करकालः दशमशतकादिमः भाग इति (I. A. Vol. I Page 136) प्रतिपादयति। K. A. नीलकण्ठशास्त्री तु "येनाधीतानि शास्त्राणि भगवच्छङ्कराह्वयात्। निःशेषसूरिमूर्धालिमालालीढाङ्घ्रिपङ्कजात्। सर्वविद्यैकनिलयो वेदवित् विप्रसम्भवः। शासको यस्य भगवान् रुद्रो रुद्र इवापरः।" इति पद्यं शिवसोमकालिकायाश्शिलालेखायाः ज्ञायते। शिवसोमश्च (877-889 A. D.) कालिकस्य इन्द्रवर्मणो गुरुरिति शङ्करकाल (877 A. D.) पर्यन्तं स्याद्वेति

सन्देग्धि । प्रतिपादितश्चैतत् (J. O. R. Vol. XI Page 265) । अडयार पुस्तकालयस्थेऽमुद्रितेऽज्ञातकर्तृके ब्रह्ममीमांसाशास्त्रसंग्रहे 815 सं (788 A. D.) शङ्करकाल इति दृश्यते । श्रीकण्ठशास्त्री तु भारतीयैतिहासिकत्रैमासिकपत्रिकायाश्चतुर्दशतमे भागे (I. H. Q. Vol. XIV Page 401) धर्मकीर्तिसामयिकश्शङ्कराचार्य इति (620 A. D.) कालात्अर्वाचीन इति प्रतिपादयति । T. R. चिन्तामणिमहाशयस्तु (560-650 A. D.) कालमध्यवर्ती शङ्कर इति प्रतिपादयति । म. म. कुप्पुस्वामिशास्त्रिणश्च (632-664 A. D.) इति प्रतिपादयन्ति ।

शङ्कराचार्यग्रन्था:—

यद्यपि शङ्कराचार्यकृता इति बहवो ग्रन्था: मुद्रिता: प्रसिद्धाश्च तथापि ते सर्वे शङ्कराचार्यकृता इत्यत्र न प्रमाणम् । परन्तु तत्सिंहासनारूढैश्शिष्यप्रशिष्यैर्विरचित इति ज्ञेयम् । परन्तु अधोनिर्दिष्टा: ग्रन्थाश्शङ्करकृता इत्यत्र न संशय: ॥

1. अद्वैतपञ्चरत्नम्—(S. M. E. Vol 16)

सोपानपञ्चकापरनामायं ग्रन्थश्शङ्कराचार्यस्मारकग्रन्थावल्यां श्रीरङ्गनगरे मुद्रित: । अस्य व्याख्या:–कृष्णानन्दसरस्वतीकृता "किरणावली," विमलभूधरकृता व्याख्या, अज्ञातकर्तृका दीधीतिनाम्नी व्याख्या, अज्ञातकर्तृका अपरा व्याख्या च विद्यन्ते ॥

2. अद्वैतानुभूति:—(S. M. E. Vol 16)

प्रकरणग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रित: ।

3. अध्यात्मविद्योपदेशविधि:—

अज्ञानबोधिनी 'अध्यात्मविद्योपदेश:' 'आत्मज्ञानोपदेश' इत्यादिनामान्तरमस्य दृश्यते । प्रकरणग्रन्थोऽयं चौखाम्बामुद्रणालये मुद्रित:। अस्य व्याख्या: आनन्दगिरिकृता, अनन्तरामसुनिकृता "सम्प्रदायतिलकम्," पुराणानुभवकृता "दीपकनाम्नी," पूर्णानन्दकृता व्याख्या च विद्यन्ते ॥

4. अनात्मश्रीविगर्हणम्—(S. M. E. Vol 16) प्रकरणग्रन्थोऽयं मुद्रित: ।

5. अपरोक्षानुभूति:—(S. M. E. Vol 15)

147 पद्यै: पूर्णोऽयं प्रकरणग्रन्थश्शाङ्करप्रकरणग्रन्थावल्यां मुद्रित: । अस्यैव "अपरोक्षानुभवामृत" मित्यपि नामान्तरं श्रूयते । अस्य व्याख्या:-चण्डेश्वरशर्मकृता 'दीपिका,' नित्यानन्दानुचरकृतं विवरणम्, बालगोपालयतिकृता व्याख्या विद्यारण्यकृता 'व्याख्या' अज्ञातकर्तृका काचन व्याख्या च वर्तते ॥

6. आत्मबोध:—(S. M. E. Vol 15)

अज्ञानबोधिनी बोधार्यापरनामायं प्रकरणग्रन्थ: 68 पद्यै: पूर्ण: जीवात्मनोरभेदं जीवन्मुक्तदशाञ्च प्रतिपादयति । मुद्रितश्चायं ग्रन्थश्शाङ्करप्रकरणग्रन्थावल्याम् । अस्य व्याख्या:–अद्वयानन्दकृता व्याख्या चिदानन्दकृता "आत्मबोधलहरी," पद्मपादाचार्यकृता 'वेदान्तसार:,' बोधेन्द्रकृता 'भावप्रकाशिका,' भासुरानन्दकृता व्याख्या, मधुसूदनसरस्वतीकृता व्याख्या, रघुनाथसरस्वतीकृता व्याख्या, रामानन्दतीर्थकृता व्याख्या, विश्वेश्वरपण्डितकृता दीपिका च विद्यन्ते । कृष्णानन्दसरस्वतीकृता व्याख्या ग्रन्थलिप्यां मुद्रित: । ब्रह्मानन्दकृता आत्मबोधव्याख्या, चित्सुखशिष्यकृता व्याख्या, अद्वयानन्दसरस्वतीकृता व्याख्या, अद्वैतानन्दसरस्वतीकृता व्याख्या च विद्यन्त इति श्रूयते । हलपसूच्यां तु विद्यारण्यकृता व्याख्या च निर्दिष्टा । रघुनाथसरस्वतीकृता व्याख्या तु (AL. BRD) पुस्तकालये लभ्यते । आनन्दगिरिकृता टीका वाराणसीविश्वविद्यालये अमुद्रिता विद्यते । (D. C. VII P. No. 130) ।

7. आत्मानात्मविवेक:—(VVP)

प्रकरणग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रित: । अस्य व्याख्या:—पूर्णानन्दतीर्थकृता व्याख्या, वासुदेवयतिकृता व्याख्या, सदाशिवेन्द्रसरस्वतीकृता 'प्रकाशिका' स्वयंप्रकाशयतिकृता व्याख्या, च विद्यन्ते । सायणाचार्येण पद्मपादाचार्येण व्याख्या कृतेति श्रूयते । अज्ञातकर्तृका वेदान्तचूर्णिकानाम्नी च विद्यते ।

8. उपदेशसाहस्री—(S. M. E. Vol 14)

गद्यपद्यात्मकभागद्वयमितोऽयं प्रकरणग्रन्थ: अद्वैतवेदान्तखनि: । मुद्रितश्चायं शाङ्करप्रकरणग्रन्थावल्याम् । अस्य व्याख्या:–आनन्दगिरिकृता व्याख्या, अखण्ड-

धामकृता "गूढार्थदीपिका" बोधनिधिकृता व्याख्या रामतीर्थकृता 'पदयोजनिका' च विद्यन्ते। त्र्यम्बकभट्टकृता व्याख्या उज्जैनसूच्यां दृश्यते। अज्ञातकर्तृक-व्याख्या मद्रासराजकीयपुस्तकालये लभ्यते।

9. एकश्लोकः—(S. M. E. Vol. 16)

किं ज्योतिःश्लोक इत्यपरनामायं ग्रन्थः शाङ्करप्रकरणग्रन्थावल्यां मुद्रितः। दिग्विजययात्रायै विश्वं सञ्चरन् कदाचित् शङ्कराचार्यः कस्मिंश्चित् ग्रामविशेषे, कूश्माण्डमिव पाण्डुराङ्गं, उलूकमिव सूर्यावलोकनाक्षमं, लज्जयावनतमुखं मां त्राहि त्राहि इति पुनः पुनः प्रणमन्तं कञ्चन कुष्ठिनं साधनचतुष्टययुतमवलोक्य संसारसङ्कटान्मोचयन् कृती कर्तुं परमकारुणिकोऽयं भगवान् शङ्कराचार्यः प्रश्नप्रतिवचनप्रणाल्या श्लोकमेनं निबबन्ध इति साम्प्रदायिकी कथा श्रूयते। अस्य व्याख्या-स्वयम्प्रकाशयतिकृता "तत्वदीपनाख्या" (स्वात्मदीपनम्) विद्यते।

10. काशीपञ्चकम्। वाणीविलासमुद्रणालये मुद्रितः।

11. कौपीनपञ्चकम्—(S. M. E. Vol. 16)

यतिपञ्चकापरनामायं ग्रन्थः श्रीरङ्गक्षेत्रे मुद्रितः।

12. ज्ञानाङ्कुशम् सविवरणम्—

मनोनिग्रहोपायप्रतिपादनपरोऽयं ग्रन्थः अद्वैतसभापत्रिकायां मुद्रितः।

13. दशश्लोकी—(S. M. E. Vol. 15)

अद्वैतदशकम्, निर्वाणदशकम्, इत्यपरनामायं ग्रन्थ वाराणस्यां वाणीविलासमुद्रणालये च मुद्रितः। अस्य व्याख्यामधुसूदनसरस्वतीकृता सिद्धान्तबिन्दुनाम्नी प्रसिद्धा। विश्वेश्वरकृतापि व्याख्या विद्यते। कुत्रचिदस्यैव चिदानन्दस्तवराजः, चिदानन्ददशश्लोकीत्यपि नामान्तरं श्रूयते।

14. निर्वाणषट्कम्—(S. M. E. Vol. 16)

15. पञ्चरत्नमालिका—(S. M. E. Vol. 16)

आत्मपञ्चिका, अद्वैतपञ्चिका, उपदेशपञ्चकम्, पञ्चरत्नकारिका इत्यपरनामायं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः। अस्य व्याख्याः अभिनवनारायणेन्द्र-

कृता, पाण्डुरङ्गपण्डितकृता प्रकाशाख्या, सदाशिवब्रह्मकृता, सुब्रह्मण्यकृता, दीधितिनाम्नी अज्ञातकर्तृका, मुमुक्षुजनकल्पवल्लीनाम्नी अज्ञातकर्तृका च व्याख्या विद्यन्ते। ग्रन्थोऽयं शङ्कराचार्यकृत इति प्रसिद्धिः। परन्तु अमुद्रिते मद्रासराजकीयहस्तलिखितपुस्तकालयस्थेऽऽदर्शपुस्तके (D. 4632 MGOML) "शङ्कराचार्यः प्रकटयति" इति दर्शनात् नायं शङ्करकृतिरिति प्रतिभाति।

16. पञ्चीकरणम्—(S. M. E. Vol 16)

वेदान्तसारपञ्चीकरणनामायं ग्रन्थश्शाङ्करप्रकरणग्रन्थावल्यां मुद्रितः। अस्य व्याख्याः—अन्तरारामकृता "समाधिप्रक्रिया", अभिनवनारायणेन्द्रकृता भावप्रकाशिका, आनन्दज्ञानकृतं विवरणम्, प्रज्ञानानदयतिकृतं विवरणम्, रामतीर्थकृता तत्वचन्द्रिका, स्वयंप्रकाशयतिकृतं विवरणम्, अज्ञातकर्तृका तत्वपञ्चिका, अज्ञातकर्तृका व्याख्या, सुरेश्वराचार्यकृतं पञ्चीकरणवार्तिकम्।

17. प्रबोधसुधाकरः—(S. M. E. Vol 16)

प्रकरणग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रितः। ग्रन्थोऽयं नृसिम्हचम्पूकर्त्रा षोडशशतकीयेन दैवज्ञसूर्यसूरिपण्डितेन कृतस्स्यादिति अडयार बुल्लट्न पत्रिकायाः प्रथमे भागे, (AOR Vol VI) पत्रिकायाञ्च प्रतिपादितम्।

18. प्रश्नोत्तररत्नमाला—(S. M. E. Vol 16)

19. प्रौढानुभूतिप्रकरणम्—(S. M. E. 16)

सप्तदशभिः पद्यैः पूर्णोऽयं ग्रन्थः जीवन्मुक्तस्य स्वानुभवप्रकटनपद्धत्या रचितः। वाणीविलासमुद्रणालये मुद्रितश्च।

20. ब्रह्मानुचिन्तनम्—(S. M. E. Vol 16)

ब्रह्मानुसन्धानापरनामायं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः।

21. मनीषापञ्चकम्—(S. M. E. Vol 16)

कदाचित् शङ्कराचार्यः काशीपुरीं प्रति ययौ। तत्र शङ्कराचार्यस्य ज्ञानपरीक्षायै भगवान् चण्डालस्वरूपमुपादाय समागतः। चण्डालस्वरूपं दृष्ट्वा गच्छ गच्छ इति वदन्तं शङ्कराचार्यं स चण्डालः "अन्नमयादन्नमयं अथवा चैतन्यादेव चैतन्यं, यतिवर किं दूरीकर्तुं वाञ्छसि? शरीरयोरनयोरन्नकार्यत्वादिति पप्रच्छ।

28

तत्प्रश्नस्य प्रतिवचनाय शङ्कराचार्यैर्मनीषापञ्चकं प्रणीतमिति कथा प्रसिद्धा। प्रतिचरणं "मनीषा मम" इति दर्शनात् अस्य मनीषापञ्चकमिति नाम। अद्वैतसिद्धान्तसारभूतोऽयं प्रकरणग्रन्थश्शाङ्करग्रन्थमालायां मुद्रितः। अस्य व्याख्याः— गोपालबालयतिकृता "मधुमञ्जरी", नृसिम्हाश्रमिकृता 'मधुमञ्जरी' वासुदेवेन्द्रकृता व्याख्या, सदाशिवब्रह्मेन्द्रकृता तात्पर्यदीपिका, अज्ञातकर्तृकं लघुविवरणम्, अज्ञातकर्तृका व्याख्या च विद्यन्ते।

22. मायापञ्चकम्—

मायाविवरणापरनामायं ग्रन्थः मायाया अघटितघटनापटीयस्त्वं वर्णयति। ग्रन्थोऽयं शाङ्करप्रकरणग्रन्थावल्यां (S. M. E. 16) मुद्रितः।

23. मोहमुद्गरः—(S. M. E. Vol. 16)

द्वादशमञ्जरिकापरनामायं ग्रन्थः भजगोविन्दस्तोत्रमित्यपि व्यपदिश्यते। मुद्रितोऽयं ग्रन्थः। अस्य व्याख्या द्वादशमञ्जरी "मकरन्द" नाम्नी स्वयम्प्रकाशयतिकृता तिरुवनन्तपुरपुस्तकालये मद्रासराजकीयहस्तलिखितपुस्तकालये च लभ्यते॥

24. लघुवाक्यवृत्तिप्रकरणम्—(S. M. E. Vol. 16)

प्रकरणग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रितः। रामानन्दसरस्वतीकृता प्रकाशिका नाम्नी, अज्ञातकर्तृका "पुष्पाञ्जलि" नाम्नी च व्याख्या वर्तते। तत्र पुष्पाञ्जलिः रामभद्रयतिशिष्यरामानन्दकृता इति हालसूच्याः 107 पुटे दृश्यते।

25. वाक्यवृत्तिः—(ASS 80, S. M. E. Vol. 15)

गुरुशिष्यकथासरण्या विरचितोऽयं प्रकरणग्रन्थस्त्रिपञ्चाशद्भिः पद्यैः पूर्णो जीवब्रह्मणोरैक्यं महावाक्यार्थञ्च प्रतिपादयति। अस्य व्याख्याः आनन्दज्ञानकृता व्याख्या, आनन्दस्वरूपभट्टारककृता वाक्यदीपिका, रामानन्दसरस्वतीकृता प्रकाशिका, विश्वेश्वरपण्डितकृता प्रकाशिका, अज्ञातकर्तृका लघुटीका च॥

26. विवेकचूडामणिः—(S. M. E. Vol. 14)

आत्मानात्मविवेकचूडामण्यपरनामायं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः। अस्य व्याख्या रत्नस्वामिशिष्येण हरिनाथभट्टेन कृता काचन वाराणस्यां मुद्रिता। अपरा अज्ञातकर्तृका च विद्यतेऽमुद्रिता। शृङ्गगिरिशङ्करपीठाधीशैः श्रीमच्चन्द्रशेखरभारतीस्वामिभिः कृता काचन व्याख्या पाण्डित्यपूर्णा मुद्रिता लभ्यते।

27. वेदान्तसारः—(S. M. E. Vol. 15)

वेदवेदान्तसारः, सर्ववेदान्तसिद्धान्तसारसङ्ग्रह इत्यपरनामायं ग्रन्थः 124 पद्यैः पूर्णः वाणीविलासमुद्रणालये मुद्रितः॥

28. शतश्लोकी—(S. M. E. 15)

वेदान्तशतश्लोक्यपरनामायं ग्रन्थ आनन्दज्ञानेन व्याख्यातः, स्रग्धरावृत्तघटितश्च वाणीविलासमुद्रणालये मुद्रितश्च। अज्ञातकर्तृका व्याख्या काचन बरोडापुस्तकालये बाम्बे युनिवर्सिटिपुस्तकालये च लभ्यते। लन्दननगरहस्तलिखितपुस्तकालयेऽपि लभ्यते।

29. षट्पदी—(G. N. P. B)

आर्यावृत्तघटितैः पद्यैः पूर्णोऽयं ग्रन्थ अद्वैतब्रह्मात्मकभगवत्स्तुतिरूपः। मुद्रितश्चायं गोपालनारायणमुद्रणालये बाम्बे नगरे। अस्य व्याख्याः कविसरोजभिक्षुकृता, वैकुण्ठशिष्यकृता, शङ्करानन्दतीर्थकृता च षट्पदमञ्जरी नाम्नी प्रसिद्धा॥

30. सदाचारप्रकरणम्—(S. M. E. Vol. 16)

सदाचारानुसन्धानमित्यपि व्यपदिश्यतेऽयं ग्रन्थः। आत्मसाक्षात्कारोपायभूतं सदाचारं प्रतिपादयन्नयं ग्रन्थः वाणीविलासे मुद्रितः। ग्रन्थोऽयं अच्युतशर्मामोडकेन शुद्धधर्मपद्धत्याख्यया व्याख्यया व्याख्यातः।

31. सनत्सुजातीयभाष्यम्—(S. M. E. Vol. 13)

महाभारतोद्योगपर्वान्तर्गतस्य विदुरप्रार्थनाप्रेरितसनत्सुजातधृतराष्ट्रसंवादात्मकस्य ग्रन्थस्य व्याख्यारूपोऽयं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः काण्डद्वयातीतयोगिना मोक्षसाम्राज्यलक्ष्मीतन्त्रनाम्न्या व्याख्यया, नीलकण्ठकृतया च व्याख्यया व्याख्यातः।

32. सर्ववेदान्तसिद्धान्तसंग्रहः—(S. M. E. Vol. 15)

सर्वदर्शनसिद्धान्तः, सर्वसिद्धान्तसंग्रहः, वेदान्तशास्त्रसिद्धान्तसंग्रहः, वेदान्तसिद्धान्तदीपिका, सर्ववेदान्तसिद्धान्तसारसंग्रह इत्यपरनामायं ग्रन्थः द्वादशभिः

प्रकरणैः पूर्णः भारतीयानां विभिन्नानां दर्शनानां सिद्धान्तान् प्रतिपादयति । मुद्रितश्चायं वाणीविलासमुद्रणालये । अस्य व्याख्या शेषगोविन्दकृता च विद्यते ।

ग्रन्थोऽयं शङ्करादर्वाचीनेन केनापि कृतं स्यादिति (ABORI Vol. XII Page 253) पत्रिकायां प्रतिपादितम् । "अथतोऽप्यद्वयानन्दमतीतद्वैत लक्षणम् । आत्मारामममुं वन्दे श्रीगुरुं शिवविग्रहम्" । इत्यमुद्रिते अडयारपुस्तकालये च दर्शनात् प्रथमसदानन्दप्रशिष्येण अद्वयानन्दशिष्येण द्वितीयसदानन्देन कृतस्स्यादिति (J. O. R. Vol. XIII, AOR. Vol. VI) पत्रिकयोः प्रतिपाद्यते ।

33. स्वरूपानुसन्धानाष्टकम्—(S. M. E. Vol. 16)

भुजङ्गप्रयातछन्दोबद्धोऽयं विज्ञाननौकापरनामा ग्रन्थ अष्टभिः पद्यैः पूर्णः वाणीविलासमुद्रणालये मुद्रितः । अस्य व्याख्या आनन्दज्ञानकृता "स्वरूपविवरण"नाम्नी, पद्मपादकृता "स्वरूपानुभव"नाम्नी, श्रीकुदकृता "पदव्याख्या" नाम्नी च विद्यन्ते ॥

34. स्वात्मनिरूपणम्—(S. M. E. Vol. 16)

स्वात्मप्रकाशिका, स्वात्मानन्दप्रकरणम्, वेदान्तार्या, अनुभूतिरत्नमाला, स्वात्मानन्दप्रकाशिका, इत्यादिनामभिः व्यपदिश्यमानोऽयं ग्रन्थः देहेन्द्रियादिभिन्न आत्मस्वरूपमेकं प्रतिपादयति । मुद्रितश्चायं शाङ्करप्रकरणग्रन्थावल्यां वाणीविलासमुद्रणालये । अस्य व्याख्या सच्चिदानन्दसरस्वतीकृता अमुद्रिता विद्यत इत्यन्यत्र प्रतिपादितम् ॥

35. हस्तामलकीयभाष्यम्—

हस्तामलकाचार्यकृतविवेकमञ्जरीव्याख्यात्मकोऽयं ग्रन्थः वाणी विलासमुद्रणालये मुद्रितः ।

36. ईशावास्योपनिषद्भाष्यम्—(ASS 5)

ग्रन्थोऽयमानन्दाश्रममुद्रणालये मुद्रितः । अस्य व्याख्याः—आनन्दगिरिकृता शिवानन्दयतिकृता च विद्येते ।

37. ऐतरेयोपनिषद्भाष्यम्—(ASS 11)

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये । अस्य व्याख्याः—अभिनवनारायणेन्द्रकृता, आनन्दज्ञानकृता, ज्ञानामृतयतिकृता, उपनिषद्ब्रह्मेन्द्रकृता, विद्यातीर्थकृता, च विद्यन्ते । नृसिंहकृता, बालकृष्णदासकृताश्च भाष्यव्याख्या विद्यन्त इति वदन्ति । परन्तु ताः कुत्र लभ्यन्त इति न ज्ञायते । सीतानाथतत्वभूषणेन काचन व्याख्या कृता । सा च भारतकार्यलयमुद्रितपुस्तकाल्यपुस्तकसूच्यां लन्दननगरस्थायां (IOLPC Vol II Part I Page 64) दृश्यते ।

38. कठोपनिषद्भाष्यम्—(ASS 7)

मुद्रितश्चायं ग्रन्थ आनन्दाश्रममुद्रणालये । अस्य व्याख्याः—अच्युतकृष्णानन्दकृता, अभिनवनारायणेन्द्रकृता, आनन्दगिरिकृता, गोपालबालयतिकृता, शिवानन्दयतिकृता, श्रीधरशास्त्रिकृता च विद्यन्ते ।

39. केनोपनिषद् भाष्यम्—(ASS 6)

पदवाक्यभाष्यभेदेन भिन्नं भाष्यद्वयमपि आनन्दाश्रमे मुद्रितम् । अस्य व्याख्या अभिनवनारायणेन्द्रकृता, आनन्दगिरिकृता, शिवानन्दयतिकृता, श्रीधरशास्त्रीपाठककृता च व्याख्याः विद्यन्ते ।

40. छान्दोग्योपनिषद् भाष्यम्—(ASS 14)

मुद्रितोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये । अस्य व्याख्याः—अभिनवनारायणेन्द्रकृता, आनन्दगिरिकृता, च विद्येते । नरेन्द्रपुरीकृता काचन भाष्यटिप्पणी मद्रासराजकीय पुस्तकालये लभ्यते ।

41. तैत्तरीयोपनिषद् भाष्यम्—(ASS 12)

ग्रन्थोऽयं आनन्दाश्रमे वाणीविलासे च मुद्रितः । अस्य व्याख्याः आनन्दगिरिकृता, अच्युतकृष्णानन्दकृता वनमालाख्या, सुरेश्वराचार्यकृतं वार्तिकम्, अभिनवविद्याचार्यबालकृष्णानन्दसरस्वतीकृतं भाष्यविवरणमिति व्याख्याः विद्यन्ते ।

42. नृसिम्हतापनीय भाष्यम्—(ASS. 30)


(D. 581. MGOML) ग्रन्थोऽयं वाणीविलासेऽऽनन्दाश्रमे च मुद्रितः ।


43. प्रश्नोपनिषद्भाष्यम्—(ASS 18)

आनन्दाश्रमे मुद्रितः । अभिनवनारायणेन्द्रकृता आनन्दगिरिकृता उपनिषद्ब्रह्मेन्द्रकृता, शिवानन्दयतिकृता अज्ञातकर्तृका व्याख्याः विद्यन्ते ॥

44. ब्रह्मसूत्रभाष्यम्— (N. S. P.)


शारीरकमीमांसाभाष्यापरनामायं ग्रन्थः निर्णयसागरमुद्रणालयेऽन्यत्र च मुद्रितः । अस्य व्याख्याः—अद्वैतानन्दकृतं ब्रह्मविद्याभरणम्, अनन्तकृष्णशास्त्रिकृतः प्रदीपः, अनन्यानुभवकृता शारीरकन्यायमणिमाला, अनुभूतिस्वरूपाचार्यकृत प्रकटार्थविवरणम्, आनन्दगिरिकृतः न्यायनिर्णयः, उपनिषद्ब्रह्मेन्द्रकृतः भाष्यसिद्धान्तसंग्रहः, कृष्णशास्त्रिकृतानुगुण्यसिद्धिः, रामानन्दकृता रत्नप्रभा, चित्सुखाचार्यकृता भाष्यभावप्रकाशिका, ज्ञानोत्तमकृता विद्याश्रीः, त्र्यम्बकशास्त्रिकृता भाष्यानुप्रभा (भाष्यभानुप्रभा) नारायणसरस्वतीकृतं भाष्यवार्तिकम्, पद्मपादाचार्यकृता पञ्चपादिका, बालकृष्णानन्दकृतं भाष्यवार्तिकम्, ब्रह्मानन्दयतिकृतः भाष्यार्थसंग्रहः, वाचस्पतिमिश्रकृता भामती, शिवनारायणानन्दकृता सुबोधिनी, कृष्णानुभूतिकृतः भाष्यसिद्धान्तसंग्रहः, प्रकाशात्मकृता भाष्यन्यायसंग्रहाख्याश्च व्याख्याः प्रसिद्धतमाः ॥





45. बृहदारण्यकोपनिषद्भाष्यम्—(ASS 16)

आनन्दाश्रममुद्रणालये वाणीविलासमुद्रणालये च मुद्रितः। अस्य आनन्दगिरिकृता, शिवानन्दयतिकृता, महादेवेन्द्रसरस्वतीकृता, सुरेश्वराचार्यकृतं वार्तिकञ्चेति व्याख्यास्सन्ति।



46. भगवद्गीताभाष्यम्—(N. S. P.)


निर्णयसागर – वाणीविलास – आनन्दाश्रममुद्रणालयेषु मुद्रितः। अस्य व्याख्याः—अनुभूतिस्वरूपाचार्यकृता, आनन्दगिरिकृता, केशवसाक्षिभगवत्पादकृता, रामानन्दकृता, भागवतानन्दकृताश्च विद्यन्ते।

47. माण्डूक्योपनिषद्भाष्यम्—(ASS 10)

सव्याख्योऽयं ग्रन्थः वाणीविलासमुद्रणालयेऽऽनन्दाश्रममुद्रणालये च मुद्रितः। आनन्दगिरिकृता मधुरानाथशुक्लकृता, राघवानन्दकृता, अज्ञातकर्तृकाश्च व्याख्यास्सन्ति।

48. माण्डूक्यकारिकाभाष्यम्—(ASS 10)

गौडपादकारिकाभाष्यापरनामायं ग्रन्थ आनन्दाश्रमे मुद्रितः। अस्य आनन्दगिरिकृता, अनुभूतिस्वरूपकृताश्च व्याख्याः विद्यन्ते॥



49. मुण्डकोपनिषद् भाष्यम्—(ASS 9)

ग्रन्थोऽयं वाणीविलासआनन्दाश्रममुद्रणालययोर्मुद्रितः। अस्य व्याख्याः—अभिनवनारायणेन्द्रकृता, आनन्दगिरिकृता, शिवानन्दयतिकृताश्च विद्यन्ते॥

50. श्वेताश्वतरोपनिषद्भाष्यम्—(ASS 17)

भाष्यमिदं शङ्कराचार्यकृतमिति प्रसिद्धं आनन्दाश्रमे मुद्रितञ्च। परन्तु नेदं शङ्कराचार्यकृतमिति वर्णितं उपनिषत्प्रस्थाने॥

स्तोत्रग्रन्थाः

51. अच्युताष्टकम्।
52. अन्नपूर्णाष्टकम्।
53. अर्धनारीश्वरस्तोत्रम्।
54. आनन्दलहरी।
55. उमामहेश्वरस्तोत्रम्।
56. कनकधारास्तोत्रम्।
57. कल्याणवृष्टिस्तवः।
58. कालभैरवाष्टकम्।
59. काशीपञ्चकम्।
60. कृष्णाष्टकम्।
61. गणेशपञ्चरत्नम्।
62. गणेशभुजङ्गम्।

63. गुर्वष्टकम् ।
64. गोविन्दाष्टकम् ।
65. गौरीशतकम् ।
66. गङ्गाष्टकम् ।
67. जगन्नाथाष्टकम् ।
68. त्रिपुरसुन्दरीवेदपादस्तोत्रम् ।
69. त्रिपुरसुन्दरीमानसपूजास्तोत्रम् ।
70. त्रिपुरसुन्दर्यष्टकम् ।
71. दक्षिणामूर्तिवर्णमालास्तोत्रम् ।
72. दक्षिणामूर्त्यष्टकम् ।
73. दशश्लोकीस्तुतिः ।
74. देवीचतुःषष्ट्युपचारस्तोत्रम् ।
75. देवीभुजङ्गम् ।
76. नवरत्नमालिका ।
77. नर्मदाष्टकम् ।
78. निर्गुणमानसपूजा ।
79. पाण्डुरङ्गाष्टकम् ।
80. प्रातस्स्मरणस्तोत्रम् ।
81. भवानीभुजङ्गम् ।
82. भगवन्मानसपूजा ।
83. भ्रमराम्बाष्टकम् ।
84. मणिकर्णिकाष्टकम् ।
85. मृत्युञ्जयमानसपूजास्तोत्रम् ।
86. मन्त्रमातृकापुष्पमालास्तवः ।
87. मोहमुद्गरः ।
88. मीनाक्षीस्तोत्रम् ।
89. यमुनाष्टकम् ।
90. रामभुजङ्गप्रयातम् ।
91. लक्ष्मीनृसिम्हकरुणारसस्तोत्रम् ।
92. ललितात्रिशतीभाष्यम् ।
93. ललितापञ्चरत्नम् ।
94. विष्णुसहस्रनामभाष्यम् ।
95. विष्णुभुजङ्गप्रयातम् ।
96. विष्णुपादादिकेशान्तवर्णनम् ।
97. वेदसारशिवस्तोत्रम् ।
98. शारदाभुजङ्गप्रयाताष्टकम् ।
99. शिवपञ्चाक्षरनक्षत्रमालास्तोत्रम् ।
100. शिवनामावल्यष्टकम् ।
101. शिवकेशादिपादान्तवर्णनम् ।
102. शिवपादादिकेशान्तवर्णनम् ।
103. शिवभुजङ्गम् ।
104. शिवापराधक्षमापनस्तोत्रम् ।
105. शिवानन्दलहरी ।
106. षट्पदीस्तोत्रम् ।
107. सुब्रह्मण्यभुजङ्गम् ।
108. सौन्दर्यलहरी ।

अस्य व्याख्याः—अरिच्छिद्कृता "सुधाविद्योतिनी" । अमुद्रिता व्याख्येयं तिरुवनन्तपुरपुस्तकालये (C. O. L. 116 F.) लभ्यते । अस्यां व्याख्यायां सौन्दर्यलहरी प्रवरसेनेन कृतेति दृश्यते । प्रवरसेनाख्यः कश्चित् क्षत्रिय आसीत् । तस्य पिता द्रमिडाख्यः कश्चन राजा । माता वेदवतीनाम्नी । शुकाख्यः मन्त्री स च प्रवरसेनजननकालरीत्या द्रमिडस्य राज्यच्युतिमुवाच । भीतः द्रमिडः स्वपुत्रं प्रवरसेनं गिरिमूर्धनि तत्याज । क्षुधिताय तस्मै बालाय प्रवरसेनाय भगवती परमेश्वरी स्तन्यं पाययामास । स्तन्यपानलब्धवैदुष्यः प्रवरसेनः भगवतीस्तोत्ररूपां सौन्दर्यलहरीं चकार । अत एव "तव स्तन्यं मन्ये" इत्यादिना निर्दिश्यते । प्रवरसेनस्य कश्चित्पुत्रः वन्यायां भार्यायामुत्पन्नः । तस्य नाम अरिच्छिदिति । अनेन कृतेयं सुधाविद्योतिनीति कथापि दृश्यते ।

अन्ये तु "तव स्तन्यं मन्ये" इति श्लोके दृश्यमानः द्रविडशिशुशब्दः तमिलभाषाशैवसाहित्यप्रसिद्धः तिरुज्ञानसम्बन्धनायनारिति वदन्तः पूर्वोक्तां कथामधिक्षिपन्ति ।

कैवल्याश्रमकृता सौभाग्यवर्धिनी, नरसिम्हकृता व्याख्या, डिण्डिमरामकविकृता व्याख्या, लक्ष्मीधरकृता लक्ष्मीधरा, अज्ञातकर्तृका विद्वन्मनोरमा, सदाशिवकृता व्याख्याश्च मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यन्ते ।

109. हरिस्तुतिः ।
110. हनूमत्पञ्चरत्नम् ।
111. सुवर्णमालास्तोत्रम् ।
112. द्वादशलिङ्गस्तोत्रम् ।

अन्योऽपि प्रपञ्चसाराख्यः तन्त्रशास्त्रग्रन्थः विरचितः । एवमन्येऽपि शङ्कराचार्यकृता इति मुद्रिता अमुद्रिताश्च बहवः ग्रन्था उपलभ्यन्ते । परन्तु नामान्तरेण निर्दिष्टा एत एव ग्रन्था इति विभावनीयम् ।

27. पद्मपादाचार्यः (800 A. D.)

शङ्करभगवत्पादशिष्यतल्लजेष्वन्यतमोऽयं पद्मपादाचार्यः आश्रमस्वीकारात्पूर्वं सनन्दनापरनामा विमलनामकस्य ब्राह्मणस्य पुत्रः, नद्यास्तीरे स्थितोऽयं उत्तरतीरवर्तिना गुरुणाऽऽहूतः सत्वरागमनाय नदीजले पादौ निक्षिप्य पाथोरुहेषु क्रमेण पदं विनिक्षिप्याजगाम । तादृशीमनितरसाधारणीं गुरुभक्तिं दृष्ट्वा तुष्ट आचार्यस्तस्य पद्मपाद इति नाम व्यतानीदिति कथा प्रसिद्धा । स्वगुरोस्सकाशादनेन वारत्रयं भाष्यमपाठि । आचार्यानुज्ञातेनानेन भाष्यस्य पञ्चपादिका नाम्नी टीका व्यरचि ।

टीकामेतां पूर्वमीमांसापण्डितस्य कर्मनिष्ठस्य कस्यचित् स्वबन्धोर्गृहे निक्षिप्य पद्मपादाचार्यः तीर्थयात्रायै जगाम । द्वेषात् स बन्धुः लोकापवादभीतेश्च पञ्चपादिकां भस्मसात् कर्तुमिच्छन् स्वगृहमेव भस्मसात् चकार । तीर्थयात्रायास्समागतेन पद्मपादाचार्येण पुनरपि स्वगुरुणा शङ्कराचार्येण स्मृतिपथमानीतं यद्यदुक्तं तत्सर्वं विलिखितमिति निर्मूला दन्तकथा श्रूयते ।

शङ्कराचार्यशिष्योऽयं अष्टमशतकीय इति तु सामान्यसिद्धान्तः । म. म. कुप्पुस्वामिशास्त्रिणां तु सप्तमशतकमिति (625—705 A.D.) विशेषसिद्धान्तः । अस्य सतीर्थ्याः सुरेश्वरहस्तामलकतोटकाचार्याः प्रसिद्धाः ।

अद्वैतवेदान्तसाहित्ये पद्मपादाचार्यः विशिष्टप्रस्थानस्य प्रवर्तकः । तच्च प्रस्थानं पञ्चपादिकाप्रस्थानमिति प्रसिद्धम् ।

1. पञ्चपादिका—(V. N. S. S. 3)

सूत्रभाष्यव्याख्यात्मकोऽयं ग्रन्थश्चतुस्सूत्र्यन्त एवोपलभ्यते । नवभिः वर्णकैः पूर्णोऽयं ग्रन्थः विजयनगरसंस्कृतग्रन्थमालायां, निर्णयसागरमुद्रणालये, वाणीविलासमुद्रणालये, कलकत्तासंस्कृतग्रन्थमालायां, च मुद्रितः । ग्रन्थस्य नामपर्यालोचने पञ्चभिः पादैर्भाव्यम् । परन्तु प्रथमेऽध्याये प्रथमे पादे चतुस्सूत्र्यन्त एवोपलभ्यते । अस्य व्याख्याः—आत्मसर्वज्ञकृता “प्रबोधपरिशोधिनी,” आनन्दपूर्णविद्यासागरकृता पञ्चपादिकाव्याख्या, उत्तमज्ञयतिकृता तत्त्वप्रकाशिका, नृसिम्हाश्रमिकृता वेदान्तरत्नकोशः, प्रकाशात्मयतिकृतं पञ्चपादिका विवरणम्, रामानन्दकृता ऋयन्तभावदीपिका, धर्मराजाध्वरिकृता पञ्चपादिकाव्याख्या, विज्ञानात्मकृता तात्पर्यद्योतिनी, अज्ञातकर्तृका च पञ्चपादिका व्याख्याः ग्रन्थेऽस्मिन् प्रतिपादिताः ॥

2. विज्ञानदीपिका—(A. U. S. S. 1)

पद्यबद्धोऽयं ग्रन्थः । ग्रन्थेऽस्मिन् सकलवेदान्ततत्वान्यवलोड्य विविधकर्मपाशबन्धनच्छेदेनैव मुक्तिर्भवितुमर्हतीति निश्चित्य विश्वजनीनं मोक्षमार्गं सुलभं कर्तुं केनोपायेन कर्मनिर्मुक्तिर्भविष्यतीति ज्ञापनमुखेन फलानुसन्धानरहितकर्मानुष्ठानद्वारा साक्षात् परम्परया वा विज्ञानं जायत इति तत्वज्ञानप्रदीपिकेयं प्रदीपिता । अस्य व्याख्यापि मूलकृतैव कृता विद्यते । मुद्रितश्चायं ग्रन्थः अलहाबाद विश्वविद्यालयग्रन्थमालायाम् ।

3. आत्मबोधव्याख्या—(D. 4558 MGOML)

शाङ्करात्मबोधव्याख्यात्मकोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये अमुद्रित उपलभ्यते । बरोडापुस्तकालयेऽपि लभ्यते ।

4. आत्मानात्मविवेकव्याख्या—(686 C. C. P. B.)

5. कठोपनिषद्भाष्यम्—(742 C. C. P. B.)

6. कर्मनिर्णयः—(686 C. C. P. B.)

7. तत्वमसिपञ्चकम्—(77 Nasik Vol. XXVI 52) ग्रन्थोऽयं नासिक सूच्यां दृश्यते ।

8. प्रपञ्चसारव्याख्या—(686 C. C. P. B.)

9. स्वरूपानुभवः—(7730 TSML.)

एते ग्रन्थाः पद्मपादकृता इति निर्दिष्टाः । परन्तु प्रबलप्रमाणानि नोपलभ्यन्ते । आदर्शग्रन्थाश्च नावलोकितुं पार्यन्ते च ।

28. सुरेश्वराचार्यः (800–900 A. D.)

“श्रीमच्छङ्करपादपद्मयुगलं संसेव्य लब्धोचिवान्” इति नैष्कर्म्यसिद्धौ वदन्नयं सुरेश्वराचार्यः शङ्कराचार्यशिष्यः पद्मपादतोटकहस्तामलकानां सतीर्थ्यश्च ।

पूर्वाश्रमे शोणानदीतीरवासी पञ्चगौडान्तर्गतः कुमारिलभट्टजामाता पूर्वकाण्डप्रवर्तकः मण्डनमिश्र इति ख्यातः विश्वरूप एव सन्यासस्वीकारादनन्तरं सुरेश्वर इति प्रसिद्ध इति साम्प्रदायिका वदन्ति । जागोपमहाशयेन नैष्कर्म्यसिद्धिभूमिकायां मण्डनमिश्रसुरेश्वरविश्वरूपाणामैक्यं नाङ्गीक्रियते । सप्तदशशतकीयेन बाल-


कृष्णानन्दसरस्वत्या कृते शारीरकमीमांसाभाष्यवार्तिके च त्रयाणामैक्यमेवोपवर्णितम् । विद्यारण्यैः विवरणप्रमेयसंग्रहे बृहदारण्यकवार्तिकादुद्धरणं दत्तम् । तत्रापि विश्वरूपशब्देन सुरेश्वरः निर्दिष्टः ।

दासगुप्तमहाशयस्तु सुरेश्वरविश्वरूपावभिन्नौ मण्डनमिश्रस्त्वन्य इति वदति । हिरियण्णामहाशयस्तु (J. R. A. S. 1924) पत्रिकायां सुरेश्वरः मण्डनादन्य इति निश्चिनोति । म. म. कुप्पुस्वामिशास्त्रिणस्तु सुरेश्वरब्रह्मसिद्धिकारयोस्सिद्धान्तगत भेदमुपवर्ण्य ब्रह्मसिद्धिकारः सुरेश्वरादन्य इति प्रतिपादयन्ति । संक्षेपशारीरक कर्ता सर्वज्ञात्मा सुरेश्वर (देवेश्वर) शिष्य इति प्रसिद्धिः । श्रीकण्ठशास्त्री तु नायं सर्वज्ञात्मगुरुरिति (I. H. Q. Vol. XIV) वदति । दासगुप्तस्तु सर्वज्ञात्मा सुरेश्वरशिष्य इत्येव वदति । श्रीकण्ठशास्त्रिणा प्रदर्शितायां शृङ्गगिरिगुरु-परम्परायां नित्यबोधघनाभिधः नित्यबोधाचार्यस्सुरेश्वरशिष्य इति निर्दिष्टम् । नित्य-बोधाचार्यकालश्च (773–848 A.D.) पर्यन्तमिति च । तस्मात् सर्वज्ञात्मन एव नित्यबोधाचार्य इत्यपि नामान्तरं स्यादिति स्वीकारोऽपि सुष्ठु लगति ।

शङ्कराचार्यकाल एव सुरेश्वरकालः । तस्मात् नवमशतकीयस्सुरेश्वरः । कुप्पुस्वामिशास्त्रिणश्च (602–700 A.D.) इति वदन्ति । शृङ्गगिरिगुरुपर-म्परायां सुरेश्वरकालः (695–777 A.D.) इति दृश्यते ।

1. तैत्तरीयोपनिषद्वार्तिकम्—(A. S. S. 13)

शाङ्करतैत्तरीयभाष्यस्य पद्यमयी वार्तिकनाम्नी व्याख्या आनन्दाश्रममुद्र-णालये वाराणसीग्रन्थमालायाञ्च मुद्रिता । अस्या व्याख्या:—आनन्दगिरिकृता वार्तिकटीका, विश्वानुभवकृता वार्तिकसङ्गतिः, लिङ्गनसोमयाजिकृतम्—कल्याण-विवरणम्, विद्यन्ते ॥



2. नैष्कर्म्यसिद्धिः—(B. S. P. S. 38.)

प्रकरणग्रन्थोऽयं बाम्बे संस्कृतप्राकृतग्रन्थमालायां मुद्रितः । बन्दरकार प्राच्यभाषाग्रन्थमालायाञ्च मुद्रितः । अस्य व्याख्याः— अखिलात्मकृतं विवरणम्, ज्ञानोत्तमकृता चन्द्रिका, ज्ञानामृतयतिकृता विद्यासुरभिः, चित्सुखकृता भावतत्त्व-प्रकाशिका, अज्ञातकर्तृका सम्बन्धोक्तिरिति विद्यन्ते ।

3. प्रणवार्थकारिकाः—(551 TMPL)

अमुद्रितोयं ग्रन्थ अनन्तशयनराजगृहपुस्तकालये लभ्यते ।

4. पञ्चीकरणवार्तिकम्—

ग्रन्थोऽयं कामकोटि सूच्यां दृश्यते । कामकोटिकोशस्थाने मुद्रितश्च । नासिकसूच्यान्तु अस्य व्याख्याया एव वार्तिकाभरणमिति नाम दृश्यते । अभि-नवनारायणेन्द्र कृता वार्तिकाभरणनाम्नी, शिवनारायणानन्दकृता विवरणदीपिका-नाम्नी च व्याख्ये विद्येते ।

5. बृहदारण्यकोपनिषद्भाष्यवार्तिकम्—(ASS. 16)

अस्य व्याख्या:—आनन्दगिरिकृता—शास्त्रदीपिका, आनन्दपूर्णकृता न्याय-कल्पलतिका, नृसिम्हाश्रमिकृतं न्यायतत्वविवरणम्, विद्यारण्यकृतः वार्तिकसारः, विश्वानुभवकृता सम्बन्धोक्तिश्च विद्यन्ते ।

6. मानसोल्लासः—

शाङ्करदक्षिणामूर्तिस्तोत्रव्याख्यात्मकोऽयं ग्रन्थः अड्यारपुस्तकालये मुद्रितः । अस्य व्याख्या रामतीर्थकृता मानसोल्लासवृत्तान्तविलासनाम्नी विद्यते ।

7. मोक्षनिर्णयः—(R. 2603 A. MGOML)

काशीमोक्षनिर्णयापरनामायं ग्रन्थ अमुद्रितः मद्रासमैसूरपुस्तकालययो-र्लभ्यते ।

8. वेदान्तसारवर्तिकराजसंग्रहः—(7736 TSML) ग्रन्थोऽयं (DC TSML Vol. XIII) मुद्रितः ।

9. लघुवार्तिकम्—अस्य कर्ता न सुरेश्वरः परन्तु उत्तमश्लोक इति निश्चयः ।

29. तोटकाचार्यः (800–900 A. D.)

शङ्करभगवत्पादशिष्येष्वन्यतमोऽयं तोटकाचार्य उदङ्कापरनामा शिलादपुत्र इति शङ्करविजयात् ज्ञायते। गिरिरितिनामान्तरमप्यस्यैव। तोटकाचार्य इति नाम तु तोटकवृत्तघटितग्रन्थप्रणयितृत्वेन सञ्जातम्।

उदङ्कापरनामा गिरिनामकोऽयं शङ्कराचार्ये निष्कामभक्तिमान् नितान्तं श्रद्धधानश्च भूत्वा गुरुचरणसेवापर आसीत्। कस्मिंश्चिद् दिने गिरिनामायं शिष्यः दिनचर्यादिकं कृत्वा भाष्यपाठस्यागमने चिरयति स्म। तदागमनप्रतीक्षावन्तं शङ्कराचार्यं पण्डितप्रकाण्डाः तीक्ष्णप्रतिभावन्त पद्मपादादयः विद्यामदमत्ताः गिरिं अनाघ्रातशास्त्रगन्धं वदन्तः तदनागमनं भाष्यपाठारम्भस्य न प्रतिरोधकं भवतु इति निवेदयामासुः। आचार्यस्तु पद्मपादादिदर्पपरिहाराय तोटकाचार्यं मनसा अनुजगृहे। नातिचिरादागतः तोटकाचार्यः आचार्यकटाक्षवीक्षावाप्तवैदग्ध्यः भाष्यपाठान्ते लब्धगुर्वनुज्ञः तोटकवृत्तघटितैः श्लोकैः सर्वमद्वैतवेदान्ततत्वं पपाठ। ततः प्रभृति तोटकाचार्याख्यापि अस्य समज्ञातेति साम्प्रदायिकी कथा।

अनेन स्वग्रन्थे द्रविडः 106 तमे श्लोके, ईश्वरगुप्तः 51 तमे श्लोके च निर्दिष्टौ। द्रविडाचार्यमधिकृत्य पूर्वमेवोपपादितम्। ईश्वरगुप्तमधिकृत्य न किमपि ज्ञातुं पार्यते।

1. श्रुतिसारसमुद्धरणम्—(ASS 103)

प्रकरणग्रन्थोऽयं गुरुशिष्यकथाश्रवणपद्धत्या अद्वैतसिद्धान्तान् प्रदर्शयन् एकोनाशीत्यधिकशतसंख्याकैः पद्यैः (179) पूर्णः आनन्दाश्रमे मुद्रितश्च, श्लोकेष्वेतेषु प्रक्षिप्तभागा अपि सन्तीति प्रतिभाति। सच्चिदानन्दयोगिकृता तत्वप्रदीपिका, पूर्णरमकृष्णकृता व्याख्या, अज्ञातकर्तृनामधेया श्रुतिसारसमुद्धरणसम्बन्धोक्तिरीति व्याख्यास्सन्ति।

केचित्तु नामैकदेशो नामग्रहणमिति न्यायमनुसन्दधानाः आनन्दगिरिरेव गिरिशब्देन व्यवहृत इति तोटकाचार्यानन्दगिर्योरैक्यं मन्वानाः आनन्दगिरिशङ्करशिष्य इति प्रवदन्ति। परन्तु प्रमाणं किमपि नोपलभामहे।

30. हस्तामलकः (800–900 A. D.)

हस्तामलकाचार्योऽयं शङ्कराचार्यशिष्यः। अस्य पिता प्रभाकरः। प्रभाकरोऽयं पूर्वमीमांसायां गुरुमतप्रवर्तक इति केचित्। सुरेश्वरादीनामिव हस्तामलकस्यापि कालः नवमशतकमिति विनिश्चीयते।

श्रीकैवल्याख्ये ग्रामे वसतः प्रभाकरस्य पुत्रत्वेन आविर्भूतदेहः जन्मान्तरानुष्ठितश्रवणादिना निवृत्ताज्ञानः दिव्ययोगीन्द्रः मूढजनैः पिशाचत्वेनाभिमतः जन्मना मूकः, शङ्करभगवत्पादविजययात्रासमये स्वपित्रा शङ्करसन्निधावानीतः, शङ्करभगवता कस्त्वमिति पृष्टः स्वानुभवं वदन्, अन्येषां मुमुक्षूणां अनुभवो भूयादिति प्राणिनामनुकम्पया द्वादशश्लोकैरात्मतत्वं उपनिषदर्थञ्च समधिगम्य प्रतिवचनछलेन विवेकमञ्जरीमाहेति, तादृशप्रतिवचनेन तुष्टश्शङ्करस्तं स्वच्छात्रेषु अन्यतमं स्वीचकारेति पण्डितप्रसिद्धा साम्प्रदायिकी कथानुसन्धेया।

1. अनुभववेदान्तप्रकरणम् —(D. 4538 MGOML)

नित्योपलब्धिस्वरूपोऽहमात्मा इति प्रतिचतुर्थचरणं दृश्यमानोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालयेऽमुद्रितः प्राप्यते।

2. विवेकमञ्जरी—(V. V. P.)

हस्तामलकश्लोकाः, हस्तामलकस्तोत्रम्, वेदान्तसिद्धान्तदीपिका, हस्तामलकीयमित्यादिना प्रसिद्धोऽयं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः। अस्य आनन्दप्रकाशकृता व्याख्या, शङ्कराचार्यकृतं भाष्यम्, स्वयम्प्रकाशमुनिकृता व्याख्या, अज्ञातकर्तृका च व्याख्यास्सन्ति।

31. वाचस्पतिमिश्रः (842 A. D.)

वाचस्पतिमिश्रस्य आचार्यमिश्रवाचस्पतिः, षड्दर्शिनीटीकाकृदाचार्यवाचस्पतिरिति नामान्तराणि। माधवीयशङ्करविजये शङ्कराचार्याणां प्रधानशिष्यः पद्मपादाचार्य एवान्यस्मिन् जन्मनि वाचस्पतिमिश्र आसीदिति दृश्यते। वेदधर्मशास्त्रपुराणतन्त्रव्याकरणज्योतिष-छन्दोन्यायवैशेषिक-सांख्ययोगमीमांसा वेदान्तचिकित्साशास्त्रादौ वाचस्पतिनाम्ना बहवः ग्रन्थाः प्रणीता विद्यन्ते। बहुषु वाचस्पतिषु दार्शनिकौ द्वौ प्रसिद्धतमौ। तयोरपि एकः तत्वचिन्तामणिप्रकाश-न्यायतत्वालोकाख्य-न्यायसूत्रवृत्ति-न्यायसूत्रोद्धारादिकर्ता वाचस्पतिः। अन्यश्च भामती-ब्रह्म-

तत्त्वसमीक्षा न्यायसूचीनिबन्धादिकर्ता षड्दर्शिनीटीकाकार आचार्यवाचस्पतिरिति । सोऽयं भामतीकारः वाचस्पतिमिश्रः वेदान्ते मण्डनमिश्रमतानुसारीति मण्डनपृष्ठसेवी वाचस्पतिरिति प्रसिद्धिर्विद्यते । अद्वैतवेदान्तशास्त्रे सूत्रभाष्यव्याख्याप्रस्थाने भामतीप्रस्थानमस्मादेव प्रस्थितमिति विशेषः ।

वाचस्पतिमिश्रदेशः —

वाचस्पतिमिश्रोऽयं कस्मिन् देशे आविरभूदिति गवेषणायां मण्डनमिश्र मुरारिमिश्रपार्थसारथिमिश्रसुचरितमिश्रादयस्सर्वेऽपि मैथिला इति मिश्रान्तनामसम्बन्धात् मिथिलावासीत्यनुमातुं शक्यते । केचित्तु नेपालप्रान्ते भामानामकः कश्चन ग्रामः । तत्र वसन् वाचस्पतिमिश्र भामतीग्रन्थं तद्देशप्रसिध्यै तद्देशस्मरणाय वा चकारेति वदन्ति ।

सम्प्रदायसमागता कथा तु वाचस्पतिमिश्रस्य भामतीनाम्नी पत्नी आसीत् । तया तस्य विवाहकाले काचन पण्डितपरिषत् सञ्जाता । वेदान्तशास्त्रे वादस्समजनि । वेदान्तेतरविदुषां वादः युक्तयश्च प्रबला अद्वैतिनां युक्तयः दुर्बलाश्चासन् । ततः प्रभृति अद्वैतवेदान्तयुक्तीरतिप्रबलास्सप्रमाणाश्च कर्तुं यत्नं कुर्वतस्तदर्थं ग्रन्थस्यास्य भामत्याख्यस्य रचयितुर्नवीनं वयः गतम् । ग्रन्थनिर्माणे मग्नस्यास्यापरे वयसि काचन नातिवृद्धा नष्टप्राययौवना स्त्री समायाता । ताञ्च स्वपत्नीमक्षतयोनिमसञ्जातसन्ततिं स्वञ्च ग्रन्थनिर्माणमग्नं दृष्ट्वा स्वग्रन्थस्य भामतीति स्वपत्न्याः नाम चकारेति प्रसिद्धा ।

कान्यकुब्जाधिपतेर्युक्तिदीपिकाकारस्य वृद्धभोजस्य सभापण्डित आश्रितश्चायं वाचस्पतिमिश्रः षड्दर्शिनीटीकाकृत् नवमशतकीय इति गुरुपादहाल्दारः वृद्धत्रय्यां वदति ।

वाचस्पतिमिश्राणामाचार्यः —

तात्पर्यटीकायां वाचस्पतिमिश्रेण "त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखै" रिति कथनात् त्रिलोचनमिश्रः वाचस्पतिगुरुरिति ज्ञायते । केचित्तु "मार्तण्डतिलकस्वामिमहागणपतीन्वयम् ।" इति भामत्यां मङ्गलाचरणात् तिलकस्वामी आचार्य इति वदन्ति । परन्तु अमलानन्देन "समस्तशब्दोऽयं मार्तण्डतिलकस्वामि" शब्दः देवतापर इति व्याख्यातम् । तिलकस्वामिशब्दश्च सुब्रह्मण्यपर इति प्रसिद्धिः । तस्मात्तिलकस्वामिशिष्य इत्यसमञ्जसमिति भाति । उदयनाचार्यै

र्न्यायवार्तिकतात्पर्यपरिशुद्ध्यां वाचस्पतिस्त्रिलोचनशिष्य इति प्रतिपादितम् वर्धमानोपाध्यायैश्च न्यायनिबन्धप्रकाशे उदयनोक्तिरादृता । दासगुप्तस्तु विद्यातरुरपि गुरुस्स्येति (HIP Vol. 107) वदति ॥

वाचस्पतिमिश्राश्रयदाता :—


वाचस्पतिमिश्रैर्भामत्यन्ते "नरेश्वरा यच्चरितानुकारमिच्छन्ति कर्तुं न च पारयन्ति । तस्मिन् महीये महनीयकीर्तौ श्रीमन्नृगेऽकारि मया प्रबन्धः ॥" इति स्वाश्रयदाता निर्दिष्टः । नृगोऽयं राघवदेवपण्डितपौत्रेण दामोदरपुत्रेण शार्ङ्गधरेण "शार्ङ्गधरपद्धत्यां" विशिष्टराजवंशवर्णनप्रस्तावे निर्दिष्टः । नातोऽधिकं ज्ञायते ॥

वाचस्पतिमिश्राणां कालः—

वाचस्पतिमिश्रैःस्वीये न्यायसूचीनिबन्धे न्यायसूचीनिबन्धोऽयं अकारि सुधियां मुदे । श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सर" इति निर्दिष्टम् । यदि शकाब्दस्स्यादयं तर्हि 893–976 A. D. इति दशमशतकमस्य कालः । यदि विक्रमाब्दस्स्यात् तर्हि 893 सं 842 A. D. इति सिध्यति । सर्वथा नवमशतकमध्यवर्तीति तु निश्चयः । दशमशतकीयेन रत्नकीर्तिनाम्ना बुद्धपण्डितेन अपोहसिद्धौ (Page 7) भामतीकारः निर्दिष्टः । तस्मादप्यस्य दशमशतकपूर्ववर्तित्वं सिध्यति ॥

1. ब्रह्मसूत्रभाष्यव्याख्या भामती (N. S. P.)

वाराणस्यां, निर्णयसागरमुद्रणालये, वाणीविलासे च मुद्रितोऽयं ग्रन्थः । अस्य व्याख्याः—अखण्डानन्दसरस्वतीकृता ऋजुप्रकाशिका, अच्युतकृष्णानन्दकृता भावदीपिका अल्लालसूरिकृता भामतीतिलकम्, अज्ञातकर्तृका भामतीविलासः, अमलानन्दकृतः, कल्पतरुरिति व्याख्यापञ्चकमत्र निर्दिष्टम् ।



2. ब्रह्मतत्त्वसमीक्षा—

ग्रन्थोऽयं न्यायवार्तिकतात्पर्यटीकायास्तृतीयेऽधिकरणे द्वितीयाह्निके, भामत्यां (Page 64 VVP. Edn) च निर्दिष्टः। ग्रन्थस्तु नोपलभ्यते मण्डन मिश्रकृतब्रह्मसिद्धिव्याख्यात्मकोऽयमिति वदन्ति।

अन्येऽपि न्यायवार्तिकतात्पर्यटीका, न्यायसूचीनिबन्धनम्, तत्त्ववैशारदी, सांख्यतत्त्वकौमुदी, तत्त्वबिन्दुः, न्यायकणिकादयः ग्रन्थाः न्यायमीमांसायोगशास्त्रेष्वारचिताः।

32. विमुक्तात्मा (950–1050 A. D.)

अव्ययात्मभगवत्पादशिष्योऽयं विमुक्तात्मा (1050) कालिकेनानन्दबोधयतिना प्रमाणमालायां (1150 A. D.) कालिकेन यामुनाचार्येण सिद्धित्रये (1150) कालिकेन मङ्खकेन श्रीकण्ठचरिते चतुर्दशशतकीयेन रामाद्वयेन वेदान्तकौमुद्यां निर्दिष्टः। नवमशतकीयः भास्कराचार्यैः विमुक्तात्मना खण्ड्यते। एवञ्चायं विमुक्तात्मा दशमशतकीयापरार्धकाले उवासेति निश्चीयते। दासगुप्तमहाशयस्तु द्वादशशतकीयमेनं वर्णयति। हिरियण्णामहाशयस्तु (JOR. Vol. V Page 32) पत्रिकायां (850 A. D.) कालात्प्राचीनो न भवतीति वदति।

संक्षेपशारीरककर्त्रा चतुर्दशतमे पद्ये चतुर्थाध्याये संक्षेपशारीरके मुक्तिकोविदशब्देन विमुक्तात्मा निर्दिष्टः। इष्टसिद्धिकारविमुक्तात्मा एव मुक्तिकोविदशब्देन प्रतिपादित इति संक्षेपशारीरकसारसंग्रहकर्त्रा मधुसूदनसरस्वत्या, नृसिंहाश्रमिणा रामतीर्थेन च प्रतिपादितम्। तस्मात् सर्वज्ञात्मनः पूर्वतनस्स्यादिति निर्णीयते।

1. इष्टसिद्धिः (G. O. S. S. 65)

अष्टभिः परिच्छेदैः पूर्णोऽयं ग्रन्थः भास्करमतं खण्डयति। मुद्रितश्चायं बरोडाग्रन्थमालायाम्। अनुभूतिस्वरूपकृतं आनन्दानुभवकृतं ज्ञानोत्तमकृतञ्च विवरणमस्य विद्यते।

2. प्रमाणवृत्तिनिर्णयः।

ग्रन्थोऽयं इष्टसिद्धौ (Page 37) निर्दिष्टः।

33. प्रकाशात्मा (1000 A. D.)

स्वयम्प्रकाशानुभवापरनामायं प्रकाशात्मा अनन्यानुभवशिष्यः तत्त्वशुद्धिकारस्य ज्ञानघनस्य सामयिक इति च ज्ञायते। अस्य गुरुणा अनन्यानुभवेन आत्मतत्त्वमिति ग्रन्थः कृतः, यश्च ज्ञानघनेन तत्त्वशुद्धौ उद्धृत इति श्रीकण्ठशास्त्री (I. H. Q. Vol XIV)।


वेदान्ते प्रस्थानद्वयस्य प्रचारे प्रकाशात्मा भामतीकारवाचस्पतिश्च कारणम्। अनयोः प्रस्थानभेदस्य कारणं-एकेश्वरवाद अविद्याश्रयादिवादयोरङ्गीकारानङ्गीकार एवेति च प्रसिद्धम्।

विशिष्टाद्वैतिना रामानुजेन श्रीभाष्ये परिशीलितोऽयं प्रकाशात्मा तस्मात् पूर्वतन इति तु निश्चयः। परन्तु दासगुप्तः (1200–1300 A. D.) अस्य काल इति वदति। श्रीकण्ठशास्त्री तु (950–1050 A. D.) काल एवास्येति प्रतिपादयति (I. H. Q. Vol XIV)।

1. पञ्चपादिकाविवरणम् (V. N. S. S. 5)

पञ्चपादीयपञ्चपादिकाव्याख्यात्मकोऽयं ग्रन्थः विजयनगरसंस्कृतग्रन्थमालायां, कल्कत्तासंस्कृतग्रन्थमालायां च मुद्रितः।

अस्य व्याख्या :—



एषु तत्त्वदीपनमखण्डानन्दमुनिकृतम्, विवरणदर्पणं अमलानन्दकृतम्, भावद्योतनिका चित्सुखकृता, टीकारत्नं आनन्दपूर्णकृतम्, ऋजुविरणं विष्णुभट्टोपाध्याय-

कृतम्, विवरणप्रमेयसंग्रहः विद्यारण्यकृतः, भावप्रकाशिका नृसिंहाश्रमिकृता, विवरणोपन्यासः रामानन्दसरस्वतीकृतः, विवरणोज्जीविनी यज्ञेश्वरदीक्षितकृता, रामतीर्थकृता व्याख्या, कृष्णकृता व्याख्या, परिव्राजककृता भावप्रकाशिकेति च ज्ञेयम् ।

2. शाब्दनिर्णयः (T. S. S. 53)

वृत्तिसंवलितकारिकामयोऽयं ग्रन्थः (प्रकरणग्रन्थः) शब्दात् ब्रह्मापरोक्ष ज्ञानं जायत इत्युपवर्णयति । तिरुवनन्तपुरपुस्तकमालायां मुद्रितश्च । अस्य व्याख्या आनन्दबोधभट्टारककृता शाब्दनिर्णयदीपिकाख्या च मद्रासहस्तलिखित-पुस्तकालये लभ्यते ।

3. शारीरकन्यायसंग्रहः (M. U. S. S.)

ब्रह्मसूत्रवृत्तिरूपोऽयं ग्रन्थः 193 न्यायान् प्रतिपादयति । ग्रन्थोऽयं मद्रास-विश्वविद्यालयमालायां मुद्रितः ।

4. लौकिकन्यायसंग्रहः । ? अयं कुत्र लभ्यत इति न ज्ञायते । परन्तु प्रकाशात्म-कृत इति श्रूयते ।

34. सर्वज्ञात्मा (1050 A. D.)

"श्रीदेवेश्वरपादपङ्कजरजःसम्पर्कपूताशय" इति वदन्नयं सर्वज्ञात्मा देवेश्वरशिष्य इति निश्चीयते । कोऽयं देवेश्वर इति संशये सुरेश्वर एव देवेश्वर शब्देन निर्दिष्ट इति सुरेश्वरशिष्यश्शङ्कराचार्यप्रशिष्य इति च बहवो वदन्ति । एवं संक्षेपशारीरकस्य मधुसूदनसरस्वतीव्याख्याअन्वयार्थप्रकाशिकायां दृश्यते च सर्वज्ञात्मायं कामकोटिपीठाधिष्ठाता चासीदिति च वदन्ति ।

सर्वज्ञात्मना संक्षेपशारीरकोपान्त्यश्लोके "श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति" इति स्वसामयिको राजा निर्दिष्टः । तस्य राज्ञो नाम श्रीमानिति केचित् । परन्तु मनुकुलादित्यनामा राजा (1027 A. D.) काले अनन्तशयन-राज्यं प्रशशास । तथा च तत्कालीनस्तद्देशीयश्चेति वदन्ति ।

देवेश्वरो न सुरेश्वरः, परन्तु सर्वज्ञात्मकृत प्रमाणलक्षणप्रमाणेन श्रेष्ठानन्दस्य प्रशिष्यः, देवानन्दस्य शिष्योऽयं देवेश्वर अन्य एवेति T. R. चिन्तामणि प्रभृतयः

वदन्ति । श्रीकण्ठशास्त्रिमिश्र (IHQ Vol XIV & J.O R. 1937) पत्रिकायां तथैव निरूपितम् ।

दासगुप्तमहाशयैस्तु (HIP. Vol. II 112) सुरेश्वरशिष्य एवायं सर्वज्ञात्मा, सर्वज्ञात्मनः नित्यबोधाचार्य इति नामान्तरमपीति प्रतिपाद्य नवमशतकीयोऽयं सर्व-ज्ञात्मा इति प्रतिपाद्यते । नायं सुरेश्वरशिष्यः परन्तु इष्टसिद्धिकारात् विमुक्तात्मनः अर्वाचीन इति श्रीकण्ठशास्त्रिणा प्रतिपाद्यते ।

शङ्कराचार्यः
|
सुरेश्वरः (देवेश्वर)
|
सर्वज्ञात्मा

श्रेष्ठानन्दः
|
देवानन्दः
|
देवेश्वरः
|
सर्वज्ञात्मा

1. संक्षेपशारीरकम्—(S. B. S. 69)

समन्वयाविरोधसाधनफलाख्यैश्चतुर्भिरध्यायैः पूर्णोऽयं प्रकरणन्थः पद्यमयः भाष्यार्थविचारणपरः सरस्वतीभवनग्रन्थमालायां आनन्दाश्रममुद्रणालये च मुद्रितः । अस्य व्याख्याः—नृसिंहाश्रमिकृता तत्वबोधिनी, पुरुषोत्तमदीक्षितकृता सुबोधिनी, प्रत्यग्विष्णुकृता व्याख्या, मधुसूदनसरस्वतीकृतः सारसङ्ग्रहः, राघवानन्दकृता विद्यामृतवर्षिणी, रामतीर्थकृता अन्वयार्थप्रकाशिका, विश्ववेदकृतसिद्धान्तदीपः, वेदानन्दकृता संक्षेपशारीरकसंबन्धोक्तिरिति व्याख्यास्सन्ति । महादेववेदान्तिकृतः लघुसंक्षेपशारीरकम् (संक्षेपशारीरककुतूहलम्) इति ग्रन्थः हरप्रसादशास्त्रिसूच्यां दृश्यते । (H. P. R. III No. 261)

2. पञ्चप्रक्रिया—(MUSBS 4)

ग्रन्थोऽयं मद्रासराजकीयहस्तलिखितपुस्तकालयेऽपि (R 1361 B.) लभ्यते । अस्य व्याख्या पूर्णविद्यकृता । नायं संक्षेपशारीरककारकृतिरिति दासगुप्तः ॥

3. प्रमाणलक्षणम्—(D. 1576 MGOML)

35. आनन्दबोधः (1050–1150 A. D.)

आनन्दबोधोऽयमात्मावासशिष्यः उत्तरभारतदेशवासीति शब्दनिर्णयव्या-ख्याया अवगम्यते । प्रकाशात्मनश्शाब्दनिर्णयस्य व्याख्यां कुर्वन् आनन्दगिरिणा

व्याख्यातोऽयं तयोरुभयोर्मध्यकालवर्तीति ज्ञायते । "एतदेवोक्तं गुरुभिरिति" इष्टसिद्धिकारः विमुक्तात्मा आनन्दबोधेन निर्दिश्यत इति आनन्दबोधोऽयं विमुक्तात्मशिष्य इत्यपि केचिद्वदन्ति ।

1 न्यायदीपावलिः—(BSS. 38, 62, 87, 117)

पञ्चावयववाक्यैर्नैय्यायिकप्रक्रियानिरसनपूर्वकं भेदवादं खण्डयन् अद्वैतप्रक्रियां साधयति । अस्य व्याख्या - अमृतानन्दमुनिना कृता न्यायविवेकाख्या, सुखप्रकाशकृता व्याख्या, अनुभूतिस्वरूपकृता चन्द्रिकाख्या, आनन्दगिरिकृता वेदान्तविवेकाख्याश्च विद्यन्ते ।

2. न्यायमकरन्दः—(BSS. 38, 62, 87, 117)

नैय्यायिकाभिमतं भेदवादं खण्डयति । वाचस्पतिमिश्रमण्डनमिश्रपञ्चपादिकाविवरणकारान् प्रमाणयति । अनिर्वचनीयख्यातिं जीवब्रह्मणोरैक्यं मोक्षस्वरूपं च प्रतिपादयति । नानानिबन्धकुसुमप्रभवावदातेति वदन्नयं ग्रन्थः प्राचीनान् सिद्धान्तान् संगृह्णाति ।

3. प्रमाणमाला—(BSS. 38)

न्यायमकरन्दप्रतिपादितान् सिद्धान्तान् संगृह्णन् वाचस्पतिमिश्रकृतां ब्रह्मतत्वसमीक्षां प्रमाणयन् प्रकरणग्रन्थतामर्हत्ययं ग्रन्थः । अस्य व्याख्याऽनुभूतिस्वरूपाचार्यकृता निबन्धनाख्या । अन्या काचन अज्ञातकर्तृनामधेया व्याख्या वाराणस्यां विद्यते ।

4. शाब्दनिर्णयव्याख्या— ग्रन्थोऽयं मद्रासराजकीयपुस्तकालये लभ्यते ।

36. श्रीहर्षः (1075–1175 A.D.)

श्रीहीरपण्डितमामल्लदेव्योः पुत्रोऽयं श्रीहर्षः कान्यकुब्जदेशवासी जयचन्द्रसभापण्डितः द्वादशशतकीय निश्चयः ।

हीरपण्डितः कान्यकुब्जाधीशस्य (कन्नौज) हड्डालवंशस्य विजयचन्द्रस्य सभायां पण्डित आसीत् । अस्य पत्नी मामल्लदेवी । एनमधिकृत्य सम्प्रदायसमागता कथेयं प्रसिद्धा—"श्रीहीरपण्डितः वादे उदयनाचार्येण पराभूतः । श्रीहीरः स्वन्यक्कृतिपरिहाराय स्वन्यक्कृतिप्रतीकाराय वा श्रीहर्षमादिश्य ममार । तस्मात् श्रीहर्षः

चिन्तामणिमन्त्रोपासनया लब्धवाग्वैभवः उदयनं वादे पराजित्य स्वपितुरानृण्यतां गतः ।

श्रीहर्षसामयिक राजा—

'ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्' इति खण्डनखाद्ये दर्शनात् श्रीहर्षोऽयं विजयचन्द्रपुत्रस्य जयचन्द्रस्य सभायां पण्डित आसीत् । अस्य स्थानं कान्यकुब्ज इति च निर्धार्यते । विषयेऽस्मिन्

गोविन्दनन्दनतया च वपुःश्रिया च
मास्मिन् नृपे कुरुत कामधियं तरुण्यः ।
अस्त्रीकरोति जगतां विजये स्मरः
स्त्रीः अस्त्रीजनः पुनरनेन विधीयते स्त्रीः ॥

इति प्रसिद्धं पद्यं श्रूयते । गोविन्दनन्दनतया चेति शब्दस्वारस्यात् जयचन्द्रपितुर्विजयचन्द्रस्य गोविन्द इति नामान्तरं स्यादिति संशयोपि ॥

प्रकाण्डपण्डितः वाग्मी चिन्तामणिमन्त्रप्रसादलब्धवैदुष्यः श्रीहर्ष इति सार्वजनीनम् । अनेन नक्तंदिवं अनशनो भूत्वा चिन्तामणिमन्त्राराधना कृता । मन्त्रप्रसादात् अनेन तादृशी कवित्वशक्तिः एतादृशी वाग्वैखरी समासादिता यथा कृताया एतदीयकविताया अर्थावगमे, एतदीयशास्त्रार्थविचारस्य तत्वावगमे वा पण्डिता कुण्ठिता अभूवन् । तदर्थं श्रीहर्षः यामिन्यास्त्रितीये यामे प्रतिदिनं स्नात्वा माहिषदधिमिश्रमन्नं भक्षयामास । तादृशाहारदोषात् सञ्जातबुद्धिप्रतिभादिमान्द्यः परिणतः । एतादृश्यां परिणतावस्थायां अनेन नैषधीयचरितं खण्डनखण्डखाद्यञ्च प्रणीतमिति कथापि सम्प्रदायसमागता श्रूयते ।

श्रीहर्षोऽयं काव्यप्रकाशकारस्य मम्मटभट्टस्य भागिनेय इति केषाञ्चिन्मतम् । विषयेऽस्मिन् "तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः" इति पद्यांशे सन्ध्यश्लीलदोषप्रयुक्तं (तव वर्त्म निवर्तताम्) मम्मटश्रीहर्षयोर्विवादं प्रमाणयन्ति ॥

जयचन्द्रसामयिकोऽयम् । देहलीशाय पृथ्वीराजाय द्रुह्यत असूयावतश्च जयचन्द्रस्य प्रेरणया यवनराजः गोरीनामकः देहलीनगरे पृथ्वीराजोपरि सेनाक्रमण

चकारेति, महान् भयावहो युद्धस्समजनीति चेतिहासः । स च युद्धः 1191 A. D. द्वादशशतकान्ते इति च वदन्ति । एवञ्चास्य कालः द्वादशशतकमिति ।

1348 A. D. कालिकेन राजशेखरेण रचिते प्रबन्धकोशाख्ये ग्रन्थे श्रीहर्षः परिशीलितः । श्रीहर्षेण एकादशशतकस्य पूर्वार्धवासी महिमभट्टः तत्कृतिर्व्यक्तिविवेकश्च खण्डनखण्डखाद्ये निर्दिष्टः । एकादशशतकस्योत्तरार्धवासिना 1050 A D. प्रसिद्धेन धारापतिना भोजराजेन निर्मिते सरस्वतीकण्ठाभरणे प्रख्यातकविनामसु श्रीहर्षनामनिर्देशो नास्ति । प्रसिद्धनैय्यायिकः तत्वचिन्तामणिकारः गङ्गेशोपाध्यायः द्वादशशतकीयः श्रीहर्षं निर्दिशति । एवञ्च महिमभट्टात् भोजराजात् अर्वाक्तनः, राजशेखरात् गङ्गेशोपाध्यायाच्च प्राक्तन इति सिध्यति ।

केचित्तु उदयनाचार्यसामयिक इति वदन्ति । श्रीहर्षेणोदयनाचार्यः खण्डने खण्ड्यते । उदयनकालश्च तर्काम्बराङ्कप्रमितशकः (906–984 A.D.) इति लक्षणावल्याः ज्ञायते । तस्मादनन्तरभावीत्येव निर्णेतुं शक्यते ।

1. खण्डनखण्डखाद्यम् (B. S. S. 81, 109)

शून्यवादिमतं नैय्यायिकमतञ्च खण्डयति । अद्वैतवेदान्तशास्त्रे नव्यन्यायशैलीप्रवेशजं यशः प्रथमत अस्यैव ग्रन्थस्य । न्यायशास्त्रीयतर्कशैल्या न्यायसिद्धान्ताः खण्डिताः। नैय्यायिकाभिमतान् पदार्थान् निरस्य, तदभिमतं द्वैतवादमपि निरस्य अद्वैतवादस्स्थापितः । सर्वेषामलौकिकानां लौकिकानाञ्च पदार्थानां अनिर्वचनीयता प्रमाणनिरूपिता । अत एवास्य ग्रन्थस्य "अनिर्वचनीयतासर्वस्व" मिति व्यपदेशोऽपि युज्यते । ग्रन्थस्यास्य खण्डनखण्डं, खण्डनखाद्यं, खाद्यखण्डनं, खण्डनमित्यपि नामान्तराणि श्रूयन्ते । ग्रन्थोऽयं चौखाम्बामुद्रणालये मुद्रितः । अस्य व्याख्याः ।

शङ्करमिश्रकृता आनन्दवर्धिनी, चित्सुखकृता काचन व्याख्या, पद्मनाभपण्डितकृता खण्डनटीका, भवनाथविरचितं खण्डनमण्डनम्, परमानन्दविरचितं खण्डनमण्डनम्, वरदराजकृतं खण्डनमण्डनम्, चरित्रसिंहकृतः खण्डनमहातर्कः, प्रगल्भमिश्रकृतं खण्डनखण्डनम्, गोकुलनाथकृतः खण्डनकुठारः, वाचस्पतिकृतः खण्डनोद्धारः, रघुनाथशिरोमणिकृता दीधितिः, वर्धमानकृतः प्रकाशः, विद्याभरणकृता विद्याभरणी, आनन्दपूर्णकृता विद्यासागरी, अनुभूतिस्वरूपकृता शिष्यहितैषिणी, शुभङ्करकृतं श्रीदर्पणम्, अज्ञातकर्तृकं अद्वैतबोधामृतम्, अज्ञातकर्तृका शारदा, सूर्यनारायणशुक्लकृता खण्डनरत्नमालिका चेति । आद्य खण्डनकुठारः, खण्डनोद्धारश्च श्रीहर्षदोषोद्धाराय कृतौ । आनन्दवर्धना तात्पर्यमात्रप्रकाशिका, न तु प्रतिपदव्याख्यारूपा ।

नैषधीयचरितमित्यादयः इतरे नव-काव्य-ग्रन्था अपि रचिता इति नैषधीयचरितात् ज्ञायते ।

37. आनन्दानुभवः (1100–1200 A.D.)

"वन्दे तस्य पदारविन्दयुगलं नाराणज्योतिष" इति स्वग्रन्थेषु वदन्नयं आनन्दानुभवः नारायणज्योतिश्शिष्य इति निश्चीयते । एतेन कृताः त्रयः ग्रन्था- उपलभ्यन्ते । तेषु पदार्थतत्वनिर्णयः आनन्दानुभवकृत इति मद्रासपुस्तकालयस्थात् पुस्तकात् ज्ञायते । परन्तु "तर्कसंग्रह" भूमिकायां त्रिपेदीमहाशयेन "पदार्थतत्वनिर्णयः" गङ्गापुरीभट्टारककृत इति वर्णितम् । आनन्दानुभवस्यैव आश्रमस्वीकरात्पूर्वं गङ्गापुरीभट्टारक इति नामान्तरं स्यादिति त्रिपेदीमहाशयवचनमपि सम्भाव्यते ।

दासगुप्तस्तु (950–1050 A. D.) अस्य कालं वदति । न्यायमकरन्दकारादानन्दबोधादर्वाचीनोऽयमिति (IHQ Vol. XIV) श्रीकण्ठशास्त्रिभिः प्रतिपादितम् । विमुक्तात्मकृतस्य इष्टसिद्धिग्रन्थस्य व्याख्यां कुर्वन् आनन्दगिरिणा व्याख्यातोऽयं तयोर्मध्यकालिक इति तु निश्चयः ।

1. इष्टसिद्धिविवरणम्—(39. A. 3. AL) ग्रन्थोऽयमड्यारपुस्तकालये लभ्यते अमुद्रितश्च ।

2. न्यायरत्नदीपावली—(38. H. 15. AL)

समन्वय-अविरोध साधन - फलाख्यैश्चतुर्भिरध्यायैः पूर्णोऽयं प्रकरणग्रन्थः अमुद्रित अड्यारपुस्तकालये लभ्यते । अस्य व्याख्या आनन्दगिरिणा कृता । मुद्रितश्चायं मद्रपुर्याम् (MGOMLS)

3. पदार्थतत्वनिर्णयः—(R 2981 MGOML, 41. A. 39. AL)

ग्रन्थोऽयं नैय्यायिकाभिमतान् वैशेषिकाभिमतांश्च पदार्थान् खण्डयति । अद्वैतदिशा पदार्थान् विभजते च । ग्रन्थोऽयममुद्रितः मद्रासपुस्तकालये लभ्यते । अस्य व्याख्या आनन्दगिरिणा, आत्मस्वरूपेण च कृता ।

38. अनुभूतिस्वरूपाचार्यः (1100–1300 A.D.)

स्वग्रन्थेषु हयग्रीवं प्रणमन्नयं अनुभूतिस्वरूपः दक्षिणदेशीयोऽपि सन् न्याय-वेदान्ताध्ययनाय गुजरातिप्रान्तीयकठियावारप्रान्तीयद्वारकादिक्षेत्रेषु उवास । न्याय-व्याकरणवेदान्तेषु निष्णातोऽयं आनन्दगिरेः, प्रज्ञानानन्दस्य, नरेन्द्रनगर्या-ख्यस्य च गुरुरिति ज्ञायते । स्वरचिते खण्डनखण्डव्याख्याने शिष्यहितैषिण्याख्ये श्रीहर्षं प्रणमन्नयं श्रीहर्षशिष्य इति ख्यातः ।

वेदान्तवेद्यस्यात्मनः बहुत्वासम्भवे वाच्ये सति पुंस्शब्दस्य सप्तमीबहुवचने कगागमो भविष्यतीति स्वोच्चरितपुंक्षु-इति रूपस्य साधुत्वप्रदर्शनायानेन एकरात्र्यामेव सारस्वतसूत्राणि सवृत्तीनि रचितानीति कथा पण्डितसम्प्रदायसमागता श्रूयते ।

द्वादशशतकीयस्य आनन्दबोधाचार्यकृतस्य न्यायमकरन्द–न्यायदीपावली–प्रमाणमालाख्यग्रन्थत्रयस्यापि व्याख्यां कुर्वन् एकादशशतकीयप्रथमपादोत्पन्नस्य इष्टसिद्धिग्रन्थस्य व्याख्यां रचयन् आनन्दगिरिणा अभिवन्द्यमानोऽयं अनुभूतिस्वरूपः क्रैस्तवीयद्वादशशतकमध्यादारभ्य त्रयोदशशतकमध्यपर्यन्तमुवासेति ज्ञायते ।

1. इष्टसिद्धिविवरणम्— (TCL 656) अमुद्रितोऽयं ग्रन्थ अनन्तशयनपुस्तकालये लभ्यते ।

2. गौडपादीयभाष्यटिप्पणी—(R. 5911 MGOML)

माण्डूक्यकारिकाशाङ्करभाष्यव्याख्यात्मकोऽयं ग्रन्थः मद्रासहस्तलिखित-पुस्तकालये लभ्यते ।

3. चन्द्रिका—(D. 15306 MGOML)

आनन्दबोधीयन्यायदीपावलिव्याख्यात्मकोऽयं ग्रन्थः मद्रासपुस्तकालये बीकानेरपुस्तकालये चामुद्रित उपलभ्यते ।

4. निबन्धनम् (प्रमाणरत्नमाला व्याख्या)—(R. 3268 MGOML)

5. प्रकटार्थविवरणम्—(MUS 9)

ब्रह्मसूत्रशाङ्करभाष्यव्याख्यात्मकोऽयं ग्रन्थः मद्रासविश्वविद्यालयपुस्तकमालायां मुद्रितः । पञ्चपादिकाविवरणस्य गूढार्थत्वेन व्याख्यापेक्षतां प्रकटार्थविवरणस्य तदनपेक्षतां च प्रकटीकुर्वन्नयं अन्वर्थनामा ग्रन्थः "वाचस्पतिस्तु मण्डनपृष्ठसेवी"ति भामतीखण्डनपरः उदयनसुन्दरपाण्ड्याचार्यब्रह्मप्रकाशिकाकारान् प्रमाणयन् भाष्यार्थं विशदयति ।

यद्यपि मुद्रिते ग्रन्थे अनुभूतिस्वरूपाचार्यनाम न निर्दिष्टम्, नापि कल्प-तर्वादौ प्रकटार्थविवरणखण्डनावसरे अनुभूतिस्वरूपनाम निर्दिश्यते, प्रकटार्थ-विवरणस्य द्वादशशतकापरभागकालिकत्वं वदता दासगुप्तेनापि ननिर्दिष्टम्, तथापि बन्दरकाररजतजयन्तीस्मारकपत्रिकायां राघवमहाशयेन प्रकटार्थकार अनुभूति स्वरूप इति सिद्धान्तिम् ।

6. भगवद्गीताभाष्यटिप्पणी (231 T. C. L.) ग्रन्थोऽयं अड्यारपुस्तकालये अनन्तशयन पुस्तकालये च प्राप्यते ।

7. शिष्यहितैषिणी (खण्डनखण्डखाद्यव्याख्या)

ग्रन्थोऽयं जैनबन्दरगारपुस्तकालयसूच्या 27 पुटे दृश्यते । सारस्वतप्रक्रियापि अदसीया कृतिः ।

39. चित्सुखाचार्यः (1120–1220 A.D.)

चित्सुखप्राचार्यः—

चित्सुखाचार्यस्य प्राचार्यः ज्ञानघन इति ख्यातः । अस्यैव बोधघन इत्यपि नामान्तरम् । बोधघनापरनाम्ना तत्वशुद्धिः कृता ज्ञानघनेन । ज्ञानघनोऽयं नित्य-बोधघनशिष्य इति शृङ्गगिरिसूच्यां दृश्यते । अस्य कालश्च (848–910 A.D.) इति । एवञ्च ज्ञानघनः नित्यबोधघनशिष्यः । ज्ञानघनस्य शिष्यः ज्ञानोत्तम इति च ज्ञायते ।

चित्सुखाचार्यगुरुः—

ज्ञानघनशिष्यः ज्ञानोत्तमः चित्सुखाचार्यगुरुः। 'तत्वप्रदीपिका' अन्ते अयं ज्ञानोत्तमः गौडेश्वराचार्यशब्देन विशेषितः। ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम्' इति तत्वप्रदीपिकायां, तात्पर्यटीकायां, भावतत्वप्रदीपिकायां च ज्ञानोत्तमस्यैव सत्यानन्द इति नामान्तराण्यपि दृश्यन्ते। सोऽयं ज्ञानोत्तमः शृङ्गगिरि गुरुपरम्परायां (910–953 A.D.) काले आसीदिति ज्ञायते।

अद्वैतवेदान्तसाहित्ये ज्ञानोत्तमद्वयं वर्तते। तयोरेकः चित्सुखगुरुः प्रकृतः। अन्यस्तु नैष्कर्म्यसिद्धि–इष्टसिद्धिव्याख्याकारः चोलदेशीयः मङ्गलग्रामवासी दाक्षिणात्यः। चित्सुखगुरुश्च गौडदेशीयः। T. R. चिन्तामणिश्च चित्सुखाचार्यगुरोर्ज्ञानोत्तमात् नैष्कर्म्यसिद्धिव्याख्याता ज्ञानोत्तमो भिन्न इत्येव वदति। हिरियण्णा च चिन्तामणिमतमाराधयन् एवं वदति योऽयं सत्यानन्दापरनामा ज्ञानोत्तमः चित्सुखाचार्येण निर्दिष्टः स चित्सुखाचार्यात् प्राचीनः। सर्वज्ञपीठमधिरोहमाणानां काञ्चीकामकोटिपीठाधीशानां नामद्वयवत्वं प्राचीनपरम्परासिद्धम्। एवञ्च कामकोटिगुरुपरम्पराप्रामाण्यात् ज्ञानोत्तमः शङ्करात् चतुर्थपीठाधिपतिः। तत्प्रणीतां नैष्कर्म्यसिद्धिव्याख्यां चित्सुखीया नैष्कर्म्यसिद्धिव्याख्या अनुसरतीति। दासगुप्तस्तु मङ्गलग्रामवासिनमेनं नवीनंवदति।

गौडेश्वराभिधानेन चित्सुखगुरुणा ज्ञानोत्तमेन न्यायसुधा, ज्ञानसिद्धिरिति द्वौ ग्रन्थौ प्रणिताविति तत्वप्रदीपिकाया (Page 392) ज्ञायते। अप्पय्यदीक्षितैश्च सिद्धान्तलेशसंग्रहे (269–270) न्यायसुधा निर्दिष्टा। श्रीकण्ठशास्त्रिभिः (IHQ Vol. XIV P 401) ज्ञानसुधाख्योपि ग्रन्थः निर्दिश्यते। एवञ्च न्यायसुधा ज्ञानसिद्धि — ग्रन्थकारः गौडेश्वरापराभिधः ज्ञानोत्तमः चित्सुखाचार्यगुरुरिति ज्ञायते।

चित्सुखकालः —

1268–1369 (A.D.) कालवर्तिना वेदान्तदेशिकेन चित्सुखाचार्यस्स्वग्रन्थे निर्दिष्टः। एवं (1187 A.D.) कालवर्तिनः श्रीहर्षस्य कृतेः खण्डनखण्डनखाद्यस्य चित्सुखाचार्येण व्याख्या कृता। एवं (1050–1150 A.D.) कालवर्तिन आनन्दबोधस्य कृतेः व्याख्या कृता। तस्मात् (1120–1220 A.D.) चित्सुखकाल इति सिध्यति।

परन्तु शृङ्गगिरिमठीयगुरुपरम्परासूची यदि प्रामाणिकी तत्र दृश्यमान ज्ञानोत्तमकालश्च (953 A.D.) यदि प्रामाणिकः, यदि स एव ज्ञानोत्तमश्चित्सुखाचार्यगुरुस्तर्हि 1053 A.D.) चित्सुखसमय इति सिध्यति। श्रीकण्ठशास्त्रिभिस्तु स्वीये प्रबन्धे चित्सुखकालः (1180 A.D.) इति वर्णितम्। परंतु ज्ञानोत्तमः कः इति न निर्णीतम्। यदि स एव स्यात्तर्हि द्वादशशतकात् शतवर्षेभ्यः पूर्वमिति वक्तव्यमापतति। स चायं सन्देहः शङ्कराचार्यस्य कालस्सप्तमशतकपूर्वार्ध इति सिद्धान्तस्वीकारमूलक इति प्रत्यक्षम्। सर्वथा चित्सुखः द्वादशशतकीय इति निश्चयः।

चित्सुखसतीर्थ्यः—

श्वेताश्वतरोपनिषद्दीपिकायां विज्ञानात्मना "प्रत्यस्ताखिलभेदाय जगद्विभ्रमसाक्षिणे। ज्ञानोत्तममुनीन्द्राय नमः प्रत्यक्स्वरूपिणे" इति ज्ञानोत्तमः नमस्कृतः। एवञ्च पञ्चपादिकाव्याख्यातात्पर्यद्योतिनी–श्वेताश्वतरोपनिषद्दीपिकाकारः विज्ञानात्मा चित्सुखसतीर्थ्य इति निर्णीयते।


चित्सुखशिष्याः—

न्यायापदेशमकरन्दव्याख्यायां, अधिकरणरत्नमालायाम्, तत्वप्रदीपिका व्याख्यायाञ्च भावद्योतनिकायाम्, सुखप्रकाशेन चित्सुखः नमस्कृतः। एवमानन्दगिरेर्दीक्षागुरुः शुद्धानन्दश्च चित्सुखशिष्य इति श्रीकण्ठशास्त्रिभिः प्रतिपादितम्। तस्मात् सुखप्रकाशशुद्धानन्दौ चित्सुखशिष्याविति निर्णीयते।

चित्सुखप्रशिष्याः—

"सुखप्रकाशयतिनं तं नौमि विद्यागुरुम्" इत्यमलानन्दैरुक्तत्वात् कल्पतरुकार अमलानन्दः सुखप्रकाशशिष्यः चित्सुखाचार्यप्रशिष्यश्च। एवं "शुद्धानन्दपदाम्भोजभृङ्गायितमना" इत्यादिना आनन्दगिरिणा वर्ण्यमानश्शुद्धानन्दोऽपि आनन्दगिरिदीक्षागुरुरिति निर्णीयते। तस्मात् आनन्दगिरिरपि चित्सुखाचार्य प्रशिष्यो भवितुमर्हति।

अत्रायं शिक्षादीक्षागुरुशिष्यपरम्परावृक्षः—



चित्सुखग्रन्थाः—

1. अधिकरणमञ्जरी (J. O. R. Vol V)

"रामग्रहेन्दुसंख्याता न्यायाश्शारीरकाश्रया" इत्यादिना शङ्करभगवत्पाद भाष्यानुसारं अधिकरणार्थं अधिकरणसंख्याश्च प्रतिपादयन्नयं ग्रन्थः प्राच्यभाषाशोधन पत्रिकायां (J. O. R. Vol V) मद्रासनगरे मुद्रितः।

2. अधिकरणसङ्गतिः (J. O. R. Vol VII)

भाष्योपवर्णिताधिकरणानां सङ्गतिप्रदर्शनपरोऽयं ग्रन्थकः (J. O. R. Vol VII) मुद्रितः। अमुद्रितस्तु (R. 3305 MGOML) लभ्यते।

3. अभिप्रायप्रकाशिका (R. 3853 MGOML)

मण्डनमिश्रीयब्रह्मसिद्धि व्याख्यात्मकोऽयं ग्रन्थ अनादिः सान्तश्च मद्रासहस्तलिखितपुस्तकालये लभ्यते।

4. खण्डनभावप्रकाशिका—

श्रीहर्षीयखण्डनखण्डव्याख्यात्मकोऽयं ग्रन्थः अंशतः चौखाम्बामुद्रणालये मुद्रितः॥

5. तत्त्वप्रदीपिका (N. S. P.)

समन्वय-अविरोधसाधनफलाख्यैश्चतुर्भिः परिच्छेदैः पूर्णोऽयं ग्रन्थः न केवलं अद्वैतसिद्धान्तरक्षकः परं अद्वैतप्रकाशकः व्युत्पादकश्च। निर्णयसागरमुद्रणालये मुद्रितश्च। नयनप्रसादिनी, भावद्योतनिकेति च द्वे व्याख्ये विद्येते।

6. न्यायमकरन्दटीका (B. S. S. 38, 62, 87, 117)

आनन्दबोधकृतन्यायमकरन्दव्याख्यात्मकोऽयं ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः। ग्रन्थेऽस्मिन् आनन्दबोधं ब्रह्मप्रकाशिकाकारखण्डनपरं चित्सुखः (Page 346) वर्णयति।

7. प्रमाणरत्नमालाव्याख्या (R. 3273 MGOML)

तात्पर्यटीका, सम्बन्धोक्तिः निबन्धनमित्यादय नामविशेषाः श्रूयन्ते। आनन्दबोधीय प्रमाणरत्नमालाव्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः मद्रासपुस्तकालये अनन्तशयनपुस्तकालये सरस्वतीमहालये च लभ्यते। ब्रह्मविद्यापत्रिकायां मुद्रितश्च।

8. भावतत्वप्रकाशिका (R. 3271 MGOML)

नैष्कर्म्यसिद्धिव्याख्यात्मकोऽयं ग्रन्थः अमुद्रितः मद्रासराजकीयपुस्तकालये अडयारपुस्तकालये च लभ्यते। व्याख्यैषा ज्ञानोत्तमकृतां चन्द्रिकामनुकरोति।

9. भावद्योतनिका (R. 4305 MGOML)

तात्पर्यदीपिकापरनामायं ग्रन्थः पञ्चपादिकाविवरणव्याख्यात्मकः मद्रास राजकीयपुस्तकालये लभ्यते। अचिरादेव प्रकाशमेष्यति।

10. भाष्यभावप्रकाशिका (R. 3020, R. 5140, MGOML)

अध्यासभाष्यान्तोऽयं सूत्रभाष्यव्याख्यात्मकः ग्रन्थः मद्रास अडयार मैसूर पुस्तकालयेषु लभ्यते।

11. वेदान्तसिद्धान्तकारिकामञ्जरी (R. 1492 MGOML) प्रकरणग्रन्थोऽयं मद्रासपुस्तकालये लभ्यते।


12. विष्णुपुराणव्याख्या (5511 DC. TSML)

13. ब्रह्मस्तुतिः
14. सद्दर्शनसंग्रहः
} अनयोश्चित्सुखकर्तृत्वे प्रमाणं न ज्ञायते ।

40. अमलानन्दः (1247-1347 A.D.)

"आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुम्" इति आनन्दात्मानं प्रणमत्ययं (632 TMPL) व्यासाश्रम इत्यपरनामा अमलानन्द आनन्दात्मप्रशिष्य इति, "यथार्थानुभवानन्दपदगीतं गुरुं नुम" इति अनुभवानन्दं प्रणमत्ययं अनुभवानन्दशिष्य इति च ज्ञायते । "सुखप्रकाशशशिनं तं नौमि विद्यागुरुं" इति सुखप्रकाशं विद्यागुरुत्वेन वर्णयन् अयं सुखप्रकाशात् प्राप्तविद्य इति च ज्ञायते । तस्मात् दीक्षागुरुः अनुभवानन्दः, दीक्षाप्रगुरुरानन्दात्मा, विद्याप्रगुरुश्चित्सुख विद्यागुरुस्सुखप्रकाश इति सिध्यति । एतेन अमलानन्दगुरुरयं अनुभवानन्दः कोशरत्नप्रकाशप्रभामण्डलकारात् अनुभवानन्दात् भिन्नश्शङ्करानन्दसामयिक इति, अमलानन्दश्च आनन्दात्मप्रशिष्यशङ्करानन्दशिष्यविद्यारण्यसामयिक इति च सिध्यति ।

"श्रीजैत्रदेवात्मजे कृष्णे क्ष्माभृति भूतलं सह महादेवेन सम्बिभ्रति" इति देवगिरिक्ष्मापतिकृष्णस्य तद्भ्रातुर्महादेवस्य सामयिकत्वदर्शनात् क्रैस्तवीयत्रयोदशशतकापरकालिक इति निश्चियते । महाराष्ट्रदेशज इति केचित् ।



1. कल्पतरुः— (N. S. P.)

भामतीव्याख्यात्मकोऽयं ग्रन्थः प्रकटार्थकारं खण्डयन् भामतीपक्षमक्षुण्णं साधयति । निर्णयसागरे मुद्रितः । अस्य व्याख्या अप्पय्यदीक्षितकृता परिमलाख्या लक्ष्मीनृसिंहीया आभोगाख्या, वैद्यनाथकृता कल्पतरुमन्दारमञ्जरी च विद्यते ।

2. शास्त्रदर्पणम्—(VVSS 7)

अधिकरणरचनासु भामतीमनुसरन् सूत्रवृत्तिग्रन्थोऽयं भामत्यर्थान् संगृह्णाति । वाणीविलासे मुद्रितः ।


3. पञ्चपादिकादर्पणम् —पञ्चपादिकाव्याख्यात्मकोऽयं ग्रन्थः कृत इति सम्प्रदायसमागता कथा श्रूयते ।

आनन्दगिरिः (1260–1320 A. D.)

आनन्दज्ञानापराभिधस्यास्य आनन्दगिरेस्सन्यासाश्रमस्वीकारात्पूर्वं जनार्दन इति नाम । गुजरातप्रान्तजोऽयं सन्यासस्वीकारादनन्तरं द्वारकाशाङ्करपीठाधीश आसीत् । केचिदेनमान्ध्रदेशजं वदन्ति । अन्ये तु चेरदेशजं वदन्ति ।

"तं वन्देऽनुभवस्वरूपयमिनं स्मृत्याखिलाभीष्टदम्" इति तत्वालोके दर्शनात् सारस्वतप्रक्रियाइष्टसिद्धिविवरणप्रकटार्थविवरणादिकार अनुभूतिस्वरूपाचार्यः विद्यागुरुरिति "शुद्धानन्दपदाम्भोज भृङ्गायितमना जगौ" इति बहुत्र दर्शनात् शुद्धानन्दः दीक्षागुरुरिति निर्णयः ।

सारस्वतप्रक्रियाव्याख्यातुर्नरेन्द्रनगरीति प्रसिद्धस्य सामयिकोऽयम् । तत्वदीपनकार अखण्डानन्दसरस्वती, तत्वालोकव्याख्याता तत्वप्रकाशिकाकारः प्रज्ञानानन्दश्च आनन्दगिरिशिष्येषु प्रसिद्धतरौ । एकादशीनिर्णयव्याख्याता अच्युतानन्दोऽपि शिष्योऽयमस्येति ज्ञायते । अदसीयायां पदार्थतत्वनिर्णयव्याख्यातर्कविवेकाख्यायां "कलिङ्गदेशाधिपतौ नरेन्द्रे भुवं प्रशासत्यमरेन्द्रतुल्ये । नृसिम्हदेवे जगदेकवीरे नरोत्तमेऽकारि मया प्रबन्धः" । इति दर्शनात् कलिङ्गदेशाधिप नृसिम्हदेवस्य सामयिकश्चेति ज्ञायते ।



आनन्दगिरिशिष्येण अद्वयगिरिणा प्रपञ्चसारव्याख्या विज्ञानचन्द्रिकानाम्नी कृता या अडयारपुस्तकालये लभ्यते ।

आनन्दगिरिणा प्रायस्सर्वाण्यपि शाङ्करभाष्याणि व्याख्यातानि । परन्तु ऐतरेय-प्रश्नोपनिषदां भाष्यस्य या व्याख्या आनन्दगिरिकृतेति मुद्रिता सा वस्तुतः नानन्दगिरिकृता । यतः—ऐतरेयप्रश्नोपनिषद्व्याख्याया अन्ते विद्यारण्यीया दीपिका निर्दिष्टा । विद्यारण्यश्चानन्दगिरेरर्वाचीन इति तु निश्चयः । तस्मात् न प्रसिद्ध आनन्दगिरिरस्य कर्ता । श्रीकण्ठशास्त्रिभिः (I. H. Q. Vol. XIV) अनन्तानन्दगिरिति कश्चन लक्ष्मीवरगुरुर्वर्णितः । तेन कृता स्यादिति संशयः ।

1. आत्मज्ञानोपदेशविधिटीका —(R. 3380 H. MGOML) अमुद्रितोऽयं ग्रन्थः मद्रासराजकीयपुस्तकालये पश्चात् सूच्यां च दृश्यते ।

2. ईशावास्यशाङ्करभाष्यटिप्पणी —(ASS 5)

3. उपदेशसाहस्री व्याख्या —(7207 TSML)

अमुद्रितोऽयं ग्रन्थः सरस्वतीमहालये, मद्रासपुस्तकालये (R 380 b.-MGOML) अडयारपुस्तकालये (33. M. 25 AL) लन्दनपुस्तकालये (2279 IOL) च लभ्यते ।

4. उपसदनव्याख्या —(R 3380 E. MGOML)

5. काठकोपनिषद्भाष्यव्याख्या —(ASS 7)

6. केनोपनिषद्भाष्यव्याख्या —(ASS 6)

7. गोविन्दाष्टकटीका (XXII 9) नासिकसूच्यां दृश्यते ।

8. छान्दोग्यभाष्यव्याख्या —(ASS 14)

9. तर्कविवेकः (पदार्थतत्त्वनिर्णयव्याख्या) — (R. 4342 MGOML)

आनन्दानुभवीयपदार्थतत्त्वनिर्णयव्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः मद्रास पुस्तकालये अनन्तशयनसूच्यां 303 (T. C. D.) दृश्यते ।

10. तत्त्वालोकः —(1105 DCRAS Bombay Mss. 229 27287 DC Benaras Sanskrit Viswa Vidyalaya Vol. VII Page No. 56.)

न्यायवैशेषिकप्रतिपादितं सिद्धान्तं दूषयन्नयं ग्रन्थः भास्कराचार्यनिम्बार्काचार्यौ निर्दिशन् प्रकटार्थकारमार्गानुसारी भागद्वयपरिमितः रायल आसियाटिक सोसाइटि बाम्बे नगरे, अपूर्णः अडयारपुस्तकालये च लभ्यते । अस्य व्याख्या प्रज्ञानानन्दकृता तत्त्वप्रकाशिकाख्या वर्तते ।

11. तर्कसङ्ग्रहः—(G. O. S. 3)

12. त्रिपुटीविवरणम्—(R 3380 d. MGOML)

13. तैत्तरीयभाष्यव्याख्या—(ASS 13)

14. पञ्चप्रकरणव्याख्या "पञ्चप्रक्रियाव्याख्या"—MUSBS 4)

ग्रन्थोऽयं सर्वज्ञात्ममुनिकृतपञ्चप्रक्रियाव्याख्यात्मकः मद्रासविश्वविद्यालय बुलेटिनग्रन्थमालायां प्रकाशितः ।

15. तैत्तरीयवार्तिकटीका — (ASS 12)

16. पञ्चीकरणविवरणम्—

रामतीर्थकृततत्त्वचन्द्रिकाव्याख्यासहितोऽयं चौखाम्बामुद्रणालये मुद्रितः । अमुद्रितस्तु मद्रास-अनन्तशयनादिषु लभ्यते च ।

17. बृहदारण्यकभाष्यव्याख्या—(ASS 15)

18. बृहदारण्यकवार्तिकव्याख्या—(ASS 16)

19. भगवद्गीताभाष्यविवेचनम् (ASS 34)

20. माण्डूक्योपनिषद्भाष्यव्याख्या—(ASS 10)

21. माण्डूक्यकारिकाव्याख्या—(ASS 10)

22. मुण्डकभाष्यव्याख्या—(ASS 9)

23. वाक्यवृत्तिव्याख्या—(R 3380 A. R 3324 b. MGOML)

24. वेदान्तविवेकः (न्यायदीपावलीव्याख्या) —(R 4439 b. R 3604, MGOML) अनन्तशयनपुस्तकालयेऽपि (365 TCD) लभ्यते ।

25. शारीरकन्यायनिर्णयः (सूत्रभाष्यव्याख्या)—N.S.P.

26. स्वरूपविवरणम् (R 3380 C MGOML, XXI 37/8) जयपुरसूची ।

आनन्दगिरिकृतत्वे सन्दिग्धाः ग्रन्थाः

27. ऐतरेयभाष्यव्याख्या—(ASS 11) 28. गुरुस्तुतिः। 29. चूलिकोपनिषद्व्याख्या 30. प्रश्नोपनिषद्भाष्यव्याख्या—(ASS 8) 31. बृहच्छङ्करविजयः। 32. मितभाषणी। 33. शतश्लोकीव्याख्या—(Mysore Edn BSS 20) 34. शङ्कराचार्यावतारकथा। 35. हरिमीडेस्तुतिव्याख्या (76 d.) शृङ्गगिरिसूच्यां, (254) नासिक्सूच्याञ्च दृश्यते।

42. अखण्डानन्दमुनिः (1250–1350 A.D.)

अयमखण्डानन्दमुनिरखण्डानुभूत्यानन्दगिर्योः शिष्यः। अखण्डानुभूतिर्दीक्षागुरुः। आनन्दज्ञानः विद्यागुरुः। ग्रन्थस्यारम्भे चतुर्थवर्णकावसाने च उभयोरपि नामनिर्देशः कृतः। आनन्दगिरिर्वोभपूर्वीपशब्देन निर्दिष्टः। आनन्दगिरिजन्मस्थानं रत्नाचल इति च निर्दिश्यते। अयमौत्तरः विष्णुभट्टोपाध्यायसतीर्थ्यश्चेति निश्चयः।

म. म. अनन्तकृष्णशास्त्रिणस्स्वसम्पादिते ब्रह्मसूत्रभाष्यग्रन्थे तत्वदीपनकारस्याखण्डानन्दमुनेः भामतीव्याख्याऋजुप्रकाशिकाकर्तुः अखण्डानन्दानुभूतेरैक्यं सम्भावयन्ति। ऋजुप्रकाशिकाकर्तुः गुरोः स्वयम्प्रकाशआ गौणीति च सम्भावयन्ति।

परन्तु इम्मिडिजगदेकरायकालिकस्य षोडश–सप्तदश–शतकीयस्य ऋजुप्रकाशिकाकर्तुरखण्डानन्दसरस्वत्याः तत्वदीपनकारात् त्रयोदशचतुर्दशशकीयात् आनन्दगिरिशिष्यात् अखण्डानन्दमुनेर्भिन्नता प्रतीयते। केशवमिश्रकृतायाः तर्कभाषाया व्याख्या गोवर्धनेन कृता। गोवर्धनकृताया व्याख्यायाः व्याख्या ऋजुप्रकाशिकाकारेण अखण्डानन्देन रचिता। गोवर्धनकालस्तु (1560 A. D.) इति प्रसिद्धम्। तस्मात् ऋजुप्रकाशिकाकारस्तत्वदीपनकारात् भिन्न एव। तस्यानुसन्धानकारस्य महादेवसरस्वत्यास्सतीर्थ्योऽयं ऋजुप्रकाशिकाकारः। महादेवसरस्वती तु षोडशशतकापरार्धोदारब्धे समये आसीत्। तस्माच्चायं भिद्यते ऋजुप्रकाशिकाकारात्। ऋजुप्रकाशिकाकर्त्रा नृसिम्हाश्रमीयस्य अद्वैतरत्नकोशस्य व्याख्या रत्नकोशप्रकाशिकानाम्नी मैसूरपुस्तकालये कृतेति दृश्यते। नृसिम्हाश्रमश्च (1550 A. D.) काले आसीदिति प्रसिद्धम्। तस्मादपि कारणात् ऋजुप्रकाशिकाकाराद्भिन्नोऽयं तत्वदीपनकार इति निश्चीयते।

1. तत्वदीपनम् (C. S. S. 1)

पञ्चपादिकाविवरणव्याख्यारूपोऽयं चतुस्सूत्रीभागपूर्णः ग्रन्थः कल्कत्तासंस्कृतमालायां विजयनगरग्रन्थमालायां वाराणसीग्रन्थमालायाञ्च मुद्रितः। विनायककृतस्तत्वदीपनसारोऽपि बरोडासूच्यां दृश्यते।

43. आनन्दपूर्णः (1275–1350 A. D.)

विद्यासागरापराभिधोऽयं आनन्दपूर्ण अभयानन्दशिष्य इति एतदीयकृतिषु अभयानन्दस्तुतेर्ज्ञायते। बृहदारण्यकोपनिषद्भाष्यवार्तिकव्याख्यायां न्यायकल्पलतिकायां "श्रीमते गुरवे श्वेतगिरये स्यात् नमस्क्रिया" इति दर्शनात् श्वेतगिरिर्दीक्षागुरुरभयानन्दो विद्यागुरुरिति च निश्चियते। आशुतोषग्रन्थमालाप्रथमपुष्पात् कृष्णानन्दसरस्वतीकृतात् शारीरकमीमांसाभाष्यवार्तिकाख्यात् ग्रन्थात् 'यदि रत्नप्रभाब्रह्मामृतवर्षिणीकारः गोविन्दानन्दः तर्हि गोविन्दानन्दस्य परमेष्ठिगुरुरानन्दपूर्णोऽयं इति, यदि रामानन्दः रत्नप्रभाकारस्तर्हि रामानन्दपरमेष्ठिगुरोर्गुरुरानन्दपूर्णोऽयमिति" निर्णीयते। आनन्दपूर्णस्य शिष्यः पुरुषोत्तमानन्दसरस्वतीति च।

एतदीयायां न्यायचन्द्रिकायां न्यायकल्पलतिकायाञ्च गोकर्णक्षेत्रनिर्देशात् गोकर्णक्षेत्रवासीति निश्चयः। न्यायचन्द्रिकाव्याख्यान्यायप्रकाशिकायां स्वरूपानन्दमुनिकृतायां "येन व्याकरणाटवी स्फुटतरं संप्लाविता लीलया" इति दर्शनात् व्याकरणेऽपि आनन्दपूर्णः प्रकाण्डपण्डित इति ज्ञायते। अमुद्रितस्य न्यायकल्पलतिकाग्रन्थस्य प्रतिलेखनकालः (1499 सं 1443 A. D.) इति (R. 5283 MGOML) ग्रन्थात् ज्ञायते। एवञ्च ग्रन्थकर्ता (1443 A. D.) कालात्पूर्वतन इति तु निश्चयः। राघवमहोदयस्तु स्वीये प्रबन्धे (A.O.R. Madras Vol. IV Part I) कामदेवभूपालकालिकोऽयं विद्यासागरः (1350 A. D.) इति प्रतिपादयति। दासगुप्तस्तु (1600 A. D.) कालिकं वदति। टैलाङ् महाशयस्तु महाविद्याविडम्बनभूमिकायां (1529–1600 A. D.) सामयिकं प्रवदति॥

1. खण्डनफक्किकाविभजनम् (B.S.S 81,109)

खण्डनखण्डखाद्यव्याख्यात्मकोऽयं ग्रन्थः विद्यासागर्यपराभिधः चैखाम्बा-मुद्रणालये मुद्रितः ।

2. टीकारत्नम् (R. 3403 M.G.O.M.L) पञ्चपादिकाविवरणव्याख्यात्मकोऽयं ग्रन्थ मद्रासनगरे लभ्यते ॥

3. न्यायचन्द्रिका (R. 2931 M.G.O.M.L, 298—299 DCTCL)

अमुद्रितोऽयं परिच्छेदचतुष्टयात्मकस्सिद्धान्तलेशसंग्रहे उद्धृतः । ग्रन्थोऽयं न्यायवैशेषिकमीमांसादिमतं खण्डयन् प्रमाणानां लक्षणं प्रतिपादयन् प्रकरणग्रन्थता मर्हति । अस्य व्याख्या न्यायप्रकाशिकाख्या स्वरूपानन्दमुनिकृता अनन्तशयने लभ्यते ॥

4. न्यायकल्पलतिका (R. 5283 MGOML)

बृहदारण्यकभाष्यवार्तिकव्याख्यात्मकोऽयं ग्रन्थः । अचिरादेव तिरुपति केन्द्रीयविद्यालयात् प्रकाशतामेष्यति ।

5. बृहदारण्यकव्याख्या

ग्रन्थोऽयं कुत्रत्य इति न ज्ञायते । परन्तु प्रबोधचन्द्रोदयव्याख्यायाः नन्दिल्लीगोपप्रणीतायाः चन्द्रिकाख्यायाः Page 204 (N.S. P. Edn.) "बृहदारण्यक भाष्ये मधुकाण्डे विद्यासागरीतोऽवगन्तव्यमिति ग्रन्थात् ज्ञायते ॥

6. पञ्चपादिकाव्याख्या (2261 DC IOL Vol. IV)

पञ्चपादिकाविवरणानुसारी भाववर्णनपरः स्वतन्त्रव्याख्यारूप इति ज्ञायते - ग्रन्थोऽयं लन्दनपुस्तकालये लभ्यते ॥

7. भावशुद्धिः 'ब्रह्मसिद्धिव्याख्या' (R 3967 MGOML) 8. समन्वयसूत्रवृत्तिः 9. न्यायसारव्याख्या (व्याख्यारत्नम्) 10. पुरुषार्थबोधः 11. प्रक्रियामञ्जरी (काशिकावृत्तिव्याख्या) 12. मोक्षधर्मव्याख्या 13. महाविद्याविडम्बनव्याख्या ॥ एते ग्रन्था अपि विरचिताः केचन मुद्रिताः अपरेऽमुद्रिताश्च ॥

44. शङ्करानन्दः (1275–1350 A.D.)

एतद्विरचितायां नृसिम्हतापनीयदीपिकायां "कृता मया वेदचतुष्टयेऽपि प्रसिद्ध-शाखोपनिषत्पदेषु । व्याख्या तया तुष्यतु सर्वजीवः आनन्दआत्माद्वय ईश्वरोऽयम् । इति, एवमितरग्रन्थेषु चानन्दात्मा नमस्कृतः । एवञ्चायं आनन्दात्मशिष्यः । विवरणप्रमेयसंग्रहे पञ्चदश्यादौ च विद्यारण्येन शङ्करानन्दः नमस्क्रियते । एवाञ्चायं विद्यारण्यगुरुः । एतदीये आत्मपुराणे "इदं गुरुस्स्वशिष्याय कावेरीतीरवासिने । उक्तवान् श्रद्धधानाय स्नेहादेव च केवलम् ॥" इति दर्शनात् द्रविडान्वयसम्भूतस्स्यादिति प्रतिभाति ।

अयं विद्यातीर्थशिष्यः विद्यारण्यगुरुश्चोलदेशीयमध्यार्जुनग्रामाभिजनश्चेति सम्प्रदायसमागता जनश्रुतिः । विद्यातीर्थस्यैव आनन्दात्मा इति नामान्तरं स्यात् । अथवा आनन्दात्मा विद्यागुरुः, विद्यातीर्थः दीक्षागुरुरिति स्यात् । सूर्यनारायणशास्त्री तु विद्यातीर्थस्यैव विद्याशङ्करतीर्थः शङ्करानन्द इति नामान्तरं इति वदति । दासगुप्तस्तु विद्यारण्यामलानन्दयोर्गुरुश्शङ्करानन्द इति वदति । शृङ्गगिरिगुरुपरम्परायां नृसिम्हतीर्थशिष्यः विद्यातीर्थ इति दृश्यते । यदि विद्यातीर्थ एव शङ्करानन्दस्स्यात्तर्हि नृसिम्हतीर्थस्यैव आनन्दात्मा इति नाम भाव्यम् । अथवा आनन्दात्मा विद्यागुरुः, नृसिम्हतीर्थः दीक्षागुरुरिति वक्तव्यं भवति । "आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुम्" इति दर्शनात् आनन्दात्मनः प्रशिष्य अमलानन्द इति तु निश्चयः । एवं "यथार्थानुभवानन्दपदगीतं गुरुं नमः" इति दर्शनात् अनुभवानन्दः गुरुरिति ज्ञायते । "सुखप्रकाशयतिनं तं नौमि विद्यागुरु"मिति दर्शनात् सुखप्रकाशः विद्यागुरुरिति च निश्चयः । तस्मात् किमयं अमलानन्दः अनुभवानन्दशिष्य उत शङ्करानन्दशिष्य इति संशय उदेति । सर्वथा सामयिक इति तु निश्चयः ।

शङ्करानन्दस्य शिष्यः सदानन्दप्रथमः । सदानन्दप्रथमस्य शिष्य अद्वैतानन्दसरस्वती । अद्वैतानन्दसरस्वत्याश्शिष्यः सदानन्दद्वितीय इति A. O. R. पत्रिकायां (Vol VI Part I) प्रतिपादितम् ।

आनन्दात्मविद्यातीर्थयोश्शिष्यः, भारतीकृष्णतीर्थविद्यारण्ययोर्गुरुः, मध्यार्जुनक्षेत्र (तिरुविडैमरुदूर्) वासी, सन्यासस्वीकारात्पूर्वं अस्य पितरौ वेङ्कटेश-सुब्बाम्बा-वाञ्छेश्वरौ इति च ज्ञायते ।

आनन्दात्मा (नृसिम्हतीर्थः)

(विद्याशङ्करः) शङ्करानन्दः (विद्यातीर्थः)

- सदानन्दः I → अद्वैतानन्दः → सदानन्दः II
- विद्यारण्यः
- अनुभवानन्दः, सुखप्रकाशः → अमलानन्दः

1. अथर्वशिर उपनिषद्दीपिका
2. अथर्वशिखा उपनिषद्दीपिका
3. अमृतनादोपनिषद्दीपिका
4. अमृतबिन्दूपनिषद्दीपिका
5. आत्मपुराणम् (उपनिषद्रत्नम्) ग्रन्थोऽयं गोपालनारायणमुद्रणालये बाम्बेनगरे मुद्रितः। अस्य व्याख्या "रामकृष्णकृता सत्प्रसवाख्या"।
6. आरुणिकोपनिषद्दीपिका
7. ईशावास्यदीपिका
8. ऐतरेयदीपिका
9. कठोपनिषद्दीपिका
10. केनदीपिका
11. कैवल्यदीपिका
12. कौषीतकीदीपिका
13. क्षुरिकदीपिका
14. गर्भदीपिका
15. छान्दोग्यदीपिका
16. जाबालदीपिका
17. तैत्तरीयदीपिका
18. नारायणोपनिषद्दीपिका
19. नृसिम्हतापनीदीपिका
20. पञ्चकोशयात्रामञ्जरी
21. परमहंसोपनिषद्दीपिका
22. प्रश्नोपनिषद्दीपिका
23. बृहदारण्यकदीपिका
24. ब्रह्मविद्योपनिषद्दीपिका
25. ब्रह्मसूत्रदीपिका (B. S. S. 91)
26. ब्रह्मसूत्रवृत्तिः (A. S. S. 67) तात्पर्यबोधिन्यपरनामायं ग्रन्थः।
27. ब्रह्मोपनिषद्दीपिका
28. भगवद्गीताव्याख्या (तात्पर्यबोधिनी) (N. S. P.)
29. महोपनिषद्दीपिका
30. माण्डूक्योपनिषद्दीपिका
31. मुण्डकोपनिषद्दीपिका
32. शिवगीताव्याख्या
33. श्वेताश्वतरदीपिका
34. श्रुतिगीताव्याख्या

35. हंसोपनिषद्दीपिका। आसु दीपिकासु काश्चन आनन्दाश्रममुद्रणालये "उपनिषदां समुच्चये" मुद्रिता। अमुद्रितास्सर्वा अपि शृङ्गगिरिमठपुस्तकालये मद्रासराजकीयहस्तलिखितपुस्तकालये च लभ्यन्ते।

45. भारतीतीर्थः (1230–1350 A. D.)

"प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं। वैय्यासिकन्यायमाला श्लोकैस्संगृह्यते स्फुटम्" इति वैय्यासिकन्यायमालायां दर्शनात् भारतीतीर्थगुरुर्विद्यातीर्थ इति ज्ञायते। "स्वमात्रयानन्दयदत्र जन्तून् सर्वात्मभावेन तथा परत्र। यच्छङ्करानन्दपदं हृदब्जे विभ्राजते तद्यतयो विशन्ति" इति विवरणप्रमेयसंग्रहे दर्शनात् (1802 A. C. O. L, 352 A. T. C. D.) इमे विद्यातीर्था एव विद्याशङ्करतीर्थ इति शङ्करानन्द इति वा प्रसिद्धा (1280 A. D.) काले शृंगगिरिपीठाधीशा आसन्। विद्यातीर्थेन च रुद्रप्रश्नस्य भाष्यं कृतम्। तस्मात् विद्यातीर्थापराभिधशङ्करानन्दस्य शिष्योऽयं भारतीतीर्थ इति निश्चीयते।

भारतीतीर्थशिष्याः—

विद्यारण्यस्यैव आश्रमस्वीकारात् पूर्वं माधवाचार्य इति नाम माधवाचार्येण "कालनिर्णये" सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं मज्जन् सज्जन सङ्गतीर्थनिपुणस्सद्वृत्तितीर्थे श्रयन्। लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम्। इति भारतीतीर्थः नमस्कृतः। एवञ्च विद्यारण्यगुरुषु भारतीतीर्थोऽपि अन्य इति सिध्यति। ब्रह्मानन्दभारत्याख्य अपरशिष्योऽपि भारतीतीर्थस्य। ब्रह्मानन्दभारत्या दृग्दृश्यविवेकस्य व्याख्या कृता। महावाक्यदर्पणकारः कृष्णानन्दभारती च भारतीतीर्थशिष्यः।

भारतीतीर्थोऽयं विद्यातीर्थादनन्तरं (1333 A. D.) काले शृङ्गगिरिमठपीठाधिप आसीदिति ज्ञायते। बहूनां ग्रन्थानां भारतीतीर्थस्स्वतन्त्रः कर्ता। कतिपयानां पञ्चदश्यादीनां ग्रन्थानां विद्यारण्येन सम्मिलितः कर्तेति च ज्ञायते।

1. दृग्दृश्यविवेकः—(B.S.S. 56)

वाक्यसुधापरनामायं ग्रन्थः नाम्नोऽनुरूपं दृश-आत्मनः, दृश्यस्य—जगतश्च मार्मिकं विवेचनं दृष्टृदृश्ययोस्सम्बन्धञ्च वर्णयति। यद्यपि ग्रन्थमेनं शङ्कराचार्यकृत-

1. अनुभूतिप्रकाश: N. S. P.

द्वादशोपनिषदां सारात्मकोऽयं विंशतिभिरध्यायैः परिमितः ग्रन्थः निर्णयसागरमुद्रणालये मुद्रितः ॥

2. अपरोक्षानुभूतिदीपिका (Mysore G.O.M.L.S. 20)

शाङ्करापरोक्षानुभूतिव्याख्यात्मकोऽयं ग्रन्थः मैसूर बिब्लियोथिकासंस्कृतमालायां मुद्रितः ॥

3. उपनिषत्कारिका: (विद्याप्रकाशः)।

ग्रन्थोऽयं 549 पञ्जाब सूच्यां दृश्यते।

4. ऐतरेयोपनिषद्दीपिका (ASS XI).

दीपिकैषा आनन्दज्ञानकृतायां ऐतरेयशाङ्करभाष्यटिप्पण्यां (Page 28) निर्दिष्टा। आनन्दज्ञानकाल (1260 – 1320 A.D.) तस्मात् भिन्नकालीनैषा कथं आनन्दगिरिणा निर्दिष्टा भवेत् एवञ्च ऐतरेयभाष्यटिप्पणं न प्रसिद्धानन्दज्ञानकृतिरिति कल्पनमुचितम्। शुद्धानन्दादिगुरुवन्दनादेरभावाच्च।

5. जीवन्मुक्तिविवेक: (ASS 20)

गद्यपद्यात्मकैः पञ्चभिः प्रकरणैः पूर्णेऽस्मिन् ग्रन्थे जीवन्मुक्ति-वासनाक्षय-मनोनाश-स्वरूपसिद्धिप्रयोजनविद्वत्सन्याससम्बद्धाः विषयाः विचारिताः। विरक्तिद्वैविध्यं, न्यासद्वैविध्यं, मुक्तिद्वैविध्यं, तयोर्भेदञ्च वर्णयन्नयं ग्रन्थः जीवतो मुक्तस्य च स्वाभाविकभेदं च वर्णयन् प्रकरणग्रन्थतामर्हति। ग्रन्थोऽयं वाराणस्यां आनन्दाश्रमे च मुद्रितः। अस्य व्याख्याः—अच्युतशर्मकृता, पूर्णानन्दकृता दीपिका, सदेकानन्दकृतरसाराख्यश्च वर्तन्ते ॥

6. तैत्तरीयलघुदीपिका (R 1968 MGOML)

7. नृसिम्होत्तरतापिनीदीपिका (R. 3615 MGOML)

8. पञ्चदशी (N. S. P.)

अद्वैतवेदान्तस्य परमोपकारी पञ्चदशभिः प्रकरणैः पूर्णोऽयं प्रकरणग्रन्थः सव्याख्यः निर्णयसागरमुद्रणालये मुद्रितः। ग्रन्थोऽयं विद्यारण्यभारतीतीर्थयोरुभयोरपि कृतिरिति सम्प्रदायः। पञ्चदशीव्याख्यात्रा निश्चलदासस्वामिना "प्राथमिकादश परिच्छेदा एव विद्यारण्यनिर्मिताः" इति प्रतिपाद्यते। रामकृष्णेन तु सप्तम परिच्छेदारम्भे एव भारतीतीर्थकृत इति निर्दिश्यते। अपरे तु प्रथमपरिच्छेदषट्कं विद्यारण्यकृतं, अन्यत् परिच्छेदनवकं भारतीतीर्थकृतमिति प्रतिपादयन्ति। अस्य व्याख्याः—निश्चलदासकृतः वृत्तिप्रभाकरः, रामकृष्णकृता तात्पर्यबोधिनी (पददीपिका) रामानन्दकृता विशुद्धदृष्टिः, सदानन्दकृता व्याख्या, अच्युतशर्मकृता पूर्णानन्देन्दुकौमुदी, लिङ्गनसोमयाजिकृता कल्याणपीयूषाख्या, अज्ञातकर्तृका तत्वबोधिनी च विद्यन्ते।

9. ब्रह्मविदाशीर्वादपद्धतिः

द्विपञ्चाशद्भिः आशीर्लिङ्प्रत्ययान्तैः भूधात्वन्तैर्वाक्यैः अद्वैतसिद्धान्तान् गुर्वनुग्रहप्रणाल्या प्रतिपादयन्नयं ग्रन्थः विद्याविनोदिनीमुद्रणालये तञ्जपुरे मुद्रितः।

10. बृहदारण्यकटीका 127 नासिकसूच्यां दृश्यते।

11. बृहदारण्यकवार्तिकसारः (B. S. S. 205, 208, 243, 244,)

यद्यपि मुद्रितात् ग्रन्थादस्मात् विद्यारण्यः कर्तेति न प्रतीयते। तथापि व्याख्यायां "येनोद्धृतो वार्तिकाब्धेस्सारः विबुधतुष्टिदः। अविद्यातज्जतापघ्नं विद्यारण्यगुरुं भजे" इति दृश्यते। अज्ञातकर्तृका वार्तिकसारव्याख्या वार्तिकसारसंग्रहापरनाम्नी (397 T. C. D.) दृश्यते। महावाक्यविवरणमपि अस्य कृतिरिति वदन्ति। परन्तु पञ्चदश्यन्तर्गतमिति भाति।

12. विद्यारत्नदीपिका (2992 G. V. B. S.)

13. विवरणप्रमेयसंग्रहः (V. N. S. S. 7.)

अस्यैव विवरणोपन्यास इति नामान्तरमिति सिद्धान्तलेशसंग्रहात् (Page 68) ज्ञायते। पञ्चपादिकाविवरणार्थान् संगृह्णात्ययं ग्रन्थः। विजयनगरसंस्कृतमालायां मुद्रितः।

14. सर्वदर्शनसंग्रहः 15. पराशरमाधवः 16. कालमाधवः 17. शङ्करदिग्विजयकाव्यम्। ग्रन्थोऽयं न विद्यारण्यकृतिः। परन्तु अभिनवकालिदासकृतिरिति सिद्धान्तः।

18. सङ्गीतसारः

" सङ्गीतसारं समवेक्ष्य विद्यारण्याभिधश्रीचरणप्रणीतम् " इति गोविन्ददीक्षितकृतायां सङ्गीतसुधायां द्वितीयेऽध्याये दर्शनात्, चतुर्दण्डीप्रकाशिकायां वीणाप्रकरणे निर्देशाच्च ज्ञायते ॥

47. माधवमन्त्री (1300–1400 A.D.)

विजयनगरराजसभायां माधवाचार्यत्रयमासीत् । तेषु विद्यारण्यापरनामा माधवाचार्य एकः । सायणमाधव अपरः । तृतीयः प्रचण्डपण्डितः प्रतापी योद्धा माधवनामा मन्त्री। सर्वेषां नामसाम्यात् कस्यचित्कार्यकलाप अन्यस्मिन् आरोपितो भवति । परन्तु यपिग्राफिका कर्नाटिका (Vol 7) शिकारपुर (Page 281 एवं (Vol 8) प्रमाणात् माधवमन्त्री माधवाचार्याद्भिन्न इति निश्चीयते ।

माधवमन्त्री आङ्गिरसगोत्रोत्पन्नः । चावुण्डोऽस्य पिता । माचाम्बिका अस्य माता । उपनिषन्मार्गप्रवर्तकाचार्य इति बिरुदभूषितः । काशीविलासक्रियाशक्तिशिष्यः । शिवाद्वैततत्त्ववेत्ता सन्नपि शङ्कराद्वैतपक्षपातीति सूतसंहिताव्याख्या तात्पर्यदीपिकायाः ज्ञायते । अत्र प्रमाणम् " गोत्रे योऽङ्गिरसां प्रचण्डतपसश्चावुण्डपृथ्वीसुरश्रेष्ठादुद्भवमेत्य नीतिसरसौ दत्तां धियं धैषणीम् । सूरिस्सन्नपि सर्वदा नवमनःप्रह्लाददानोचितां यद्भूयः कवितां व्यनक्ति तनुते नो कस्य तेनाद्भुतम् ॥ I ॥
" यः कृत्वाखिलभूतमौपनिषदं दूर्वादकोन्मदव्यालतक्षदुर्नयोग्रगह्वरोत्सादेन वर्त्मोज्ज्वलम् । ब्राह्मं धाम सुदूरमप्यविरतं प्रस्थापयन्नप्रक्रमात् आर्यो स्वेन बुधैरुपनिषन्मार्गप्रतिष्ठागुरुः " ॥ II ॥ यः साक्षाद्गिरिशावतारवपुषः काशीविलासेशितुस्सोल्लासाद्भुतया कटाक्षकलया नीतः प्रथां शाम्भवीम् । जेता शक्तिभिरीशितात्मभिरिमं चामुष्य लोकं जवात् आजैषीत् कियतोऽपरान्तविषयान् यत्सास्तु कास्य स्तुतिः ॥ III ॥ " तस्या (बुक्कराज) स्ति शस्तयशसो नयशौर्यमुख्यैः ख्यातो गुणैर्जगति माधव इत्यमात्यः यो ब्रह्मजिह्मदमनाधिकृतः पवित्रं क्षत्रं च जैत्रमभयाय भुवो बिभर्ति (Vol 7) ' प्रज्ञाबलेन गुरुमप्यतिसन्दधानो मन्त्री महानजनि माधवनामधेयः " । (Vol 8)

माधवमन्त्री हरिहरप्रथमस्यावरजस्य मारप्पस्यापि मन्त्री आसीदिति (1347 A.D.) वर्षीयात् शिलालेखात् ज्ञायते । मारप्प–बुक्कप्रथम–बुक्क-


द्वितीयानाञ्च मन्त्री आसीदिति ज्ञायते । माधवमन्त्री न केवलं विद्वान् परन्तु शौर्यसम्पन्नः योद्धा शत्रुगणमर्दनकारी च । अस्य निधनकालः 1391 A.D. इति ।

माधवाचार्य-माधवमन्त्रीभेदतालिका

माधवाचार्यः	माधवमन्त्री
भारद्वाजगोत्रजः	आङ्गिरसगोत्रजः
मायणश्रीमत्योः पुत्रः	चावुण्डमाचाम्बिकयोः पुत्रः
सायणभोगनाथभ्राता	—
विद्यातीर्थभारतीतीर्थ-	काशीविलासक्रियाशक्तिशिष्यः
श्रीकण्ठशिष्यः	—
पराशरमाधवीयादिकर्ता	तात्पर्यदीपिका B. M. P.
सूतसंहिताव्याख्यात्मकोऽयमद्वैतग्रन्थः	बालमनोरमामुद्रणालये मुद्रितः ॥

48. लक्ष्मीधरः (1406–1500 A.D.)

सरस्वतीमहालयपुस्तकालयमद्रपुरीसर्वकारपुस्तकालयस्थहस्तलिखितपुस्तकप्रामाण्यात् (7641, 4269, 6930, T-ML R No. 1424, MGOML) लक्ष्मीधरद्वयमासीदिति ज्ञायते । चल्कूरिवंश्यः काश्यपगोत्रजः ऋग्वेदी मीमांसाद्वयपारगः कविः, आश्रमस्वीकारादनन्तरं रामानन्द इति प्रसिद्धः कृष्णाश्रमपादशिष्यः लक्ष्मीधरः कश्चन । अस्य भ्राता कोण्डुभट्टः षड्दर्शिनीविवेककारः । अस्य ज्येष्ठभ्रातृपुत्रेण यज्ञनारायणेन शास्त्रदीपिकाव्याख्या प्रभामण्डलम्, गीतगोविन्दव्याख्या श्रुतिरञ्जनी, जयदेवीयप्रसन्नराघवव्याख्या–अभीष्टार्थदायिनी षड्भाषाचन्द्रिका च कृताः । अनेन लक्ष्मीधरेण कृता इष्टार्थकल्पवल्लीनाम्नी अनर्घराघवव्याख्या सरस्वतीमहालये लभ्यते ।



अद्वैतमकरन्दकर्ता तु नरसिम्हसूरिपुत्रः अनन्तानन्दरघुनाथयतिशिष्योऽयं लक्ष्मीधरः सन्यासग्रहणादनन्तरं कृष्णेन्द्रनाम्ना प्रसिद्ध इति (7641 Mss TSML R. 1424 MGOML) ज्ञायते अस्य गुरोरनन्तानन्दरघुनाथस्य अनन्तानन्दगिरिरित्यपरं नाम । अनन्तान्दगिरिकालः (1380 A.D.) । लक्ष्मीधरोऽयं सायणभोगनाथविद्यारण्यानां भगिन्याः सिम्हलानाम्न्याः पुत्रः । कर्णाटककविमधुगवासी चायं अनन्तानन्दगिरिशिष्यः लक्ष्मीधरः देवरायप्रथमस्य राज्यशासनकाले आसीत् । देवरायप्रथमस्य राज्यशासनकालः (1406 A.D.) इति लक्ष्मीधरोऽयं चतुर्दशशतकप्रारम्भकाले आसीदिति श्रीकण्ठशास्त्रिभिः भारतीयैतिहासिकत्रैमासिकपत्रिकायां (IHQ Vol XIV) प्रतिपादितम् ।

एतत्कृतायाः भगवन्नामकौमुद्याः आपदेवात्मजेन अनन्तदेवभट्टेन व्याख्या कृता । भट्टवंशश्च (1650–A.D.) काले वाराणस्यामासीत् । अनन्तदेवस्य कालेऽपि (1600–1700 A.D.) इति प्रतिपादितम् । भारतीतीर्थकृतायाः वाक्यसुधायाः व्याख्या तच्छिष्येण ब्रह्मानन्दभारत्या कृता । तेन च 46 पुटे लक्ष्मीधरः निर्दिष्टः । ब्रह्मानन्दभारत्याः कालस्तु (1325–1425 A.D.) इति निश्चयः । तस्मादयं लक्ष्मीधरः (1406 A.D.) काल एवासीदिति निश्चीयते । चतुर्दशशतकान्तादारब्धे पञ्चदशशतकावसाने काले आसीदिति तु निश्चयः ।

1. अद्वैतमकरन्दः (V. V. P.)

प्रकरणग्रन्थोऽयं वाणीविलासमुद्रणालये श्रीरङ्गनगरे मुद्रितः । अस्य व्याख्याः–मूलकारेण कृता व्याख्या, स्वयम्प्रकाशयतिकृता । रसाभिव्यञ्जिका, पूर्णानन्दतीर्थकृता-व्याख्या 328 नार्तवेस्टग्रन्तसूच्यां दृश्यते । वंशीधरकृतव्याख्याग्रन्थोऽयं लालाचन्द्रसूच्यां दृश्यते । वासुदेवसार्वभौमकृता-अपरा काचन व्याख्या (28038, D.C. B.S.V. Vol. VII p. 128) राजेन्द्रलालसूच्यां दृश्यते । हरिरामकृता व्याख्या नार्तवेस्ट सूच्यां लभ्यते । विज्ञानदीपिकानाम्नी अज्ञातकर्तृका कामकोटिपुस्तकालये लभ्यते । अज्ञातकर्तृका काचन व्याख्या उपनिषद्ब्रह्मेन्द्रसूच्यां दृश्यते ।

भगवन्नामकौमुदी, भागवतव्याख्या—अमृततरङ्गिणी च अनेन कृताविति ज्ञायते ।

49. सदानन्दसरस्वती (1600–1600 A.D.)

शङ्करानन्दस्य प्रथमसदानन्दस्य च प्रशिष्यः अद्वयानन्दशिष्यश्चायं सदानन्दसरस्वती नृसिम्हाश्रमिसामयिकः षोडशशतकीय इति निश्चयः ।

1. वेदान्तसारः (N. S. P.)

विभिन्नमतसिद्धान्तोपवर्णनपूर्वकं अद्वैतमतस्य श्रैष्ठ्यत्वमुपादेयत्वञ्च वर्णयन्नयं सव्याख्यः प्रकरणग्रन्थः निर्णयसागरमुद्रणालये वाणीविलासमुद्रणालये वेङ्कटेश्वरमुद्रणालये च मुद्रितः । अस्य व्याख्या-आपदेवकृता बालबोधिनी, नृसिम्हसरस्वतीकृता सुबोधिनी, रामचन्द्रानन्दकृता ब्रह्मबोधिनी, रामतीर्थकृता विद्वन्मनोरञ्जिनी, रामशरणशास्त्रिकृता भावबोधिनी च ।

2. वेदान्तसिद्धान्तसारसंग्रहः (R. 1939 D. MGOML)

अद्वैतसिद्धान्ते विभिन्नग्रन्थप्रतिपादितान् सिद्धान्तान् सङ्गृह्णाति । अमुद्रितोऽयं अडयारपुस्तकालये अनन्तशयनपुस्तकालये मद्रासराजकीयपुस्तकालये च लभ्यते ।

50. नृसिम्हाश्रमी (1500–1600 A.D.)


जगन्नाथाश्रममुनेश्चित्र चरणरेणवः । वाचामगोचरेऽप्यर्थे मूकं वाचालयन्ति माम् ॥
कल्याणगुणसम्पूर्णं निर्वाणविभवालयम् । गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ॥

इति दर्शनात् नृसिम्हाश्रमिणः विद्यागुरुर्जगन्नाथाश्रमः, दीक्षागुरुर्गीर्वाणेन्द्रसरस्वतीति निश्चीयते । काञ्चीमण्डलान्तर्गतपुरुषोत्तमपुरवासीति ज्ञायते । अयमप्पय्यदीक्षितगुरुः काञ्चीमण्डलान्तर्गतचोलङ्गिपुरवासीति आश्रमस्वीकारात्पूर्वं सच्चिदानन्दशास्त्रीत्यस्यैव नामान्तरमिति वदन्ति । अयमेव नृसिम्हाश्रमी सगुणभक्तान् अप्पय्यदीक्षितान् निर्गुणभक्तान् अद्वैतनिष्ठानकरोदिति सम्प्रदायः ।

अस्य सामयिकेषु वेदान्तसारकर्ता सदानन्दसरस्वती, प्रकाशानन्दः, नानादीक्षितः, अद्वैतानन्दः, भट्टोजिदीक्षितः, अप्पय्यदीक्षितपिता रङ्गराजाध्वरी च

प्रसिद्धाः। अस्य शिष्येषु प्रसिद्धाः नारायणाश्रमधर्मराजाध्वरिगुरुवेङ्कटनाथ भट्टोजिदीक्षितकनीयसभ्राता (रंगोजिभट्टः) धर्मराजाध्वरी च।

अनेन अब्दे वेदवियद्रमेन्दुगुणिने विक्रमाब्दे (1603–1547 A. D.) अद्वैतदीपिका रचितेति ज्ञायते। एवञ्च षोडशशतके नृसिम्हाश्रमी अतिप्रसिद्धः अद्वैतवेदान्ताचार्येष्वतिप्रतिष्ठितः वेदान्तसिद्धान्तसाराभिज्ञ इति प्रसिद्ध इति निश्चीयते।



1. अद्वैतदीपिका (P. S. B.)

ग्रन्थोऽयं साक्षिविवेकविभागप्रक्रियौपनिषदर्दीपिकानन्ददीपिकाख्यैः परिच्छेदैः परिच्छिन्नः पण्डितग्रन्थमालायां वाराणस्यां मुद्रितः। अस्य व्याख्याः—नारायणाश्रमकृतं विवरणम्, सदानन्दव्यासवरकृता व्याख्या, सुन्दरराजकृता प्रकाशाख्या च।

2. अद्वैतसिद्धान्तविजयः (R. 165 C. MGOML)

अमुद्रितोऽयं मद्रासराजकीयपुस्तकालये अज्ञातकर्तृकव्याख्यया सह लभ्यते।

3. अद्वैतानुसन्धानम्—ग्रन्थोऽयममुद्रितः वङ्गालराजकीयग्रन्थसूच्यां जयपुरपोटीखाना सूच्याञ्च दृश्यते।

4. तत्वदीपनम्—(D. 4525 MGOML)

मल्लणाराध्यकृताभेदरत्नस्य व्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः मद्रासराजकीयपुस्तकालये लभ्यते। अखण्डानन्दमुनिकृताद्भिन्नोऽयं ग्रन्थः। अस्य कर्ता किमयं नृसिम्हाश्रम उतान्य इति न निर्णेतुं पार्यते।

5. तत्वबोधिनी—(S.B.T.S. 69)


संक्षेपशारीरकव्याख्यात्मकोऽयं ग्रन्थस्सरस्वतीभवनग्रन्थमालायां मुद्रितः।

6. तत्वविवेकः—(P.S.B)

ग्रन्थोऽयं नव्यनैय्यायिकसरण्या विवरणप्रस्थानानुसारं अद्वैतसिद्धान्तान् प्रतिपादयन् वैशेषिकादिमतं खण्डयति। ग्रन्थोऽयं पण्डितग्रन्थमालायां मैसूरराजकीयग्रन्थमालायाञ्च मुद्रितः। अस्य व्याख्या मूलकारेण कृता तत्वविवेकदीपनापराभिधा अद्वैतरत्नकोशनाम्नी मुद्रिता। अस्य भट्टोजिदीक्षितकृता "वाक्यमाला" नाम्नी व्याख्याप्यस्तीति ज्ञायते।

7. तत्वविवेकदीपनम्—

तत्वविवेकदीपननामायं ग्रन्थस्तत्वविवेकव्याख्यात्मकः। अस्यैव "अद्वैतरत्नकोश" इत्यपि नामान्तरम्। मुद्रितश्चायं ग्रन्थः मैसूरराजकीयपुस्तकालयमालायाम्। अस्य व्याख्याः—अग्निहोत्रभट्टकृता अद्वैतरत्नकोशपूरणी, अखण्डानन्दयतिकृता अद्वैतरत्नकोशदीपिका, अन्नम्भट्टकृता व्याख्या, करुहस्तीशयज्वकृता भावप्रकाशिका, रामाध्वरिकृता अद्वैतरत्नकोशपालिनी, अनुभवानन्दकृता कोशरत्नप्रकाशाख्या, शाश्वतानन्दतीर्थकृता भावार्थप्रकाशिका च।



8. तत्वम्पदार्थशोधनप्रकारः (7507 T. S. M. L.) अपूर्णः अमुद्रितश्चायं ग्रन्थः सरस्वतीमहालये लभ्यते।

9. नृसिम्हविज्ञापना (S. B. T. S. 52)

पद्यमयोऽयं ग्रन्थ अद्वैतवेदान्तसाहित्यरत्नम् । ग्रन्थेऽस्मिन् जीवेश्वरसाक्षिणां स्वरूपम्, बिम्बप्रतिबिम्बवादः अविद्यास्वरूपः, सर्वश्रुतीनामद्वैते ऐकमत्यादिकं सरलया शैल्या नृसिंहप्रार्थनामुखेन निरूपितम् । सरस्वतीभवनग्रन्थमालायां मुद्रितश्च ।

10. पञ्चपादिकाटीका (R. 2626 MGOML)

वेदान्तरत्नकोशापराभिध अपूर्णः अमुद्रितश्चायं ग्रन्थः मद्रासपुस्तकालये सरस्वतीमहालये मैसूरपुस्तकालये च लभ्यते ।

11. पञ्चपादिकाविवरणव्याख्या (D. 4669 MGOML)

भावप्रकाशिकापरनामायं ग्रन्थः अडयारपुस्तकालये मैसूरपुस्तकालये मद्रासपुस्तकालये च लभ्यते ।

12. भावाज्ञानप्रकाशिका (23. G. 10. प. 18 AL)

13. मधुमञ्जरी (7329 T. S. M. L.)

मनीषापञ्चकव्याख्यात्मकोऽयं ग्रन्थस्सरस्वतीमहालये लभ्यते ।

14. भेदधिक्कारः (B. S. S. 86)

नाम्नैव प्रतिपादितविषयोऽयं ग्रन्थ अन्तःकरणातिरिक्त अहमितिप्रतीयमानो जीवः परस्मात् न भिद्यते चेतनत्वात्, पदार्थत्वात् ब्रह्मवदिति प्रयोगमुखेन मध्वसिद्धान्तप्रतिपादितं नैय्यायिकवैशेषिकसिद्धान्तसाधितञ्च भेदवादं तेषां युक्त्यैव धिक्करोति । अस्य व्याख्या नारायणाश्रमकृता कालहस्तीशकृता च ।

भेदधिक्कारः
- विवृतिः (कालहस्तीशः)
- सत्क्रिया (नारायणाश्रमः)
  - उज्ज्वला (रामभद्रानन्दः)

15. वाचारम्भणप्रकरणम् (R. 2251 MGOML)

16. वैदिकसिद्धान्तसंग्रहः (D. 4750 MGOML)

अपूर्णः अमुद्रितश्चायं ग्रन्थश्शिवविष्णुरुद्राणां परस्मात् ब्रह्मण एव सद्गुणरूपेणाविर्भूतत्वं वर्णयन् मूर्तित्रयाद्वैतं वर्णयति । ग्रन्थोऽयं मद्रासराजकीयपुस्तकालये लभ्यते ।

51. अप्पय्यदीक्षितः (1520–1593 A. D.)

संस्कृतवाङ्मये विशेषतः दक्षिणदेशे च अप्पय्यनाम्ना बहवः प्रसिद्धा आसन् । तेषु प्रसिद्धतरौ द्वौ यावधिकृत्य नात्र विचारः क्रियते । प्रसिद्धतमः चतुरधिकशताधिकग्रन्थप्रणेतृत्वेन प्रसिद्धः अद्वैतपक्षपाती अप्पय्यदीक्षित एवात्र विचारार्हः ।

अप्पय्यदीक्षितस्य पितामहः—

अप्पय्यदीक्षितस्य पितामह आचान् दीक्षितेत्यपरनामकः आचार्यदीक्षितः । काञ्चीपुरसमीपवर्तिनि अडयप्पलनाम्न्यग्रहारे उवास । वक्षस्थलाचार्य इत्यपि नामान्तरमस्य । वक्षस्थलाचार्य इति नाम विजयनगराधीश्वरेण कृष्णराजमहीपतिना प्रदत्तमिति वदन्ति । कदाचित् विजयनगराधीशः सपत्नीकः सपरिवारः काञ्चीनगरमाजगाम । तदोपासीनवरदराजस्य महीपतेः पत्नीं वरदराजसन्निधौ वीक्ष्य वक्षस्थलगणपत्युपासकेन स्वीकृतनृपतिप्रार्थनेन आचार्यदीक्षितेन एवमावेदितम् —"कञ्चित् काञ्चनगौराङ्गीं वीक्ष्य साक्षादिव श्रियम् । वरदस्संशयापन्नः वक्षस्थलमवैक्षत । इति तादृशमुपश्लोकं श्रुत्वा कामनामोदितमानसेन चमत्कृतमनसा राज्ञा "वक्षस्थलाचार्य" इत्याहूत आचार्यदीक्षितः । प्रतिपादितश्चैतत् अप्पय्यदीक्षितैश्चित्रमीमांसायां सन्देहालङ्कारध्वन्युदाहरणावसरे । आचार्यदीक्षित अद्वैतचित्सुखमहाम्बुधिमग्नभाव इति च अप्पय्यदीक्षितैर्न्यायरक्षामणौ आवेदितः । आचार्यदीक्षितस्य द्वे भार्ये आस्ताम् । तयोः प्रथमा सजातीया । द्वितीया श्रीवैष्णवकुलतिलकश्रीवैकुण्ठाचार्यवंश्यश्रीरङ्गराजाचार्यदुहिता विप्रकन्या तोतारम्बीनाम्नी । अस्यामाचार्यदीक्षितस्य पुत्राश्चत्वार अभूवन् । तेषु मातामहप्रार्थनाप्रसन्नपितृदत्तरङ्गराजाभिधानः रङ्गराजाध्वरीति प्रसिद्धः कश्चन ।

अप्पय्यदीक्षितपिता रङ्गराजाध्वरी—

अद्वैतमुकुर–विवरणदर्पणादिप्रबन्धकृत् सर्वविद्याविशारदश्च । प्रपञ्चितश्चैतत् न्यायरक्षामणौ अप्पय्यदीक्षितैः, नलचरिते नीलकण्ठदीक्षितैश्च । अस्य द्वौ

पुत्रावास्ताम् । तयोर्ज्यायान् अप्पय्यदीक्षितः कनीयानाचार्यदीक्षितः । यस्य नाम कालक्रमेण विकृतिं गतं आचान् दीक्षित इत्यापि व्यवहृतम् ।

अप्पय्यदीक्षितस्य नामान्तराणि—

स्वपित्रा रङ्गराजाध्वरिणा पुत्रः 'अप्पा' इति 'अय्या' इति सस्नेहमाह्वानात् अप्पय्यदीक्षित अप्पदीक्षित इति व्यवहृतः । परन्तु पित्रा नामकरणसंस्कारकाले "विनायक" इति नाम कृतमिति वदन्ति । अप्पय्यदीक्षितस्य "अवधानियज्वा" इत्यपि नामान्तरमिति अप्पय्यदीक्षितकृतायाः न्यायसिद्धान्तमञ्जरीव्याख्यायाः ज्ञायते इति दासगुप्तः (H. I. D. II 230)

अप्पय्यदीक्षितगुरवः—

अप्पय्यदीक्षितस्स्वपितुरेवावाप्तसर्वविद्य इति रंगराजाध्वर्येवास्य गुरुरिति सार्वजनीनम् । परन्तु "अप्पय्यदीक्षितैर्वाराणस्यां कस्मिंश्चित् धार्मिके विषये दत्तायां व्यवस्थायां स्वपित्रा रंगराजाध्वरिणा साकं स्वेन नृसिम्हाश्रमिणां सविधे शास्त्राध्ययनं कृतमित्युक्तमिति सूर्यनारायणशुक्लमहोदयैर्नृसिम्हविज्ञपनाभूमिकायां लिखितम् । एवञ्च नृसिम्हाश्रमी चास्य गुरुरिति केचित् । प्राकृतमणिदीपिकाख्यः ग्रन्थः न प्रसिद्धाप्पय्यदीक्षितस्य कृतिरिति केचित् । केचित्तु तां प्रसिद्धदीक्षितीयां मत्वा एवं वदन्ति प्राकृतमणिदीपिकायां "ध्यायामि पादपद्मे सच्चिदानन्दशास्त्रिण" इति दर्शनात् सच्चिदानन्दशास्त्रीत्यपरो गुरुरप्यस्येति । अपरे आश्रमस्वीकारात्पूर्वं नृसिम्हाश्रमिण एव सच्चिदानन्दशास्त्रीति नामान्तरमिति वदन्ति ।

अप्पय्यदीक्षितकालः—

शिवानन्दयोगिरचिते अप्पय्यदीक्षितचरिते अप्पय्यकाल (1553 A. D.) दृश्यते । भट्टारमजगमजयन्तपण्डितेन (1564 A. D.) इति वर्ण्यते । (1520 A. D.) इति आंग्लविमर्शकवरेण्या वदन्ति । (1550 A. D.) इति ब्रह्मविद्यापत्रिकायां प्रतिपादितम् । मानवल्लीगङ्गाधरशास्त्रिणश्च (1550 A. D.) इत्येव वदन्ति । हरिहरशास्त्रिणस्सिद्धान्तलेशसंग्रहभूमिकायां (1587 A. D.) इति वदन्ति । अप्पय्यदीक्षितेन्द्रविजयकाव्ये (18-9-1553 A. D.) इति दृश्यते । हालास्यनाथशास्त्रिभिः कुवलयानन्दभूमिकायां (1552–1626 A. D.) इति प्रतिपादितम् । भारतीयशिलाशासनपत्रिकायाः (Ep. Ind. Vol XII 1554-1626 A. D.) इति ज्ञायते । षोडश शतकमध्यकालिक इति दासगुप्तः (H. I. P. Vol II. P. 230) ।

इतिहास-शिलाशासन-सम्प्रदाय-साहित्यजन्मपत्रादिप्रमाणात् अप्पय्यदीक्षितकाल 1520–1593 A. D.) इति अप्पय्यदीक्षितवंश्यैर्महालिङ्गशास्त्रिभिः प्रतिपादितम् (J. O. R. Vol III P. 160)

अप्पय्यदीक्षिताः चिदम्बरक्षेत्रं गता चिदम्बरेशसन्निधौ "आभाति हाटकसभानटपादपद्मज्योतिर्मयो मनसि मे तरुणारुणोऽयमिति"

"चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलम् ।
वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा ।
सुताश्च विनयोज्वलास्सुकृतयश्च काश्चित्कृताः ।
न किञ्चिदहं अर्थये शिवपदं दिदृक्षे परम् ॥"

इति वदन्त एवैक्यं गताः, प्रार्थनानुपदं सायुज्यसिद्धिरिति सम्प्रदायसमागता कथा श्रूयते । तस्मात् अप्पय्यदीक्षितजीवनकाल मार्कि द्वासप्ततिरिति निर्णीयते ।

अप्पय्यदीक्षितभ्राता आचार्यदीक्षितः—

अप्पय्यदीक्षितस्य कनीयसः भ्रातुर्नाम आचार्यदीक्षित इति । अप्पय्यदीक्षितस्य काचन कनीयसी भगिनी आसीदित्यपि ज्ञायते । आचार्यदीक्षितस्य पञ्च पुत्रा आसन् । तेषु द्वितीयः पुत्रः नीलकण्ठदीक्षितनामा प्रसिद्धः नीलकण्ठविजयचम्प्वादिकर्ता ।

अप्पय्यदीक्षितधर्मपत्नी—

अप्पय्यदीक्षितभार्या मङ्गलनायिकानाम्नी प्रसिद्धानां रत्नखेटश्रीनिवासदीक्षितानां पुत्रीति ज्ञायते ।

अप्पय्यदीक्षितापत्यानि—

अप्पय्यदीक्षितस्य नीलकण्ठ–उमामहेश्वर–चन्द्रावतंसनामानः त्रयः पुत्राः मरकतवल्ली–मङ्गलाम्बाख्ये द्वे कन्ये चोदभवन् ।

अप्पय्यदीक्षितशिष्येषु प्रधानतमाः—

अप्पय्यशिष्येषु प्रसिद्धः भट्टोजिदीक्षितः । अप्पय्यदीक्षितप्रेरणया तत्त्वकौस्तुभं शाङ्करभाष्याब्धेरुद्धधार । नीलकण्ठदीक्षितोपि प्रसिद्धः ।

अप्पय्यदीक्षितसामयिकाः केचन विद्वांसः—

विद्यापरिणयजीवानन्दादिप्रणेता आनन्दरायमखी, रत्नकेतूदयसुभद्रापरिणयादिप्रबन्धकारः वीरराघवयज्वापरनामा बालकविः, मल्लिकामारुतादिप्रकरणकर्ता उद्दण्डापरनामा सार्वभौमकविः, चन्द्रगिरिमहीपतिगुरुः श्रीवैष्णवः ताताचार्यः, भाट्टदीपिका—भाट्टरहस्यादिकृत् वारणसीवासी पण्डितराजजगन्नाथपितृपेरुभट्टगुरुः सन्यासस्वीकारादनन्तरं श्रीधरेन्द्रयतीति प्रसिद्धश्च खण्डदेवः, यात्राप्रबन्धकृत् समरपुङ्गवदीक्षितः, कमलिनीकलहंस—आनन्दराघवभावनापुरुषोत्तम—भैष्मीपरिणय—काव्यदर्पण—तन्त्रशिखामणिप्रभृतिग्रन्थनिर्माता सत्यमङ्गलवासी रत्नखेटदीक्षितपुत्र राजचूडमणिः, विश्वगुणादर्शचम्पू—प्रद्युम्नानन्दनाटकादिकृत ताताचार्यभागिनेयः वेङ्कटाध्वरी, शतदूषणीव्याख्याकारः दोड्डयाचार्यः नीलकण्ठदीक्षितमन्त्रगुरुर्गीर्वाणयोगी, वार्तिकाभरणकर्ता नीलकण्ठदीक्षितविद्यागुरुर्वेङ्कटेश्वरमखी च अप्पय्यदीक्षितसामयिकाः ॥

केचित्तु रसगङ्गाधर—चित्रमीमांसाखण्डनकारः सम्राट्शाहजहाँप्रेमपात्रं जगन्नाथपण्डितोऽपि, ब्रह्मतत्त्वप्रकाशिकाकारस्सदाशिवब्रह्मेन्द्रश्च सामयिकाविति वदन्ति ।

एतादृशं शिवाद्वैतपक्षपातिनं सर्वतन्त्रनिष्णातं प्रकाण्डपण्डितं अत्युत्कटसाधकं अप्पय्यदीक्षितं नृसिम्हाश्रम्येव अद्वैतपक्षपातिनमद्वैतप्रचारबद्धदीक्षञ्चा कुर्वन्निति सम्प्रदायः । अप्पय्यदीक्षितेन यज्ञेश्वरदीक्षितेन साकं न्यायशास्त्रमध्यधीतमिति जानकीनाथकृतन्यायसिद्धान्तमञ्जर्याख्यग्रन्थस्य व्याख्याया ज्ञायते । अप्पय्यदीक्षितश्चतुरधिकशताधिकप्रबन्धकर्ता भारद्वाजगोत्रज इति प्रसिद्धिः । तेषु अद्वैतग्रन्थाः ।

1. सिद्धान्तलेशसङ्ग्रहः (A. M. S. 5)

शङ्करादारब्धानां नृसिम्हाश्रम्यन्तानां आत्मैक्यसिद्धौ सन्नद्धानां अद्वैताचार्याणां प्रक्रियास्सिद्धान्तांश्च प्रतिपादयन्नयं ग्रन्थः न केवलं सिद्धान्तप्रदर्शनेन परन्तु ऐतिहासिकदृष्ट्यापि बहूपकरोति । अद्वैतमञ्जरीग्रन्थमालायां मुद्रितश्च । अस्य व्याख्याः-अच्युतकृष्णानन्दकृता कृष्णालङ्काराख्या, राघवानन्दकृता सिद्धान्तकौमुदी, रामचन्द्रपूज्यपादकृता सिद्धान्तसूक्तिमञ्जरी, विश्वनाथकृता व्याख्या, वासु-

देवब्रह्मकृतस्संग्रहसारश्च विद्यन्ते । दासगुप्तेन (H. I. P. Vol II 220) गङ्गाधरेन्द्रसरस्वत्या सिद्धान्तबिन्दुसीकर इति, रामचन्द्रयज्वना गूढार्थप्रकाश इति, विश्वनाथतीर्थेन धर्मय्यदीक्षितेन च व्याख्याः कृता इति प्रतिपाद्यते । P. P. शास्त्रिणश्च सिद्धान्तलेशसंग्रहस्य मधुसूदनसरस्वत्या काचन व्याख्या कृतेति (7535 DC. T. S. M. L. Vol XII) ग्रन्थे प्रतिपादयन्ति ।

2. न्यायरक्षामणिः (S. V. P.)

शारीरकन्यायरक्षामणिरिति प्रसिद्धोऽयं ग्रन्थः ब्रह्मसूत्रवृत्तिरूपः भाष्यं भामतीञ्चानुसरति । प्रत्यधिकरणं पूर्वपक्षसिद्धान्तौ मीमांसान्यायाननुसृत्य सविस्तरमुपवर्णितौ । प्रतिसूत्रं दलप्रयोजनमस्य ग्रन्थस्य महान् विशेषः । प्रथमाध्यायान्तमुपलभ्यमानोऽयं ग्रन्थः भाष्यस्य क्रोडपत्ररूपः वाणीविलासे मुद्रितश्च ।

3. परिमलः । अमलानन्दकृतभामतीव्याख्याकल्पतरुव्याख्यारूपोऽयं ग्रन्थः मुद्रितः । अस्य संग्रहोऽपि विद्यते ।

4. मध्वतन्त्रमुखमर्दनम्—(S.V.P.)

आनन्दतीर्थीयां द्वैतपरां शारीरकशास्त्रप्राथमिकपञ्चाधिकरणप्रक्रियां तन्मतमर्यादयैव स्रग्धराघटितपद्यैः खण्डयन्नयं ग्रन्थः मध्वमुखमर्दनं माध्वमुखभङ्ग इति नाम्ना प्रसिद्धः । अस्य व्याख्यापि मूलकारकृता व्यध्वविध्वंसनाख्या मुद्रिता च ।

5. व्यध्वविध्वंसनम्—(S.V.P.)

6. नयमञ्जरी—(V.V.P.)

अद्वैतमतानुसारेण सूत्रार्थविवरणं ग्रन्थेऽस्मिन् उपलभ्यते । अप्पय्यदीक्षितैरेतैः कृते चतुर्मतसारसंग्रहे परिच्छेदचतुष्टयात्मके उपलभ्यमानः अद्वैतपरिच्छेदार्थसंग्रहात्मकः 182 पद्यैः कल्पितः ग्रन्थ वाणीविलासे मुद्रितः ।

7. अधिकरणकुञ्चिका—भारतीसदनमुद्राक्षरशालायां कार्वेटनगरे मुद्रितः ।

8. चतुर्मतसारसंग्रहः—(V.P.P.)

चतुर्भिः परिच्छेदैः परिक्लृप्तः । प्रथमे न्यायमुक्तावल्याख्ये द्वैतिनां मतं, द्वितीये नयमयूखमालिकाख्ये विशिष्टाद्वैतिमतं, तृतीये नयमणिमालाख्ये श्रीकण्ठा-

चार्यमतं शिवाद्वैतं प्रतिपादितम् । चतुर्थे नयमञ्जर्याख्ये सिद्धान्तपद्धत्या अद्वैतमतमुपवर्णितम् ।

9. वादनक्षत्रमालिका—(V.V.P.)

पूर्वोत्तरमीमांसावादनक्षत्रमालिकेति प्रसिद्धोऽयं ग्रन्थः सप्तविंशतिभिः वादकोटिभिः प्रणीतः । तत्र प्रथमेषु अष्टभिः कोटिभिः पूर्वमीमांसायां पूर्वपक्षसिद्धान्ताः प्रतिपादिताः । द्वितीयेषु एकोनविंशतिभिः कोटिभिः शाङ्करभाष्योपरि प्रवृत्तानां पूर्वपक्षाणां खण्डनं कृतमिति पूर्वोत्तरमीमांसावादनक्षत्रमालिकेत्यन्वर्थनामा ।

अप्पय्यदीक्षितरचितग्रन्थसूची—

1. अद्वैतनिर्णयः
2. अधिकरणकुञ्चिका
3. अधिकरणमाला
4. अधिकरणसारावलिः
5. अनुग्रहाष्टकम्
6. अमरकोषव्याख्या
7. अरुणाचलेश्वरस्तुतिः
8. आत्मार्पणस्तुतिः
9. आदित्यस्तोत्ररत्नम्
10. आनन्दलहरी
11. आनन्दलहरीव्याख्या चन्द्रिका
12. आर्याशतकम् अस्य व्याख्या 'राघवशर्मणा' कृता पूनानगरे मुद्रिता च ।
13. उपक्रमपराक्रमः
14. कुवलयानन्दः
15. कृष्णध्यानपद्धतिः
16. कृष्णध्यानपद्धतिव्याख्या
17. गङ्गाधराष्टकम्
18. चतुर्मतसारसंग्रहः
19. चित्रपटः (लघुवार्तिकम्) (J. O. R. Vol III) मुद्रितः ।
20. चित्रमीमांसा
21. जयोल्लासनिधिः
22. तत्त्वसमर्थनम्
23. तत्त्वमुक्तावलिः
24. तप्तमुद्राविद्रावणम्
25. तान्त्रिकमीमांसा (A. O. R. Vol VI 3)
26. तिङन्तशेषसंग्रहः
27. दशकुमारचरितसंग्रहः
28. दशकोटिः
29. दुर्गाचन्द्रकलास्तुतिः
30. दुर्गाचन्द्रकलाविवरणम्
31. धर्ममीमांसापरिभाषा

32. नयमञ्जरी
33. नयमयूखमालिका
34. नामसंग्रहमाला
35. नामसंग्रहमालाव्याख्या
36. निग्रहाष्टकम्
37. न्यायमुक्तावलिः
38. न्यायमुक्तावलीव्याख्या
39. न्यायरक्षामणिः
40. न्यायरत्नमाला
41. न्यायरत्नमालाव्याख्या
42. पञ्चरत्नस्तुतिः
43. पञ्चरत्नस्तुतिव्याख्या
44. पञ्चस्तववृत्तिः
45. पादुकासहस्रव्याख्या
46. परिमल (कल्पतरुव्याख्या)
47. पूर्वमीमांसाविषयसंग्रहदीपिका (J. O. R. Vol IX 321)
48. प्रबोधचन्द्रोदयटीका
49. प्राकृतचन्द्रिका
50. ब्रह्मतर्कस्तवः
51. ब्रह्मतर्कस्तवविवरणम्
52. भक्तिशतकम्
53. भस्मवादावलिः
54. भारततात्पर्यसंग्रहः
55. भारततात्पर्यसंग्रहव्याख्या
56. मणिमालिका
57. मतसारार्थसंग्रहः
58. मध्वतन्त्रमुखमर्दनम्
59. मध्वविध्वंसनम्
60. मार्गबन्धुचम्पूः
61. मार्गबन्धुपञ्चरत्नम्
62. मार्गसहायलिङ्गस्तुतिः
63. मार्गसहायस्तोत्रम्
64. मानसोल्लासः
65. यादवाभ्युदयव्याख्या
66. योगमार्तण्डः
67. रत्नत्रयपरीक्षा
68. रत्नत्रयपरीक्षाव्याख्या चन्द्रिका
69. रामायणतात्पर्यसंग्रहः
70. रामायणतात्पर्यसंग्रह-व्याख्या
71. रामायणस्तवराजः
72. रामायणसारसंग्रहः
73. रामायणतात्पर्यनिर्णयः
74. रामायणसारः
75. रामानुजमतखण्डनम्
76. रामानुजशृङ्गभङ्गः
77. लक्षणरत्नावली सव्याख्या J.O.R Vol IV 242
78. वरदराजस्तवः
79. वरदराजस्तवविवरणम्
80. वसुमतीचित्रसेनविलासः

81. वादनक्षत्रमालिका
82. विधिरसायनम्
83. विधिरसायनव्याख्या सुखोपयोगिनी
84. विष्णुतत्त्वरहस्यम्
85. वीरशैवम्
86. वृत्तवार्तिकम्
87. व्याकरणवादनक्षत्रमाला
88. शब्दप्रकाशः
89. शान्तिस्तवः
90. शास्त्रदीपिकाव्याख्या
91. शिखरिणीमाला
92. शिवकर्णामृतम्
93. शिवकल्पद्रुमः
94. शिवतत्त्वविवेकः
95. शिवध्यानपद्धतिः
96. शिवध्यानपद्धतिव्याख्या
97. शिवपुराणतामसत्वखण्डनम्
98. शिवपूजाविधिः
99. शिवार्कमणिदीपिका
100. शिवार्चनाचन्द्रिका
101. शिवार्चना चन्द्रिकाव्याख्या "बालचन्द्रिका"
102. शिवाद्वैतनिर्णयः
103. शिवोत्कर्षचन्द्रिका
104. शिवोत्कर्षमञ्जरी
105. शैवकल्पद्रुमः
106. श्रीविद्यातत्वविवरणम्
107. सिद्धान्तरत्नाकरः
108. सिद्धान्तलेशसंग्रहः
109. स्तोत्ररत्नाकरः
110. हरिवंशसारचरितव्याख्या
111. हरिहरस्तुतिः
112. हंससन्देशटीका

एषु नयमञ्जरी, नयमयूखमालिका उभावपि चतुर्मतसारसंग्रहान्तर्भूतौ वसुमतीचित्रसेननाटकं तु नैतेनाप्पय्यदीक्षितेन कृतम्। परन्तु तन्त्रसिद्धान्तदीपिका-दूरूहशिक्षा–प्राकृतमणिदीपिका–अतिदेशलक्षणपुनराक्षेपादिकर्त्रा प्रसिद्धाप्पय्यदीक्षितपौत्रेण कृतमिति (AOR Vol VI 3. & JOR Vol II 247) पत्रिकासु प्रतिपादितम् । एवं दशकुमारचरितसारोऽपि अप्पय्यदीक्षितवंश्यैः कृतमिति (AOR Vol VI 3) प्रतिपादितम् । अमुद्रिते जयोल्लसनिधिनामके भागवत-व्याख्याने तत्कर्ता श्रीनिवासपुत्रः श्रीवत्सगोत्रज अप्पय्य इति (6742 DC I.O.L Vol II) दृश्यते । प्रसिद्धस्तु भारद्वाजगोत्रज इति नैतद्रचनेति ज्ञायते ।

णत्वसमर्थनन्तु न कुत्राप्युपलभ्यते परन्तु वेङ्कटेशविरचिते स्वात्मानुभूतिमणिदर्पणे (21. J. 2. AL Mss) परामृष्टः ।

52. धर्मराजाध्वरी (1550–1650 A.D.)

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः । तं नौमि नृसिम्हाख्यं यतीन्द्रं परमं गुरुम् ॥ इति नृसिम्हाश्रमिणं, "श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्गुडिनिवासिनः" । इति वेङ्कटनाथञ्च नमस्कुर्वन्नयं धर्मराजाध्वरी नृसिम्हाश्रमिप्रशिष्यः वेङ्कटनाथपुत्रः रामकृष्णदीक्षितपिता त्रिवेदीनारायणदीक्षितभ्राता कौण्डिन्यगोत्रजः, ऋग्वेदाध्यायी चोलदेशस्थकण्डरमाणिक्यग्रामवासीति सप्तदशशतकीय इति च निश्चीयते । अस्य-शिष्येण नारायणशास्त्रिणा कृता महाभाष्यप्रदीपव्याख्या मद्रपुरीपुस्तकालये लभ्यते । (R. 39 MGOML)

1. अद्वैतवेदान्तपरिभाषा—

अष्टभिः परिच्छेदैः पूर्णोऽयं ग्रन्थः प्रत्यक्षानुमानोपमानशब्दार्थापत्ति-अनुपलब्धिरूपाणि प्रमाणानि सपरिकरं निरूप्य वेदान्तस्य विषयप्रयोजने च विशदयति । प्रकरणग्रन्थोऽयं अनन्तशयन - कलकत्ता - अडयार - आदिमुद्रणालये मुद्रितः । अस्य व्याख्याः - शिवदत्त - धनपतिसूरि - जीवानन्द विद्यासागरकृताः अर्थदीपिकाः, अनन्तकृष्णशास्त्रि पेद्दीक्षितकृताः प्रकाशिकाः, कृष्णनाथकृता आशुबोधिनी, वेदाद्रिसूरिकृता तत्वबोधिनी, नारायणभट्टकृतं भूषणम् , अमरदासकृता मणिप्रभा, रामकृष्णदीक्षितीयः शिखामणिः, रामवर्मकृतः परिभाषासंग्रहश्चेति विद्यन्ते ।

2. पञ्चपादिकाव्याख्या—पदयोजनिका । अपूर्णोऽयं ग्रन्थः मैसूरपुस्तकालये (आ 237) लभ्यते ।


तर्कचूडामणि–तत्वचिन्तामणिप्रकाशिका न्यायसिद्धान्तदीपव्याख्या-युक्तिसंग्रहादयश्च ग्रन्थाः कृता इति ज्ञायते ।

53. भट्टोजिदीक्षितः (1550–1650 A.D.)

ऋग्वेदान्तर्गताश्वलायनसूत्रशाकलशाखाध्यायी भट्टकुलावतंसः लक्ष्मीधरपण्डितपुत्रः शेषकृष्णस्य शिष्यः अप्पय्यदीक्षितान्नृसिम्हाश्रमिणश्च प्राप्ताद्वैतविद्यः रङ्गोजिभट्टभ्राता कौण्डभट्टस्य पितृव्यः भानुदीक्षितवीरेश्वरयोः पिता हरिदीक्षितस्य पितामहश्चायं भट्टोजिदीक्षितः सारस्वतब्राह्मणकुलोत्पन्न इति महाराष्ट्रदेशज इति

निर्श्चीयते । केचित्वेनं दाक्षिणात्यं वदन्ति । दक्षिणयात्रासमये विजयनगराधीशितुः प्रेरणया मध्वमतविध्वंसः, नृसिम्हाश्रमिण अप्पय्यदीक्षितस्य च प्रेरणया तत्वकौस्तुभश्चानेन कृत इति सम्प्रदायपरम्परागता कथा ।

वंशवृक्षः



1. तत्वकौस्तुभः—(V.V.P.)

परिच्छेदत्रयपरिमितोऽयं ग्रन्थः आनन्दतीर्थीयद्वैतविचारदूषणपरः । प्रथमपरिच्छेदे मध्वाचार्यसिद्धान्तदूषणं द्वितीये ब्रह्मसूत्रार्थवर्णनम्, तृतीये शङ्करसिद्धान्तप्रदर्शनमिति विवेकः । ग्रन्थोऽयं शङ्करगुरुकुलपत्रिकायां श्रीरङ्गनगरे वाणीविलासमुद्रणालये मुद्रितः ।

2. वाक्यमाला—(1978 B R.D.)

नृसिम्हाश्रमीयवेदान्ततत्वविवेकस्य व्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः बरोडापुस्तकालये लभ्यते । दासगुप्तेन (HIP Vol II 217) निर्दिष्टश्च ।


3. मध्वमतविध्वंसः—(7561 TSML)

आशौचनिर्णयः, आशौचदशश्लोकीव्याख्या, कालनिर्णयः, गोत्रप्रवरनिर्णयः, ग्रहणश्राद्धविधिः, चतुर्विंशतिस्मृतिव्याख्या, तन्त्राधिकारिनिर्णयः, तिथिनिर्णयः, त्रिस्थलीसेतुः, प्रौढमनोरमा, शब्दकौस्तुभः, सिद्धान्तकौमुद्याद्याः ग्रन्थाश्च कृताः ।

54. गोविन्दानन्दसरस्वती (1550–1650 A.D.)

द्रविडान्वयजः दाक्षिणात्योऽयं गोविन्दानन्दः शिवरामप्रशिष्यः गोपालसरस्वतीशिष्यः रामानन्दगुरुः, ब्रह्मविद्याभरणकारस्य अद्वैतानन्दस्य प्राचार्यः, षोडशशतकापरा-

र्धादारब्धे काले आसीदिति ज्ञायते । अनेन भाष्यस्य रत्नप्रभाख्या व्याख्या कृतेति वदन्ति । परन्तु गोविन्दवाणीचरणकमलगो निर्वृतोऽयं यथालिः" इति ग्रन्थे दर्शनात् गोविन्दानन्दो नास्य कर्ता भवति । परन्तु तच्छिष्येण रामानन्देनैव कृता । गुरुकृतत्वेन व्यावहारस्तु आदरातिशयेन इति केचिद्वदन्ति । अतएव रत्नप्रभायाः रामानन्दीयमिति व्यवहारोऽपि सङ्गच्छते । गोविन्दानन्दरामानन्दयो गुरुशिष्यपरम्परावृक्षः—



1. योगमणिप्रभा (R. 3885 MGOML) रामानन्दकृत इत्येव (R. 3885) मातृकायां दृश्यते । रामानन्दगोविन्दानन्दयोरैक्यं सम्पाद्य गोविन्दान्दकृत इति व्यवहारः संगच्छते ।

2. सप्तविधानुपपत्तिभङ्गः । 44 शृङ्गगिरिसूच्यां दृश्यते । 3. भाष्यरत्नप्रभा रामानन्दप्रस्तावे लिखितमस्माभिः ।

55. रामानन्दसरस्वती (1570–1650 A. D.)

शिवरामानन्दगोपालानन्दसरस्वत्योः प्रशिष्यः, गोविन्दानन्दशिष्यश्चायं स्वयम्प्रकाशानन्दसरस्वतीशिष्योऽपि षोडशशतकापरार्धकालवासीति निश्चीयते। अनेन रत्नप्रभायां जगन्नाथाश्रमिकृता भाष्यदीपिका (Page 5 N. S. P. Edn.) निर्दिष्टा।

1. भाष्यरत्नप्रभा (N. S. P.)

सूत्रभाष्यव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरे मुद्रितः। अस्य व्याख्याः– अच्युतकृष्णानन्दकृता व्याख्या, प्रकाशानन्दकृता व्याख्या, स्वयम्प्रकाशशिष्यकृता व्याख्या, पूर्णानन्दकृता व्याख्या, अज्ञातकर्तृका अभिव्यक्ता च।

2. ब्रह्मसूत्रविषयवाक्यवृत्तिः—(R. 2471 MGOML)

3. विवरणोपन्यासः—(B.S.S. 55)

पञ्चपादिकाविवरणतात्पर्यसंग्राहकोऽयं ग्रन्थः चौखम्बायां मुद्रितः। गद्यात्मकविवरणेन साकं अर्थसंग्राहकश्लोकाश्च विद्यन्ते।

56. मधुसूदनसरस्वती (1565–1665 A.D.)

मधुसूदनसरस्वत्याः कुलपूरुषः राममिश्रः—

मुहम्मदगोरीनाम्नः यवनराजस्याक्रमणात् भीताः ब्राह्मणाः (1194 A.D.) काले कान्यकुब्जान् त्यक्त्वा पलायनपरा आसन्। तेषु अध्वर्युः काश्यपगोत्रजः राममिश्राख्यः ब्राह्मणस्सपरिवारः पूर्वस्यां दिशि आससार। स च वङ्गदेशेषु फरीदपुरान्तर्गतकोटालिपाडा नामनि ग्रामे लब्धवास उवास। स एव राममिश्रः मधुसूदनस्य कुलपूरुष इति ऐतिहासिकपरिशीलनात् ज्ञायते। वैदिकवादमीमांसा हरिलीलाप्रामाण्यात् राममिश्रपुत्रः गोपालमिश्रः, गोपालमिश्रस्य पुत्रः माधवमिश्रः, माधवमिश्रस्य पुत्रः सनातनमिश्रः, सनातनमिश्रपुत्रः गणपतिमिश्रः, गणपतिमिश्रपुत्रः गुणार्णवाचार्यः, गुणार्णवपुत्रः मधुसूदनपिता पुरन्दराचार्यः इति ज्ञायते।

प्रमोदनपुरन्दराचार्यापरनाम्नः पुरन्दराचार्यस्य वासस्थानं माधवपाशाभिधक्षेत्रम्। अस्य चत्वारः पुत्रा उदभूवन्। ते च श्रीनाथयादवानन्द—कमलजनयन वागीशगोस्वम्याख्याः चत्वारः।

यादवानन्दन्यायाचार्य इति प्रसिद्धोऽयं कमलजनयनभ्राता प्रतापादित्यस्य सभाचूडामणिरासीत। तस्य पाण्डित्यमपूर्वं श्रुत्वा मुग्धेन राज्ञा यादवानन्द अविलम्बसरस्वतीति नाम्ना अलञ्चक्रे। अस्यैव माधवसरस्वतीति प्रसिद्धिरासीत्। किमयमेव माधवसरस्वतीं मधुसूदनसरस्वत्याः विद्यागुरुरुतान्यो वा वृत्तरत्नाकरटीकाकर्तुः नारायणभट्टस्य पितुः रामेश्वरभट्टस्य शिष्यः माधवसरस्वतीति सम्यक् नावधारयितुं पार्यते।

कमलजनयनः (मधुसूदनसरस्वती)—

पुरन्दराचार्यस्य तृतीयः पुत्रः कमलजनयनाख्यः नवद्वीपे न्यायशास्त्रमधीतवान्। अस्य वैदुष्यं जानन्नपि माधवपाशाभिधजनपदाधिपः तदीयवासार्हभूभागप्रदाने पराङ्मुख आसीत्। मनस्वी मधुसूदनः नृपतेरेवंविधाचरणमवलोक्य जातखेदः नितरां विषयवैराग्यमनुभवन् स्वीकृतपित्राज्ञः विश्वेश्वरसरस्वत्यास्सन्यासाश्रमं स्वीचकार। आश्रमगुरवः विश्वेश्वरसरस्वत्यः कमलजनयनमेनं मधुसूदनसरस्वत्यभिधानेन भूषयामासुः। ततः प्रभृति तन्नाम्नैव प्रसिद्धिं गतः ग्रन्थांश्चकार।

राममिश्रः
|
गोपालमिश्रः
|
माधवमिश्रः
|
सनातनमिश्रः
|
गणपतिमिश्रः
|
गुणार्णवाचार्यः
|
पुरन्दराचार्यः
|
श्रीनाथः — यादवानन्दः — कमलजनयनः (मधुसूदनः) — वागीशगोस्वामी

मधुसूदनसरस्वत्याः गुरवश्शिष्याश्च—

मधुसूदनसरस्वत्या प्रायस्सर्वेष्वपि ग्रन्थेषु "श्रीरामविश्वेश्वरमाधवानां" इति निर्दिश्यते। अद्वैतसिध्यन्ते

"श्रीमाधवसरस्वत्यो जयन्ति यमिनां वराः।
वयं येषां प्रसादेन शास्त्रार्थे परिनिष्ठिताः॥"

माधवसरस्वती निर्दिष्टः। एवञ्च विश्वेश्वरसरस्वती दीक्षागुरुः, माधवसरस्वती विद्यागुरुरिति सिध्यति। श्रीरामसरस्वती तु विश्वेश्वरसरस्वतीगुरुरिति श्रीरामसरस्वती मधुसूदनस्य परमगुरुरिति केचित्। हरिरामतर्कवागीशानामन्तिके गदाधरचक्रवर्तिना साकं मधुसूदनेन न्यायशास्त्रमधीतमिति हरिराम एव श्रीरामशब्देन निर्दिष्ट इति प्रतिभाति।


मधुसूदनसरस्वत्या स्वीये संक्षेपशारीरकव्याख्याने रामतीर्थः केचित्पदेनानूद्यते। एवञ्च रामतीर्थादनन्तरवर्ती सामयिको वायं भवितुमर्हति। केचित्तु इदमेव प्रमाणं मत्वा रामतीर्थोऽप्यस्य गुरुरिति वदन्ति। तादृशकथनस्य प्रबलतरप्रमाणाभावादेव रामतीर्थस्य शिष्यवर्णनमसङ्गतमिति निश्चयः।

मधुसूदनसरस्वतीगुरुविषये परिशीलनावसरे इण्डियन् अण्टिक्वैरि I. A. 1912-9 नामक पत्रिकायां एवं दृश्यते।

रामेश्वरभट्टनामा पण्डितः राज्ञा वितीर्णानि पारितोषिकादीनि हस्त्यश्वादीनि स्वीकृत्य कश्य एव द्वारकां प्रतस्थे। तस्मिन्नेव मार्गे त्रिपञ्चाशदधिकचतुर्दशतमे शकाब्दे (1531 A.D.) तस्य एकः पुत्रस्समजनि। तस्य च नारायणभट्ट इति महती प्रसिद्धिरभूत्। रामेश्वरभट्टस्य श्रीधराख्यः कश्चन पुत्रः वर्षचतुष्टयादनन्तरं उदभूत्। नारायणभट्टानां जन्मसमये रामेश्वरभट्टः वयसा वृद्ध आसीत्। स च प्रतिष्ठाननगरमध्युवास। अन्ते वाराणसीमाजगाम। रामेश्वरभट्टस्य त्रयः प्रधानशिष्या आसन्—अनन्तभट्टः, दामोदरभट्टः, माधवसरस्वतीति। तेषु माधवसरस्वत्याः शिष्य मधुसूदनसरस्वतीति।

सिद्धान्तबिन्दुव्याख्याने पुरुषोत्तमसरस्वतीविरचिते बिन्दुसन्दीपनाख्ये "विद्यागुरुं गुरुमिव सुराणां मधुसूदनम्" इति दर्शनात् पुरुषोत्तमसरस्वती मधु-

सूदनशिष्य इति ज्ञायते। "बहुयाचनया मयायमल्पो बलभद्रस्य कृते कृतो निबन्धः" इति श्लोकांशस्य व्याख्यानावसरे "बलभद्रो भट्टाचार्यः, कश्चन सम्यक् भक्त" इति दर्शनात् बलभद्रोऽपि शिष्यः इति ज्ञायते। शेषगोविन्दनिर्मितायां शङ्करसर्वसिद्धान्तरहस्यटीकायां "यत्प्रसादाधीनसिद्धिपुरुषार्थचतुष्टयम्। सरस्वत्यवतारं तं वन्दे श्रीमधुसूदनम्। गुरुणा मधुसूदनेन" इति च दर्शनात् शेषगोविन्दोऽपि मधुसूदनशिष्य इति ज्ञायते।



मधुसूदनसामयिकाः विशिष्टाः केचन कवयः—

अवधीभाषाकविसम्राजः रामचरितमानसकर्तुः भक्तकवेः तुलसीदासस्य सामयिकोऽयं मधुसूदनः। अनयोर्मैत्रीविषये

आनन्दकानने काचित् जङ्गमस्तुलसीतरुः।
कवितामञ्जरी (कवितावलि) यस्य मुखपद्माद् विनिस्सृता।"

इति पद्यमपि प्रसिद्धम्। भारतसम्राजः अक्बरस्य सामयिकोऽयं देहलीसभायां अक्बरेणाहूतः वादे विदुषः पराभूय (1600 A.D.) काले

"वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती।
मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती"॥ इति

गाथाञ्च लेभे। भारतसम्राजः अक्बरस्य प्रतिद्वन्द्विनः देशभक्तशिखामणेः मातृभूमिस्वातन्त्र्याय त्यक्तसर्वस्वस्य आजानवीरस्य राणाप्रतापस्य सामयिकः। नव्यनैय्यायिकस्य न्यायशास्त्रविपश्चितः गदाधरभट्टाचार्यस्य सतीर्थ्योऽपि भेदवादखण्डने

अस्यानितरसाधारणीं प्रतिभां विलोक्य गदाधरभट्टाचार्योऽपि चकम्पे। अत एव नवद्वीपे समायाते मधुसूदनवाक्पतौ। चकम्पे तर्कवागीशः कातरोऽभूत् गदाधर॥ 'इति फणितिरपि प्रसिद्धा। अद्वैतदीपिकादिकर्ता नृसिम्हाश्रमी अप्पय्यदीक्षित-भट्टोजिदीक्षितादयः अपरवयस्या सामयिका आसन्निति च वक्तुं शक्यते॥

मधुसूदनसरस्वतीकालः—

(1678 A.D.) काले आसीदिति हरिलीलाविवेकभूमिकायां दृश्यते। रामतीर्थंषोडशशतकीयः केचित्पदेन संक्षेपशारीरकव्याख्याने अनूदित इति मधु-सूदनसरस्वती सप्तदशशतकापरार्धकालिक इति (J. O. R. Vol II Page 101) उपवर्णितम्। ईश्वरचन्द्रमहाशयैः मधुसूदनसरस्वतीकाल (1532–1620 A. D.) इति प्रतिपाद्यते। महाविद्याविडम्बनाख्ये ग्रन्थे तिलाङ्गमहाशयैः सप्तदशशतकीय इति प्रतिपाद्यते। गोपीनाथकविराजमहाशयेन स्वीयसंस्कृतहस्तलिखितग्रन्थ-सूचीभूमिकायां (1918–1919) मधुसूदनसरस्वती षोडशशतकापरार्धकालिक इति प्रतिपाद्यते। दिवानजीमहाशयस्तु (A. B. O. R. I. Vol VIII Part II) षोऽशशतकापरार्धकालिकं वदति। सर्वथा (1565–1665 A.D.) काले आसी-दिति निश्चयः। मधुसूदनसरस्वत्याः जीवनकालः पञ्चाधिकशततमवयःपर्यन्तमिति (105) वाराणस्यामेवास्य ब्रह्मलोकवासस्समजनीति च सम्प्रदायः।

मधुसूदनसरस्वतीग्रन्थाः—

1. अद्वैतरत्नरक्षणम् (N. S. P.)

शङ्करमिश्रकृतभेदरत्नस्य खण्डनात्मक अद्वैतसिद्धिसारभूतश्चायं ग्रन्थः निर्णयसागरमुद्रणालये मुद्रितः।

2. अद्वैतसिद्धिः (N. S. P., Mysore S. S. 75)

व्यासतीर्थकृतन्यायामृताख्यस्य द्वैतपरग्रन्थस्य नव्यनैय्यायिकसरण्या खण्डन-परोऽयं महान् ग्रन्थः निर्णयसागरमुद्रणालये मैसूरग्रन्थमालायाञ्च मुद्रितः। अस्य व्याख्याः गौडब्रह्मानन्दकृता गुरुचन्द्रिका, लघुचन्द्रिका, सदाशुखकृता शरच्चन्द्रिका, बलभद्रकृता अद्वैतचन्द्रिका, पुरुषोत्तमकृतः अद्वैतसिद्धिसाधकः, अज्ञातकर्तृनामक-व्याख्याद्वयञ्च वर्तन्ते।

अद्वैतसिद्धिः
- सिद्धिसाधकः
- शरच्चन्द्रिका
- लघुचन्द्रिका
  - ब्रह्मानन्दीयभावप्रकाशः
  - शारदोल्लासः
  - विट्ठलेशीया
- गुरुचन्द्रिका
- अद्वैतचन्द्रिका

3. आत्मबोधव्याख्या 526 पञ्चावसूच्यां दृश्यते।

4. ईश्वरप्रतिपत्तिप्रकाशः (TSS. 73)

तनीयान् ग्रन्थोऽयं ईश्वरं प्रति याः वादिविप्रतिपत्तयः ताः निराकृत्य युक्त्या सम्प्रतिपत्तिं प्रकाशयन् अद्वैतमतवर्णनेन सामापयति। ग्रन्थोऽयं तिरुवनन्तपुर मालायां मुद्रितः।

5. गूढार्थदीपिका (N.S.P.)

भगवद्गीताव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरे मुद्रितः। व्याख्यामेनामनुसृत्य धर्मदत्तबज्झाशर्मणापि काचन व्याख्या लिखिता।

6. प्रस्थानभेदः—(ASS 5)

सर्वदर्शनसंग्रहवत् ग्रन्थोऽयमपि विभिन्नप्रस्थानान्युपपाद्य शाङ्करप्रस्थाने वैशि-ष्ट्यं प्रतिपादयन् सर्वेषां प्रस्थानानां साक्षात् परम्परया वा अद्वितीये परमात्मनि तात्पर्यं निरूपयति। आनन्दाश्रममुद्रणालये मुद्रितश्च।

7. वेदान्तकल्पलतिका—(S.B.S. 3)


ग्रन्थेऽस्मिन् मोक्षशास्त्रापरपर्यायस्य वेदान्तदर्शनस्योपेयतया व्यवस्थितस्य मोक्षपदार्थस्य स्वरूपनिर्णयाय तत्साधनादिप्रदर्शनाय च विभिन्नवाद्यभ्युपगतमोक्ष-तत्साधनादिस्वरूपप्रदर्शनपूर्वकं निराकरणीया अंशा निराकृताः। मुद्रितश्चायं सरस्वतीभवनग्रन्थमालायाम्।

8. शारीरकसारसंग्रहः

संक्षेपशारीरकव्याख्यात्मकोऽयं ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः। विश्ववेद प्रत्यग्विष्णुकृते संक्षेपशारीरकव्याख्येऽत्र निर्दिष्टे।

9. सिद्धान्तबिन्दुः—(BSS. 65 AMS. 3)

शाङ्करदशश्लोकीव्याख्यात्मकोऽयं ग्रन्थः उपोद्घात-त्वम्पदार्थतत्पदार्थ-तत्त्वमसि निर्णयविभागभेदेन चतुर्भिः परिच्छेदैः पूर्णः मुद्रितश्च। अस्य व्याख्याः तारानाथकृतः सिद्धान्तबिन्दुसारः, नारायणीया लघुटीका, पुरुषोत्तमकृतं सन्दीपनम्, पूर्णानन्दीयः तत्त्वविवेकः, ब्रह्मानन्दीया न्यायरत्नावली, सच्चिदानन्द-शिवलालकृता व्याख्या च विद्यन्ते।



10. सिद्धान्तलेशसंग्रहव्याख्या ?


ग्रन्थोऽयं हरिलीलाविवेकभूमिकायां निर्दिष्टः। P. P. शास्त्रिणश्च सरस्वतीमहालयवर्णनात्मकहस्तलिखितग्रन्थसूच्याः त्रयोदशमे भागे (7535 DC. T. S. M. L. Vol XIII) निर्दिशन्ति।

अन्येऽपि आनन्दमन्दाकिनी - भक्तिरसायन - हरिलीलाविवेकव्याख्याद्याः बहवः ग्रन्था अनेन कृताः। जटाद्यष्टविकृतिविवृतिरिति ग्रन्थस्तु नानेन कृत इति ज्ञायते।

57. गौड-ब्रह्मानन्दसरस्वती (1600-1700 A.D.)

गद्यमयशारीरकमीमांसाभाष्यवार्तिककर्तुः नारायणतीर्थस्य परमानन्दतीर्थस्य च शिष्यः शिवरामानन्दगोपालानन्दयोः रत्नप्रभाकारगोविन्दानन्दसरस्वत्याः प्रशिष्यः, बालकृष्णानन्दसरस्वतीत्र्यम्बकभट्टरामचन्द्रानन्दसरस्वतीनां गुरुरयं गौड-ब्रह्मानन्दसरस्वती सप्तदशशतकीयः। अस्य गुरुणा नारायणतीर्थेन सिद्धान्त बिन्दोः व्याख्या कृता इति (7540 DC. T. S. M. L. Vol XIII) ग्रन्थे

P. P. शास्त्रिणः वदन्ति। अयमेव वाक्यसुधाव्याख्याता ब्रह्मानन्दसरस्वती। अस्य गुरुः परमानन्दतीर्थ एव आनन्दगुरुशब्देन निर्दिष्ट इति केचित्।



काञ्चीमण्डलान्तर्गतशिवरामानन्दात् प्राप्ताद्वैतविद्य इत्यपि केचित्।

1. अद्वैतसिद्धान्तविद्योतनम् (S. B. S. S. 51)

ग्रन्थोऽयं सप्तविधासु ख्यातिषु अनिर्वचनीयख्यातिरेवाद्वैतिनां परमसिद्धान्त इति प्रतिपादयति। स चायमनिर्वचनीयख्यातिवादः भाष्यभामतीखण्डनखण्डखाद्या-दिषूपवर्णितोऽपि साकल्येनास्मिन्नेव ग्रन्थे वर्णित इति तु विशेषः। ग्रन्थोऽयं सरस्वतीभवनग्रन्थमालायां मुद्रितः।

2. ईशावास्यरहस्यम् (A. S. S. 5)

3. गुरुचन्द्रिका (Mysore S. S. 75)

बृहद्ब्रह्मानन्दीयापरनामायं ग्रन्थः मधुसूदनसरस्वतीकृतायाः अद्वैतसिद्धे-र्व्याख्यात्मकः। मधुसूदनसरस्वतीकृता अद्वैतसिद्धिः व्यासतीर्थकृतन्यायामृत दूषणाय प्रवृत्ता। अद्वैतसिद्धिदूषणाय रामाचार्येण न्यायामृततरङ्गिणी कृता। न्यायामृततरङ्गिणीदूषणाय अद्वैतसिद्धिव्याख्याव्याजेन ब्रह्मानन्दसरस्वत्या गुरु-चन्द्रिका कृता। ग्रन्थोऽयं मैसूर संस्कृतग्रन्थमालायां मुद्रितः।

4. न्यायरत्नावली (B. S. S. 65)

मधुसूदनसरस्वतीकृतस्य सिद्धान्तबिन्दोर्व्याख्यात्मकोऽयं ग्रन्थः वाराणसीग्रन्थमालायामद्वैतमञ्जरीग्रन्थमालायाञ्च मुद्रितः ।

5. लघुचन्द्रिका (N. S. P.)

गुरुचन्द्रिकासंग्राहकोऽयं ग्रन्थः अद्वैतसिद्धिव्याख्यात्मकः मुद्रितः निर्णयसागरमुद्रणालये । अस्य व्याख्या विट्ठलेशमिश्रकृता विट्ठलेशीया । शारदोल्लासाख्याऽपरा काचन व्याख्या लाहूरपण्डितराधाकृष्णसूच्यां दृश्यते ।

6. वेदान्तसूत्रमुक्तावलिः (A. S. S 77)

सूत्रवृत्तिरूपोऽयं ग्रन्थ आनन्दाश्रमे मुद्रितः । अस्यां निर्णयदर्पणाख्यः ग्रन्थः निर्दिष्टः । अस्य व्याख्या तत्त्वार्थविवेचनाख्या रामसुब्रह्मण्यशास्त्रिकृता हलपूसूच्यां (H. Z. 1542) दृश्यते ।

7. मीमांसाचन्द्रिका (259 S. B. D.)

सरस्वतीभवनामुद्रितग्रन्थसूच्यां दृश्यते । मुण्डकोपनिषद्रहस्यं, ईशावास्यश्लोकार्थः, मीमांसारहस्याख्याश्च ग्रन्थाः कृता इति श्रूयते ।

58. अखण्डानन्दसरस्वती (1600–1700 A.D.)

अस्याखण्डानन्दसरस्वत्याः पूर्वाश्रमे रङ्गनाथ इति नाम । आन्ध्रदेशीयोऽयं अद्वैतरत्नकोशव्याख्यायाः, भावप्रकाशिकायाः भेदधिक्कारविवृतेश्च कर्तुः कालहस्तीशयज्वनः यज्ञाम्बानाम्न्याश्च पुत्रः । नल्लगन्तुवंशजोऽयं स्वयम्प्रकाशानन्दस्य शिष्यः । अस्याश्रयदाता सामयिकश्च इम्मिडिजगदेकरायः (जगदेकरायद्वितीयः)। अस्य शासनकालः क्रैस्तवीयषोडशशतकात् सप्तदशशतकमिति S. कृष्णस्वाम्यय्यङ्गारलिखितविजयनगरचरित्रग्रन्थात् कर्णाटकदेशान्तर्गतशिलाशासनप्रतिपादकग्रन्थस्य प्रथमभागात् (भूमिका आफ् यपिग्राफिका कर्णाटिका आफ मैसूर Part I Page 27-28) च ज्ञायते ।

तत्त्वदीपनकाराद्भिन्नोऽयं अखण्डानन्द इति तत्त्वदीपनकाराखण्डानन्दसरस्वतीप्रस्तावे प्रतिपादितम् ।

1. ऋजुप्रकाशिका भामतीव्याख्या (C.S.S. 1)

ग्रन्थस्यास्य शैली सरलतमा सुबोधाऽर्थपूर्णा च । ग्रन्थेऽस्मिन् अद्वैतरत्नकोशप्रकाशिका निर्दिष्टा । ग्रन्थोऽयं चौखाम्बामुद्रणालयेऽपि मुद्रितः ।

2. रत्नकोशप्रकाशिका (भावप्रकाशिका) 47 शृङ्गगिरिसूची

ग्रन्थोऽयममुद्रितः मैसूरपुस्तकालये शृङ्गगिरिसूच्याञ्च दृश्यते । ग्रन्थोऽयं नृसिम्हाश्रमीयतत्त्वविवेकदीपनव्याख्यात्मकः । अस्यैव अद्वैतरत्नकोशदीपिका इत्यपि नामान्तरम् ।

तर्कभाषाप्रकाशः, तर्कभाषातत्त्वबोधिनीव्याख्या, न्यायसिद्धान्तदीपिका अपि अदसीयन्यायशास्त्रीयाः ग्रन्थाः मैसूरपुस्तकालये लभ्यन्ते ।

59. अद्वैतानन्दबोधेन्द्रः (1700 A. D.)


अस्य पूर्वाश्रमे सीतापतिरिति नाम । अस्य पिता प्रेमनाथदीक्षितः । माता पार्वती । दक्षिणदेशे पञ्चनदक्षेत्रे जन्म इति "प्रेमेशस्य पिनाकिनी तटभुवः सुनुस्स सीतापति" इति पुण्यश्लोकमञ्जर्यां तथा "जप्येशस्य कृपाभरात् समुद्भूत् यः पार्वतीगर्भजः" इति एतदीयशान्तिविवरणे च दर्शनात् ज्ञायते ।

एष किलाद्वैतानन्दबोधेन्द्रः काञ्चीकामकोटिपीठाधिपतिभिः भूमानन्दापराभिधानचन्द्रशेखरेन्द्रसरस्वतीभिः दीक्षित इति "भूमानन्दपराभिधानविलसच्छ्रीचन्द्रचूडाश्रमिप्रेक्षावाप्तसमस्तविद्यतया श्रीकामकोटीश्वरः ।" इति "विद्यां ददौ चिन्मयीं भूमानन्दपदस्थितो गुरुरसौ" इति शान्तिविवरणे (Page 219) दर्शनात् ज्ञायते । अस्य विद्यागुरू रामानन्दसरस्वतीति "रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा" इति ब्रह्मविद्याभरणे P. 1 दर्शनान्निश्चीयते । अयमेव "चिद्विलासः" आनन्दबोधाचार्य इत्यादिभिर्नामभिर्व्यपदिष्ट इति सदाशिवब्रह्मेन्द्रकृतगुरुरत्नमालिकायां "कलये हृदि संश्रितं स्वभासा विजयं चिद्वियतीह चिद्विलासम्" इति दर्शनाज् ज्ञायते ।

अस्य कालः कल्यब्देषु (4218-4301-1168-1201 A. D.) इति सम्प्रदायविदां मतम् । श्रीहर्षाभिनवगुप्तादिसामयिकश्चेति केचित् ।

परन्तु अद्वैतानन्दबोधकालः सप्तदशशतकस्य आदिमः भाग इति विमर्शकसिद्धान्तः । अत्रैषा युक्तिः—

अद्वैतानन्दसरस्वती अद्वैतवाणी अद्वैतानन्दबोधेन्द्र एते त्रयोऽपि एक एव । सप्तदशशतकावसानसामयिकेन अच्युतकृष्णानन्दतीर्थेन स्वीये भाष्यरत्नप्रभा-व्याख्याने "अद्वैतानन्दवाण्याख्यं तं वन्दे शमवारिधिम्" इति अद्वैतानन्दवाण्यै नम आवेदितम् । अच्युतकृष्णानन्दगुरुस्स्वयम्प्रकाशानन्दः । स्वयम्प्रकाशगुरुरद्वैता-नन्दवाणीति युक्तमेव प्रगुरोर्नमस्काराविष्करणम् । अद्वैतानन्दसरस्वत्याः गुरु रामानन्दसरस्वती । रामानन्दश्च गोविन्दानन्दशिष्यः । नारायणतीर्थ रघुनाथ तीर्थसतीर्थ्यश्च । नारायणतीर्थेन पञ्चदशशतके (1592 A.D.) शारीरकभाष्य-वार्तिकं कृतमिति अच्युतकृष्णानन्दनारायणसरस्वत्योः मध्यमः काल एव अद्वैता-नन्दबोधस्य, स च सम्भाव्यते सप्तदशशतकस्यादिमः भाग इति ।



1. ब्रह्मविद्याभरणम् (A. M. S. 6)


ब्रह्मविद्याभरणाख्योऽयं ब्रह्मसूत्रशाङ्करभाष्यव्याख्यात्मकः समग्रचतुरध्यायी भामतीभावप्रकाशनपर अद्वैतमतस्याभरणमेव । ग्रन्थोऽयमद्वैतमञ्जरीग्रन्थमालायां मुद्रितः ।

शान्तिविवरणम् गुरुप्रदीपः, उभावपि एतद्विरचितौ ग्रन्थाविति ज्ञायते ॥ अध्यात्मचन्द्रिका आत्मबोधटीकापि अनेन कृताविति वदन्ति ।

60. कृष्णानन्दसरस्वती (1600–1700 A. D.)

दक्षिणदेशीयस्यास्य कृष्णानन्दसरस्वत्याः पूर्वाश्रमे पितुर्नाम विश्वनाथः । माता अंम्बा "नाम्नीति अडयार पुस्तकालयस्थसिद्धान्तसिद्धाञ्जनहस्तलिखित-

पुस्तकाज् ज्ञायते । स्वग्रन्थे जागर्ति त्रिजगद्गुरुर्मनसि नः श्रीरामभद्रो यमी" इति रामभद्रयमिनं "तं पर्येमि प्रणतिभिरहं वासुदेवं यतीन्द्रम्" इति वासुदेवेन्द्रञ्च नमस्कुर्वन्नयं रामभद्रवासुदेवयोश्शिष्य इति निर्णीयते । अयं प्रकाशानन्दसरस्वत्याः प्रशिष्यश्चेति "स्वयम्प्रकाशं परमगुरुं नौमि योगीन्द्रम् इति ग्रन्थादेव ज्ञायते । अस्य शिष्येषु भास्करदीक्षित–रामनन्दसरस्वती–रघुनाथसूरि–प्रज्ञानाश्रमी–अनु-भवानन्द अय्याध्वरिणः विशिष्टाः प्रसिद्धतराश्च अनेनैव सिद्धान्तसिद्धाञ्जने पस्वाचार्यपरम्परा निर्दिश्यते—



शाहजीप्रथमेन तञ्जपुरशासकेन मानितोऽयं कृष्णानन्दसरस्वतीति ग्रन्थादेव ज्ञायते । शाहजीप्रथमकालस्तु (1684–1711 A. D.) इति निश्चयः । रामानन्दाख्येनास्य शिष्येण (1670 A.D.) काले प्रतिलेखः कृत इति प्रतिलेखकस्य स्वस्याचार्यः मूलग्रन्थकार इति ग्रन्थत एव प्रतिपादितम् । एवञ्चास्य कालस्सप्तदशशतकापरार्धादारभ्य इति निर्विवादोऽयं विषयः ।

1. कृष्णालङ्कारः (B. S. S. 36)

सिद्धान्तलेशसंग्रहव्याख्यात्मकोऽयं ग्रन्थः चौखाम्बामुद्रणालये अद्वैतमञ्जरीग्रन्थमालायाञ्च मुद्रितः ।

2. सिद्धान्तसिद्धाञ्जनम् (T. S. S. 47)

विशिष्टाद्वैतदूषणपरोऽयं ग्रन्थः विविधान् भिन्नाचार्याशयान् वेदान्तसिद्धान्तान् परिशीलयन् शाङ्कराद्वैतसिद्धान्तं साधयति । ग्रन्थोऽयं तिरुवनन्तपुरसंस्कृतग्रन्थमालायां मुद्रितः । अस्य व्याख्या भास्करदीक्षितकृता रत्नतूलिकानाम्नी ।

3. अनुष्ठानपद्धतिः, 4. शिवतत्त्वमालिका, 5. वेदान्तवादार्थ (7516 T. S. M. L.) इमे ग्रन्थास्सरस्वतीमहालये विद्यन्ते । 6. प्रणवनिर्णयप्रकाशिका तु तिरुवनन्तपुरपुस्तकालये लभ्यते । 7. शास्त्रनिर्णयनामा ग्रन्थः मैसूरपुस्तकालये लभ्यते ।

61. कृष्णानन्दसरस्वती (1600–1700 A.D.)

"श्रीनारायणरूपांस्तानखण्डानन्ददेशिकान् । नत्वा" इत्यादिना अखण्डानन्दसरस्वतीन् नमस्कुर्वन्नयं कृष्णानन्दसरस्वती अखण्डानन्दशिष्य इति निश्चीयते ।

अथ कोऽयमखण्डानन्दसरस्वती ? किं तत्त्वदीपनकारः ? उत षोडशसप्तदशशतकोत्तरार्धपूर्वार्धकालिकः ऋजुप्रकाशिकाकार अखण्डानन्दसरस्वती ? । त्रिपेदी महाशयस्तु स्वसम्पादिततर्कसंग्रहभूमिकायां तत्त्वदीपनऋजुप्रकाशिकाकारौ उभावपि

अखण्डानन्दौ न भिन्नाविति साधयति । एवञ्च तन्मतेन स एवास्य गुरुरिति सिध्यति । श्रीकण्ठशास्त्री तु स्वीये (I. H. Q. XIV) लेखे तत्त्वदीपनकारादखण्डानन्दात् ऋजुप्रकाशिकाकारं भिन्नं वर्णयति । एवं सति कृष्णानन्दयतिरयं सप्तदशशतकीय इति सिध्यति । अन्ये तु अन्योऽयमखण्डानन्द इति वदन्ति ।

अनेन कृष्णानन्दसरस्वत्या स्वीये ग्रन्थे 101, 92, पुटे विद्यारण्य उद्धृतः । विद्यारण्यस्य कालस्तु (1296–1384 A.D.) इति निरूपितम् । आनन्दगिरिस्तु विद्यारण्यात् पूर्वतनः । यद्येवं आनन्दगिरिप्रशिष्योऽयं कृष्णानन्दसरस्वती विद्यारण्यस्यापरे वयसि सामयिक इति वक्तव्यं भवति । आनन्दगिरिप्रशिष्योऽयं कृष्णानन्दः गुजरातदेशवासी । एवं च गुजरातदेशपर्यन्तं विद्यारण्यस्य कृतेः प्रसिद्धिः विद्यारण्यकाल एवाभ्युपेयो भवति । प्रायः ग्रन्थकर्तॄणां ग्रन्थस्य च प्रसिद्धिः कालविलम्बमर्हति । यद्येवं तर्हि विद्यारण्यं प्रमाणीकुर्वन्नयं न तत्त्वदीपनकारशिष्य इति वक्तव्यं भवेत् । ऋजुप्रकाशिकाकार शिष्य इत्यभ्युपगमे तु शतकद्वये विद्यारण्यस्य ग्रन्थानां महती प्रसिद्धिस्सम्भाव्यते ।

1. ब्रह्मतत्त्वसुबोधनी—(33. F. 4. AL)

महावाक्यानि दहरविद्यां, जीवन्मुक्तस्वरूपं अध्यारोपापवादौ च सपरिकरं विचारयन्नयं प्रकरणग्रन्थ अमुद्रितः पूर्णः अडयारमद्रासपुस्तकालयपञ्चावसूच्यादिषु लभ्यते ।

62. बालकृष्णानन्दसरस्वती (1600–1700 A.D.)

"श्रुतिनगराधीशेन अभिनवद्रविडार्यबालकृष्णेन । रचितेयं मोदयतात् कैलासेशं कृतिर्महादेवम् ।" इति ग्रन्थे दर्शनात् श्रुतिनगरस्य वेदपुरीति प्रसिध्या च काञ्चीमण्डलान्तर्गत वेदपुरीवासीति ज्ञायते । अभिनवद्रविडाचार्य इत्यस्य नामान्तरमपि द्रविडदेशत्वमस्य द्रढयति ।

" सूत्रभाष्यकृदनुग्रहपक्षलम्बनादमृतमान्तरमाप्तुम् ।
वैनतेय इव पुष्करदेशं जन्मयोगमतरं जलराशिम् ॥

इति कथनात् पुष्करदेशेऽनेनाश्रमस्वीकार कृतः इति निश्चीयते ।

प्राचीना हि द्रविडाचार्याः शङ्करात् प्राचीनाश्छान्दोग्योपनिषदां बृहदारण्यकोपनिषदाश्च वाक्याभिधस्य ब्रह्मनन्दिकृतस्य व्याख्यानस्य भाष्यकृत्वेन प्रसिद्धाः । अभिनवद्रविडाचार्यस्तु स्वग्रन्थमहिम्ना स्वविद्यया अध्यापनसामर्थ्येन अनुष्ठाननिष्ठया च पूजितः गौडैः परमहंसैः अभिनवद्रविडाचार्य शब्देनेति ज्ञायते । सिद्धान्तवर्णनेनापि अयमभिनवत्वमर्हति । तमसः चक्षुःप्रभारूपतया वर्णनम्, आकाशसरूपत्वाप्रत्यक्षत्वादिवर्णनञ्चास्याभिनवसिद्धान्तः । तस्मादिदमपि अभिनवद्रविडाचार्यत्वप्रसिद्धौ मुख्यं निदानं भवितुमर्हति ।

साहित्यशास्त्रेऽस्य गुरुर्वेङ्कटकविः । व्याकरणे नागेशभट्टः । ज्योतिश्शास्त्रे स्वयम्प्रकाशतीर्थस्तिप्पन्नयज्वा च । न्यायशास्त्रे सिद्धान्तसिद्धाञ्जनकर्तुः गुरुर्वासुदेवानन्दसरस्वती । वेदान्तेऽद्वैतसिद्धिव्याख्याता गौडब्रह्मानन्दसरस्वती । दीक्षागुरुः श्रीधरानन्दसरस्वती । अनेन पूर्णानन्दारब्धा श्रीधरान्ता च गुरुपरम्परा निर्दिश्यतेऽत्र ग्रन्थे—

पूर्णानन्दसरस्वती
|
पुरुषोत्तमानन्दसरस्वती
|
शिवरामानन्दसरस्वती
|
गोपालानन्दसरस्वती
|
स्वयम्प्रकाशानन्दसरस्वती
|
श्रीधरानन्दसरस्वती
|
बालकृष्णानन्दसरस्वती

महादेवः श्रीमान् समधिगततत्त्वो वटुवरः
महाकैलासेशः सकलयतिसंसेवनपरः ।
विशेषं जानीतां विशदवचनैर्भाष्यवचसां
इतीयं सञ्जाता जगति कृतिरमद्या विजयताम् ॥

इति ग्रन्थे दर्शनात् महादेवकैलासेशाख्यौ द्वावस्य शिष्याविति ज्ञायते ।

अथास्य कालः—

ब्रह्मानन्दसरस्वतीकालश्च नागेशभट्टकालश्च सप्तदशशतकमिति निर्णयः । गौडब्रह्मानन्दश्च नारायणसरस्वतीशिष्यः । नारायणसरस्वत्या च गद्यमयं ब्रह्मसूत्र भाष्यवार्तिकं "चत्वार्यब्दसहस्राणि तथा रसशतानि च । नवतिस्त्रीण्यथाब्दस्य व्यतीतानि यथा कलेः ॥" इति 4693–1670 श 1592 A.D, काले कृतमिति निर्दिश्यते । एवञ्च तत्प्रशिष्योऽयं बालकृष्णानन्दस्सप्तदशशतकीय एव भवितुमर्हति ।


अभिनवद्रविडाचार्यापरनामायं बालकृष्णानन्दः श्रीधरानन्दशिष्यः सिद्धान्तसिद्धाञ्जनकारकृष्णानन्दसामयिकः, लघुचन्द्रिकाकारब्रह्मानन्दसरस्वतीशिष्यः श्रुतिनगरापराभिधवेदपुरी(तिरुवेत्तियूर)ग्रामजस्सप्तदशशतकीय इति च साम्प्रदायिकाः । वेदपुर्यपरापराभिधोऽयं तिरुवेत्तियूर्ग्रामः काञ्चीनगरस्य षोडशयोजने वर्तमानः नार्तार्काड(उत्तरार्काड)न्तर्गत इति प्रसिद्धिः ।

1. शारीरकमीमांसाभाष्यवार्तिकम् (A. S. 1)

उक्तानुक्तदुरुक्तचिन्तनं हि वार्तिकम् । तच्च चिन्तनं सूत्रविवरणमपि भवति । भाष्यविवरणमपि । सिद्धान्तलेशसंग्रहादिषूपवर्णितान् प्रक्रियाविशेषान् भाष्यारोपणप्रयत्नं कुर्वाणोऽयं बालकृष्णानन्दः वार्तिकलक्षणाङ्गभूतस्य चिन्तनस्य अनुरूपं ग्रन्थं प्रतिपादयति । भामतीकाराणां अवच्छेदवादः, विवरणकाराणां ईश्वरभावापत्तिरेव मुक्तिरिति मतम्, एवमन्येऽपि विषयविशेषाः प्रतिपादिताः । ग्रन्थकारोऽयं वार्तिकमतानुसारी सुरेश्वरविश्वरूपमण्डनमिश्राणां ऐक्यमङ्गीकरोति । ग्रन्थोऽयमाशुतोषग्रन्थमालायां मुद्रितः ।

2. तैत्तरीयोपनिषद्विवरणम् (भाष्यविवरणम्) (R. 383 MGOML) लन्दनपुस्तकालये बाम्बेरायलासियाटिकपुस्तकालये च लभ्यते ।

ईशकेनकठछान्दोग्य प्रश्नोपनिषदां व्याख्याऽपि अनेन कृता इति ज्ञायते ।



63. सदानन्दकाश्मीरी (1650–1750 A.D.)

काश्मीरदेशाभिजनोऽयं सदानन्दः ब्रह्मानन्दसरस्वत्याशिष्यः वेदान्तसार-कर्तुस्सदानन्दात् भिन्नश्चेति ज्ञायते। अनेन कृताया अद्वैतब्रह्मसिद्धेः कस्मिंश्चित् हस्तलिखितग्रन्थे 1761 संवत्सरे ग्रन्थसमाप्तिरिति दृश्यते। एवञ्चास्य काल अष्टादशशतकस्य पूर्वार्धावधिक इति ज्ञायते।

अनेन कृतायां अद्वैतब्रह्मसिद्धौ अद्वैतमतविरुद्धानां आस्तिकनास्तिकानां बहूनि मतानि खण्डितानि। परन्तु वल्लभोपज्ञं मतं न खण्डितम्। तस्माद्विशुद्धा-द्वैतमतप्रवर्तकात् पञ्चदशशतकीयात् (1479 A. D.) वल्लभाचार्यादयं पूर्वतन इति केचिद्वदन्ति।

1. अद्वैतब्रह्मसिद्धिः (C. U.)

षण्णामास्तिकानां नास्तिकानाञ्च दर्शनानां संक्षेपत उपन्यासपूर्वकं तत्खण्डनम्, अद्वैतसिद्धान्तस्याबाधितत्वञ्च मुद्गरप्रहाराख्येषु चतुर्षु परिच्छेदेषु वर्णितम्। मुद्रितश्चायं ग्रन्थः कलकत्ताविश्वविद्यालये।

2. स्वरूपप्रकाशः। ग्रन्थोऽयं अद्वैतब्रह्मसिद्धौ निर्दिष्टः।

64. अच्युतकृष्णानन्दतीर्थः (1650–1750 A.D.)

दाक्षिणात्योऽयमच्युतकृष्णानन्दः स्वयम्प्रकाश-अद्वैतानन्दसरस्वत्योश्शिष्यः। अद्वैतवाणीति अद्वैतानन्दसरस्वत्या एव नामान्तरमिति अनेन भाष्यरत्नप्रभाव्या-ख्याने व्यपदिश्यते। अद्वैतानन्दश्च रामानन्दस्य शिष्यः। एवञ्चाद्वैतवाणीं नम-स्कुर्वाणोऽयं अच्युतकृष्णः रामानन्दप्रशिष्यः स्वयम्प्रकाशाद्वैतानन्दयोः शिष्य इति सिध्यति। स्वयम्प्रकाशानन्दश्च अद्वैतानन्दानामपि शिष्यः। अस्य कालस्सप्त-दशशतकापरार्धादिमः अष्टादशशतकपूर्वार्धश्चेति ज्ञायते।

1. कठोपनिषच्छाङ्करभाष्यटीका 1278 अ 22 प (GOML Mysore)

2. कृष्णालङ्कारः (A. M. S. 5)

सिद्धान्तलेशसंग्रहव्याख्यात्मकोऽयं ग्रन्थ अद्वैतमञ्जरीग्रन्थमालायां कुम्भ-घोणे मुद्रितः।

3. वनमाला । तैत्तरीयोपनिषच्छाङ्करभाष्यव्याख्यात्मकोऽयं ग्रन्थः वाणीविलासे मुद्रितः ।

4. भावदीपिका—भामतीव्याख्या (39 E. 9 A. L.)

कल्पतरुपरिमलसंग्रहरूपोऽयं ग्रन्थ अमुद्रित अडयारपुस्तकालयस्थः ।

5. भाष्यरत्नप्रभाभागव्याख्या (R. 2782 MGOML)

जिज्ञासासूत्रमारभ्य आनन्दमयाधिकरणपर्यन्तेयं रत्नप्रभाव्याख्या अमुद्रिता मद्रासराजकीयपुस्तकालये अडयारपुस्तकालये च (26 M. 20 A. L.) लभ्यते । विश्वभारतीशान्तिनिकेतनपुस्तकालये अनन्तशयनपुस्तकालये लभ्यते ।

6. मानमाला—

प्रमाणप्रमेयप्रमाप्रमातृनामभिः प्रकरणैः पदार्थानां भेदनिर्वचनपूर्वकं प्रमाणस्वभावं वर्णयन्नयं प्रकरणग्रन्थ अडयार पुस्तिकामालायां मुद्रितः । अस्य व्याख्या रामानन्दभिक्षुविरचिता विवरणाख्या च ।

65. अय्यण्णादीक्षितः (1700–1800 A. D.)

दाक्षिणात्योऽयं द्रविडदेशवासी अय्यण्णादीक्षितः स्वग्रन्थे "तस्मै श्रीधरवेङ्कटेशगुरवे कुर्वे प्रणामायुतम् ।" इति श्रीधरवेङ्कटेशन्नमस्करोति । एवञ्च तिरुविशनल्लूराख्यचोलदेशीयग्रामवासिन अय्यावालिति प्रख्यातस्य श्रीधरवेंकटार्यस्य शिष्यः, राधामाधवसंवादकर्तुः वेंकटपतेः पुत्रः, सुदन्ताकल्याणकर्तुः नरहरिसूनोः भ्रातृव्यः सदाशिवब्रह्मेन्द्रसामयिकः क्रैस्तवीयाष्टादशशतकीय इति ज्ञायते ।

1. व्यासतात्पर्यनिर्णयः (V. V. P.)

शाङ्करभाष्यवर्णितं ब्रह्मसूत्रार्थं व्यासाभिमतं वर्णयन् परिच्छेदद्वयवानयं ग्रन्थः अद्वैत एव व्यासाभिमतं युक्तिभिः प्रमाणैश्च साधयति । मुद्रितश्चायं वाणीविलासमुद्रणालये ।

2. अद्वैतमतप्रकाशः (त्रिमतैक्यप्रकाशान्तर्गतः) 3. जीवन्मुक्तिविवेकः


4. आत्मानात्मविवेकश्च अनेन कृता इति ज्ञायते । व्यासतात्पर्यनिर्णयस्य आधुनिकेन नरकण्ठीरवाख्यशास्त्रिणा कृता च व्याख्या वर्तते ।

66. सदाशिवब्रह्मेन्द्रसरस्वती (1700–1800 A. D.)

योगशक्तिसम्पन्नस्य महतस्सिद्धस्यास्य सदाशिवब्रह्मेन्द्रस्य पूर्वाश्रमे शिवरामकृष्ण इति नाम । मधुरानगरवासिनस्सोमनाथावधानिनः पार्वत्याश्च पुत्रोऽयम् । प्रसिद्धरामभद्रदीक्षितसतीर्थ्योऽयं आश्रमस्वीकारादनन्तरं सदाशिवब्रह्मेन्द्र इति प्रसिद्धिं गतः । दहरविद्याप्रकाशिकाकर्तुः परमशिवेन्द्रस्य शिष्यः अद्वैतरसमञ्जरीकर्तुर्नल्लादीक्षितस्य गुरुः, तिरुविशनल्लूर अय्यावालिति प्रसिद्धस्य श्रीधरवेङ्कटेशशास्त्रिणः, महाभाष्यं गोपालकृष्णशास्त्रिणश्च सतीर्थ्यः, शरभोजिप्रथमस्य सामयिकः अष्टादशशतकीय इति निर्णीयते । अखण्डकावेरीतीरस्थिते त्रिशिरपुर्यन्तर्गते नेरूरग्रामे अयं समाधिनिष्ठश्च । सदाशिवब्रह्मेन्द्रोयं नवसालपुरराजाय विजयरघुनाथतोण्डमानाख्याय मन्त्रानुपदिदेश । तत आरभ्यैव प्रतिनवरात्रं पण्डितपरिषत्प्रचलति इति च वदन्ति ।

कृष्णमाचार्यकृते संस्कृतसाहित्येतिहासे तु सदाशिवब्रह्मेन्द्रकालः षोडशशतकीय इति दृश्यते ।

गुरुशिष्यपरम्परा



1. आत्मविद्याविलासः (VVP)

द्विषष्ठिभिः पद्यैः पूर्णोऽयं ग्रन्थ आत्मज्ञानानुभवं प्रदर्शयति । आर्याच्छन्दोघटितैः पद्यैः पूर्णोऽयं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः । ग्रन्थोऽय शरभोजीप्रथमस्यानुग्रहार्थं मल्हारीपण्डितप्रार्थनावशात् सदाशिवब्रह्मेन्द्रेण रचित इति सरस्वतीमहालयस्थात् आत्मविद्याविलासपुस्तकात् (7685 TSML) ज्ञायते ।

2. आत्मानात्मविवेकप्रकाशिका (23. C. 15. AL)

अमुद्रितोऽयं ग्रन्थ अडयारपुस्तकालये लभ्यते। ग्रन्थेऽस्मिन् "अथाद्वैतविज्ञानेऽस्मत्परमगुरु सदाशिवब्रह्मेन्द्र कृते आत्मानात्मविवेकप्रकाशिकायां उदाह्रियन्ते" इति दर्शनात् आत्मानात्मविवेक अस्य प्रसिद्धसदाशिवब्रह्मेन्द्रस्य परमगुरुणा सदाशिवेन्द्रेण कृतस्स्यादिति ज्ञायते। अस्य व्याख्या प्रशिष्येणानेन कृता।

3. आत्मानुसन्धानम्। मुद्रितश्चायं सरस्वतीमहालये (7746 DC TSML Vol. XIII)

4. कैवल्योपनिषद्दीपिका (R. 1492 D. MGOML)

5. नवमणिमाला। मुद्रितश्चायं (7734 DC T. S. M. L. Vol XIII)

6. मनीषापञ्चकव्याख्या "तात्पर्यदीपिका" (7328 T. S. M. L.) अनन्तशयनपुस्तकालयेऽपि लभ्यते।

7. ब्रह्मतत्त्वप्रकाशिका (V. V. P.)

शाङ्करभाष्यानुयायिनीयं सूत्रवृत्तिः सूत्रार्थावबोधे सुलभबोधा भवति। वाणीविलासे मुद्रिता च।

8. वेदान्तसिद्धान्तकल्पवल्ली सव्याख्या (V. V. P.)

सिद्धान्तलेशसंग्रहसारभूतोऽयं ग्रन्थः वाणीविलासमुद्रणालये मुद्रितः। अस्य व्याख्या "केसरावली" नाम्नी।

9. स्वानुभूतिप्रकाशः (R. 2111 E. MGOML)

जीवन्मुक्तानुभवप्रदर्शनमुखेन जीवात्मपरमात्मैक्यप्रदर्शनपरोऽयं ग्रन्थः सरस्वतीमहालयवर्णनात्मकग्रन्थसूच्यास्त्रयोदशे भागे (7772 DC. T.S.M.L. Vol XIII) मुद्रितश्च।

एवं गीतरत्नमालिका, गुरुरत्नमालिका, शिवमानसिकपूजा, सपर्यापर्यायस्तवः, शिवयोगदीपिका, योगसुधाकरः, दक्षिणामूर्तिध्यानम्, महावाक्यार्थशोधनम्, परमहंसचर्या, स्वप्नोदितम्, सर्ववेदान्तसंग्रहश्चेति ग्रन्थाः कृताः। परं सर्ववेदान्तसारसंग्रहोऽयं पाययाराध्यकृतत्वेन मद्रासराजकीयपुस्तकालयात् ज्ञायते।

67. उपनिषद्ब्रह्मेन्द्रः (1750–1850 A.D.)

उपनिषद्ब्रह्मेन्द्रोऽयं आत्मानं वासुदेवेन्द्रशिष्यं स्वग्रन्थेषु निर्दिशति। अस्यैव रामचन्द्रेन्द्र इत्यपि नामान्तरमिति ब्रह्मसूत्रभाष्यसिद्धान्तसंग्रहाख्यात् ग्रन्थात् ज्ञायते। वासुदेवेन्द्र इति प्रसिद्धाः बहवस्सन्ति। तथापि तत्त्वबोधकारः वासुदेवेन्द्रशिष्य वासुदेव एवास्य गुरुरिति भाति। महावाक्यरत्नावलीकार इति प्रसिद्धः कर्माकर्मविवेक-तत्त्वम्पदार्थलक्ष्यैक्यशतकादिकर्ता रामचन्द्रेन्द्रोऽपि वासुदेवेन्द्रशिष्य उपनिषद्ब्रह्मेन्द्रसतीर्थ्यश्चेति निश्चीयते। तत्त्वबोधलेखनकाल 1823 सं. (1767 A.D.) इति अडयारपुस्तकालयस्थे आदर्शग्रन्थे दृश्यते। एवं बरोडावर्णनात्मकग्रन्थसूच्यां एकोनविंशतिशतकीयोऽयमुपनिषद्ब्रह्मेन्द्र इति (6214 A. D. C. BRD Vol. I) दृश्यते। एवञ्चोपनिषद्ब्रह्मेन्द्रकालोऽपि (1775–1850 A.D.) इति सिध्यति। उपनिषद्ब्रह्मेन्द्रशिष्येषु कृष्णानन्दसरस्वतीति कश्चनेति ज्ञायते। उपनिषद्ब्रह्मेन्द्रोऽयं काञ्चीनगरवासीति च प्रसिद्धिः। यस्य नाम्नाद्यापि मठस्स्थापितः दृश्यते। पूर्वाश्रमेऽस्य पितुर्नाम शिवकामेश्वर इति मुक्तिकोपनिषद्व्याख्याया अवसानेऽनेनैव प्रतिपाद्यते। मुक्तिकोपनिषद्विवरणावसरे—

"प्रजोत्पत्त्यब्दचापैकादशपक्षे शुभे दिने।
भौमाश्विन्यामिदं शास्त्रं सम्पूर्णपदवीं गतम्॥"

इति च दृश्यते। तस्मादस्य कालः अष्टादशशतकीय इति मुक्तिकोपनिषद्विवरणनिर्माणकालः (1751 A.D.) इति च निश्चीयते।

अनेन रामतरङ्गमाला रामाष्टपदीति गीतग्रन्थाः भजनानि कीर्तनानि च रचितानीति Dr. वे. राघवमहोदयैः "जर्नल आफ् म्यूसिक अकाडमि मद्रास" (J. M. A. Vol. XXVII 1957) पत्रिकायां प्रतिपादितम्।

1. अध्यात्मरामायणविवरणम्।

2. ईशाद्यष्टोत्तरशतोपनिषद्विवरणम्—(ALS) एषु विवरणेषु दशोपनिषद्विवरणभावेन वाक्यविन्यासेन च शाङ्करभाष्यं पूर्णतयानुसरति।

3. महावाक्यरत्नावलीव्याख्या—"किरणावलिः"

अस्यैव तत्वसिद्धान्तविवृत्तिः पदयोजना इत्यपि नामान्तरं दृश्यते । रामचन्द्रेन्द्रसरस्वतीकृतमहावाक्यरत्नावलीव्याख्यात्मकोऽयं ग्रन्थ अडयारपुस्तकालये (33 G, 21 AL, D. 4708 MGOML) लभ्यते ।

4. त्रिपात्तत्वादिसप्तप्रकरणी

5. ब्रह्मतत्वप्रकाशिका—उभावपि ग्रन्थौ मैसूरपुस्तकालये लभ्यते ।

6. ब्रह्मसूत्रभाष्यसिद्धान्तसङ्ग्रहः—(ALPS 19)

ब्रह्मसूत्रसिद्धान्तविवृतिरित्यपरनामायं ग्रन्थः शङ्कराचार्यकृतसूत्रभाष्यस्य प्रत्यधिकरणसारार्थं प्रतिपादयति । ग्रन्थकृतानेन प्रथमद्वितीयचतुर्थाध्यायानां यथाक्रमं विराड्विश्वबीजतुर्याख्या समाख्याता । ग्रन्थोऽयमडयारपुस्तिकालयमालायां मुद्रितः ।

7. ब्रह्मसूत्रार्याद्विशतिका—द्विशतैः पद्यैस्सूत्रार्थविवरणकार्ययं ग्रन्थ निर्णयसागरमुद्रणालये अडयार पुस्तकलये च मुद्रितः ।

8. लिङ्गभङ्गयुक्तिशतकम्—सव्याख्यम् सव्याख्योऽयं ग्रन्थ 87 पञ्जाबसूच्यां दृश्यते ।

9. महावाक्यरत्नावलीप्रभालोचनम्—

भासकलोचनापरनामायं ग्रन्थः रामचन्द्रेन्द्रसरस्वतीकृतायाः महावक्यरत्नावलीव्याख्यायाः प्रभाख्याया व्याख्यारूपः । अमुद्रितोऽयं ग्रन्थः मैसूरपुस्तकालये लभ्यते ।

10. परमाद्वैतसिद्धान्तपरिभाषापि अनेन कृतेति ज्ञायते ।

त्यागराजशास्त्री (राजुशास्त्री) (1815–1904 A. D.)

आधुनिकोऽयं प्रकाण्डपण्डितः मन्नार्गुडिराजुशास्त्र्यपराभिधः त्यागराजशास्त्री अप्पय्यदीक्षितवंशजः । अस्य पितामहस्त्यागराजाभिधः । अस्य पिता मार्गसहायापराभिध अप्पय्य(अप्पा)दीक्षिताख्यः । अस्य माता मरकतवल्लीनाम्नी । भारद्वाजगोत्रजोऽयं बाल्यादारभ्य स्वपितामहात् प्राप्तकाव्यव्युत्पत्तिः मन्नार्गुडिवासिनः नारायणसरस्वत्याः वेदान्तशास्त्रं, कुम्भघोणवासिन रघुनाथशास्त्रिणः मीमांसां

मन्नार्गुडिवासिनः गोपालशास्त्रिणः व्याकरणञ्चाधीयाय । तात्कालिकेषु विद्वत्सु अद्वैतवेदान्ते नितरां निष्णातोऽयं अद्वैतसभाप्रवर्तकाग्रगण्यश्रेयः प्राप । तिरुवारूर्समीपस्थे कुत्तम्भाडिनामकग्रामे समुत्पन्नोऽयं मन्नार्गुडिग्रामस्थं स्वमातुलगृहं गत्वा तत्रैव विद्वत्सङ्गदत्तचित्तः स्वकालमनैषीत् । अद्वैतसभारजतजयन्तीस्मारकपत्रिकाप्रमाणात् अस्य काल एकोनविंशतिशतकमिति (1815—1904 A.D.) इति ज्ञायते । अस्य शिष्येषु हरिहरशास्त्री प्रसिद्धः ।

1. न्यायेन्दुशेखरः (S. V. P. K.)

चन्द्रिकाप्रसादनापरनामायं ग्रन्थ तार्किकश्रीमदनन्तार्यविरचितस्य अद्वैतसिद्धि-चन्द्रिकादिदूषणपरस्य न्यायभास्करनामकग्रन्थस्य खण्डनपरः चन्द्रिकाप्रसादनपूर्वकं अद्वैतसिद्धान्तसाधकः । मुद्रितश्चायं ग्रन्थः शारदाविलासमुद्रणालये कुम्भघोणनगरे ।

2. ब्रह्मविद्यातरङ्गिणीव्याख्या—श्रीमन्नारायणयोगीन्द्रैः प्रणीतस्य अद्वैतसिद्धान्त प्रतिपादकस्य ब्रह्मविद्यातरङ्गिण्याख्यस्य प्रकरणग्रन्थस्य विस्तृतविवरणरूपः ।

3. सद्विद्याविलासः सव्याख्यः—छान्दोग्यषष्ठाध्यायार्थसङ्ग्राहकः पद्यात्मकः भाष्यतद्व्याख्यानानुसारं विस्पष्टार्थप्रकाशकः ।

4. वेदान्तवादसङ्ग्रहः—ग्रन्थोऽयं अद्वैतसिद्धान्तीयावान्तरमतभेदविषयकान् पूर्वोत्तरपक्षान् आवेदयति ।

एवं—1. दुर्जनोक्तिनिरासः । 2. उपाधिविचारः । 3. व्यावहारिकशब्दसाधुत्वविचारः । 4. प्रातिबन्ध्यशब्दसाधुत्वविचारः । 5. स्तोत्रग्रन्थाः । 6. सुन्दरेशलीलासङ्ग्रहः । 7. पुरुषार्थबोधसंग्रहः । 8. गङ्गाष्टकम् । 9. आर्तिहराष्टकम् । 10. नागरखण्डार्थसंग्रहः । 11. शिवमहिमकलिकास्तुतिव्याख्या । 12. इदंव्याख्या । 13. दीक्षितनवरत्नमालिका । 14. स्मार्तशिवरात्रिनिर्णयः । 15. राजगोपालोत्सवानुक्रमणिका । 16. त्यागेशनटनस्मरणसन्तानम् । 17. अर्धनारीश्वराष्टकम् । 18. सत्याख्या चतुश्श्लोकी । 19. कावेरीनवरत्नमालिका । 20. सव्याख्यः त्यागराजस्तवः । 21. सव्याख्या श्लोकद्वयी । 22. शिवतत्वविवेकदीपिका । 23. तत्त्वार्थचन्द्रिका (सामरुद्रसंहिताभाष्यम्) 24. ताम्रपर्णीस्तुतिः । एवं बहवो ग्रन्थाः प्रणीता इति ज्ञायन्ते ॥

69. हरिहरशास्त्री (1800–1900 A.D.)

राजुशास्त्रीति प्रसिद्धस्य त्यागराजशास्त्रिणशिष्यः चिदम्बरनगरवासी एकोनविंशतिशतकीयोऽयं हरिहरशास्त्री वेदान्तशास्त्रनिष्णातः। अस्य शिष्येषु पोलकं श्रीरामशास्त्रिणः दण्डपाणिस्वामिदीक्षिताश्च प्रसिद्धाः।

1. न्यायेन्दुशेखरः—

राजुशास्त्रिकृतन्यायेन्दुशेखरोत्तरभागात्मकोऽयं ग्रन्थः अद्वैतसिद्धान्तसाधकः ब्रह्मविद्यापत्रिकायां कुम्भघोणे मुद्रितः।

70. अनन्तकृष्णशास्त्री (1886 A.D.)

एते हि अनन्तकृष्णशास्त्रिणः महामहोपाध्यायाख्यराजकीयबिरुदसम्मानिताः पालकाडन्तर्गतसुब्रह्मण्योपाध्यायपुत्राः न केवलं ग्रन्थकरणेन शतभूषणीकाराः परन्तु जननापि शतभूषणी (नूरणि) काराः। नूरणिग्रामाभिजना एते चित्तूर-पाठशालायां साहित्यमधीत्य 1904 तमे वत्सरे चिदम्बरक्षेत्रे हरिहरशास्त्रिभ्यः समधीतव्याकरणाः मद्राससंस्कृतकलाशालाया अधीतपूर्वोत्तरमीमांसाशास्त्राः तिरुपति संस्कृतकलाशालाया अध्यापका आसन्। अनन्तरं एते कल्कत्तासंस्कृतकलाशाला-वेदान्तप्राध्यापका भूत्वा पञ्चदशवत्सरेभ्य अनन्तरं बम्बई भारतीविद्याभवनस्य गीताविद्यालये प्राध्यापका आसन्। एतेषां गुरवः पञ्चापगेशशास्त्रिणः, वेङ्कट-सुब्बाशास्त्रिणश्च धन्यतमाः। एतैः बहवः ग्रन्थास्सम्पादिताः कृताश्च। परन्तु स्वतन्त्रा एव ग्रन्था अत्र निर्दिश्यन्ते।

1. वेदान्तपरिभाषाप्रकाशिका। वेदान्तपरिभाषाव्याख्यात्मकोऽयं ग्रन्थः कल्कत्ता-विश्वविद्यालये मुद्रितः।

2. अद्वैतमार्तण्डः। ग्रन्थोऽयं व्याससिद्धान्तमार्तण्डादिद्वैतिग्रन्थं खण्डयन् अद्वैतं पुष्णाति। ग्रन्थोऽयं वणिक्प्रेस कल्कत्तायां मुद्रितः।

3. वेदान्तरक्षामणिः। ग्रन्थस्यस्य श्रीभाष्यसमालोचनमित्यपि नामान्तरम्। ग्रन्थेऽस्मिन् त्रिपाठीमहोदयोद्भावितानां अद्वैतदूषणानां खण्डनं श्रीभाष्यसमालोचना अद्वैतसिद्धान्त एव श्रुतेरैदम्पर्यञ्च वादमुखेन प्रतिपादितानि। ग्रन्थोऽयं विश्वमित्र-मुद्रणालये कल्कत्तायां मुद्रितः।

4. शारीरकभाष्यटिप्पणी—प्रदीपः (CSS 1)

5. अद्वैतदीपिका। ग्रन्थोऽयं महामहोपाध्यायश्रीरामसुब्बाशास्त्रिकृतस्य व्यास-रायरचितमध्वचन्द्रिकाखण्डनपरस्य चन्द्रिकाखण्डनाख्यग्रन्थस्य निरसनाय मध्व-चन्द्रिकासमर्थनाय च गौडगिरिवेङ्कटरमणार्यसम्पादितस्य चन्द्रिकाप्रकाशप्रसराख्यस्य ग्रन्थस्य सिद्धान्तान्, उत्तरादिमठाधीशमध्वस्वामिकृतं 'चन्द्रिकामण्डन'ञ्च खण्डयति, शाङ्करमतमक्षुण्णं साधयति च। ग्रन्थोऽयं वणिक्मुद्रणालये कल्कत्तायां मुद्रितः।

6. चतुर्ग्रन्थिसङ्ग्रहः—(CSS)

7. भगवद्गीता भारतीयदर्शनानि च। ग्रन्थेऽस्मिन् नवमेऽध्याये भगवद्गीताया अद्वैतमत एव तात्पर्यमित्यवधारितम्। ग्रन्थोऽय भारतीयविद्याभवनग्रन्थमालायां (BVS 4) बम्बई नगरे मुद्रितः।

8. शतभूषणी (शतदूषणीपरीक्षणम्)। विशिष्टाद्वैतग्रन्थरत्नस्य शतदूषण्या-ख्यस्य अद्वैतनिन्दापरस्य ग्रन्थस्य खण्डनपरोऽयं ग्रन्थः। यस्य कृते एते अनन्त-कृष्णशास्त्रिणः कामकोटिपीठाधिपतिभिः शतभूषणीति बिरुदेन भूषिताः। ग्रन्थोऽयं मद्रासनगरे (P. G. Pal) मुद्रणालये मुद्रितः।

9. शतभूषण्यनुबन्धः। एवं विवाहरहस्यमीमांसा, अभियाननिर्णयमीमांसाशास्त्र-संग्रहः, सनातनधर्मप्रदीपः, कामप्रदीपप्रभाव्याख्या, सौगन्ध्यविमर्शाख्याश्च ग्रन्था विरचिताः।

71. श्रीरामशास्त्री (1900–1968 A.D.)

पोलकं-श्रीरामशास्त्रिण इति प्रसिद्धा इमे चोलदेशीय नन्निलग्रामसमीपस्थ पोलकाख्याग्रहारे प्राप्तजन्मानः वेदान्तसाहित्यादिषु दर्शनेषु पण्डिताः शास्त्ररत्ना-कर इति बिरुदेन सम्मानिताः।

अद्वैतसभापण्डिता इमे हरिहरशास्त्री–दण्डपाणिस्वामि–वेङ्कटरामशास्त्रिभ्यः प्राप्तविद्याः मद्राससंस्कृतकलाशालायाः वेदान्तप्रधानाध्यापकाश्च राजन्ते स्म। एतेषां पिता सुन्दरशास्त्री स्वस्यापरे वयसि प्राप्तसन्यासाश्रमः। एतेषां माता शिवराम-लक्ष्मीनाम्नी। वाधूलान्वयजा एते स्वग्रन्थं द्रविडात्रेयदर्शनं षट्पञ्चाशदधिकपञ्च-सहस्रेषु कलिवर्षेषु चक्रुरिति ज्ञायते।

एते न केवलं शास्त्राणामध्यापने परन्तु साहित्यरसानुभवे च निष्णाताः। शास्त्रज्ञत्वकवित्वयोस्सुन्दरसामञ्जस्यमेतेषु महान् विशेषः। एते न केवलं दर्शनतत्वज्ञाः परन्तु विमर्शकवरेण्याश्च। एतेषां प्रतिभा यथा शास्त्ररण्यां तथा विमर्शनसरण्याञ्च असाधारणी विद्यते। शिवाद्वैते शाङ्कराद्वैते च पारङ्गता इमे रसिकोत्तमाः अध्ययनशीलाश्च।

1 द्रविडात्रेयदर्शनम्। शङ्करात् प्राचीनयोः ब्रह्मनन्दिद्रविडाचार्ययोः सिद्धान्तप्रदर्शनपरोऽयं ग्रन्थः (B. G. Pal) मुद्रणालये मुद्रितः।

2. चतुर्मतसामरस्यम्। कामकोटिकोशस्थाने मुद्रितः।

3. आमोगटिप्पणी॥ मद्रासराजकीयहस्तलिखितपुस्तकालये मुद्रितः॥

अन्ये च बहवः शैवग्रन्थाः एतैस्सम्पादिताः॥

72. जगदीश्वरशास्त्री (20 th cent. A.D.)

कुम्भघोणसमीपस्थ—इञ्जिक्कोल्लैग्रामाभिजनः यज्ञरामदीक्षितपुत्रः कृष्ण—यज्ञस्वामि—वेङ्कटरामशास्त्रिभ्योऽधीतशास्त्रः अद्वैतसभापण्डित दक्षिणदेशीयश्च। अनेन कृताः ग्रन्थाः— 1. निर्गुणतत्वनिर्णयः 2. चिदचिच्छारीरकब्रह्मसिद्धिः 3. सप्तविधानुपपत्तिप्रकाशः सर्वे ग्रन्थाः अद्वैतसभायां मुद्रिताः।

—:o:—

॥ अद्वैतग्रन्थकाराः ॥

प्रथमे प्रकरणे प्रसिद्धतमानां अद्वैताचार्यपदव्यपदेश्यानां अद्वैतग्रन्थकर्तॄणां तिथिक्रमानुसारी निर्देशः कृतः। प्रकरणेऽस्मिन् द्वितीये प्रसिद्धाः अद्वैतग्रन्थ प्रणेतारः तेषां ग्रन्थाश्च वर्णमालाक्रमेण निरूप्यन्ते।

1. अखण्डधामा (1250–1350 A.D.)

अस्याखण्डधाम्नः गुरुरखण्डानुभूतिः। पञ्चपादिकाविवरणव्याख्याता तत्वदीपनकार अखण्डानन्दसरस्वती च अखण्डानुभूत्यानन्दगिर्योः शिष्यः। यदि स एव तत्वदीपनकारगुरुरखण्डानुभूतिरस्य गुरुस्तर्हि आनन्दगिरिसामयिकस्त्रयोदशचतुर्दशशतकयोरपरपूर्वभागे आसीदिति सिध्यति। अनेन स्वग्रन्थे श्रुतयः परं प्रमाणत्वेनोल्लिखिता नान्ये प्रबन्धकाः प्रबन्धा वा।

1. उपदेशसाहस्रीव्याख्या — गूढार्थदीपिका।

शाङ्करोपदेशसाहस्रीगद्यभागव्याख्यात्मकोऽयं ग्रन्थः नातिविस्तृतस्सुगमश्चामुद्रितः मद्रासपुस्तकालये R. 2793 MGOML लभ्यते।

2. अग्निचित्पुरुषोत्तमः (1600 A.D.)

संक्षेपशारीरकव्याख्यातुष्षोडशशतकीयस्य रामतीर्थस्य शिष्योऽयं पुरुषोत्तमदीक्षित इति ग्रन्थाज् ज्ञायते। अनेन सर्वज्ञात्मकृतसंक्षेपशारीरकस्य सुबोधिनीनाम्नी अन्वर्थसंज्ञा व्याख्या कृता या च आनन्दाश्रममुद्रणालये (A. S. S. 83) मुद्रिता।

3. अग्निहोत्रभट्टः (1600–1700 A.D.)

दाक्षिणात्योऽयं अग्निहोत्रभट्टः शब्दकौमुदीव्याख्यातुर्द्वादशाहेज्यस्य पुत्रः। चोक्कनाथशास्त्रिणः पौत्रः। रामान्वयप्रसूतस्यास्याग्निहोत्रभट्टस्य माता भवानीनाम्नी। मीमांसान्यायवेदान्तेषु निष्णातोऽयं ज्ञानेन्द्रसरस्वतीवासुदेवेन्द्रसरस्वतीगण्डनृसिम्हसूरि-कालहस्तीशयज्वनां शिष्यः। ज्ञानेन्द्रगण्डनृसिम्हावुभावपि वासुदेवेन्द्रशिष्यौ अग्निहोत्रभट्टस्य गुरू चेति ज्ञायते। कालहस्तीशयज्वा तु अग्निहोत्रभट्टस्य मातुकः गुरुश्च। तेषु "वासुदेवाभिधं सौम्यं पतञ्जलिमहं भजे" इति

दर्शनात् व्याकरणशास्त्रे गुरुर्वासुदेवेन्द्रः, वेदान्ते ज्ञानेन्द्रसरस्वती, न्याये गण्ड-नृसिंहः, मीमांसायां कालहस्तीशयज्वा इत्यादि ऊहितुं अस्त्यवकाशः।

सरस्वतीमहालयस्थादर्शग्रन्थान्तपुष्पिकायाः (6095 DC TSML) अग्नि-होत्रभट्टकालस्सप्तदशशतकार्धात्पूर्वमधिकष्षोडशशतकापरार्धादिकश्चेति ज्ञायते।

1. अद्वैतरत्नकोशपूरणी (तत्वविवेचनी)।

नृसिंहाश्रमिकृतस्य तत्वविवेकदीपनापरनाम्नः तत्वविवेकव्याख्यात्मकस्य अद्वैतरत्नकोशस्य व्याख्याभूतोऽयं अद्वैतरत्नकोशपूरण्याख्यः ग्रन्थः मैसूरराजकीय-विश्वविद्यालयसंस्कृतग्रन्थमालायां (O.R.I.S.S. 96 Mysore) मुद्रितः।

तर्कोर्ज्जविनीनामा केशवमिश्रकृतायाः तर्कभाषाया व्याख्यायाः तत्वबोधि-न्याख्यायाः व्याख्याभूतः ग्रन्थः कृतः। गङ्गेशोपाध्यायकृतस्य तत्वचिन्तामणे व्याख्यायाः पक्षधरमिश्रकृतायाः आलोकाख्यायाः व्याख्याः "तत्वचिन्तामण्या-लोकस्फूर्तिरिति कृता। सिद्धान्तकौमुदीव्याख्या सुमनोरमाख्या अनेन कृता उत नेति संशयः। प्रामाण्यवादाख्यः कश्चन ग्रन्थः (D. 4272 MGOML) अदसीय लभ्यते।

4. अच्युतरायमोडकः (1775–1839 A.D.)

नासिक (पञ्चवटी) क्षेत्रवासी अच्युतशर्माय नारायणसाठे—अन्नपूर्णयोः पुत्रः। नारायणसाठे इत्याख्यस्यास्य पितुस्सन्यासाश्रमस्वीकारादनन्तरं अद्वैतसच्चि-दानन्देन्द्रसरस्वतीति नाम। अद्वैतसच्चिदानन्दस्य शिष्यष्षष्ठिनारायण इति प्रसिद्धः अच्युतशर्मण अद्वैतदर्शने गुरुः। शिवभक्त्युपदेशकः शैवदर्शनगुर्महादेवबु आख्यः। जनस्थानक्षेत्रवासी रघुनाथभट्टश्चास्य गुरुः। पितुरपि प्राप्तविद्योऽयम्। क्रैस्तवीयाष्टादशशतकापरार्धादारभ्य एकोनविंशतिशतकपूर्वार्धान्तं चतुष्षष्ठितमास्समा अस्य जीवनकाल इति महावाक्यार्थमञ्जरी शङ्करदिग्विजयव्याख्याया अद्वैतराज्य-लक्ष्म्याख्यायाश्चावगम्यते।

1. अद्वैतजलजातम् 2 अद्वैतराज्यलक्ष्मीः 3. अद्वैतविद्याविनोदः (317 BRD, 12 Nasir) 4. अवैदिकमततिरस्कारः 5. अद्वैतामृतमञ्जरी 6. जीवन्मुक्तिविवेकव्याख्या (पूर्णानन्देन्दुकौमुदी (ASS 20) 7. पञ्चदशी-व्याख्या (ASS 20) 8. बोधैक्यसिद्धिः (आत्मबोधव्याख्या)

9. महावाक्यार्थमञ्जरी (II. D. 14. A. L.) एते नव ग्रन्था अपि अद्वैतसिद्धा-न्तसम्बद्धाः। मद्रपुरीविश्वविद्यालये महावाक्यार्थमञ्जरी मुद्रिता (A. O. R. Vol 24 Part II)

अपरे च—अच्युतशतकम्, (नीतिशतपत्रम्) अकल्पितचिदम्बरीस्तोत्रम्, ईशदेशिकविवेचनमञ्जरी, कृष्णलीलामृतकाव्यम्, गीतासीतापतिः, गोदालहरी, (N. S. P.), दृश्यविषयताखण्डनम् (12378 B. R. D.) निरञ्जनमञ्जरी, प्रारब्ध-ध्वान्तसंहृतिः, भागीरथीचम्पूः, भामिनीविलासव्याख्या, मतोपन्यासः, (न स्वतन्त्रः ग्रन्थः साहित्यसारस्य चतुर्थः अध्यायः) रामगीताचन्द्रिका, विष्णुपादलक्षणम्, वेदान्तामृतचिद्रत्नचषकम् (322 B. R. D.), साहित्यसारः (N. S. P.), सौभाग्यकल्पद्रुमः सौन्दर्यलहरीव्याख्या, सदाचारः सव्याख्यः (10845 B. R. D.), हेरम्बचरणामृतलहरी च ग्रन्थाः कृताः। अधोनिर्दिष्टाः ग्रन्था एतत्कृता उत नेति न निश्चेतुं पार्यन्ते-स्मरहरविजयभागः, कृष्णशतकम्, नीति-शतकम्, रतिनीतिमुकुलम्, विशुद्धमाधवनाटकम्, मृत्युञ्जयचम्पूः, दुःखक्षयेन्दू-दयः, द्वैतव्यक्तिक्षयः, मणिमयादर्शः, मुक्तिरमालङ्क्रिया, ईशकेशादिपादान्तस्तुतिः, चिच्चिन्तामणिचिन्तनम्, कारुण्यलहरी, अवयवोक्तिप्रयुक्तिमञ्जरी, सम्यमसत्कृती, जगद्विजयः, हिरण्यकेशीयाह्निकम्, भूभृदुद्वाहः, शिवस्तवनमञ्जरी, प्रियव्रतचरित-चन्द्रिका, शिवस्तुतिमुक्ताभरणम्, सिद्धान्तरत्नसिद्धान्तः, रेवापीयूषलहरी, हरि भक्तिसारामृतसिन्धुसारः, अमरप्रथमकाण्डटीका, अर्थद्वयात्मिका अमरुशतकटीका, गोवर्धनसप्तशतीटीका, सोपानपञ्चकव्याख्या, सदाशिवोक्तार्थटीका, स्वप्नमन्त्रत्रयी-टीका, शृङ्गारकलिकाटीका, स्वकृतबोधैक्यसिद्धिटीका सप्तशतीटीका च। वेदान्त संग्रहनामा ग्रन्थः मद्रपुरीपुस्तकालयेऽमुद्रित उपलभ्यते।

एषु महावाक्यार्थमञ्जरी पञ्चाशीतिभिरानुष्टुभैः पद्यैः पूर्णः तत्वमस्यादि महावाक्यानामर्थं प्रसाधयति मद्रपुर्यां विश्वविद्यालये मुद्रिता च।

5. अद्वयानन्दः (1500–1600 A.D.)

वेदान्तसारकर्तुस्सदानन्दस्य गुरुः शङ्करानन्दप्रशिष्यः प्रथमसदानन्दस्य शिष्योऽयमद्वयानन्दः पञ्चदशषोडशशकीय इति ज्ञायते। अदसीयः वेदान्त-संग्रहाख्यः प्रकरणग्रन्थ अमुद्रित अडयारपुस्तकालये लभ्यते।

6. अनन्तदेवः (1600 A.D.)

महाराष्ट्रजोऽयमनन्तदेवः देवोपनामककुलप्रसूतः गोदावरीतीरग्रामाभिजनः, एकनाथपौत्रः, आपदेवपुत्रः, द्वितीयानन्तदेवप्रपितामहः, द्वितीयापदेवपितामहः, भट्टनारायण-रामतीर्थयोश्शिष्य इति "श्रुतं यच्छ्रीरामतीर्थेभ्यः सम्प्रदायसमागतम्" इति एतदीये सिद्धान्ततत्वे, एतदीयपौत्रकृतस्मृतिकौस्तुभे च दर्शनाज्ज्ञायते। पूर्वोत्तरमीमांसापण्डितोऽयं मीमांसान्यायप्रकाशिकाकारस्यापदेवस्य पिता गुरुश्च।

केचित्तु—न्यायप्रकाशोपान्तिमश्लोके "गोविन्दगुरुपादयो" रितिदर्शनात् भ्रान्ताः आपदेवः गोविन्दशिष्य इति वदन्ति। अथवा अनन्तदेवस्यैव गोविन्ददेव इति नामान्तरं स्यादिति वदन्ति।

एकनाथः
|
रामतीर्थः (गुरुः) — आपदेवः I — भट्टनारायणः (गुरुः)
|
अनन्तदेवः (1600 A.D.)
|
आपदेवः II (न्यायप्रकाश - वेदान्तसारव्याख्याकारः)
|
अनन्तदेवः (1675 A.D. स्मृतिकौस्तुभकारः)

1. सिद्धान्ततत्वम्—(P. S. 22)

अयं ग्रन्थः श्रवणादिसाधनपरिपाकसमुत्पन्नतत्वज्ञानस्य अज्ञानतत्कार्यबाधे सति सत्यज्ञानानन्दाखण्डाद्वितीयं वस्तुमात्रमवशिष्यत इति, विक्षेपशक्तिसम्बद्धं चैतन्यं ईश्वरः, आवरणशक्तिसम्बद्धं चैतन्यं जीव इति जीवेश्वरपरिष्कृतिं कुर्वन्नयं प्रकरण-ग्रन्थकोटिमारोहति। ग्रन्थोऽयं पण्डितग्रन्थमालायां वाराणस्यां मुद्रितः। अस्य व्याख्या सम्प्रदायनिरूपणाख्यापि अनेनैव कृता।

2. सिद्धान्ततत्वव्याख्या—सम्प्रदायनिरूपणम् तत्त्वप्रक्रियेतिनामान्तरम् (7547 TSML) मनोरञ्जननाटकम्, भगवन्नामकौमुदीव्याख्या—"प्रकाशः" 328 TCD) च अनेन कृतः।

7. अनन्तभट्टः (1654 A.D.)

यदुभट्टापरनाम्नः दादूभट्टस्य पुत्रोऽयं अनन्तभट्टः बीकानेराधीशेन अनूपसिम्हेन प्रोत्साहितः ग्रन्थमेनञ्चकारेति ज्ञायते। अस्य पुत्रः वैद्यनाथभट्टनामा।
1. अद्वैतरत्नाकरः—ग्रन्थोऽयं वेङ्कटेश्वरमुद्रणालये मुद्रितः। अस्य व्याख्या अमरदासवर्मणा कृता रत्नप्रभानाम्नी मुद्रिता च। शास्त्रमालाविवृतिरपि अनेन कृतेति ज्ञायते।

8. अनुभवानन्दः (1600–1700 A.D.)

अनुभवानन्दोऽयं दक्षिणदेशवासी प्रसिद्धस्य सिद्धान्तसिद्धाञ्जनकर्तुः कृष्णानन्दसरस्वत्याश्शिष्येषु अन्यतम इति अमुद्रिते एतदीये कोशरत्नप्रकाशाख्ये ग्रन्थे "कृष्णानन्दयतीश्वरं गुरुवरम्" इति, "गुरुचोदितः कोशरत्नप्रकाशाख्यां व्याख्यां कुर्वे यथामति" इति च दर्शनाज् ज्ञायते। यद्यपि अनेन स्वग्रन्थारम्भे महेश्वरानन्द, शङ्करानन्द, कैवल्यतीर्थ शुद्धानन्दयति पूर्णानन्दाद्याः बहवो नमस्कृतास्तथापि ग्रन्थस्यादिमध्यान्तपुष्पिकाभ्यः कृष्णानन्दसरस्वत्येवास्य गुरुरिति निश्चीयते। सिद्धान्तचन्द्रिकाव्याख्याता रामानन्दयतिः कृष्णानन्दसरस्वतीकृतानुष्ठानपद्धतिव्याख्याता अप्पाध्वरी, रत्नतूलिकाकारः भास्करदीक्षितश्चास्य सतीर्थ्या इति निश्चीयते।

अस्य सतीर्थ्येन भास्करदीक्षितेन शाहजीप्रथमः तञ्जपुरमण्डलाधिराजः स्वपोषक इति रत्नतूलिकायां निर्दिश्यते। शाहजीप्रथमकालः (1684–1711 A.D.) इति इतिहासविदः। एवञ्च गुरोश्शिष्याणां सतीर्थ्यानाञ्च कालस्सप्तदशशतकमिति ज्ञायते।

1. कोशरत्नप्रकाशः—(7502 TSML)

अमुद्रितोऽयं ग्रन्थः नृसिम्हाश्रमिकृतस्वीयतत्वविवेकव्याख्याभूतस्य तत्वविवेकदीपनापरनाम्न अद्वैतरत्नकोशाख्यग्रन्थस्य व्याख्यारमकः सरस्वतीमहालये लभ्यते।

2. प्रभामण्डलम्—(6932 TSML) शास्त्रदीपिकाव्याख्यात्मकोऽयं ग्रन्थः यज्ञनारायणविरचिताद्भिन्न अमुद्रितश्च सरस्वतीमहालये लभ्यते।

9. अन्नम्भट्टः (1600–1700 A.D.)

आन्ध्रदेशजोऽयं कृष्णानदीतीरोपान्तग्रामवासी (चितूर) अद्वैतविद्याचार्यराघवसोमयाजिकुलोत्पन्नः तिरुमलाचार्यसूनुः कौशिकगोत्रजः, सिद्धान्तकौमुदीव्याख्यासिद्धान्तरत्नाकरकर्तुः रामकृष्णभट्टस्य सर्वदेवस्य च कनीयान् भ्राता, व्याकरणाचार्यशेषकृष्णपुत्रस्य शेषवीरेश्वरापराभिधस्य शेषविश्वेश्वरस्य शिष्यः, वेदान्ते ब्रह्मानन्दसरस्वत्याः शिष्यश्चेति एतत्कृतग्रन्थाज् ज्ञायते । अयं काश्यां शास्त्राण्यधीती उवासेति एतत्कृतविश्वेश्वरध्यानात् अवगम्यते । "काशीगमनमात्रेण नान्नम्भट्टायते द्विज" इत्यन्नम्भट्टप्रशंसनपरा किंवदन्ती च प्रसिद्धा । अस्य शिष्यः वेदाद्रिसूरिरिति प्रसिद्धः वेदान्तपरिभाषाव्याख्यातत्त्वबोधिनीकारः। न्याये व्याकरणे च एतदीयाः ग्रन्था उपलभ्यन्ते ।

1. मिताक्षरा—

ब्रह्मसूत्रवृत्तिग्रन्थोऽयं भामतीकल्पतरुवैय्यासिकन्यायमालाप्रदर्शितवर्त्मना ब्रह्मसूत्रार्थं वर्णयन् वाक्यविन्यासेन कल्पतरुं न्यायमालामनुसरति । ग्रन्थश्चायं मद्रासराजकीयहस्तलिखितपुस्तकालयमालायां (MGOMLS 19) मुद्रितः ।

तर्कसङ्ग्रहः, तर्कसङ्ग्रहदीपिका, तर्कभाषा, तत्त्वबोधिनीटीका, जयदेवकृततत्त्वचिन्तामणिव्याख्या सिद्धाञ्जनम्, महाभाष्यप्रदीपव्याख्या राणकोज्जीविनी, तत्त्वचिन्तमणिदीधितिव्याख्या सुबुद्धिमनोहरा, तन्त्रवार्तिकव्याख्या सुबोधिनी, स्वरविवेकः, तत्त्वविवेकदीपनव्याख्याश्च कृता इति ज्ञायते ।

10. अभिनवनारायणेन्द्रसरस्वती (1600-1700 A.D.)

अयमभिनवनारायणः ज्ञानेन्द्रसरस्वतीशिष्यः, कैवल्येन्द्रसरस्वतीप्रशिष्यः सदाशिवब्रह्मेन्द्रगुरोः परमशिवेन्द्रस्य गुरुः, अग्निहोत्रभट्टस्य सतीर्थ्यश्चेति ज्ञायते । प्रसिद्धनृसिंहाश्रमिणां शिष्यस्य नारायणाश्रमिण अपरे वयसि सामयिकोऽसाविति कारणादेवास्य अभिनवनारायणत्वं सार्थकं भवति । अनेन स्वीये छान्दोग्यभाष्यव्याख्याने विद्याप्रकाशाख्यः ग्रन्थः बहुवारं प्रमाणीकृतः ।

कैवल्येन्द्रसरस्वती
|
ज्ञानेन्द्रसरस्वती
|
अभिनवनारायणः — अग्निहोत्रभट्टः
|
परमशिवेन्द्रः
|
सदाशिवब्रह्मेन्द्रः

1. ऐतरेयोपनिषद्भाष्यटीका—(R. 1475 MGOML)
2. कठोपनिषद्भाष्यटीका—(XXI old h)
3. केनोपनिषद्भाष्यटीका (XXI 26 Oudh)
4. छान्दोग्योपनिषद्भाष्यटीका (R. 1662 MGOML)
5. पञ्चीकरणभावप्रकाशिका (R. 1492 B. MGOML)
6. प्रश्नोपनिषद्भाष्यटीका (D. 621 MGOML)
7. मुण्डकोपनिषद्भाष्यटीका (XXI 26 Oudh)
8. वार्तिकाभरणम् (B. S. S.)

सुरेश्वराचार्यकृतपञ्चीकरणवार्तिकव्याख्यात्मकोऽयं ग्रन्थः वाराणस्यां मुद्रितः । अनेन पञ्चरत्नव्याख्या कल्पवल्लीनाम्नी कृतेति वदन्ति ।

11. अभिनवसदाशिवब्रह्मेन्द्रः (1800–1900 A.D.)

कर्माकर्मविवेकतत्त्वम्पदार्थलक्ष्यैकशतकादिग्रन्थप्रणेतुर्वासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रस्य शिष्योऽयं अभिनवसदाशिवः आत्मानं स्वीयाभिनवत्वविशेषणेनैव प्रसिद्धसदाशिवब्रह्मेन्द्रस्य पश्चाद्भवं दक्षिणदेशजमावेदयति ।

1. पञ्चीकरणम् (D. 4572 MGOML)

12. अमरदासः (1800–1900 A.D.)

अनेन वेदान्तपरिभाषा-व्याख्यामणिप्रभायाः विषयपरिच्छेदे (Page 298) स्वस्य दीक्षागुरुः श्रीचन्द्र इति निर्दिश्यते । ब्रह्मविज्ञानोऽस्य विद्यागुरुः । नानक-

वन्दनात् गुरुसिक्खमतप्रवर्तकनानकसम्प्रदायानुगतोऽपि अद्वैतसम्प्रदाये महानादर अनेन प्रदर्श्यते । अमरदासोऽयं एकोनविंशतिशतकीय इति ग्रन्थेभ्यः निर्णीयते ।

1. वेदान्तपरिभाषा-शिखामणि-व्याख्या-मणिप्रभा ग्रन्थोऽयं वेङ्कटेश्वर स्ट्रीममुद्रणालये मुद्रितः ।

2. ईश - ऐतरेय - कठ - केन - तैत्तरीय - प्रश्न - माण्डूक्य - मुण्डकोपनिषदां व्याख्या मणिप्रभा अनेन कृता । अतएवायं मणिप्रभाकार इत्यपि प्रसिद्धः । उपनिषदां व्याख्या मणिप्रभा चौखाम्बामुद्रणालये मुद्रिता ।

13. अमरानन्दः (1225–1300 A.D.)

कर्णाटकदेशाभिजनस्यापि काशीवासिनोऽस्यामरानन्दस्य पूर्वाश्रमे पितुर्नाम कुमारेश्वर इति ज्ञायते । कर्णाटकदेशशासितुः होयलवंशजस्य त्रयोदशशतकीयस्य नरसिम्हपुत्रसोमेश्वरस्य सामयिकोऽयममरानन्दः अमरानन्दप्रशिष्यस्य जगदाराध्येत्यपरनामकानुपमसुखशिष्यस्य विश्वनाथापराख्यनिरुपमबोधस्य शिष्य इति ग्रन्थेषु दर्शनात् अस्य परात्परगुरुः अमरानन्दप्रथमः, परमगुरुर्जगदाराध्येत्यपरनामा अनुपमसुखः, विश्वनाथापरनामा निरुपमबोधः गुरुरिति निश्चीयते ।

1. स्वात्मयोगप्रदीपः—(R. 3428 MGOML)

आत्माद्वैतप्रतिपादकोऽयं ग्रन्थः जीवेश्वरस्वरूपं वर्णयन् तत्त्वम्पदविचारं सपरिकरं प्रतिपादयति । गौडपादाचार्यं भट्टाचार्यञ्च प्रमाणयति । अस्य व्याख्यापि मूलकर्त्रैव स्वात्मयोगप्रदीपप्रबोधिनी नाम्नी कृता अमुद्रिता च वर्तते ।

2. स्वात्मयोगप्रदीपव्याख्या—प्रबोधिनी (R. 3428 MGOML) विष्णुपुराणव्याख्या विष्णुवल्लभानाम्न्यपि अदसीयः ग्रन्थः ।

14. अमृतानन्दमुनिः (1400 A.D.)

"अपरं दक्षिणामूर्ति तमानन्दगिरिं भजे" इति आनन्दशैलाङ्घ्रिसरोजभृङ्गमाराद्भजे यादवशक्रशैलमिति आनन्दगिरियादवेन्द्रगिर्योर्नमस्कृतिश्रवणात् अमृतानन्दोऽयं आनन्दगिरि–यादवेन्द्रगिर्योश्शिष्य इति ज्ञायते । यादवेन्द्रगिरिस्तु आनन्दगिरेरपि शिष्य इति ज्ञायते ।

1. न्यायदीपावलीव्याख्या—न्यायविवेकः

आनन्दबोधाचार्यकृतन्यायदीपावलीव्याख्यात्मकोऽयं ग्रन्थः प्रथमानुमानपर्यन्तं मुद्रितश्चौखाम्बामुद्रणालये । अमुद्रितश्चापूर्णः ग्रन्थः सरस्वतीमहालये लभ्यते ।

15. अल्लालसूरिः (1300–1400 A.D.)

कोटिकलग्रामवासी नागमाम्बात्रिविक्रमाचार्ययोः पुत्रः अनन्तार्यप्रज्ञानारण्ययोश्शिष्योऽयमल्लालसूरिस्स्वग्रन्थे कल्पतरुकारं अमलानन्दं व्यासाश्रमशब्देन निर्दिशन् चित्सुखाचार्यं प्रमाणयति । अनेन स्वग्रन्थारम्भे वाचस्पतिमिश्रः व्यासाश्रमः प्रज्ञानारण्यश्च सनामग्रहणं निर्दिष्टाः ।

"अक्षुण्णायामरण्यान्यां भामत्यां वर्त्म यो व्यधात् ।
सुगमं प्रणमामस्तं व्यासाश्रममुनीश्वरम् ॥"

इति व्यासाश्रमः निर्दिष्टः । व्यासाश्रम एवामलानन्द इति केचित् । केचित्तु तयोर्भेदमामनन्ति । तेषां मतेन सुगम इति भामतीव्याख्या काचनासीद्या नाममात्रेण प्रसिद्धेदानीमिति वक्तव्यमापतति ।

यदि व्यासाश्रमामलानन्दावभिन्नौ (632 TMPL Mss.) तर्हि अल्लालकाल (1300 A. D.) कालादर्वाग्भवः । स्वग्रन्थे परिमलकारस्याप्पय्यदीक्षितस्यानुल्लेखात् अप्पय्यदीक्षितात्प्राचीन इति निश्चीयते । बरोडापुस्तकालयस्थे (13768 B. R. D.) भामतीतिलकादर्शपुस्तके तु तस्य प्रतिलिपिकाल (1335 A. D.) इति दृश्यते । तस्मात् (1335 A. D.) कालात्प्राक्तन इत्यत्र तु न संशयः । यदि व्यासाश्रमामलानन्दौ भिन्नौ तर्हि अमलानन्दव्यासाश्रमात् सुगमकारः व्यासाश्रमभिन्न इति बरोडास्थप्रतिलिपिकालस्यायमर्थं आपतति यत् कल्पतरुकारादपि प्राचीन इति । केचित्तु अल्लालसूरिः (1600-1700 A. D.) काले आसीदिति वदन्ति । अन्ये तु (1756 A. D.) कालादर्वाग्भव इति वदन्ति । तेषां मतेन बरोडास्थ प्रतिलिपिकाल विरुध्यते ।

1. भामतीतिलकम् (R. 4190 MGOML)

भामतीव्याख्यात्मकोऽयं ग्रन्थ अमुद्रित अपूर्णश्च बहुत्रोपलभ्यते ।

16. आत्मस्वरूपः (1150–1250 A.D.)

अप्रकाशिते एतत्कृते प्रबोधपरिशोधिन्याख्ये ग्रन्थे "श्रीनृसिंहस्वरूपस्य शिष्येणेयं मयेरिता" इति दर्शनात् नृसिंहस्वरूपशिष्योऽयमात्मस्वरूपः अनुभूतिस्वरूपादिवत्स्वरूपान्तनामा द्वादशशतकादारभ्य त्रयोदशशतकपूर्वार्धावधिककालिकस्स्यादिति ज्ञायते। अत्रेमानि कारणानि—

आत्मस्वरूपरचितौ द्वौ ग्रन्थावुपलभ्येते। प्रबोधपरिशोधिनीनामा पञ्चपादिका व्याख्यात्मकः कश्चन ग्रन्थः। द्वादशशतकीयेन आनन्दानुभवेन कृतस्य पदार्थतत्वनिर्णयस्य व्याख्यात्मक अपरो ग्रन्थः। तयोः प्रबोधपरिशोधिन्यां पञ्चपादिकाविवरणाचार्यः, आचार्यसुन्दरपाण्ड्यः, गौडाचार्यः प्रभाकराः भाट्टाश्च निर्दिष्टाः। 31–37 पत्रपर्यन्तमनिर्वचनीयख्यातिस्समर्थिता। न तत्र खण्डनादिग्रन्थो वा ग्रन्थकर्ता वोल्लिखितो नोल्लिखितः। पदार्थतत्वनिर्णयटीकायां भाट्टः किरणावली, उदयनः, न्यायसारः, भूषणं, ब्रह्मसिद्धिः, लीलावतीकारः, प्रमाणमाला, प्रशस्तपादभाष्यम्, कुसुमाञ्जलिः, इष्टसिद्धिकारश्चोद्धृताः। प्रमाणमालाकारः आनन्दबोध 11–12 शतकीयः। दशमशतकीय इष्टसिद्धिकारः। आनन्दगिरिश्चित्सुखो वा न निर्दिष्टः। तस्मादयोः पूर्वतनः आनन्दबोधादर्वाक्तन इति निश्चीयते। नान्यदत्र प्रमाणमुपलभ्यते।

1. पञ्चपादिकाव्याख्या —प्रबोधपरिशोधिनी। (R. 3225 MGOML) अमुद्रित उपलभ्यते।

2. पदार्थतत्वनिर्णयटीका–(R. 4219 MGOML) मध्यलुप्तोऽयं ग्रन्थ अमुद्रितः।

17. आदिवेङ्कटयोगी (1700–1800 A.D.)

अयमादिवेङ्कटयोगी भारद्वाजगोत्रजः गत्तिपुडीग्रामाभिजनः कोण्डयपुत्रः सुब्बय्यामात्यपुत्रः रामचन्द्रसरस्वतीप्रशिष्यः स्वयम्प्रकाशसरस्वत्याःशिष्यः आन्ध्रदेशज इति ज्ञायते। "अङ्गीकृता हि मत्कृतिरखिलैर्बालकृष्णयतिवर्यैः। शाहजियाग्रहारस्थितविद्वन्मुख्यसेवितपदाब्जैः।" इति वदन्नयं ग्रन्थकृत् सिद्धान्तसिद्धाञ्जनकाराणां शाहजग्रामवासिनां बालकृष्णसरस्वतीनां सामयिक इति ज्ञायते।

1. ब्रह्मविन्निधिः—(29 G. 29 AL. R. 4362 MGOML)

अमुद्रितोऽयं पूर्णः ग्रन्थः त्रयस्त्रिंशद्भिः प्रकरणैः परिमितः जगन्मिथ्यात्व, गुरुशिष्यलक्षणम्, महावाक्यार्थविचारम्, इन्द्रियजयोपायम्, ध्यानस्वरूपम्, जीवस्वरूपम्, सुषुप्तिमूर्छयोर्भेदम्, मुक्तिस्वरूपम्, जीवन्मुक्तिविदेहमुक्तिनिरूपणम्, अद्वैतब्रह्मस्वरूपम्, ब्रह्मविचाराधिकारिनिरूपणञ्च कुर्वन् समग्राद्वैतवेदान्तप्रकरणग्रन्थ प्रतिपादितान् विषयान् साकल्येनैकत्र प्रतिपादयति। ग्रन्थोऽयं अड्यार–मद्रास-राजकीयहस्तलिखितपुस्तकालययोर्लभ्यते।

18. आनन्दबोधेन्द्रसरस्वती (1780–1850 A.D.)

सर्वज्ञसरस्वती—रामचन्द्रसरस्वत्योः प्रशिष्यः स्वाराज्यसिद्धिकारस्य गङ्गाधरेन्द्रसरस्वत्याश्शिष्य इति ज्ञायते। अनेन "ऋतुरसतुरगमहीशक विकारि शुभवत्सरस्य शिशिरर्तौः" इति स्वग्रन्थनिर्माणकाल (1766-श 1842 A.D.) निर्दिश्यते।

1. योगवासिष्ठव्याख्या—तात्पर्यप्रकाशः (N. S. P.) योगवासिष्ठव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरमुद्रणालये मुद्रितः।

19. आनन्दरायमखी (1681–1728 A. D.)

गङ्गाधराध्वरिणः पौत्रः, नृसिंहरायपुत्रः त्र्यम्बकरायज्येष्ठभ्राता चायं आनन्दरायः शाहजीशरभोजीप्रधिवरश्चेति सप्तदशाष्टादशशतकीयः इति ज्ञायते। अस्य कृतिर्वेदान्ततत्वप्रधाना विद्यापरिणयाख्या। मुद्रिताचेयं निर्णयसागरे।

20. आनन्दस्वरूपभट्टारकः (1300 A. D.)

अयमानन्दस्वरूपभट्टारक आनन्दात्मशिष्यः। आनन्दात्मा शङ्करानन्दस्यापि गुरुः। एवञ्च शङ्करानन्दसतीर्थ्योऽयं त्रयोदशशतकीय इति निश्चयः।

1. वाक्यदीपिका (R. 3324 C. MGOML)

वेदोत्तमभट्टारकरचितायाः बृहद्वाक्यवृत्त्याः व्याख्यारूपोऽयं ग्रन्थ अमुद्रितः मद्रपुरीपुस्तकालये लभ्यते।

21. आनन्दाश्रमः (1650–1750 A. D.)

सच्चिदानन्दचिद्घनानन्दाश्रमवरशिष्यपरमहंसपरिव्राजकाचार्यआनन्दाश्रमेत्यादिग्रन्थात् सच्चिदानन्दचिद्घनानन्दशिष्योऽयं आनन्दाश्रमः महाराष्ट्रदेशज इति

ज्ञायते। अस्याचार्यस्य विश्वेश्वर इति नामान्तरमपि स्यादिति ग्रन्थतो ज्ञायते। एतद्विरचिते आनन्दरससागराख्ये ग्रन्थे शङ्कराचार्यैः, मानसोल्लासः, दशश्लोकी, योगवासिष्ठञ्च प्रमाणत्वेन वर्णितानि

कालनिर्णये प्रबलतरप्रमाणं नोपलभ्यते। परन्त्वस्य शिष्येण कृतायां मध्वसिद्धान्तभञ्जिन्यां भट्टोजिदीक्षितः निर्दिष्टः। यद्ययं भट्टोजिः प्रसिद्धस्स्यात् तर्हि तस्य सप्तदशशतकीयत्वेन तदर्वाग्भवोऽयमानन्दाश्रम इति निर्णेतुं शक्यते।

1. आनन्दरससागरः (R. 7543. R. 5749 MGOML)

त्रिपञ्चाशद्भिः प्रकरणैः पूर्णोऽयं प्रकरणग्रन्थः अखण्डार्थत्वं जगन्मिथ्यात्वं आत्मानात्मविचारञ्च कुर्वन् मद्रासराजकीयपुस्तकालये लभ्यते।

22. आपदेवः (1600–1700 A. D.)

दाक्षिणात्योऽयं आपदेवः महाराष्ट्रदेशीयः देवोपनामककुलप्रसूतः गोदावरीतीरग्रामाभिजनः एकनाथनप्ता आपदेवप्रथमस्य पौत्रः, सिद्धान्ततत्वकारस्य अनन्तदेवस्य पुत्रः स्मृतिकौस्तुभकारस्य अनन्तदेवस्य पितामहः स्वपितुरेवाधीतदर्शन इति ज्ञायते।

केचित्तु मीमांसान्यायप्रकाशोपान्त्यश्लोके "गोविन्दगुरुपादयो" रिति दर्शनात् भ्रान्ताः गोविन्दशिष्य आपदेव इति अनन्तदेवस्यैव गोविन्द इति नामान्तरमिति वा वदन्ति।

1. वेदान्तसारव्याख्या—बालबोधिनी (V. V. S.)

ग्रन्थोऽयं सदानन्दकृतवेदान्तसारव्याख्यात्मकः। ग्रन्थस्यास्य तत्वदीपिका इत्यपि नामान्तरं दृश्यते। ग्रन्थोऽयं वाणिविलासमुद्रणालये श्रीरङ्गनगरे मुद्रितः। मीमांसान्यायप्रकाशोऽपि अनेन कृतः।

23. ईश्वरतीर्थः (1098–1146 A. D.)

शृङ्गगिरिशङ्करपीठपरम्परागतोऽयमीश्वरतीर्थः नृसिंहगिरिशिष्यः, नृसिंहतीर्थगुरुश्चेति शृङ्गगिरिगुरुपरम्परासूच्याः ज्ञायते। भारतीयैतिहासिकत्रैमासिकपत्रिकायां (IHQ Vol. XIV) प्रतिपादितश्च।

1. शतश्लोकी—(5539 C.C.P.B.) वैराग्यप्रकरणापराभिधानोऽयं ग्रन्थ अमुद्रितः मध्यप्रान्तीयवरग्रन्थसूच्यां लभ्यते।

24. उत्तमश्लोकः (1250–1350 A. D.)

उत्तमश्लोकोऽयं शुद्धानन्दशिष्य इति ग्रन्थाज्ज्ञायते। आनन्दगिरिस्तु शुद्धानन्दस्यापि शिष्यः। यद्येवं तर्हि आनन्दगिरिसामयिकस्सतीर्थ्यश्चेति सिध्यति। श्रीकण्ठशास्त्री तु आनन्दगिरिकालं 1114-1228 A. D. इति (IHQ Vol. XIV) वदति। लक्ष्मीधरगुरोरनन्तानन्दगिरिरिति नाम। लक्ष्मीधरस्य शिष्येषु शुद्धानन्दः कश्चन आसीत्। यस्य च शिष्यस्स्वयम्प्रकाश इति प्रतिपादयति। यद्येवं शुद्धानन्दशिष्यौ स्वयम्प्रकाशोत्तमश्लोकौ द्वावपि सामयिकौ सतीर्थ्यौ चेति (1400 A. D.) कालीनाविति सिध्यति। ग्रन्थेषु विश्वनाथस्य विशालनयनानाथस्य च नमस्कृतिप्रकाशनात् वाराणसीवासीति ज्ञायते।

1. लघुवार्तिकम् (B. S. S. 205)

वेदान्तसूत्रलघुवार्तिकापरनामायं ग्रन्थः आनुष्टुभेण छन्दसा रचितः, कुत्रचिदेकेन पादेन एकैकस्याधिकरणस्य सङ्ग्राहकः मुद्रितश्च।

2. न्यायसुधा (B. S. S. 205)

लघुवार्तिकव्याख्यात्मकोऽयं ग्रन्थः लघुवाक्यसुधा लघुन्यायसुधा इत्यपि व्यवह्रियते।

25. उत्तमज्ञयतिः (1100–1200 A. D.)

"यन्नामश्रवणाद्भीता वादिनो मोहिता भृशम्।
तस्मै ज्ञानोत्तमाख्याय जगन्मोहभिदे नमः॥

इति तत्वशुद्धिव्याख्यायां दर्शनात् उत्तमज्ञस्यास्य गुरुर्ज्ञानोत्तम इति ज्ञायते। ज्ञानोत्तमोऽय चोलदेशीयात् मङ्गलग्रामवासिनः ज्ञानोत्तमाद्भिन्नः न्यायसुधादिग्रन्थप्रणेता विज्ञानात्मचित्सुखज्ञानगिरिगुरुरिति च परिशीलनाज्ज्ञायते। ज्ञानघनशिष्यस्य ज्ञानोत्तमस्य काल (1100–1200 A. D.) एवास्यापि कालस्स एव।

श्रीकण्ठशास्त्रिणां मतेन (IHQ Vol. XIV) ज्ञानघनः प्रकाशात्मनः सामयिक इति ज्ञानघनप्रशिष्यस्योत्तमज्ञस्य कालः (958–1038 A. D.) इति सिध्यति।

नित्यबोधघनः (773 - 848 A.D.

ज्ञानघनः (845 - 910 A.D.)

ज्ञानोत्तमः (910 - 953 A.D.)

चित्सुखः उत्तमश्लोकः ज्ञानगिरिः विज्ञानात्मा 958-1038 A.D.

1. तत्वशुद्धिव्याख्या—(754 C, O. L. 291 TCD) ज्ञानघनविरचितस्य तत्वशुद्धिग्रन्थस्य व्याख्यात्मकोऽयं पूर्णग्रन्थः तिरुवनन्तपुरपुस्तकालये लभ्यते ।

2. पञ्चपादिकाव्याख्या—वक्तव्यप्रकाशिका (56. A. Sringeri Math) अमुद्रितोऽयं ग्रन्थः शृङ्गगिरिमठपुस्तकालये लभ्यते ।

26. उपेन्द्रदत्तः (1859–1900 A. D.)

वाराणसीक्षेत्रवास्ययं भास्करानन्दापराभिधानस्यानन्तराममिश्रस्य शिष्यश्चन्द्रमणिपाण्डेयपुत्र इति ज्ञायते ।

1. पञ्चीकरणवार्तिकपाठः । ग्रन्थोऽयं वाराणसीसरस्वतीभवनग्रन्थालये मुद्रितः ।

27. उमामहेश्वरः 1550–1650 A. D.)

"गुरून् प्रज्ञाजितगुरूनमाम्यक्कय्यशास्त्रिण" इति "उमामहेश्वराख्येन वेल्लालकुलजन्मना" इति तत्वचन्द्रिकायां दर्शनात् अक्कय्येत्यपरनाम्न अक्षयसूरेः शिष्य वेल्लालकुलप्रसूतः वेङ्कटरायपुत्रः सभारञ्जनकारकविकुञ्जरगुरुः तप्तमुद्राविद्रावणकारस्य भास्करदीक्षितस्य पिता, चोलदेशीयः मोक्षकुण्ड (मुडिकोण्डान्) ग्रामवासी अभिनवकालिदासापरनामा चेति ज्ञायते । एतेन तत्वचन्द्रिकाया भूमिकायां मध्वविध्वंसन-मध्वन्यक्काराभ्यां मध्वमतस्य खण्डितत्वेन श्रीकण्ठमतरामानुजमत एवात्र खण्ड्येते इति प्रतिज्ञातम् । एवं रत्नतूलिकातप्तमुद्राविद्रावणादिकर्त्रा उमामहेश्वरपुत्रेण भास्करदीक्षितेन आत्मनः नृसिम्हाश्रमि-कृष्णानन्दसरस्वत्योश्शिष्यत्वं प्रतिपादितम् । एवञ्चाप्पय्यदीक्षितात् उमामहेश्वरः किञ्चिदर्वाचीनो अन्तिमसामयिको वा भवितुमर्हति । T. R. चिन्तामणिमहाशयस्तु स्वसम्पादिते साहित्यरत्नाकरकाव्यभूमिकायां भास्करदीक्षितं रघुनाथसामयिकं वर्णयति । रघुनाथनायकस्य शासनकाल (1600-1650 A. D.) इति P. P. शास्त्रिणः । एवञ्च भास्करदीक्षितपिता उमामहेश्वरः (1550–1650 A. D.) कालवासीति निर्णेतुं शक्यते ।

1. अद्वैतकामधेनुः (7526 T. S. M. L.) सूत्रवृत्तिरूपोऽयं ग्रन्थः परिच्छेदद्वयात्मकस्तेलुगुलिप्यां मुद्रितः ।

2. तत्वचन्द्रिका (R. 5156 MGOML)

निर्गुणब्रह्ममीमांसापरनामायं ग्रन्थः द्वादशभिरुल्लासैः पूर्णः श्रीकण्ठमतं रामानुजमतञ्च खण्डयति । अमुद्रितोऽयं ग्रन्थः अडयारजयपुरपोटीखानापुस्तकालयेषु लभ्यते ।

3. विरोधवरूथिनी (R. 4750 MGOML)

सप्तविंशतिभिः परिच्छेदैः पूर्णोऽयं ग्रन्थः रामानुजमतं खण्डयति । ग्रन्थोऽयमुद्रितः अडयार पुस्तकालये च लभ्यते ॥

4. वेदान्तसिद्धान्तसारः (R. 1403 MGOML) । पाणिनीयवादनक्षत्रमाला, भागवतचम्पूश्चानेन कृतौ ॥

28. उवटाचार्यः (1010–1062 A. D.)

आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना ।
उवटेन कृतं भाष्यं पदवाक्यैस्सुनिश्चितैः ॥
ऋष्यादींश्च नमस्कृत्य अवन्त्यामुवटो वसन् ।
मन्त्राणां कृतवान् भाष्यं महीं भोजे प्रशासति ।

इति निर्णयसागरमुद्रितायां शुक्लयजुर्वेदसंहितायां दर्शनात् उवटाचार्योऽयं वज्रटपुत्रः आनन्दपुरवासी भोजराजसामयिक इति निर्णीयते । भोजराजश्च यदि धारानगराधीशः सरस्वतीकण्ठाभरणशृङ्गारप्रकाशकारस्स्यात्तर्हि तस्य शासनकाल (1010–1062 A. D.) इति (यपिग्राफिका इण्डिकाया I page 230) प्रामाण्यात् शृङ्गारप्रकाशप्रामाण्याच्चाध्यवसीयते ॥

1. ईशावास्योपनिषद्विवरणम् (A.S.S. 5) । नवमशतकीयोऽयमिति वृद्धत्रय्यां गुरुपादहालदारः ॥

29. एकोजीराजः (1700–1750 A.D.)

चोलदेशीयतञ्जपुरराज्यशासकः प्रसिद्धशिवाजीमहाराजपौत्रः तुकोजीकुमाराम्बयोः पुत्र अष्टादशशतकीयः । शिवाजीराजस्य त्रयः पुत्रा आसन् । शाहजी शरभोजीतुकोजीनामानः । शाहजी राज्यशासनकालः (1684–1712 A.D.) शरभोजीशासनकाल (1712–1728 A.D.) तुकोजीशासनकाल (1728–1735 A.D.) एकोजीशासनकाल (1735–1736 A.D.) इति ज्ञायते । एकोजीराजस्यास्य गुरुर्महादेवपण्डिताख्य राजसभापाण्डितः ॥

1. परब्रह्मतत्वनिरूपणम् (7655 TSML)

शिवपार्वतीसंपादपद्धत्यां रचितोऽयं ग्रन्थः सर्वकारणकारणं व्यापकं ब्रह्मस्वरूपं साधयति । शिवविष्णवभेदप्रतिपादकोऽयं ग्रन्थः महादेवपण्डितकृतप्रपञ्चसारान्तर्गतः । आदर्शपुस्तकेषु त्रिषु 7655 संख्याके ग्रन्थे महादेवविरचितप्रपञ्चसाराख्यराजरञ्जनपुरण" इत्येव दृश्यते । एतत्परिशीलनेन एकोजीकृतत्वेन निर्दिष्टास्सर्वेग्रन्थाः महादेवपण्डितकृता राजरञ्जनाय राजकृता इति निर्दिष्टास्स्युरिति संशय उदेति ।

2. रामानुजमतखण्डनम्—(7659 TSML) प्रपञ्चसारान्तर्गतोऽयं ग्रन्थः कृष्णनारदसंवादशैल्या रामानुजमतदोषान् प्रतिपादयति ।

3. मध्वमतकथनम्—(7960 TSML) मध्वमतस्य दुष्टाचारतां विशदयन्नयं ग्रन्थः प्रपञ्चसारान्तर्गत एव ।

30. कामाक्षी (1852–1920 A.D.)

भारतीयप्राक्तनविद्यायाः स्त्रीषु विरलतायां हेतौ अस्मिन् आधुनिके काले कमलमिव प्रादुर्भूता इयं कामाक्षी कावेरीनदीतीरवर्तिनि मायूरक्षेत्रे चोलदेशे उवास । आन्ध्रदेशजेयं विप्रकुलोत्पन्ना अस्याः पितामहेन प्रपितामहेन वा दुभाषी रामस्वामिशर्मणा नवीन एक अग्रहार निर्मितः ब्राह्मणेभ्यश्च दत्तः । इदानीमपि स अग्रहार "दुभाषग्रहारः" इत्येव प्रसिद्ध आस्ते । अस्याः पिता रामस्वाम्यार्यः । भ्राता सुब्रह्मण्यार्यः ।

कामक्ष्याः भर्ता रामलिङ्गार्यः । स च B. A. उपाधिधारी पाश्चात्यभाषाप्रवीणः । स चाकालिकदैवगत्या (1871 A.D.) काले पञ्चत्वं गतः । भर्तुस्स्वर्गारोहणकाले कामाक्ष्या वय एकोनविंशतिः । तदा प्रभृति मातुस्समीपस्था कामाक्षी न्यायशास्त्राण्यद्वैतग्रन्थांश्च सम्यगधीतवती । अपरे वयसि स्वभ्रात्रधीना आसीत् । (1871 A.D.) काले मृतभर्तृकायाः अस्या वय एकोनविंशतिरित्युक्ते अस्य जननकाल (1852 A.D.) इति भवति

1. अद्वैतदीपिका—मधुसूदनसरस्वतीकृतां अद्वैतसिद्धिं तत्प्रतिपादितान् मिथ्यात्वपरिष्कारांश्च सङ्गृह्णात्ययं ग्रन्थः । ग्रन्थोऽयं श्रीविद्यामुद्रणालये मुद्रितः ।


2. श्रुतिरत्नप्रकाशटिप्पणी—त्र्यम्बकभट्टकृतस्य श्रुतिरत्नप्रकाशस्य व्याख्या । मुद्रितोऽयं श्रीविद्यामुद्रणालये ।

3. श्रुतिमतोद्योतटिप्पणी—त्र्यम्बकभट्टकृतश्रुतिमतोद्योतव्याख्यात्मकोऽयं ग्रन्थश्रीविद्याविलासमुद्रणालये कुम्भघोणे मुद्रितः ।

न्यायबोधिनीनीलकण्ठीयविषयाणां सङ्ग्राहकोऽयमन्यः विषयमालाख्यश्च ग्रन्थस्समारचितः ॥

31. कालहस्तीशयज्वा (1550–1620 A.D.)

"प्रणम्य दक्षिणामूर्तिं रघुनाथाश्रमान् गुरून्" इति वदन्नयं कालहस्तीशयज्वा रघुनाथाश्रमशिष्य इति ज्ञायते । अस्य प्रपितामहस्सोमनाथः । पितामहः यौवनभारती । पिता मल्लिकार्जुनः । अस्य पत्नी यज्ञाम्बानाम्नी । अस्य द्वौ पुत्रौ-रङ्गनाथः बालकविश्च । बालकविना रामवर्मविलासाख्यः ग्रन्थः (R. 3673 MGOML) प्रणीतः । रङ्गनाथस्तु आश्रमस्वीकारादनन्तरं अखण्डानन्दसरस्वतीति प्रसिद्धः स्वयम्प्रकाशशिष्य ऋजुप्रकाशिकाकारः । इति श्रीकण्ठशास्त्री (HIQ. Vol. XIV) प्रतिपादयति । नल्गन्धुवंशजोऽयं कालहस्तीशः काञ्चीपुरवासी कामाक्षीभक्तः कामाक्षीदास इति प्रसिद्धश्च । प्रसिद्धाप्पय्यदीक्षितादनेन शिवदीक्षा स्वीकृता च ।



1. भावप्रकाशिका (9. 1. 13. AL)

नृसिंहाश्रमीयाद्वैतरत्नकोशापरनामकस्य तत्त्वविवेकव्याख्यातत्त्वदीपनस्य व्याख्यात्मकोऽयं ग्रन्थ अडयार पुस्तकालये लभ्यते ॥

2. भेदधिक्कारविवृतिः (R. 2187 MGOML)

नृसिंहाश्रमीयभेदधिक्कारव्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः मद्रपुरीराजकीय-हस्तलिखित ग्रन्थालये लभ्यते ॥ वसुचरितचम्पूरप्यदसीया कृतिः ॥

32. काशीनाथशास्त्री (1800 A.D.)

अनेन वेदान्तपरिभाषाख्यः कश्चन प्रकरणग्रन्थः धर्मराजाध्वरिकृतवेदान्त-परिभाषासारगर्भित रचितः । ग्रन्थोऽयं दासगुप्तमहाशयेन (HIP Vol. II Page 54) निर्दिष्टः ।

33. कुमारभवस्वामी (1300 A.D.)

अयं कुमारभवस्वामी मध्वध्वंसन–अद्वैतकौस्तुभ–भावनापुरुषोत्तमनाटका-दिकर्तुः रत्नखेटश्रीनिवासदीक्षितस्य पञ्चमः कुलपूरुषः । एतद्विरचितः ग्रन्थ अद्वैतचिन्तामणिः । ग्रन्थोऽयं रुक्मिणीकल्याणव्याख्यायां बालयज्ञदेवेश्वरकृतायां निर्दिष्टः । अम्बास्तवव्याख्यायाञ्च निर्दिश्यते । एवं मद्रासविश्वविद्यालयप्रकाशिते NCC ग्रन्थेऽपि निर्दिष्टः ।

34 कृष्णः (1800 A.D.)

ब्रह्मानन्दापराभिधानकृष्णानन्दयतेश्शिष्योऽयं कृष्णपण्डितः दक्षिणदेशीय तमिलभाषायास्साहित्ये च निष्णातश्चोलदेशवासीति च ज्ञायते । एतदीयः ग्रन्थः कैवल्यदीपिकाख्यः । स च तमिलभाषायां ताण्डवरायस्वामिना विरचितस्य कैवल्य-नवनीताख्यस्य संस्कृतीकरणरूपः पद्यबद्धः ग्रन्थः ।

ताण्डवरायश्चाष्टादशशतकीयश्चोलदेशीयः नन्निलग्रामवासी नारायणसरस्वती-शिष्यः । केचित्तु ताण्डवरायस्वामिनं तिरुवानैक्कावल - गोपालशास्त्रिणः प्राप्तविद्यं, नारायणगुरोः प्राप्तदीक्षं, परमशिवेन्द्रशिष्यं सदाशिवब्रह्मेन्द्रसतीर्थ्यञ्च वदन्ति । सर्वथापि ताण्डवरायस्वामिन अर्वाचीनोऽयं कैवल्यदीपिकाकारः कृष्णपण्डितः अष्टादशशतकीय इति निर्णयः । अज्ञातनामधेयेनास्य शिष्येण वाक्यसुधायाः व्याख्या कृता ।

1. कैवल्यदीपिका सव्याख्या—(10. E. 18. AL)

भागद्वयपरिमितोऽयं ग्रन्थः । प्रथमे तत्त्वदीपिकाख्ये अष्टोत्तरशतैः पद्यैः परिमिते अद्वैतमततत्त्वानि प्रतिपादितानि । द्वितीये संशयच्छेदाख्ये षट्सप्तत्यधि-कशतैः पद्यैः औपनिषदप्रमाणपूर्वकं अद्वैतवस्तुन्यारोपितास्संशयाश्छिद्यन्ते । अस्य-व्याख्यापि प्रभाख्या मूलकृतैव कृता । अमुद्रितोऽयमडयारपुस्तकालये प्राप्यते ।

2. प्रत्यक्त्वस्वप्रकाशवादः—(23. F. 44 प 22. AL)

3. भगवद्गीताभावप्रकाशः—(1390 CCPB ?)

4. अद्वैतसुधाबिन्दुः—(7999 BRD)

5. छान्दोग्योपनिषत्कारिकाः—

ग्रन्थोऽयं जयपुरपोटीखाना सूच्यां दृश्यते । परन्तु कैवल्यदीपिकाया ऋते अन्ये ग्रन्थाः किमनेनैव कृता उतान्येनेति निर्णेतुं न पार्यन्ते ।

35. कृष्णकान्तविद्यावागीशः (1800–1900 A.D.)

रामकृष्णभट्टाचार्यपौत्रेण कालीचरणन्यायालङ्कारतारिणीदेव्योः पुत्रेण राम-नारायणतर्कवागीशशिष्येण नव्यनैय्यायिकेन अनेन कृता दशश्लोकीसिद्धान्तबिन्दु-न्यायरत्नावल्याः व्याख्या प्रदीपिकाख्या कृतेति विमर्शका वदन्ति । परन्तु स

ग्रन्थः न्यायग्रन्थ इति भाति । राजेन्द्रलालसूच्यामेव दृश्यतेऽयं ग्रन्थः । नान्य-विवरणमुपलभ्यते ।

36. कृष्णगिरिः (1800–1900 A.D.)

ग्रन्थान्तपुष्पिकाया अयं कृष्णगिरिः कैलासाचालशिष्य इति ज्ञायते । वाराणसीवास्ययं रणोद्दीपाख्यनृपसामयिकस्तत्पोषितश्च । बाणेन्दुरन्ध्रेन्दुमिते वत्सरे अनेन स्वग्रन्थः कृतः । एवञ्च ग्रन्थनिर्माणकालः (1915 सं. 1858 A.D.) इति ज्ञायते ।

1. मोक्षसिद्धिः ।

ग्रन्थोऽयं मुन्नालालमुद्रणालये वाराणस्यां मुद्रितः । गद्यमयोऽयं ग्रन्थः शङ्कराचार्यं प्रमाणयन् कर्मोपासनाज्ञानानां क्रमेणानुष्ठानात् अद्वयात्मकब्रह्मज्ञाना-वाप्तिरिति प्रतिपादयन् प्रकरणग्रन्थतामर्हति ।

37. कृष्णनाथन्यायपञ्चाननः (1892 A.D.)

अर्जुनमिश्रवंशजः केशवचन्द्रपुत्रश्चायं नवद्वीपवासी मीमांसार्थसंग्रह-सांख्य-तत्त्वकौमुदी - अभिज्ञानशाकुन्तलादीनां व्याख्याता एकोनविंशतिशतकीय इति ज्ञायते । अनेन कृता वेदान्तपरिभाषाव्याख्या आशुबोधिन्याख्या कलकत्तानगरे मुद्रिता ।

38. कृष्णमिश्रः (1060–1100 A.D.)

आध्यात्मिकनाटककर्ता राजस्थानान्तर्गत "जाजभुक्ति" वासी चायं कृष्णमिश्रः स्वग्रन्थे कीर्तिवर्माणं प्रस्तुवन् तत्सामयिकत्वं प्रतिपादयति । कीर्तिवर्मा च (1060–1100 A.D.) काले शशासेति ग्रन्थस्थभूमिकाया ज्ञायते । संस्कृत-साहित्ये आध्यात्मिकवस्तूनि नाटकवस्तूकृत्य नाटकप्रणयनश्रेयः प्रथमत अस्यैवेति ज्ञायते ।

1. प्रबोधचन्द्रोदयम् ।

ग्रन्थोऽयं निर्णयसागरमुद्रणालये मुद्रितः । ग्रन्थस्यास्य बहूनि व्याख्यानानि विद्यन्ते यानि चान्यत्र प्रतिपादितानि ।

39. कृष्णलीलाशुकः (1168–1293 A.D.)

अयमेव बिल्वमङ्गलाचार्य इति प्रसिद्धः । यद्येवं पितास्य दामोदरः । माता नीली । ईशानदेवशिष्योऽयं कृष्णलीलाशुकः केरलदेशवासी गोश्रीसाम्राज्यान्तर्गते तिरुच्चूरसमीपवर्तिनि "तेक्कमठे" लब्धवासः (1220–1300 A.D.) काल उवासेति प्राच्यभाषामहासम्मेलनस्य नवमाधिवेशपत्रिकायां (प्रसीडिङ्स आफ नैन्त ओरियण्टल कान्फ्रेंस) दृश्यते ।

यद्ययं सरस्वतीकण्ठाभरणव्याख्यापुरुषकार-कृष्णलीलामृतादिकर्ता कृष्णलीला-शुकस्स्यात्तर्हि कालोऽस्य द्वादशत्रयोदशशतकोत्तरार्धपूर्वार्धविधिक इति निर्णेतुं शक्यते । यतः पुरुषकारे हेमचन्द्रः निर्दिष्टः । हेमचन्द्रश्च (1166-1220 A.D.) काल आसीत् । पुरुषकारस्य पंक्तयश्च देवराजकृतायां निघण्टुटीकायामुद्धृताः । तस्मादयमेतन्मध्यपातीति निश्चीयते । देवराजकालश्च (1293–1343 A.D.) सीताराम जयरामजोशी तु कृष्णलीलाशुकं एकादशशतकीयं (1100 A.D.) स्वीये संक्षिप्तसंस्कृतसाहित्येतिहासे प्रतिपादयति ।

श्रीचिह्नकाव्यनामा कश्चन ग्रन्थः कृष्णलीलाशुकेन कृतः । तत्रायं श्लोकः— "श्रीपद्मपादमुनिवर्यविनेयवर्गश्रीभूषणं मुनिरसौ कविसार्वभौमः ।" इति । तेक्कम-ठस्य स्थापना पद्मपादाचार्येण कृता स्यात् । एवमेव पद्मपादशिष्योऽयं कृष्णलीला-शुक इति वक्तुं शक्यते । केनोपनिषद्व्याख्यायाञ्च दृश्यमाणा Page 10 "ब्रह्म-भूयं गते पूर्वं शङ्करे कृत्स्नवेदिनि पूर्वे च तादृशे" इत्यादिश्लोकीया 'पूर्वे च तादृशे' इति पंक्तिरपि पद्मपादाचार्यं निर्दिशति । एवं च वेदान्ते पद्मपादाचार्यशिष्योऽयं कृष्णलीलाशुकः नवमशतकीय इति सिध्यति । अत एव इण्डियन हिस्टारिकल रेव्यू" (IHR. Vol. VII Page 334) पत्रिकायां कृष्णलीलाशुकः नवमशतकीय इति वर्णितम् । कृष्णलीलाशुकं केचित् वङ्गदेशजं वदन्ति ।

1. केनोपनिषद्व्याख्या—शङ्करहृदयङ्गमा (MGOMLS)

कृष्णकर्णामृतम्, कृष्णलीलाचरितम्, कृष्णलीलाकौमुदी, गोविन्दस्तोत्रम्, गोविन्दैकविंशतिः, बालकृष्णक्रीडाकाव्यम्, पुरुषकारः, बिल्वमङ्गलस्तोत्रम्, श्रीचिह्नकाव्यञ्च अनेन रचितानि ॥

40. कृष्णशास्त्री (1650–1700)

भावाज्ञानप्रकाशिकाकर्तुः रङ्गनाथसूरेश्शिष्यस्य शिवरामस्य पिता अयं कृष्णशास्त्रीति ज्ञायते। अनेनाद्वैतविद्याविजयाख्यः ग्रन्थः कृत इति ज्ञायते। स च ग्रन्थः नोपलभ्यते। परन्तु तत्पुत्रकृतायां अमुद्रितायां भावाज्ञानप्रकाशिकायां निर्दिष्टः ॥

1. अद्वैतविद्याविजयः Q.

41. कृष्णशास्त्री (1870–1939 A.D.)

महामहोपाध्याय इति राजकीयबिरुदभूषितोऽयं कृष्णशास्त्री करुङ्गुलं कृष्णशास्त्रीति प्रसिद्धः। श्रीशालिपुर (तिन्नेवली) समीपस्थे कृष्णतटाकाख्ये (करुङ्गुलम्) ग्रामे लब्धजन्मान एते हरिहरशास्त्रिणां शिष्याः। अद्वैतसभापण्डितोऽयं मद्रपुरीसंस्कृतकलाशालाप्रधानाध्यापकपदवीं बहुवत्सरपर्यन्तं अलञ्चकार। अपरे वयसि प्राप्तसन्यास विदेहमुक्तो जातः ॥

1. अधिकरणचतुष्टयी।

आनन्दमयाधिकरण-यथाश्रयभावाधिकरण - ऐहिकाधिकरणलिङ्गभूयस्त्वाधिकरणानां विषयविचारप्रधानोऽयं ग्रन्थः बालमनोरमामुद्रणालये मद्रासनगरे मुद्रितः।

2. ब्रह्मसूत्रानुगुण्यसिद्धिः। ग्रन्थोऽयं गोपालविलासमुद्रणालये कुम्भघोणे मुद्रितः।

3. परिमलः (A. M. S. S. 25)

गङ्गाधरेन्द्रसरस्वतीकृतस्वाराज्यसिद्धिव्याख्यात्मकोऽयं ग्रन्थः आर्यमतसंवर्द्धिनीग्रन्थमालायां मुद्रितः।

42. कृष्णानन्दभारती (1400 A.D.)

"श्रीगुरुं भारतीतीर्थं विद्यारण्यमुनीश्वरम्" इत्यादिना भारतीतीर्थविद्यारण्यौ नमन्नयं कृष्णानन्दभारती भारतीतीर्थविद्यारण्यशिष्यः शृङ्गगिरिमठपरम्परागतः दक्षिणदेशीयश्चतुर्दशशतकीय इति सिध्यति।

1. महावाक्यार्थदर्पणम्। (54. A. 41. A.L.)

गुरुशिष्यप्रणल्यां औपनिषदमहावाक्यानां अद्वैतब्रह्मावबोधकत्वं प्रदर्शयन्नयं प्रकरणग्रन्थः पूर्णं अमुद्रितश्च अडयारपुस्तकालये प्राप्यते।

43. कृष्णानन्दसरस्वती (1825–1900 A.D.)

"नमोऽस्तु गुरवे तस्मै यत्र तत्र निवासिने। सच्चिदानन्दपादाय चरणाय मुहुर्मम।" इति ब्रह्मसूत्रकुतूहले सच्चिदानन्दाश्रमिणं, "यस्योपदेशमाहात्म्यात् जडा अपि विनिर्गताः। संसारबन्धात् तं वन्दे वासुदेवेन्द्रयोगिनम् ॥" इति वासुदेवेन्द्रञ्च नमस्यन्नयं बालकृष्णानन्दापरनामा कृष्णानन्दसरस्वती विद्यायां सच्चिदानन्दाश्रमशिष्यः, आश्रमस्वीकारे वादेवेन्द्रशिष्यश्चेति ज्ञायते। वाराणसीवास्ययं स्वनिर्मितेषु ग्रन्थेषु शङ्कराचार्यं विशेषतः प्रणमति ॥

अनेन रामदुर्गाख्यविप्रप्रेरणया वेदेन्दुवसुभूमिते शालिवाहनशके 1814–1890 A. D. शास्त्राकूतप्रकाशः ब्रह्मसूत्रकुतूहलञ्च रचिते इति ज्ञायते। एवञ्चास्य काल एकोनविंशतितमशतकमिति निश्चयः। अस्य शिष्यः हरिकृष्णशर्माख्यः।

1. अद्वैतपञ्चरत्नव्याख्या-किरणावली (R. 1613 (b) MGOML)

2. ब्रह्मसूत्रकुतूहलम्।

ग्रन्थस्यास्यावतरणिकायां अद्वैतसिद्धान्ताः विशदीकृताः। अथातो ब्रह्मजिज्ञासा त आरभ्य ज्योतिश्चरणाभिधानात् — इत्यन्तानां चतुर्विंशतिसूत्राणां काचित्स्वतन्त्रा वृत्तिरद्वैतमतपोषिण्यारचिता। ग्रन्थोऽयं राजराजेश्वरीमुद्रणालये काश्यां मुद्रितः ॥

3. शास्त्राकूतप्रकाशः

ग्रन्थोऽयं द्वैतिवादनिरसनपूर्वकं अद्वैतवादं राद्धान्तयति। ग्रन्थेऽस्मिन् दृश्यप्रपञ्चस्य मिथ्यात्वमुपपाद्य एकजीववादानेकजीववादयोर्निरवकाशत्वमुपवर्ण्य सजातीयविजातीयस्वगतभेदशून्यत्वमेवात्मत्वमिति सिद्धान्तितम्। आह्निकत्रयपरिपरिमितोऽयं लघुग्रन्थः जगदीश्वरप्रेस बम्बई नगरे मुद्रितः ॥

4. तिमिरोद्घाटनम् ।

लघुग्रन्थेऽस्मिन् अद्वैतात्मस्वरूपवर्णनेन साकं अवतारपदार्थः मुक्तिशब्दार्थविचारश्च प्रसङ्गवशादुपवर्णिताविति विशेषः । ग्रन्थोऽयं नवनलप्रेस राजकोट नगरे मुद्रितः ॥

5. भगवद्गीतैकदेशपरामर्शः ।

गीताया भेदवादे तात्पर्यं निरस्याद्वैतब्रह्मवादे तात्पर्यं साधितम् । मुद्रितश्चाया गवर्नमण्टप्रेस गोण्टारपुरनगरे ॥

44. कृष्णानन्दसरस्वती (1900 A. D.)

कैवल्यानन्दकृष्णानन्दयोश्शिष्योऽयं वाराणसीवासी एकोनविंशतिशतकीय इति ज्ञायते । 1. अद्वैतसाम्राज्यम् N.S.P. 2. अज्ञानतिमिरदीपकः IOL 3. कैवल्यगाथा Kalpathi Press Bombay 4. गीतासारोद्धारः ; 5. स्वानुभूतिप्रकाशः (विलासः) (9976 BRd.) 6. ब्रह्मगीताव्याख्या —"चित्प्रकाशिनी" (136 नासिकसूच्यां) 7. अध्यात्मभागवतव्याख्या "चित्प्रकाशिनी" । नासिकसूच्यां (108) अदसीयाः ग्रन्था दृश्यन्ते ॥

45. कृष्णानुभूतियतिः (1500–1600 A.D.)

आनन्दानुभूतिं नमस्कुर्वाणोऽयं विबुधेन्द्रापरनामा आनन्दानुभूतिशिष्यः । केरलदेशजोऽयं स्वसामयिकौ केरलशासकौ राजराजरविवर्मनामानौ शारीरकमीमांसासूत्रसङ्ग्रहे निर्दिशति । केरलीयः वासुदेवकविनामा प्रसिद्धः रविवर्मणस्सभायामासीदस्य च कालः पञ्चदशशतकमध्यभाग इति कृष्णाचार्यसंस्कृतसाहित्यचरिते 252 पुटे दृश्यते । यदि कृष्णानुभूतिनिर्दिष्ट एवायं रविवर्मास्यात्तर्हि अस्यापि काल (1550 A. D.) इति वक्तुं शक्नुमः । मद्रासराजकीयहस्तलिखितपुस्तकालयस्थ शारीरकशास्त्रसंग्रहे विद्यमानमिदं–"गीर्वाणेन्द्रसरस्वत्याः पादाब्ज हृदि बिभ्रतः" इति पद्यञ्च नृसिंहाश्रमिगुरुं गीर्वाणेन्द्रं स्मारयतीव ।

1. ब्रह्मसूत्राधिकरणन्यायानुक्रमणिका (R. 3305 B. MGOML)

2. शारीरकमीमांसाशास्त्रसंग्रहः (R. 2905 MGOML)

ब्रह्मसूत्रवृत्तिरूपोऽयं जीवब्रह्माभेदप्रतिपादकः ग्रन्थः अडयारपुस्तकालये अनन्तशयनपुस्तकालये विश्वभारतीशान्तिनिकेतनपुस्तकालये चामुद्रित उपलभ्यते ।

3. अधिकरणसंख्याश्लोकाः । (C. S. S. 1)

46. केशवशास्त्री (1800–1850 A.D.)

स्वग्रन्थे आत्मानमानन्दाश्रमप्रशिष्यं लक्ष्मणपन्तशर्मणः राजारामशास्त्रिबालशास्त्रिणोश्च शिष्यं प्रतिपादयन्नयं केशवशास्त्री एकोनविंशतिशतकीयः । तत्र लक्ष्मणपन्तशर्मा आनन्दाश्रमशिष्यश्च ।

1. आत्मसोपानम् । ग्रन्थोऽयं 479 आनुष्टुभैः पद्यैः घटितः प्रकरणग्रन्थः ।

गुरुशिष्यप्रणाल्या प्रवृत्तोऽयं ग्रन्थः आत्मनः नित्यशुद्धबुद्धमुक्तत्वं, ज्ञेयविषयाणां मिथ्यात्वं जीवन्मुक्तत्वोपपत्तिश्च प्रतिपादयति । मुद्रितश्चायं वाराणसी पण्डितसंस्कृतग्रन्थमालायाम् (Vol. IV Pandit Series Vol. IV)

47. कैवल्येन्द्रः (1550–1650 A. D.)

अनेन वेदान्तभूषणनामा ग्रन्थः कृतः । ग्रन्थोऽयं एतच्छिष्येण विद्येन्द्रसरस्वत्या स्वकृते वेदान्ततत्त्वसाराख्ये सरस्वतीमहालयस्थे (7575 TSML) ग्रन्थे निर्दिष्टः । (368 DCAL Vol. VI) नीलकण्ठवाजपेयीयायां सुखबोधिनीव्याख्यायाञ्च निर्दिष्टः ।

48. गणपतिशास्त्री (1850–1920 A. D.)

चोळदेशीयमन्नार्गुडिसमीपस्थपाङ्गानाडुग्रामवासी राजुशास्त्र्यपरनामकत्यागराजशास्त्रिणः, पद्मनाभस्वामिनश्च प्राप्तन्यायवेदान्तव्याकरणशास्त्रः आशुकविर्गणपतिशास्त्री स्वीयसप्तदशमे वयस्येव कटाक्षशतककविरिति प्रसिद्धः । कोनेरिराजपुरवासिना साम्बशिवार्येण अद्वैतग्रन्थप्रकाशनाख्यं मुख्यं महत् प्रयोजनं मनसि कृत्वा कुम्भघोणे स्थापितस्य अद्वैतमञ्जरीग्रन्थमालां समारब्धवतः श्रीविद्यामुद्रणालयस्य ग्रन्थप्रकाशनाय नियुक्तेषु पण्डितेषु गणपतिशास्त्र्यप्यन्यतमः । द्वारकापीठाधिष्ठातृणा वेदान्तशास्त्रे समाधेयत्वेन (1905 A. D.) काले प्रकाशितानां सप्त प्रश्नानां उत्तरदानेन गणपतिशास्त्री वेदान्तकेसरीति बिरुदेन भूषितश्च ।

1. अथशब्दविचारः 2. ईशावास्यविवृतिः 3. कटाक्षशतकम् 4. केनोपनिषद्विवृतिः 5. गुरुराजसप्ततिः 6. जीवविजयचम्पूः 7. दुर्गाशतकम्, 8. ध्रुवचरितम् 9. नैर्गुण्यसिद्धिः 10. पार्थप्रहारः 11. वैदिकाभरणव्याख्या—मुकुरः 12. शारीरकमीमांसारहस्यम्, 13. श्रवणविधिवाक्यार्थश्चानेन कृताः ग्रन्थाः। केचित् अमुद्रिताः, केचन अद्वैतसमास्वर्णमहोत्सवपत्रिकायां प्रकाशिताः। वैदिकाभरणव्याख्या तु अण्णामलैविश्वविद्यालये मुद्रिता।


49. गणेशशर्मा (1906 A. D.)

दक्षिणदेशजोऽयं दक्षिणार्काडजिल्लान्तर्गतदीक्षामङ्गलाग्रहारवासी मद्रपुरीसंस्कृतकलाशालाप्रधानाध्यापकयोः कृष्णतटाक—कृष्णशास्त्रि रामचन्द्रदीक्षितयोः शिष्यः विंशतिशतकीयोऽयं गणेशशर्मा।

1. सुरेश्वरहृदयम्। ग्रन्थेऽस्मिन् शबलब्रह्मणः जगत्कारणत्वं, साक्षिशब्दार्थः, भावाविद्या, अज्ञानशब्दनिर्वचनम्, भावरूपाज्ञाने सुरेश्वरसम्मतिः, सुषुप्त्यवस्थायां भावाविद्यासद्भावे भाष्यवार्तिकतात्पर्यनिर्णयः, वार्तिकमतेन दृष्टिसृष्टिवादः प्रतिपादितः। ग्रन्थोऽयं मद्रासलाजर्नलमुद्रणालये मुद्रितः॥

50. गीर्वाणेन्द्रसरस्वती (1600–1700 A. D.)

अमरेन्द्रसरस्वतीप्रशिष्यः विश्वेश्वरसरस्वतीशिष्यश्चायं गीर्वाणेन्द्रसरस्वती नृसिम्हाश्रमिबोधेन्द्रयत्योः गुरुश्चेति ज्ञायते। रघुनाथाश्रमिसामयिकः जगन्नाथाश्रमिसामयिकश्च॥



1. प्रपञ्चसारसङ्ग्रह (17637 TSML)

शाङ्करप्रपञ्चसारसङ्ग्रहात्मकोऽयं ग्रन्थः अमुद्रितस्सरस्वतीमहालये लभ्यते॥

51. गुरुमूर्तिशास्त्री (1850–1910 A. D.)

अनेनाद्वैतानन्दतीर्थकृताया ब्रह्मसूत्रतात्पर्यदीपिकायाः व्याख्यातात्पर्यविमर्शिनी रचिता। ग्रन्थोऽयं तेलुगु लिप्यां मुद्रितः। एकोनविंशतिशतकीयोऽयमिति ज्ञायते॥

52. गुरुस्वामिशास्त्री (1911 A. D.)

चोलदेशीयकुम्भघोणसमीपस्थे वरहूर्ग्रामे लब्धजन्मायं गुरुस्वामिशास्त्री साहित्यवेदान्तपण्डितः मद्रपुरीसंस्कृतकलाशालाया प्राप्तविद्यः वैद्यनाथधर्माम्बिकयो पुत्रः मद्रपुरीसंस्कृतकलाशालाध्यापकेभ्यः बालसुब्रह्मण्यशास्त्रि वैद्यनाथशास्त्रि-रामचन्द्रदीक्षितेभ्यः प्राप्तविद्यः विंशतिशतकीय इति ज्ञायते।

1. शारीरकव्याख्याप्रस्थानानि॥

विमर्शकसरण्या शाङ्करभाष्योपरि प्रवृत्तानां पद्मपादमण्डन-सुरेश्वर-विमुक्तात्म-प्रकटार्थकार–ज्ञानघनपाद–नृसिम्हमहोपाध्यायकृतानां व्याख्यानानां आशयभेदा उपवर्णिताः। ग्रन्थोऽयं बालमनोरमामुद्रणालये मुद्रितः।

53. गोपालः (1850 A. D.)

अस्य पिता मुद्गलभट्टः। औत्तरोऽयं गोपालः एकोनविंशतिशतकीय इति ज्ञायते।

1. विवेकामृतम्—(IO. B. 6. AL) द्वाभ्यां प्रकरणाभ्यां विभक्तोऽयं प्रकरणग्रन्थः देहविचारं, तात्पर्यशोधनम्, मुक्तिस्वरूपविचारम्, ब्रह्मणस्सर्वात्मकत्वं तस्याद्वयत्वञ्च वर्णयति। ग्रन्थोऽयमड्यारपुस्तकालये लभ्यते।

54. गोपालबालयतिः (1500–1600 A. D.)

"श्रीमद्यतीन्द्रमानम्य जगन्नाथश्रमं गुरुम्" इति एतदीये ग्रन्थे दर्शनात् बालगोपालापरनामायं गोपालबालयतिः नृसिम्हाश्रमिसामयिकः नृसिम्हाश्रमिसतीर्थ्यश्चेति षोडशशतकीयः। अस्य शिष्यस्स्वयम्प्रकाशाख्यश्शाङ्करैकश्लोकव्याख्यामधुमञ्जरीकारः।

1. कठोपनिषच्छाङ्करभाष्यव्याख्या—भाष्यविवरणम् । (ASS. 7) ग्रन्थोऽयं आनन्दाश्रमे मुद्रितः ।

2. मधुमञ्जरी—(D. 4706 MGOML) शाङ्करमनीषापञ्चक व्याख्यात्मकोऽयं-ग्रन्थ अपूर्ण अमुद्रितश्च मद्रासराजकीयपुस्तकालये लभ्यते ।

55. **गोपालानन्दसरस्वती** (मार्कि 1700–1900 A. D.)

योगानन्दशिष्योऽयं गोपालनन्दसरस्वती वाराणसीवासीति ज्ञायते । गोपालानन्दमेनं दासगुप्तमहाशयस्सप्तदश—एकोनविंशतिशतकमध्यवर्तिनं प्रतिपादयति (HIP. Vol. II Page 57)

1. अखण्डात्मप्रकाशिका—(R. 3891 MGOML)

निष्कामकर्मणश्चित्तशुद्धिः, चित्तशुद्धेस्संसारयाथात्म्यावबोधः तस्माद्वैराग्योत्पत्तिः, ततो मुमुक्षुत्वम्, तस्मादुपायोपेयेषणापूर्वकसर्वकर्मसन्यासः इति निरूप्य महावाक्यार्थपरिज्ञानं मननं योगाभ्यसाच्चित्तस्य प्रत्यक्प्रवणता, तस्माच्च सर्वाविद्योच्छेदः, तस्माच्च पूर्णाद्वितीयसच्चिदानन्दात्मना अवस्थितिरिति प्रतिपादितम् । प्रकरणग्रन्थोऽयं पूर्ण अमुद्रितश्च मद्रासराजकीयपुस्तकालये मैसूरपुस्तकालये चोपलभ्यते ।

2. ईशावास्योपनिषट्टीका (4527 B. R. D.)

3. वेदान्तामृतम् (4913 B. R. D.)

56. **गोविन्दभट्टः** (1752 A. D.)

आहिताग्निरयं गोविन्दभट्टः विश्वनाथभट्टपुत्रः उत्तरभारतीय इति ज्ञायते । अनेनात्मार्कबोधाख्ये ग्रन्थे ग्रन्थनिर्माणकालः 1676 शकवत्सराणीति प्रतिपाद्यते । एवञ्चास्यकाल अष्टादशशतकमिति ज्ञायते ।

1. आत्मार्कबोधः (B. D. 285 R. A. S. Bomboy)

विंशत्यधिकशतपद्यैः षड्भिरध्यायैश्च पूर्णोऽयं ग्रन्थः प्रकरणग्रन्थकोटिमारोहति । अमुद्रितोऽयं रायलआसियाटिकसोसाइटि बाम्बेनगरस्थपुस्तकालये लभ्यते ।

2. वेदान्ततात्पर्य निवेदनम् (908 D. C. Panjab)

57. **गोविन्दानन्दसरस्वती** (1885 A.D.)

माधवानन्दसरस्वतीशिष्योऽयं गोविन्दानन्दसरस्वती वाराणसीवासीति ज्ञायते । अनेन ब्रह्मसुधाकारिकाख्यः ग्रन्थः कृतः । स च निर्णयसागरमुद्रणालये मुद्रितः ।

58. **गोविन्देन्द्रयतिः** (1800–1900 A.D.)

नारायणेन्द्रशिष्योऽयमाधुनिकः । अनेन रचिते तत्वानुभवाख्येऽमुद्रिते (R. 47 B. MGOML) पुस्तके स्वानुभवपद्धत्यां जीवन्मुक्तस्थितिः वर्णिता । अन्योऽयं "अखण्डात्मप्रकाशिकाख्यः" ग्रन्थः विश्वभारतीशान्तिनिकेतनपुस्तकालयेऽमुद्रितः (3035 V. B. S.) लभ्यते ।

59. **गौरीनाथशास्त्री** (1850–1920 A.D.)

बन्दरपुरवासी स्वामिनाथशास्त्रिपौत्रः, नृसिंहशास्त्रिपुत्रः शाण्डिल्यगोत्रजोऽयं सच्चिदानन्दसरस्वतीशिष्य इति ज्ञायते ॥

1. शाङ्करभाष्यगाम्भीर्यनिर्णयखण्डनम् । ग्रन्थोऽयं चोलदेशीयेन रामसुब्रह्मण्यशास्त्रिणा कृतस्य शाङ्करभाष्यनिर्णयाख्यग्रन्थस्य खण्डनात्मक अद्वैतग्रन्थः । ग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रितः ॥

60. **गङ्गाधरः** (1200 A.D.)

अस्य पिता मनोरथः । अयं (1137 A. D.) काले आसीदिति "यफ़िग्राफिका इंडिकापत्रिकायाः द्वितीयभागे 333 पुटे दृश्यते । अनेन अद्वैतशतकमितिग्रन्थः कृत इति च दृश्यते ॥

61. **गङ्गाधरभगवद्भक्तकिङ्करः** (1750–1850 A.D.)

अग्निहोत्रिवीरेश्वरसूरिपौत्रः सदाशिवभट्टपुत्रः महाडकरइत्युपनामायं गङ्गाधरभगवद्भक्तकिङ्करः वत्सर्षिगोत्रजः अष्टादशशतकीय इति निश्चीयते ॥

1. सुबोधिनी—शारीरकसूत्रसारार्थचन्द्रिकानामायं ग्रन्थः सूत्रवृत्तिरूप अमुद्रितः लन्दननगरस्थभारतकार्यालयपुस्तकालये उज्जयिन्याञ्च लभ्यते ॥

62. गङ्गाधरेन्द्रसरस्वती (1780–1880 A.D.)

दक्षिणदेशजोऽयं गङ्गाधरेन्द्रसरस्वती सर्वज्ञसरस्वतीप्रशिष्यः रामचन्द्रसरस्वतीशिष्यः अष्टादशशतकोत्तरार्धादारभ्य एकोनविंशतिशतकमध्यभागावधिके काले (1780–1880 A.D.) आसीदिति निश्चीयते। एतदीये स्वाराज्यसिद्धिग्रन्थे "वस्वब्धिमुन्यवनिमानशक" इति ग्रन्थनिर्माणकाल (1728 श= 1826 A.D.) इति दृश्यते ॥

1. वेदान्तसिद्धान्तसूक्तिमञ्जरी (C.S.S. 4) । अप्पय्यदीक्षितकृतसिद्धान्तलेशसारात्मकोऽयं ग्रन्थस्समन्वयाविरोधसाधनफलाख्यैश्चतुर्भिः परिच्छेदैः परिच्छिन्नः कल्कत्तासंस्कृतमालायां मुद्रितः। अस्य व्याख्यापि "प्रकाशाख्या" अनेन कृता।

2. सिद्धान्तचन्द्रिकाव्याख्या—"उद्गारः" ॥ रामब्रह्मेन्द्रापरनाम्ना रामभद्रानन्देन विरचितस्य सिद्धान्तचन्द्रिकाग्रन्थस्य व्याख्यात्मकोऽयं ग्रन्थः गोपालनारायण मुद्रणालये मुम्बय्यां मुद्रितः।

3. स्वाराज्यसिद्धिः। पद्यात्मकोऽयं ग्रन्थः द्वैतखण्डनपूर्वकं अध्यारोपापवादकैवल्याख्यैस्त्रिभिः प्रकरणैः निरावरणस्वप्रकाशपरमात्मस्वरूपं प्रकाशयति। ग्रन्थोऽयं आर्यमतसंवर्द्धिनीमुद्रणालये (A. M. S. S. 25) मद्रासनगरे मुद्रितः। अस्य व्याख्या मूलकृत्कृता कैवल्यद्रुमाख्या, कृष्णशास्त्रिकृता परिमलाख्या च वर्तेते।

4. निर्वाणाष्टकव्याख्या (264 TCL), 5. प्रणवकल्पप्रकाशः,
6. शुकाष्टकव्याख्या (214 Nasik) च अनेन कृताः ग्रन्थाः ॥

63. गङ्गापुरीभट्टारकः (1100–1200 A.D.)

न्यायरत्नदीपावली–इष्टसिद्धिविवरणकार आनन्दानुभव एवायमिति आनन्दानुभवमधिकृत्य विचारावसरे प्रतिपादितम्। गङ्गापुरीभट्टारककृतत्वेन त्रिपेदीमहाशयेन वर्णितः पदार्थतत्वनिर्णयाख्यः ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये आनन्दानुभवोपज्ञ इति दृश्यते। आनन्दानुभवस्यैव सन्यासस्वीकारात्पूर्वं गङ्गापुरीभट्टारक इति स्यान्नाम। दासगुप्तस्तु (950–1050 A.D.) अस्य कालं वर्णयति।

1. पदार्थतत्वनिर्णयः (R. 2981 MGOML) अस्य व्याख्या आनन्दगिरिकृता चास्ति ॥

64. घनश्यामः (1706–1786 A.D.)

महाराष्ट्रजातीयः चौण्डाजीपण्डित - आर्यक - सर्वज्ञकवि - वश्यवाचस् - कण्ठीरव - सरस्वतीति उपनामभिः प्रसिद्धोऽयं घनश्यामः तञ्जावूरनगरवासी तुक्कोजीक्षितीशस्य (1729–35 A.D.) मन्त्री चासीत्। काशी - महादेवयोः पुत्रः चौण्डबालजीपौत्रः मौनभार्गववंशजः ईशपण्डितस्य कनिष्ठभ्राता शाकम्भर्याश्च भ्राता सुन्दरीकमलयोः पतिः चन्द्रशेखर-गोवर्धनयोः पिता संस्कृते प्राकृते प्रान्तीय भाषायाञ्च बहूनां ग्रन्थानां कर्ता चेति (J. O. R. Vol III & IV) ज्ञायते।

1. अद्वैतबोधः। ग्रन्थोऽयं विद्धशालभञ्जिकोपोद्घाते घनश्यामपत्न्या निर्दिष्टः। (TSML 4678)

2. प्रचण्डराहूदयः। ग्रन्थोऽयं बेलगामनगरे (1960) मुद्रितः।

65. चन्द्रशेखरभारतिः (2000 A.D.)

एते शृङ्गगिरिशङ्कराचार्यपीठाधिष्ठिताः चतुस्त्रिंशत्तमा आचार्याः नितान्तं विद्वांसः ज्ञानिष्ठाश्चासन्। विवेकचूडामणिव्याख्या अत्रत्यः ग्रन्थः। व्याख्येयं तत्र तत्र सूत्रभाष्याद्युक्तानर्थान् विशदय्य मूलग्रन्थं सुलभयति। मुद्रितश्चायं ग्रन्थः।

66. चन्द्रिकाचार्यभिक्षुः (1800–1900 A.D.)


दक्षिणदेशवासी कृष्णानन्द–रामब्रह्मेन्द्र सरस्वत्योरिशष्योऽयं चन्द्रिकाचार्यभिक्षुः गुरुणा रामब्रह्मेन्द्रेण 'रामब्रह्मेन्द्र' इति दत्तनामा मन्नारगुडिराजुशास्त्र्यपराभिधत्यागराजमखिप्रोत्साहित अद्वैतसिद्धान्तगुरुचन्द्रिकां चकारेति एकोनविंशतिशतकीय इति च निश्चीयते।

1. अद्वैतसिद्धान्तगुरुचन्द्रिका—

ग्रन्थोऽयं भागद्वयपरिमितः प्राचीनान् निलीनविलीनान् अद्वैतसिद्धान्तान् श्रुतियुक्तिभ्यां च गवेषयति। ग्रन्थोऽयं ओरियण्टलमुद्रणालये मद्रासनगरे मुद्रितः। अस्य व्याख्या मूलकृतैव अमृतरसझरीनाम्नी कृता।

67. चिद्घनानन्दः (1895–1915 A.D.)

वाराणसीवासी रामकृष्णपरमहंससम्प्रदायगतोऽयं चिद्घनानन्दः लक्ष्मणशास्त्रिद्राविडशिष्यः विंशतिशतकीय इति निर्णीयते । अच्युतानन्दोऽस्य दीक्षागुरुः ।



1. ब्रह्मसूत्रभाष्यनिर्णयः ।

ग्रन्थोऽयं ब्रह्मसूत्रोपरि प्रवृत्तानां शाङ्कररामानुजभास्करमध्वनिम्बार्कादिविविधभाष्यस्य गुणदोषविवेचनां कुर्वन् शाङ्करभाष्यस्यैव बादरायणव्याससम्मतत्वं प्रदर्शयति । समालोचनात्मकोऽयं ग्रन्थः बोधायनादिवृत्तिसद्भावे संशयमुत्पादयति । ग्रन्थोऽयं काशीस्थरामकृष्णसेवाश्रममुद्रणालये मुद्रितः ।

68. चिरञ्जीविभट्टाचार्यः (1675–1750 A.D.)

गौडदेशजोऽयं काश्यपगोत्रजः चिरञ्जीविभट्टः रामदेवचिरञ्जीव–वामदेवचिरञ्जीव इत्यपरनामा सामुद्रिकाचार्यपौत्र इति ज्ञायते । स्वकृतविद्वन्मोदतरङ्गिण्यां

"द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतः
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत् कविः ।
विद्वन्मोदतरङ्गिणी ननु चिरञ्जीवेन तज्जन्मना" ।

इत्यादिवर्णनात् शतावधानभट्टाचार्यापराभिधानराघवेन्द्रस्य पुत्र इति निर्णीयते । स्वकृतकाव्यविलासे रघुदेवचरणध्यानात् रघुदेवन्यायालङ्कारशिष्य इति ज्ञायते ।

1. विद्वन्मोदतरङ्गिणी—

ग्रन्थोऽयं श्रव्यकाव्यशैल्यां प्रणीतः विविधदर्शनसारसङ्ग्रहात्मकः शास्त्रप्रसिद्धैर्युक्तिजालैर्व्यावहारिकैश्च युक्तिजालैः वैष्णवशाक्तशैवनैयायिकालङ्कारिकसिद्धान्तान् तदीयानाशयभेदांश्चोपवर्णयन् नास्तिकैस्साकं तत्तद्दार्शनि-

कानां वादप्रतिवादं सयुक्तिकं प्रकाशयन् नास्तिकवादखण्डनाय वेदान्तशास्त्रस्य न्यायशास्त्रापेक्षित्ववर्णनपूर्वकं आत्मन अद्वितीयत्वं

"ब्रह्मण्येव समुत्पद्य जगत्तत्रैव लीयते ।
बुद्बुदा इव तोयेषु शुक्तयो रजतेष्विव" ।


इत्यादिना प्रतिपादयति । प्रसङ्गवशात् हरिहराद्वैतभावनां प्रकाशयति । ग्रन्थोऽयं कल्कत्ताग्रन्थमालायां वेङ्कटेश्वरमुद्रणालये बम्बईनगर्यां काव्यप्रकाशमुद्रणालये वाराणस्यां च मुद्रितः ।

काव्यविलासः, शृङ्गारतटिनी, वृत्तरत्नावली, माधवचम्पूरिति ग्रन्थाश्च रचिताः ।

69. चोक्कनाथदीक्षितः (1600–1650 A.D.)

सभानाथ सर्वक्रत्वपराभिधानोऽयं अग्निहोत्रभट्टपितामहः, चोलदेशीयः नारायणशास्त्रि-गणपत्यम्बयोः पुत्रः, नारायणसुब्रह्मण्यवैद्यनाथयोः, द्वादशाहयाजि बालपतञ्जल्यपरनाम्नः बालचन्द्रदीक्षितस्य च पिता, अस्यैव सुन्दरेशापरनामा च ज्ञायते । अस्य जामाता रामभद्रमखी । रामभद्रमखिनश्श्वशुरः गुरुश्चायं चोक्कनाथदीक्षितस्सप्तदशशतकीयः नल्लादीक्षितधर्मराजाध्वरीन्द्रसामयिकश्चेति निश्चीयते । वेङ्कटेशदीक्षितशिष्यश्चायं प्रसिद्धवैयाकरणोऽभूदिति ज्ञायते । अस्यैव सञ्चारिमहाभाष्यमिति नाम प्रसिद्धम् ।

शाब्ददीपिका, धातुरत्नावली, भाष्यरत्नावलीति व्याकरणग्रन्थाश्चानेन कृताः । शाब्ददीपिकायाः शब्दकौमुदी नाम प्रसिद्धम् । अत्रायं वंशपरम्परावृक्षः—



1. वेदान्तदीपिका (356 T. C. D. Vol. III)

विषयविदग्धापरनामायं ग्रन्थ अमुद्रितस्त्रिवनन्तपुरपुस्तकालये लभ्यते । शाङ्करभाष्यगतार्थसंग्राहकोऽयं सूत्रवृत्तिरूपः ग्रन्थः चौखाम्बामुद्रणालये मुद्रितश्च ॥

70. जगज्जीवनः (1775–1850 A.D.)

अच्युताश्रमशिष्योऽयं अद्वैताश्रमप्रशिष्यः वाराणसीवासी जगज्जीवन इति ज्ञायते ।

1. ब्रह्मानन्दप्रकाशिका (145 Nasir)
2. वेदान्तसारसद्रत्नावलिः (1570 V. B. S.)

प्रकरणग्रन्थोऽयममुद्रितः विश्वभारतीशान्तिनिकेतअडयारपुस्तकालययोर्लभ्यते ॥

71. जगन्नाथसरस्वती (1664 A. D.) कालात्प्राक्

" हरिहरसरस्वती यद्गुरुरीड्यः परमहंसानाम् " इति ग्रन्थे दर्शनात् हरिहरसरस्वतीशिष्योऽयं जगन्नाथसरस्वतीति निश्चयः ।

1. अद्वैतामृतम् ।

सव्याख्योऽयं ग्रन्थः कल्लोलाख्यैः पञ्चभिः परिच्छेदैः परिच्छिन्नः पद्यात्मकः वेदान्तशास्त्रप्रतिपादितं आत्मज्ञानोपायं, प्रपञ्चमिथ्यात्वं अद्वैतप्रक्रियाञ्च ज्ञान्यज्ञनाप्रश्नप्रतिवचनसरण्या प्रतिपादयति । प्रथमं काचनानङ्गविलासभूमिरङ्गना विवेकाश्रमनामकस्य ज्ञानिनस्सकाशमागत्य सन्यासविधिं ईषणात्रयत्यागञ्च निन्दन्ती ऐहिकविषयाभिलाषावश्यकतां प्रस्तौति । तस्यै उपदेशव्याजेन सर्वेऽपि अद्वैतसिद्धान्ताः प्रतिपादिताः । ग्रन्थोऽयं चौखाम्बामुद्रणालये वाराणस्यां मुद्रितः । अमुद्रितस्तु सरस्वतीमहालये लन्दननगरस्थपुस्तकालये च लभ्यते । अस्य व्याख्या 'तरङ्गिणी' नाम्नी मूलकृतैव कृता ।

2. अद्वैतवादः—ग्रन्थोऽयं अप्रकाशितः कल्कत्तासूच्यास्तृतीये पुटे दृश्यते ।
3. वेदान्तरहस्यम्—ग्रन्थोऽयं हरप्रसादशास्त्रिसूच्यामेव दृश्यते । (HPR. Vol. 1V. No. 280)

72. जगन्नाथाश्रमः (1465–1575 A. D.)

अद्वैतदीपिकायां नृसिम्हाश्रमिणा " जगन्नाथाश्रममुनेश्चित्रं चरणरेणवः " इति नमस्कृतोऽयं नृसिम्हाश्रमविद्यागुरुर्जगन्नाथाश्रमः पञ्चदशशतकापरार्धादारभ्य षोडशशतकपूर्वार्धावधिके काले आसीदिति निश्चीयते । दक्षिणदेशीयेनानेन शाङ्करसूत्रभाष्यस्य काचन व्याख्या रचिता स्यादित्यूह्यते । गोविन्दानन्दकृतायां 'रत्नप्रभायां' पञ्चमपुटे युष्मदस्मद्वाच्यविचारावसरे " आश्रमचरणास्तु टीकायोजनायां एवमाहुः " इति एतदीयः ग्रन्थः परामृष्टः ।

जगन्नाथाश्रमं वन्दे यतिं वेदान्तकोविदम् ।
पदवाक्यप्रमाणज्ञं स्वधर्मनिरतं सदा ॥

इति प्रक्रियाकौमुदीव्याख्यायां (P. 798, Bombay Sanskrit Series 82. Part 2) विट्ठलाचार्येण नमस्कृतोऽयमिति विट्ठलदासस्यापि गुरुरिति ज्ञायते । (No. 148 D. C. A. L. Vol. VI)

दासगुप्तमहाशयस्तु ग्रन्थस्यास्य 'भाष्यदीपिका' इति नामेति स्वीये भारतीयवेदान्तसाहित्येतिहासे (HIP. Vol. II Page 103) प्रतिपादयति । मुद्रितरत्नप्रभायान्तु 'टीकायोजना' इत्येव नाम दृश्यते ।

1. सूत्रभाष्यव्याख्या—(भाष्यदीपिका टीकायोजना)

73. जयकृष्णतीर्थः (1650–1750 A. D.)

सर्वेश्वरतीर्थशिष्योऽयं आनन्दगिरिं योगवासिष्ठञ्च प्रमाणयति । रामतीर्थादिवत् तीर्थान्तनामायं सप्तदशशतकीयस्स्यादिति परं ज्ञायते नान्यत्प्रबलतरं प्रमाणमुपलभामहे ।

1. ब्रह्मामृतम्—प्रकरणग्रन्थोऽयं 1027 श्लोकैः परिमितः गुरुशिष्यप्रणाल्या अद्वैतात्मकज्ञानाप्त्यै श्रवणमननध्यानसमाधीनां उपयोगं जगतस्सृष्टिप्रलयौ शुष्कतर्कवादात् ज्ञानानुत्पत्तिं च बहुविधाख्यायिकाप्रतिपादनसरण्या निरूपयन्

आत्मैव सर्वमिदमस्य विकारजालं मृत्स्नेव कुम्भविकृतः कटकं सुवर्णम् ।
माला फणीव निजहेतुमतस्त्व एव स्वाज्ञानमूलमखिलं मयि तत्त्वतो न ॥

इत्यादिना ब्रह्मात्मकत्वं प्रतिपादयन् व्रजभूषणदासकम्पन्यां काश्यां मुद्रितः ।

74. जयरामः (1700 A.D.)

नागरवंशीयोऽयं जयरामपण्डितः मार्कि सप्तदशशतकीय इति ज्ञायते। एतदीयमहावाक्यादर्शप्रतिलिपिकाल 1778 संवदिति बरोडापुस्तकालयसूच्याः ज्ञायते।

1. ब्रह्मसूत्रार्थप्रकाशिका। 231 पञ्जाबविश्वविद्यालयसूच्यां दृश्यते।
2. महावाक्यादर्शः 12424 बरोडासूच्यां दृश्यते।

75. ज्ञानघनः (950–1050 A.D.)

"विद्यावृष्टिसुपक्वशिष्ययतिसत्सस्यैः क्षमा शोभते।
शश्वद्बोधघनस्य यस्य गुरवे तस्मै नमः श्रेयसे॥"

इति स्वग्रन्थे बोधघनं प्रणमन्नयं ज्ञानघनः बोधघनशिष्य इति निर्णीयते। बोधघनस्यैव नित्यबोधघन इत्यपि नामान्तरं शृङ्गेरीसूच्यां दृश्यते। अस्य ज्ञानघनस्य शिष्यः ज्ञानोत्तम इति ख्यातः चित्सुखगुरुश्च। शृङ्गगिरिगुरुपरम्परासूच्यां ज्ञानघनकालः (848–910 A.D.) इति दृश्यते। परन्तु अनन्यानुभवशिष्यस्य प्रकाशात्मयतेः पञ्चपादिकविवरणकारस्य सामयिकोऽयं ज्ञानघन इति, प्रकाशात्मगुरुणा अनन्यानुभवेन आत्मतत्वमिति ग्रन्थः कृतः यश्च तत्वशुद्धिकारेण ज्ञानघनेन स्वग्रन्थे प्रथमपुटे "अनन्यानुभवानन्दाद्वितीयात्मतत्वमधिकृत्य केषुचिदर्थेषु परिशोधनं विधीयते" इति अनन्यानुभव उद्धृत इति च श्रीकण्ठशास्त्री (I. H. Q. Vol XIV) वदति। दासगुप्तस्तु (H. I. P.) ग्रन्थे (1200–1300) शतकीय इति वर्णयति। परन्तु न्यू इण्डिया अण्डिक्वैरि पत्रिकायां (N. I. A. Vol II Page 62-72) दशमशतकीय इति निर्णीतम्।

1. तत्वशुद्धिः। षट्चत्वारिंशद्भिः प्रकरणैः पूर्णोऽयं प्रकरणग्रन्थः कुत्रचित् मण्डन मिश्रकृतां ब्रह्मसिद्धिं वाक्येन भावेनानुसरति। तत्वमस्यादिवाक्यजनितापरोक्षब्रह्मविद्याया अनाद्यविद्यापटलसमुत्पाटननित्यसिद्धनिरतिशय-आनन्दप्रत्यगद्वितीय परमात्मचैतन्यात्मना अवस्थानं अपवर्ग इति भाष्यकारमतं साधयति। ग्रन्थोऽयं मद्रासविश्वविद्यालयसंस्कृतग्रन्थमालां मुद्रितः। अस्य व्याख्या उत्तमज्ञयतिकृता तिरुवनन्तपुरपुस्तकालये लभ्यते।

76. ज्ञानामृतयतिः (1350–1450 A.D.)

"निराकृतद्वैतकथं यतीश्वरं नमामि नाम्ना सदृशोत्तमामृतम्॥" इति उत्तमामृतयतिं "आनन्दारण्यपूज्यानां पादपङ्कजपांसवः। पान्तु मां" इत्यानन्दारण्यञ्च नमस्कुर्वन्नयं ज्ञानामृतयति उत्तमामृतआनन्दारण्ययोश्शिष्य इति भाति।

अनेन स्वग्रन्थे पूर्वटीकाक्षरेभ्यः भावतत्वं गृहीत्वा व्याख्या निर्मीयत इति प्रतिज्ञातम्। अनेन स्वग्रन्थेषु उदयनाचार्यः भट्टाचार्यः ब्रह्मदत्तः, भर्तृप्रपञ्चः, भट्टमिश्रः, मण्डनमिश्रः, वाचस्पतिमिश्रः, गौडपादाचार्याश्च नामतो निर्दिष्टाः। (1350-1450 A.D.) कालवर्तिना भाष्यमित्यूह्यते एतदीयऐतरेयभाष्यटिप्पणात् अयं सायणाचार्यसामयिक इति ज्ञायते॥

1. नैष्कर्म्यसिद्धिव्याख्या— विद्यासुरभिः (R. 3354 MGOML)

ज्ञानोत्तमकृतात् चित्सुखाचार्यकृताच्च व्याख्यानाद्भिन्नोऽयं ग्रन्थः पूर्णः अमुद्रितश्च मद्रास-अडयारपुस्तकालययोर्लभ्यते॥

2. ऐतरेयभाष्यटिप्पणम् (D 332 MGOML)

77. ज्ञानेन्द्रसरस्वती (1550–1650 A.D.)

अनेन पुरुषार्थसुधानिधौ वासुदेवेन्द्रः नमस्कृतः। अग्निहोत्रभट्टेन अद्वैतरत्नकोशपूरणी कृता, तत्र "ज्ञानेन्द्रापरनामानं" इत्यादिना ज्ञानेन्द्रः वासुदेवेन्द्रश्च नमस्कृतौ। एवञ्चाग्निहोत्रभट्टः ज्ञानेन्द्रवासुदेवेन्द्रशिष्य इति उपपादितम्। अग्निहोत्रभट्टेन च स्वकृते अद्वैतरत्नकोशपूरणीग्रन्थे 49 तमे पुटे "अस्मत्परमगुरुचरणमतमेव सम्यक्," इति 72 तमे पुटे जिज्ञासाशब्दविचारे "परमगुरुचरणास्तु जिज्ञासापदं तन्त्रेणोपात्तमित्याहु" रित्यादिना ज्ञानेन्द्रसरस्वतीग्रन्थ अनूद्यते। तस्मात् ज्ञानेन्द्रसरस्वती वासुदेवेन्द्रगुरुरग्निहोत्रभट्टप्राचार्यस्सप्तदशशतकपूर्वार्धवर्षिककालवासीति सिध्यति॥

1. पुरुषार्थसुधानिधिः (सूत्रवृत्तिः) (R. 2471 MGOML)

सर्ववेदान्तश्रुतिसारसंग्रहः सूत्रविषयवाक्यवृत्तिः वैय्यासिकब्रह्ममीमांसासारसंग्रहः सूत्रभाष्यसारसंग्रहापरनामा ग्रन्थः मद्रास-सरस्वतीमहालय-अडयार-अनन्तशयनपुस्तकालयेषु लभ्यते॥

78. ज्ञानोत्तमः I (1200 A.D. कालात्प्राक्)

स्वग्रन्थे नैष्कर्म्यसिद्धिविवरणे "यमनियमनिलयधिषणो जयति श्रीसत्यबोधार्यः" इत्यादिना सत्यबोधाचार्यस्सादरं सूचितः । एवं ग्रन्थान्ते

चोलेषु मङ्गलमिति प्रथितार्थनाम्नि ग्रामे वसन् पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमस्सकलदर्शनपारदृश्वा व्याख्यामिमां वितनुते स्फुटमिष्टसिद्धेः ॥

इत्यादिना स्वपरिचयश्च प्रदत्तः । अनेन उपनिषदः वाजसनेयसंहिता शाबरभाष्यं, तन्त्रवार्तिकञ्च प्रमाणत्वेन निर्दिष्टानि । एवञ्चायं स्वपितुरेव प्राप्तविद्यः चोलदेशीयः मङ्गलग्रामवासी ज्ञानोत्तमपुत्रः ज्ञानोत्तमशिष्यश्चेति ज्ञायते । स्वग्रन्थे निर्दिष्टः सत्यबोधाचार्यः अस्य दीक्षागुरुरिति ज्ञायते । दशमशतकीयस्य सर्वज्ञात्मनः कृतेः व्याख्यां कुर्वन्नयं दशमशतकादर्वाचीन इति तु निश्चयः । अस्यैव आश्रमस्वीकारादनन्तरं ज्ञानानन्द इति नामापि दृश्यते ।

चित्सुखाचार्यगुरुर्ज्ञानोत्तम अयमेवेतान्य इति न निर्णेतुं शक्यते । ग्रन्थान्तपुष्पिकायां 'गौडेश्वराचार्यज्ञानोत्तमकृतायां' इति दर्शनात् मिश्रान्तोऽयं बंगालवासी गौडेश्वराचार्यापरनामा स्यादिति वक्तुं शक्यते । गौडेश्वरापराभिधस्सत्यानन्द इत्यपि व्यवह्रियते । चित्सुखाचार्येण स्वग्रन्थे गौडेश्वराचार्यस्सत्यानन्दश्च नमस्कृतौ । तथा च चित्सुखाचार्यगुरुर्ज्ञानोत्तम एवायमिति केचित् वदन्ति । एवं सति चोलेषु मङ्गलमिति श्लोको विरुध्यते ।

दासगुप्तस्तु मङ्गलग्रामवासित्वेन वर्णितं ज्ञानोत्तमं नवीनं वदति । T. R. चिन्तामणिमहाशयस्तु चित्सुखगुरोरन्यं ज्ञानोत्तममिमं वदति ।

हिरियण्णामहाशयैस्तु—योऽयं सत्यबोधापरनामा सत्यानन्दः चित्सुखाचार्येण निर्दिष्टः स चित्सुखाचार्यात्प्राचीनः । सर्वज्ञपीठाधिरोहणशीलानां काञ्चीकामकोटिपीठाधीशानां नामद्वयवत्वं प्राचीनपरम्परासिद्धम् । कामकोटिपरम्पराप्रामाण्यात् ज्ञानोत्तमः शङ्कराच्चतुर्थः पीठाधिपतिः । चित्सुखकृता भावतत्त्वप्रकाशिकानाम्नी नैष्कर्म्यसिद्धिव्याख्या ज्ञानोत्तमकृतां नैष्कर्म्यसिद्धिचन्द्रिकामनुसरति । तस्माच्चित्सुखाचार्यगुरोर्भिन्नोऽयं ज्ञानोत्तमः द्वादशदशमशतकयोरन्तालवर्तीति निश्चीयते ।

1. इष्टसिद्धिविवरणम्—(G. O. S. 65.)

2. नैष्कर्म्यसिद्धिचन्द्रिका । ग्रन्थोऽयं मन्दरकार प्राच्यभाषानुसन्धानसमिति ग्रन्थमालायां मुद्रितः ।

79. ज्ञानोत्तमः II (1100–1200 A.D.)

ज्ञानोत्तमोऽयं ज्ञानघनशिष्यः । चित्सुखाचार्यगुरुश्च चित्सुखाचार्यैस्तत्त्वप्रदीपिकायां ज्ञानोत्तमोऽयं गौडेश्वराचार्यशब्देन विशेषितः । तत्त्वप्रदीपिकायां, तात्पर्यटीकायां, भावतत्त्वप्रदीपिकायाञ्च चित्सुखाचार्येणास्य ज्ञानोत्तमस्य सत्यानन्द इत्यपि नामान्तरं निर्दिष्टम् । सोऽयं ज्ञानोत्तमः शृङ्गेरीगुरुपरम्परासूच्यनुसारं (919–953 A.D.) काले आसीदिति निर्णीयते ।

अयं ज्ञानोत्तमः नैष्कर्म्यसिद्धि - इष्टसिद्धिव्याख्याता ज्ञानोत्तमाद्भिन्न इत्यपि ज्ञायते । अस्य द्वौ शिष्यौ । तयोरेकश्चित्सुखाचार्यः । अपरस्तु पञ्चपादिकाव्याख्यायाः "तात्पर्यद्योतिन्याः" श्वेताश्वतरोपनिषद्दीपिकायाश्च कर्ता विज्ञानात्मा इति विज्ञानात्मकृतश्वेताश्वतरदीपिकायाः ज्ञायते ।

ज्ञानोत्तमस्य कालश्चित्सुखाचार्यात्किञ्चिदिव प्राचीनः । श्रीकण्ठशास्त्री तु स्वीये प्रबन्धे शृङ्गगिरिगुरुपरम्परां प्रदर्शयति । तत्रास्य कालः (910–953 A.D.) इति दृश्यते । स चायं भेदः शङ्करकालस्सप्तमशतकपूर्वार्ध इति सिद्धान्तं स्वीकृत्य वर्णित इति ज्ञायते ।

ज्ञानोत्तमकृताः ग्रन्था नोपलभ्यन्ते । परन्तु चित्सुखाचार्येण तत्त्वप्रदीपिकायां 392 तमे पुटे "न्यायसुधा" निर्दिष्टा । प्रत्यक्स्वरूपाचार्येण 'आराध्यपादाः स्वगुरवः ज्ञानसिद्धिकाराः, तत्प्रणीतं वेदान्तप्रकरणं न्यायसुधा' इति व्याख्यातम् । अप्पय्यदीक्षितैश्च सिद्धान्तलेशसंग्रहे 269–270 तमे पुटे न्यायसुधा निर्दिष्टा । श्रीकण्ठशास्त्री ज्ञानसुधामपि निर्दिशति । तस्मात् ज्ञानसिद्धि न्यायसुधाज्ञानसुधाकारः ज्ञानोत्तमः द्वादशशतकीय इति निश्चीयते ।

1. न्यायसुधा Q.
2. ज्ञानसिद्धिः Q.
3. ज्ञानसुधा Q ?

80 ज्ञानोत्तममिश्रः III (1000–1200 A.D.)

कोऽयं ज्ञानोत्तममिश्रः। किं नैष्कर्म्यसिद्धिव्याख्याता? मङ्गलग्रामवासी चोलदेशीयः? आहोस्वित् गौडेश्वराचार्यापराभिधः गौडेषु वासी चित्सुखगुरुर्ज्ञानोत्तम? इति निर्णेतुं न शक्यते। परन्त्वमुद्रिते विद्याश्रीनामके ब्रह्मसूत्रभाष्यव्याख्याने ज्ञानघन आचार्यः निर्दिष्टः। ज्ञानोत्तमभट्टारक इत्यपि स्वस्य नामनिर्दिष्टम्। दासगुप्तेन तु ज्ञानोत्तममिश्र इति नाम निर्दिश्यते। नैष्कर्म्यसिद्धिव्याख्यायां ज्ञानोत्तममिश्र इति नाम निर्दिश्यते। नैष्कर्म्यसिद्धिव्याख्यायां ज्ञानोत्तमः मिश्रान्तशब्देन निर्दिष्टः। यद्येवं तर्हि मङ्गलग्रामवासी भवितुमर्हति। भट्टारकान्तनामश्रवणात् आनन्दबोधभट्टारकादिवत् अयमपि द्वादशशतकीयो भवितुमर्हति।

1. विद्याश्रीः (R. 3783 MGOML)

अनादिरनन्तोऽयं सूत्रभाष्यव्याख्यात्मकः ग्रन्थ अमुद्रित मद्रासपुस्तकालये लभ्यते॥

2. सुरेश्वरवार्तिकव्याख्या। ग्रन्थोऽयं दासगुप्तमहाशयेन भारतीयदर्शनसाहित्येतिहासे H I. P निर्दिष्टः। अस्य कालः दशमशतकमिति च निर्दिष्टम्॥

81. तत्त्वबोधभगवान् (1100–1200 A.D.)

"वन्दे वेदान्तशैलास्यं ज्ञानोत्तममृगोत्तमम्" इत्यादिना ज्ञानोत्तमः, "श्री सत्यबोधशीतांशुमक्षीणकरुणाश्रये" इत्यादिना सत्यबोधाचार्यः, "तं वन्दे प्रज्ञारण्यमहामुनिम्" इति प्रज्ञारण्यश्चानेन नमस्कृताः। नैष्कर्म्यसिद्धिचन्द्रिकाकारेणापि सत्यबोधाचार्यः नमस्क्रियते। एवञ्चायं सत्यबोधाचार्यप्रशिष्यः ज्ञानोत्तमप्रज्ञारण्यशिष्य इति निर्णेतुं शक्यते। एकादशद्वादशशतकमध्यवर्ती भवेदिति च निश्चीयते॥

1. तत्त्वबोधः (R. 3344 MGOML) बौद्धमतं खण्डयन् अद्वैतं मण्डयन् शङ्कराचार्यं प्रमाणयत्ययं ग्रन्थः। अमुद्रितोऽयं सादिरनन्तः ग्रन्थः मद्रासराजकीय पुस्तकालये लभ्यते॥

82. तारकब्रह्माश्रमी (1700-1800 A.D.)

रामचन्द्राश्रमिणं नमस्यन्नयं तारकब्रह्माश्रमी दक्षिणदेशीयः रामचन्द्राश्रमिशिष्यस्सप्तदशशतकीयान्तवर्तीति निर्णीयते॥

1. परिमलसङ्ग्रहः—(R. 2811 MGOML) अप्पय्यदीक्षितीयकल्पतरुव्याख्यापरिमलं संगृह्णाति। अमुद्रितोऽयं प्रथमाध्यायतृतीयपादान्तं मद्रासपुस्तकालये लभ्यते।

2. तैत्तरीयोपनिषत्सारसंग्रहः। ग्रन्थोऽयमडयारपुस्तकालयस्थः॥

83. तारानाथशर्मा (1825–1900 A.D.)

कालिदाससार्वभौमभट्टाचार्यपुत्रोऽयं तारानाथशर्मा वात्स्यगोत्रजः वाराणसीवासीति ज्ञायते। अनेन ग्रन्थनिर्माणकालः अग्निनववाहेन्दुमितश्शकः (1793–1871 A.D.) इति निर्दिष्टः।

1. सिद्धान्तबिन्दुसारः। मधुसूदनीयसिद्धान्तबिन्दुं संगृह्णात्ययं ग्रन्थः। सरस्वतीमुद्रणालये कल्कत्तायां मुद्रितश्च॥

84. ताराचरणशर्मा (1800–1900 A.D.)

आधुनिकोऽयं वाराणसीवासी ताराचरणशर्मा। अनेन खण्डनखण्डखाद्यस्य टिप्पणीरूपः खण्डनपरिशिष्टाख्यः ग्रन्थः कृतः यश्च चौखाम्बायां मुद्रितः।

85. त्र्यम्बकभट्टः (1650–1750 A.D.)

त्र्यम्बकमखीति प्रसिद्धोऽयं भारद्वाजगोत्रोत्पन्नः बाबाजीयज्वनः पौत्रः गङ्गाधराध्वरिकृष्णाम्बिकयोः पुत्रः नरसिम्हयज्वनः कनीयान् भ्राता, परमार्थसारव्याख्यातृ राघवानन्दस्य, गौडब्रह्मानन्दसरस्वत्याश्च शिष्यः शाहजीशरभोजीकाले चोलदेशवर्ती, पश्चात् मैसूर-पूनादिनगरेषु उवासेति ज्ञायते। अस्य शिष्यस्स्थाणुशास्त्रीति प्रसिद्धः घृतशौचदीपिकाकर्ता इति (R. 3854) मद्रासराजकीयपुस्तकात् ज्ञायते।

1. अद्वैतवाक्यार्थः। अद्वैतप्रकरणापरनामायं ग्रन्थः कृष्णपुरसूच्यां (105) दृश्यते।
2. अद्वैतसिद्धान्तवैजयन्ती। वाणीविलासमुद्रणालये (VVP) मुद्रितः॥
3. तत्त्वनिरूपणम्। मैसूरसूच्यां दृश्यते।
4. तत्त्वसंख्यानखण्डनम्। (29 G. 4 A.L.)

आनन्दतीर्थकृतस्य द्वैतसिद्धान्तपरतत्वसंख्यानस्य खण्डनपरोऽयं ग्रन्थ अडयार पुस्तकालये लभ्यते ॥

5. दृग्दृश्यसम्बन्धानुपपत्तिप्रकाशः । ग्रन्थोऽयं मैसूर पुस्तकालये लभ्यते ॥

6. प्रकृत्यधिकरणविचारः । ग्रन्थोऽयं मैसूरपुस्तकालयस्थः ।

7. प्रमाणतत्वम् । अयमपि पूर्वमिव ।

8. भाष्यानुप्रभा । (41. C. 90 A. L.)

भाष्यभानुप्रभा इत्यपि नामान्तरमस्य श्रूयते । सूत्रभाष्यव्याख्यात्मकोऽयं ग्रन्थः भाष्यार्थसंग्राहकः कोडपत्रात्मकश्च अपूर्ण अमुद्रित अडयारपुस्तकालये लभ्यते । शृङ्गगिरिसूच्यां तस्य त्र्यम्बकवृत्तिरिति नामान्तरं दृश्यते ॥

9. शास्त्रारम्भसमर्थनम् । (21 G. 6 A. L.)

लघुशास्त्रारम्भसमर्थनमिति नाम्ना च प्रसिद्धोऽयं ग्रन्थः "वेदान्तानां प्रत्यगभिन्नब्रह्मण्येव तात्पर्यमिति निर्णायकन्यायग्रथनात्मकं ब्रह्ममीमांसाशास्त्रमारम्भणीयमिति" ब्रह्मानन्दसरस्वती प्रदर्शितदिशा समर्थयति । अडयारपुस्तकालयेऽमुद्रितोऽस्ति ॥

10. श्रुतिमतप्रकाशः (7810 B. R. d.)

11. श्रुतिमतोद्योतः । ग्रन्थोऽयं प्रथमद्वितीयमिथ्यात्वं सपरिकरं परिष्करोति । जगन्मिथ्यात्वानुमाने पक्षतावच्छेदकञ्च नव्यतर्कशैल्यां विशदयति । ग्रन्थोऽयं श्रीविद्याविलासमुद्रणालये कुम्भघोणे मुद्रितः । अस्य कामाक्षीकृता टिप्पणी च मुद्रिता ॥

12. श्रुतिमतानुमानोपपत्तिः । (R. 2202 MGOML) ग्रन्थोऽयममुद्रितस्तेलुगुलिप्यां मद्रासपुस्तकालये लभ्यते ॥

13. श्रुतिरत्नप्रकाशः । ग्रन्थोऽयं मिथ्यात्वसाधनानुमाननिरूपणपूर्वकं अविद्यां साधयति । दृश्यत्वपरिच्छिन्नत्वहेतू विचार्य दृश्यत्वहेतुं निर्दोषं साधयति । ईक्षत्यधिकरणार्थं च नव्यतर्कशैल्या वर्णयति । ग्रन्थोऽयं श्रीविद्याविलासमुद्रणालये कुम्भघोणे मुद्रितः । अस्याः टिप्पणी कामाक्षीकृता च वर्तते । नरोडास्थश्रुतिमतप्रकाशात्

(7810 B.R.d.) भिन्नो वा उत नेति न ज्ञायते । वाल्मीकिरामायणव्याख्या धर्माकूतोऽप्यनेन कृतः ॥

86. त्यागराजः माकिं (1750–1850 A. D.)

त्यागराजोऽयं काश्यपगोत्रजः आनन्दनाथशिष्य आन्ध्रदेशवासीति एतत्कृतग्रन्थदर्शनाज् ज्ञायते । आन्ध्रदेशजोऽपि

"त्यागेशपदानन्दसमुद्रे भानुहिमांश्वोर्योगविशेषे ।
काले स्नात्वा पूतो भव रे न पुनर्जननं न पुनर्मरणम् ॥"

इति दर्शनात् त्यागेशभक्तिप्रदर्शनाच्च दक्षिणद्रविडदेशवासी स्याद्वेति संशीयते ।

मन्नार्गुडिवासिनस्त्यागराजदीक्षितादयं भिन्नः । अदसीयेषु बहुषु ग्रन्थेषु चत्वर एवाद्वैतपराः ।

1. उपदेशशिखामणिः । (7745 TSML)

शङ्कराचार्यकृतमोहमुद्गरवत् (भजगोविन्दम्) तदीयसंख्या तदीयवृत्तेनैव निर्मितश्शङ्कराद्वैतमतप्रदर्शकः प्रकरणग्रन्थः । ग्रन्थोऽयं अडयारपुस्तकालये सरस्वतीमहालये च लभ्यते । सरस्वतीमहालयवर्णनात्मकग्रन्थसूच्यास्त्रयोदशतमे भागे (DC. TSML Vol. XIII) मुद्रितश्च ।

2. पञ्चकोशविमर्शिनी (9 F. 43. AL)

भुजङ्गप्रयाताख्यवर्णच्छन्दसा बद्धैश्श्लोकैः त्यागराजात्मकपरमात्मस्वरूपनिरूपणपरया स्तुतिपद्धत्या अन्नमयादिपञ्चकोशान् वर्णयन् प्रकरणग्रन्थतामर्हति । अडयारपुस्तकालये लभ्यते च ।

3. स्वात्मस्फूर्तिविलासः सव्याख्यः । (9. F. 43. AL.)

सप्तत्रिंशद्भिश्श्लोकैः पूर्णोऽयं ग्रन्थश्शङ्कराचार्यकृतां स्वात्मप्रकाशिकां सदाशिवब्रह्मकृतं स्वानुभूतिप्रकाशञ्चानुकुर्वन् सोदाहरणं जीवब्रह्मणोरैक्यं प्रतिपादयति । ग्रन्थोऽयं अडयारपुस्तकालये सव्याख्यः लभ्यते ।

एवं शिवमीडेस्तोत्रम्, शान्तिस्तवः, नवमल्लिकास्तवः राजराजेश्वरीस्तवः, आर्यापञ्चदशी धर्माम्बिकास्तवः, शिवात्मस्फूर्तिविलासः, नवाक्षरीस्तोत्रम्, संवित्शतकम् इति ग्रन्थाश्च कृताः ।

87. **त्यागराजदीक्षितः** (2000 A. D.)

दक्षिणदेशजोऽयं त्रिशिरपुर (तिरुचि) समीपस्थ-अम्मङ्गुडिग्रामवासी विंशतिशतकीयः। अनेन ग्रन्थः (1953 A. D.) काले रचितः।

1. आत्मलाभः (अद्वैतसारः) पद्यबद्धोऽयं लघुप्रकरणग्रन्थः सङ्कलनात्मकः नवसालपुरे कोवाप्रेटिवमुद्रणालये मुद्रितः।

88. **दिवाकरः** (1750–1850 A. D.)

बोधसारकर्तुर्नरहरेशिष्योऽयं दाक्षिणात्य इति ज्ञायते। अनेन स्वग्रन्थे गजत्रिमुनिभूमिते शके (1738 श 1816 A.D.) बोधसारव्याख्या कृतेति निर्दिश्यते।

1. बोधसारव्याख्या। चौखाम्बामुद्रणालये मुद्रिता॥

89. **द्विजेन्द्रलालपुरकायस्थः** (2000 A. D.)

जयपुरवासी दुलालानन्दपुत्रः धीरेन्द्रकनिष्ठभ्राता जयकुमारतर्कवेदान्तसद्दर्शनतीर्थस्य पट्टाभिरामशास्त्रिणश्च शिष्योऽयं विंशतिशतकीयः। अनेन अद्वैतामृतसाराख्यः ग्रन्थः (1954 A. D.) काले निर्मितः।

1. अद्वैतामृतसारः। लघुप्रकरणग्रन्थोऽयं पद्यबद्धः जयपुरे मुद्रितः॥

90. **देवेन्द्रसरस्वती** (1500–1600 A. D.)

नृसिंहाश्रमिसामयिकोऽयं स्वानुभूतिप्रकाशाख्यप्रकरणग्रन्थकर्ता देवेन्द्रसरस्वतीति दासगुप्तः।

1. स्वानुभूतिप्रकाशः। दासगुप्तेन (H. I. P. Vol. II Page 55) निर्दिष्टोऽयं ग्रन्थः॥

91. **धनपतिसूरिः** (1750–1850 A. D.)

पञ्जाबान्तर्गतरावलपिण्डीनाम्ना प्रसिद्धनगरे उत्पन्नोऽयं रामकुमारसूरिपुत्रः सारस्वतब्राह्मणकुलोत्पन्नः प्रत्यक्तत्वचिन्तामणिकारस्य सदानन्दव्यासवरस्य जामाता बालगोपालतीर्थस्य शिष्यः वाराणसीसंस्कृतकलाशालायां वेदान्ताध्यापकश्चासीत्। अस्याध्यापनकालः (1811 A. D.) इति ज्ञायते।

1. अर्थदीपिका — वेदान्तपरिभाषाव्याख्यात्मकोऽयं ग्रन्थः मुद्रितः।

2. भाष्योत्कर्षदीपिका — भगवद्गीताव्याख्यारूपोऽयं ग्रन्थः मुद्रितः।

3. माधवीयशङ्करदिग्विजयटीका।

4. शङ्करविजयदुन्दुभी। सदानन्दीयशङ्करदिग्विजयसारव्याख्या। विद्यारत्नाकरः (2458–59 IOL) रासपञ्चाध्यायीव्याख्या च कृता।

92. **धर्मदत्तबच्चाशर्मा** (1850–1920 A. D.)

मैथिलोऽयं बच्चाशर्मेति प्रसिद्धः धर्मदत्त एकोनविंशतिशतकीय इति ज्ञायते। अनेन मधुसूदनसरस्वतीकृतायाः भगवद्गीताव्याख्यायाः गूढार्थतत्वालोक इति व्याख्या कृता निर्णयसागरमुद्रणालये मुद्रिता च॥

93. **धर्मभट्टः** (1650–1750 A. D.)

तिरुमलाचार्यसूनुः मुकुन्दाश्रमस्य मन्त्रवादीश्रीरामचन्द्रार्यस्य च शिष्योऽयं धर्मभट्टः अन्नम्भट्टादिवत् सप्तदशशतकापरार्धकालिकस्स्यादिति ज्ञायते। अन्नम्भट्टपितुः धर्मभट्टपितुश्च नामसादृश्यमपि अवधेयार्हो विषयः॥

1. ब्रह्मामृतवर्षिणी॥ सूत्रवृत्तिग्रन्थोऽयं तेलुगुलिप्यां मुद्रितः। चौखाम्बामुद्रिते ग्रन्थे मुकुन्दगोविन्दशिष्य रामानन्दोऽस्य कर्तेति दृश्यते। आनन्दाश्रममुद्रिते तु ग्रन्थे रामकिङ्करधर्मोऽस्य कर्तेति दृश्यते। ग्रन्थेषु भेदोऽपि न दृश्यते। इण्डिया आफीस ग्रन्थालयस्थे (2268 IOL) ग्रन्थे तु स्वयंप्रकाशानन्दशिष्यसदाशिवानन्दोऽस्य कर्तेति दृश्यते। अडयारपुस्तकालयस्थे तु पुस्तके (10 E. 41 A.L.) रामकिङ्करधर्म इति दृश्यते। मद्रासराजकीयपुस्तकालयस्थे तु D. 4689 MGOML ग्रन्थे धर्मभट्टः कर्तेति दृश्यते॥

94. **धर्मय्यदीक्षितः** (1550–16?5 A. D.)

वेङ्कटेशदीक्षितपुत्रः मित्रमिश्रशिष्योऽयं धर्मय्यदीक्षितः वाराणसीवासी षोडशशतकापरार्धारब्धसप्तदशशतकपूर्वार्धान्ते काले उवासेति निश्चीयते। अत्र कारणम् — मुद्रितपुस्तके श्रीमत्परशुरामात्मजमित्रमिश्रप्रेरितस्य वेङ्कटभट्टसूनुधर्मय्य-

दीक्षितकृतौ इति दृश्यते । मित्रमिश्रेण च वीरमित्रोदयनामा ग्रन्थः प्रणीतः । स च ग्रन्थः काशीराजवंशोत्पन्नस्य बुण्डेलवंशजस्य वीरसिम्हनाम्नः काशीभूपालस्य प्रेरणया कृत इति ज्ञायते । वीरसिम्हश्च (1556–1603 A. D.) पर्यन्तं भारतराज्यं अधितिष्ठत अकबरस्यामात्येन अब्दुलफसलाख्येन हत इति इतिहासः । तस्मात् वीरमित्रोदयकर्तुर्मिश्रमित्रस्य शिष्योऽयं धर्मय्यस्सप्तदशशतकपूर्वार्धवासीति ज्ञायते । अदसीयः ग्रन्थः सरस्वतीभवनमालायां (S.B.S. 34) मुद्रितः ।

1. अद्वैतविद्यातिलकदर्पणम् । समरपुङ्गवीयाद्वैतविद्यातिलकव्याख्यात्मकोऽयं ग्रन्थः ।

95. नटेशार्यः (1850–1910 A. D.)

भारद्वाजगोत्रजोऽयं मुडिकोण्डान् ग्रामवासी चोलदेशीयः नटेशार्यः रामस्वामिनागलक्ष्म्योः पुत्रः तिरुविशनल्लूररामसुब्रह्मण्यशास्त्रिशिष्य एकोनविंशतिशतकीय इति निश्चयः ।

1. अद्वैतसरणिः । वेङ्कटरमणार्यकृतस्य चन्द्रिकाप्रकाशप्रसराख्यग्रन्थस्य खण्डनरूपोऽयं ग्रन्थः बालमनोरमामुद्रणालये मुद्रितः ।

96. नरकण्ठीरवशास्त्री (1850–1950 A. D.)

अलङ्कारतर्कवेदान्तविचक्षणोऽयं वेङ्कटेश्वरसंस्कृतपाठशालाप्राध्यापक आसीत् । अनेनोमामहेश्वरकृतौ तत्त्वचन्द्रिका-विरोधवरूथिनीग्रन्थौ प्रकाशितौ । किरणावलीव्याख्योपेतौ महावाक्यरत्नावलीतप्तचक्राङ्कविध्वंसावुभावपि ग्रन्थौ प्रकाशितौ ।

1. व्यासतात्पर्यनिर्णयदीपिका । अय्यण्णादीक्षितकृतव्यासतात्पर्यनिर्णयव्याख्या मुद्रिता च ।

97. नरसिम्हभट्टः (1700–1800 A. D.)

रघुनाथभट्टपुत्रोऽयं नरसिम्हभट्टः रामभद्राश्रमनागेश्वरयोश्शिष्यः किम्मिरि (खिमुण्डि) वंशजस्य जगन्नाथनृपतेस्सामयिकः मिथिलावासी अष्टादशशतकीय इति ज्ञायते ।

1. अद्वैतचन्द्रिका । नृसिम्हाश्रमीयभेदधिक्कारव्याख्यात्मकोऽयं ग्रन्थः दासगुप्तेन निर्दिष्टः ।

2. ईशावास्यटीका । (481 C. C. P. B.)

3. आनन्ददायिनीति ग्रन्थ अदसीय इति प्रसिद्धिः । परं नास्य कृतिरिति ज्ञायते

98. नरहरिः (1725–1325 A. D.)

दाक्षिणात्योऽयं नरहरिः । अस्य शिष्यः दिवाकरनामा । अस्य शिष्येण बोधसारव्याख्या (1738 श 1875 A. D.) काले कृता । तस्मादयं नरहरिरपि अष्टादशशतकीयः ।

1. बोधसारः । विपुलकायेऽस्मिन् ग्रन्थे गुरुमहिमा मुनिचर्या जीवन्मुक्तलक्षणान्युपवर्णितानि । वाराणस्यां मुद्रितः ।

99. नल्लासुधीः (1700–1800 A. D.)

नल्लाकविः, नल्लबुधः, नल्लादीक्षितः, भूमिनाथ इत्यादिनामभिः प्रसिद्धोऽयं सुभद्रापरिणयनाटककर्ता नल्लासुधीः कौशिकगोत्रजः बालचन्द्रदीक्षितपुत्रः चोळदेशीयकण्डरमाणिक्यग्रामवासी परमशिवेन्द्रशिष्यः सदाशिवब्रह्मेन्द्र–रामभद्रदीक्षितयोः शिष्यः रत्नगिरीशदीक्षितपुत्रस्य वैद्यनाथदीक्षितस्यापि शिष्यः श्रीधरवेङ्कटेशशास्त्रिणां सामयिकः राममद्रमखिबन्धुः सप्तदशशतकमध्यवर्तीति निर्णयः ।

1. अद्वैतरसमञ्जरी । ग्रन्थेऽत्र 45 पद्यैः सरसमधुरैश्शब्दैः नातिदीर्घैर्नातिह्रस्वैश्च समस्तशब्दैः बहुभिरुदाहरणैरर्थान्तरन्यासपूर्णैश्च वाक्यसन्दर्भैरद्वैतसिद्धान्ताः प्रतिपाद्यन्ते । ग्रन्थोऽयं वाणीविलासमुद्रणालये मुद्रितः । अस्य व्याख्या परिमलाख्या मूलकृतैव कृता । अन्या च व्याख्या अनन्तशयनपुस्तकालये लभ्यते ।

चित्तवृत्तिकल्याणम्, धर्मविजयचम्पूः, पदमञ्जरी, जीवन्मुक्तिकल्याणम्, शृङ्गारसर्वस्वभाणः, सुभद्रापरिणयनाटकञ्चानेन कृतानीति ज्ञायन्ते ।

100. नागेशभट्टः (1674–1754 A. D.)

महाराष्ट्रविप्रकुलोत्पन्नोऽय शिवभट्टसतीदेव्योः पुत्रः भट्टोजिदीक्षितपौत्रस्य हरिदीक्षितस्य शिष्यः वैद्यनाथपायुकुण्डापराख्यस्य बालशर्मणश्च गुरुः शृङ्गिबेरपुराधीशाद्रामतो लब्धजीवक अपरे वयसि प्राप्तसन्यासः नागेशभट्ट इति ज्ञायते ।

रामराजस्य महानसे पाचनविभागे सूदपदव्यां नियुक्तोऽयं अदसीयपाण्डित्यमजानता राजपुरुषेण कदाचित् भुञ्जानेषु पण्डितेषु केनाप्यन्युत्पन्नेन पण्डितम्मानिना अज्ञात'पचेर्मे'सूत्रेणोक्तं पचनार्थकं पक्तपदं श्रुत्वा अन्नपर्यवेषकेणानेन नागेशभट्टेन तद्धितस्स पण्डितः। ज्ञातवृत्तान्तो राजा नागेशभट्टं महान्तं विदुषं पात्वा सञ्जातपश्चात्तापः सभापण्डितप्रवरमेनमकार्षीदिति कथापि सम्प्रदायसमागता श्रूयते।

1. वेदान्तभाष्यप्रतिपाद्यानि। अस्यैव वेदान्तभाष्यप्रदीपोद्योत इति नामान्तरं जयपुरपोटीखानासूच्यां दृश्यते। सूत्रवृत्तिरूपः उज्जयिनीसूच्यां जयपुरसूच्याञ्च लभ्यते। परिभाषेन्दुशेखरादिश्चानेन कृतः॥

101. नानादीक्षितः (1600 A. D.)

प्रकाशानन्दनृसिंहराघवेन्द्राणां शिष्योऽयं नानादीक्षित अधिकाद्युपविश्वेशमिति स्वग्रन्थे निर्दिशति। तस्माद्वाराणसीवासी प्रकाशानन्दशिष्योऽयं षोडशशतकीय इति निर्णीयते।

1. सिद्धान्तदीपिका। प्रकाशानन्दकृतसिद्धान्तमुक्तावल्याः व्याख्यात्मकोऽयं ग्रन्थः जीवानन्दविद्यासागरमुद्रणालये कलकत्तायां मुद्रितः।

102. नारायणः (1300 A. D.)

"आनन्दशैलचरणाम्बुजषट्पद" इत्यात्मानं प्रकटीकुर्वन्नयं आनन्दशैल (आनन्दगिरि) शिष्योऽयमिति प्रतिभाति।

1 प्रपञ्चसारार्थदीपः। ग्रन्थोऽयं (R. 3451 MGOML) लभ्यते।

103. नारायणप्रियः (1600–1700 A. D.)

रामतीर्थशिष्योऽयं वृषक्षेत्रवासी नारायणप्रियः सप्तदशशतकीयः।

2. कैवल्यदीपिकाव्याख्या—"स्नेहः" (R. 2934 MGOML)

104. नारायणतीर्थः (1600–1700 A. D.)

रामगोविन्द (गोविन्दानन्द) वासुदेवतीर्थयोःशिष्योऽयं नारायणतीर्थः लघुचन्द्रिकाकार गौडब्रह्मानन्दगुरुस्सप्तदशशतकीय इति निश्चीयते। कृष्णलीलातर-

ङ्गिणीकाराद्भिन्नोऽयम्। अनेन सिद्धान्तविन्दोर्व्याख्या कृतेति P. P. शास्त्रिणः (7549 DC. TSML Vol XIII.) ग्रन्थे प्रवदन्ति।

1. अद्वैतरत्नाकरः। (B. 1028) मैसूरसूच्यां दृश्यते।

2. ब्रह्मसूत्रवृत्तिः (12717) बरोडासूच्यां दृश्यते।

3. लघुव्याख्या। (B. S. S. 65) सिद्धान्तबिन्दुलघुव्याख्यात्मकोऽयं ग्रन्थः वाराणसीग्रन्थमालायां मुद्रितः।

4. वेदान्तमन्दाकिनी (65 DC. Anup) माधवसरस्वतीकृतन्यायचूडामणिव्याख्यात्मकोऽयं ग्रन्थ अनूपसूच्यां दृश्यते।

5. अद्वैतसुधा (3820 B. R. d.)

6. शारीरकमीमांसाभाष्यवार्तिकम् (A.S.I, C.S.S.I) गद्यमयोऽयं भाष्यस्य व्याख्यात्मकः वार्तिकग्रन्थः। वार्तिकशब्देन व्यवहृतोऽपि भाष्ये दुरुक्तचिन्तनं नास्ति। ग्रन्थोऽयमाशुतोषग्रन्थमालायां मुद्रितः।

7. अद्वैतामृतकन्दम्। ग्रन्थोऽयं शारीरकमीमांसाभाष्यवार्तिके 19 तमे पुटे निर्दिष्टः॥

सिद्धान्तविन्दुमहद्व्याख्या, तत्वचन्द्रः तत्त्वत्रयनिरूपणम् न्यायकुसुमाञ्जलिकारिकाव्याख्या, भक्तिचन्द्रिका, भक्त्यधिकरणमाला, योगचन्द्रिका, योगसूत्रवृत्तिगूढार्थद्योतनिका, वेदस्तवटीका, वेदान्तविभावना सव्याख्या, सांख्यचन्द्रः, सांख्यकारिकाव्याख्या, सांख्यतत्वकौमुदीव्याख्या, दीधितिटीका, भाषापरिच्छेदटीकाश्चादसीयाः ग्रन्था इति श्रूयन्ते॥

105. नारायणतीर्थः (1700 A. D.)

ब्रह्मविद्यातरङ्गिणीति कश्चन प्रकरणग्रन्थ अडयार पुस्तकालये लभ्यते। यद्यपि तत्र ग्रन्थकर्तुर्नाम न दृश्यते तथापि ग्रन्थस्यादिमश्लोकानां परिशीलनेन कृष्णलीलातरङ्गिणीकारः नारायणतीर्थ एवास्यापि कर्ता स्यादित्यूह्यते। पूर्वमीमांसायामपि भाट्टभाषाप्रकाशिका अनेन कृता विद्यते। नारायणतीर्थशिष्यरामानन्दतीर्थ-

शिष्य आन्ध्रदेशजोऽपि दक्षिणदेशीयः कावेरीतीरस्थनडुक्कावेरीग्रामे वरहूरग्रामे च उवासेति ज्ञायते । अस्य काल (1700 A. D.) इति कृष्णमाचार्यमतम् । त्यागराजशास्त्रिकृता व्याख्याप्यस्यास्ति ।

106. नारायणाश्रमः (1526–1600 A. D.)

जगन्नाथाश्रमगीर्वाणेन्द्रसरस्वत्योः प्रशिष्योऽयं अद्वैतदीपिकाकारनृसिम्हाश्रमिणशिष्योऽयं नारायणाश्रम अप्पय्यदीक्षितसामयिकः दक्षिणदेशवासी षोडशशतकीय इति ज्ञायते ।

1. अद्वैतदीपिकाविवरणम् । नृसिम्हाश्रमीयाद्वैतव्याख्यात्मकोऽयं ग्रन्थः पण्डितग्रन्थमालायां मुद्रितः ॥

2. अद्वैतसिद्धान्तसारसंग्रहः । (N.S.P.)

3. निगमान्तार्थचन्द्रिका (22 D. 86 A.L) प्रकरणग्रन्थोऽयं अड्यारपुस्तकालये वेङ्कटेश्वरपुस्तकालये च लभ्यते ॥

4. भेदधिक्कारसत्क्रिया । (B.S.S 86, 92) नृसिम्हाश्रमीयभेदधिक्कारव्याख्या ॥

107. नारायणाश्रमी (1350 A. D. कालादर्वाचीनः)

एतेन प्रायशस्सर्वासामप्युपनिषदां दीपिकाः कृताः । कासुचित्तूपनिषत्सु दीपिका नैव कृतेति ज्ञायते । याश्चोपनिषदः शङ्कराचार्यैर्व्याकृताः तासां व्याख्यानावसरे नारायणाश्रमिणा शङ्करोक्त्युपजीविनेति कथ्यते याश्च शङ्करेणाव्याकृताः तासु श्रुतिमात्रोपजीविनेति कथ्यते ॥ एतदीयायां माण्डूक्योपनिषद्दीपिकायां "श्रीनाथात्मजभट्टरत्नाकरसूनुनारायणविरचिताद्वैताख्यप्रकरणे" इति दर्शनात् श्रीनाथपौत्रः रत्नाकरभट्टपुत्रोऽयं नारायणाश्रम इति ज्ञायते । अनेनानन्दगिरिः आरुणिकोपनिषद्दीपिकायां शङ्करानन्दश्च निर्दिश्येते । तस्मादानन्दात्मशिष्य शङ्करानन्दादर्वाकन स्सामयिको वा स्यादिति निश्चयः ।

1. उपनिषदां दीपिकाः ॥

अथर्वशिर-अथर्वशिख-अमृतबिन्दु-आत्मप्रबोध-आत्म-आरुणिक-काठक-कैवल्य क्षुरिक-गर्भ-चूलिक-जाबाल-तैत्तरीय-नारायण-नृसिम्हतापनी-प्रश्न-प्राणाग्निहोत्र-ब्रह्मविद्या-ब्रह्म-महा-माण्डूक्य-मुण्डक-रामपूर्वतापिनी श्वेताश्वतर-षट्चक्र-हंसोपनिषदां दीपिकाः कृताः । माण्डूक्यदीपिका अमुद्रिता सरस्वतीमहालये जयपुरसूच्यां च लभ्यते ।

108. नित्यानन्दाश्रमः (1620 A. D.)

पुरुषोत्तमाश्रमशिष्योऽयं नित्यानन्दाश्रमः । उज्जयिनीस्थे छान्दोग्योपनिषन्मिताक्षराग्रन्थे (1749 सं 1690 A.D.) इति कालः दृश्यते । जयपुरपोटीखानापुस्तकालयस्थे तु ग्रन्थे 1976 इति काल निर्दिष्टः । स किं प्रतिलिपिकाल उत ग्रन्थनिर्माणकाल इति निर्णेतुं न शक्यते ॥

1. अद्वैततत्त्वदीपः (7534 TSML) प्रकरणग्रन्थोऽयममुद्रित अपूर्णस्सरस्वती महालये लभ्यते ।

2. मिताक्षरा ॥ छान्दोग्योपनिषदां व्याख्यात्मकः ग्रन्थः बाम्बेसंस्कृतमुद्रणालये मुद्रितः ॥

3. मिताक्षरा ॥ बृहदारण्यकोपनिषदां व्याख्यात्मकोऽयं ग्रन्थः आनन्दाश्रममुद्रणालये (A. S. S. 31) मुद्रितः ॥

109. निश्चलदासस्वामी (1800–1900 A. D.)

वारणासीवास्ययं निश्चलदासः विद्यारण्यकृतपञ्चदश्याः व्याख्यां रचयामास । ग्रन्थोऽयं दासगुप्तेन निर्दिष्टः ।

1. वृत्तिप्रभाकरः । विद्यारण्यीयपञ्चदशीव्याख्यात्मकोऽयं ग्रन्थः मुद्रितः ॥

110. नीलकण्ठतीर्थः (1775–1875 A. D.)

"बालाभिधगुरुकृपयेति दर्शनात् बालतीर्थशिष्योऽयं अद्वैतसिद्धिकारं मधुसूदनसरस्वतीं, स्वाराज्यसिद्धिकारं गङ्गाधरेन्द्रञ्च प्रमाणयन् अष्टादशशतकवासीति निश्चीयते । केरलदेशानभिप्टुवन् केरलदेशवासितां प्रतिपादयति । अस्य शिष्या आत्मपञ्चककर्त्री आत्मयोगिनीनाम्नी सन्यासिनीति ज्ञायते ॥

1. अद्वैतपारिजातम् । प्रकरणग्रन्थोऽयं 262 पद्यैः जीवन्मुक्तलक्षणं विशदयति । ग्रन्थोऽयं निर्णयसागरे मुद्रितः ।

2. गीतार्थप्रकाशः । (D. 2081 MGOML) लभ्यते ।

3. चित्सुधार्या । स्वाराज्यसर्वस्वापरनामायं ग्रन्थः सङ्ग्रहेणासत्कार्यवादं नास्तिकमतं, कपिलकाणादाद्यनीश्वरवादिमतं सौगतमतञ्च खण्डयन् अद्वैतमतं साधयति । ग्रन्थोऽयं पालकाडनगरे मुद्रितः ।

4. वेदान्तकतकः । 3200 पद्यैः पूर्णोऽयं ग्रन्थ अतिशिथिलः भारतकार्यालयपुस्तकालये (2402 IOL) लभ्यते । आत्मपञ्चकनामा ग्रन्थः अनेन रचितः । पालघाटमुद्रणालये मुद्रितश्च ।

अष्टाक्षरस्तोत्रम्, आत्मादर्शः, प्रश्नोत्तरमञ्जरी, श्रीशिवामृतम्, सनत्सुजातीयव्याख्या ; हरिषड्वदनम्, हरिनवकम्, हरिभक्तिमकरन्दः, इति ग्रन्थ अनेन विरचिताः ।

111. नीलमेघशास्त्री (1850–1910 A. D.)

चोलदेशजोऽयं तिरुविनशल्लूरग्रामाभिजनः रामसुब्रह्मण्यशास्त्रिशिष्यः नीलमेघशास्त्रीति ज्ञायते ।

1. वेदान्तनवमालिका । ब्रह्मसूत्रलघुवृत्त्यपरनामायं ग्रन्थ ओरियण्टल पब्लिषिङ्हाउस मद्रासनगरे मुद्रितः ।

112. नृसिम्हसरस्वती (1551–1650 A. D.)

स्वग्रन्थेषु कृष्णानन्दं रामानन्दञ्च नमस्कुर्वाणोऽयं नृसिम्हभारत्यपराभिधः वाराणसीवासीति वाराणस्यां (1558 A. D.) काले स्वीयां सुबोधिनीं समापितवानिति च ज्ञायते । एवञ्चास्य कालष्षोडशसप्तदशशतकमध्य इति ज्ञायते ।

1. सुबोधिनी । सदानन्दकृतवेदान्तसारव्याख्यात्मकोऽयं ग्रन्थः विक्टेरियामुद्रणालये बाम्बेनगरे, सरस्वतीमुद्रणालये कल्कत्तायाञ्च मुद्रितः ।

2. वेदान्तडिण्डिमः । ग्रन्थस्यास्य प्रतिश्लोकं प्रतिचतुर्थचरणं 'इति वेदान्तडिण्डिम' इति दर्शनात् अस्याख्या अन्वर्था भवति । ग्रन्थोऽयं कल्कत्तायां मुद्रितः ।

3. विवेकमुकुरः । (22. D. 88. AL) देहत्रयं पञ्चकोशान् विश्वतैजसप्राज्ञांश्च विवेचयन्नयं प्रकरणग्रन्थ अमुद्रितः पूर्णश्च अडयारपुस्तकालये लभ्यते । योगपञ्चाशिकापि अनेन कृतेति ज्ञायते ।

113. परमशिवेन्द्रसरस्वती (1600–1700 A.D.)

अभिनवनारायणेन्द्रसरस्वतीशिष्योऽयं परमशिवेन्द्रसरस्वती प्रसिद्धस्य सदाशिवब्रह्मेन्द्रस्य गुरुः षोडशसप्तदशशतकीयः त्र्यम्बकमखिशङ्करनारायणमखिनोस्सामयिक इति च निर्णीयते ।

1. दहरविद्याप्रकाशः । ब्रह्मसूत्रताण्डिश्रुत्यादिषु उपवर्णिता शाङ्करभाष्ये दहराधिकरणे प्रतिपादितेयं दहरविद्या ग्रन्थेऽस्मिन् साकल्येन निर्दिष्टा । त्रिंशद्भिश्श्लोकैस्सङ्गृहीता । ग्रन्थोऽयं बालमनोरमा मुद्रणालये (B. M. P. S. 5) मुद्रितः ।

2. वेदान्तनामरत्नसहस्रव्याख्या । (7592 TSML)

स्वरूपानुसन्धानापरनामायं ग्रन्थ उपनिषत्प्रतिपादितानां ब्रह्मस्वरूपवाचकानां शब्दानां व्युत्पत्तिप्रदर्शनपर अमुद्रितस्सरस्वतीमहालये सव्याख्यः मद्रासराजकीयपुस्तकालये च लभ्यते ।

वेदसारशिवसहस्रनामव्याख्या, शिवगीतातात्पर्यप्रकाशिका चानेन कृतेति ज्ञायते ।

114. परमानन्दतीर्थः (1300–1400 A. D.)

विद्यातीर्थप्रशिष्यः भारतीतीर्थशिष्यश्चायं परमानन्दतीर्थश्चतुर्दशशतकीय इति निर्णीयते ।

1. अवधूतगीताटीका । (10 F. 15. AL) अनन्तशयन-अडयार-मैसूर-मद्रास राजकीय-पुस्तकालयेषु लभ्यते ।

2. उत्तरगीताटीका । ग्रन्थोऽयं मैसूरपुस्तकालये लभ्यते ।

3. ब्रह्मविद्यासुधार्णवः। (7560 TSML) प्रकरणग्रन्थोऽयं अडयारसरस्वतीमहालययोर्लभ्यते।

4. वेदान्तशिक्षा, चिदानन्दब्रह्मविलासाख्या सूत्रवृत्तिश्च कृतेति ज्ञायते।

115. परमेश्वरभारती (1400 A.D.)

भारतीतीर्थशिष्योऽयं परमेश्वभारती चतुर्दशशतकीयः। वैय्यासिकसूत्रोपन्यास अनेन कृतः। तिरुवनन्तपुरपुस्तकालये लभ्यते। निजतत्वामृतरसाख्य अपरो ग्रन्थ अडयारपुस्तकालये लभ्यते।

116. परमेष्ठिगुरुः (1725–1800 A.D.)

रामाश्रमापरनामायं नारायणश्रमगुरुः माधवाश्रमप्राचार्यः अष्टादशशतकीय इति माधवाश्रमकृतात् स्वानुभवादर्शाज् ज्ञायते। अनेन वेदान्तभूषणाख्यः ग्रन्थः कृतः। स च मध्वमतध्वान्तदिवाकराख्ये अमुद्रिते अडयारपुस्तकलयस्थे (I.A.18. AL) निर्दिष्टः।

1. वेदान्तभूषणम् Q.

117. पाण्डुरङ्गपण्डितः (1750–1850 A.D.)

नारायणपण्डितपुत्रोऽयं पाण्डुरङ्गपण्डितः वाराणसीवासीति ज्ञायते। अनेन द्वौ ग्रन्थौ रचितौ।

1. अद्वैतजलजातः—(11216 B.R.D.)

2. पञ्चरत्नप्रकाशः—(III. B. 122. R. A. S. B.) शाङ्करपञ्चरत्नव्याख्यात्मकोऽयं ग्रन्थः रायलासियाटिक सोसाइटि कल्कत्तासूच्यां दृश्यते।

118. पुरुषोत्तममिश्रः (1600–1700 A.D.)

कृष्णतीर्थप्रशिष्यः रामतीर्थशिष्यश्चायं पुरुषोत्तममिश्रस्सप्तदशशतकीय इति निर्णीयते। अग्निचित्पुरुषोत्तमाद्भिन्नो वा न वेति न ज्ञातुं पार्यते।

1. सुबोधिनी। (2061 DC BUL Vol. II) संक्षेपशारीरकव्याख्यात्मकोऽयं ग्रन्थ अमुद्रित बम्बई युनिवर्सिटिपुस्तकालये लभ्यते। वाराणसीसंस्कृतविश्वविद्यालये (No. 28282 D. C.) उदयपुरसूच्यां (P. 160) च दृश्यते।

119. पुरुषोत्तमसरस्वती (1600–1700 A.D.)

श्रीधरसरस्वतीशिष्य अद्वैतसिद्धिकारमधुसूदनसरस्वत्याश्च शिष्य पुरुषोत्तसरस्वती षोडशसप्तदशशतकीय इति निर्णीयते। श्रीधरसरस्वती दीक्षागुरुः, मधुसूदनसरस्वती विद्यागुरुरिति विशेषः।

1. बिन्दुसन्दीपनम्। सिद्धान्तबिन्दुव्याख्यात्मकोऽयं ग्रन्थः गुजरातिमुद्रणालये बाम्बेनगरे गैक्वार्डओरियण्टलग्रन्थमालायां (G.O.R.I S.) च मुद्रितः॥

2. अद्वैतसिद्धिसाधकः। बरोडापुस्तकालये लभ्यते।

3. उपाधिखण्डनम्। (R. 3211 B. MGOML)

120. पूर्णानन्दः [पूर्णप्रकाशः] (1650–1750 A.D.)

ब्रह्मविद्याभरणकारस्याद्वैतानन्दसरस्वत्याः प्रशिष्यः पुरुषोत्तमानन्दसरस्वत्याश्शिष्योऽयं पूर्णप्रकाशानन्दापराभिधः पूर्णानन्दः स्वग्रन्थे ब्रह्मानन्दसरस्वतीं निर्दिशति। रामानन्दस्यापि प्रशिष्यस्स्यादिति ज्ञायते। अच्युतकृष्णानन्दसामयिकस्सतीर्थ्यैश्च।

1. अधिष्ठानविवेकः। (8. H. 54. AL) अमुद्रितोऽयं ग्रन्थ अडयारशृङ्गगिरिविद्यारण्यपुरसूचीषूपलभ्यते।

2. तत्त्वम्पदार्थविवेकः। (R. 1382 MGOML & AL)

3. भाष्यरत्नप्रभाव्याख्या—पूर्णानन्दीया। ग्रन्थोऽयं मैसूरपुस्तकालस्थः। चतुस्सूत्रीपर्यन्तं मुद्रितः (KSS. 71)।

4. श्रुतिसारः (7675 TSML) जीवन्मुक्तिविवेकव्याख्या दीपिकाख्या अदसीया लभ्यते (BORI)

121. पेद्दादीक्षितः (1625–1725 A.D.)

कौशिकगोत्रजाच्छन्दोविचितिकारात् पेद्दादीक्षितात् भिन्नोऽयं कौण्डिन्यगोत्रजः त्रिवेदीनारायणदीक्षितपुत्रः धर्मराजाध्वरिणः भ्रातृष्पुत्रः ऋक्शाखाध्यायी चोलदेशीयकण्डरमाणिक्यग्रामवासी सप्तदशशतकीय इति निर्णीयते। स्वपितृव्याद्धर्मराजाध्वरिण एवायं प्राप्तविद्य इति पदमञ्जरीव्याख्यामञ्जरीमकरन्दात् (Page 13 DC. AL. Vol VI) ज्ञायते।

1. प्रकाशिका । वेदान्तपरिभाषाव्याख्यात्मकोऽयं ग्रन्थः अनन्तशयनग्रन्थमालायां (T. S S. 93) मुद्रितः । तत्वचिन्तामणिप्रकाशसारोप्यनेन कृतः ।


122. प्रकाशानन्दः (1550–1650 A.D.)

अद्वैतानन्दस्य ज्ञानानन्दस्य च शिष्योऽयं प्रकाशानन्दः नानादीक्षितगुरु नृसिम्हाश्रमिसामयिकष्षोडशशतकीय इति च निर्णीयते । सिद्धान्तलेशसंग्रहेऽयं निर्दिश्यते च ।

1. सिद्धान्तमुक्तावलिः । वेदान्तसिद्धान्तमुक्तावल्यपरनामायं ग्रन्थः वृत्तिसहितः पण्डितग्रन्थमालायां वाराणसीनगरे मुद्रितः । अस्य व्याख्या नानादीक्षितकृता सिद्धान्तदीपिकाख्या ।

123. प्रज्ञानानन्दः (1300–1400 A.D.)

"अनुभूतिस्वरूपं तं प्रणमामि परं गुरुम्" इत्युनुभूतिस्वरूपं प्रणमन्नयं अनुभूतिस्वरूपप्रशिष्य आनन्दगिरिनरेन्द्रनगर्योश्शिष्यश्चतुर्दशशतकीयादिमे भागे उवासेति निश्चीयते ।



1. तत्वप्रकाशिका । आनन्दगिरीयतत्वालोकव्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः पूर्णश्च अडयारपुस्तकालये (39-1-1 AL) बाम्बेनगरस्थ रायलासियाटिकसोसाइटि-पुस्तकालये च लभ्यते ।

2. पञ्चीकरणविवरणम् (R. 3324 MGOML)

3 त्रिपुटीटीका (III G. 51 R. A. S. Bengal)

124. प्रज्ञानाश्रमः (1600–1700 A. D. ?)

"बालमस्करीन्द्राय गुरवे प्रणतोऽस्म्यहम्" मिति वदन्नयं बालमस्करि-शिष्य इति प्रतिभाति । बालमस्करीन्द्रोऽयं बालकृष्णानन्दसरस्वत्येवेति यदि

निर्णीयते तर्हि सप्तदशशतकीयोऽयमिति निश्चयः । परन्तु बालमस्करिशब्दस्य बालसन्यासिरित्येवार्थस्फुरणात् बालसन्यासिरादिशङ्कर एव स्तूयते । गुरुशब्दश्चात्र बहुमानवाचक इति भाति ।

1. स्वात्मानन्दप्रकाशिका । बोधार्याव्याख्यात्मकोऽयं ग्रन्थ अमुद्रित अडयार-पुस्तकालये लभ्यते । (41. C. 82. AL) ग्रन्थेऽस्मिन् बोधार्याकर्ता सर्वज्ञो भग-वान् भाष्यकार इति दर्शनात् आदिशङ्कर एव कर्ता न तु सदाशिवबोधेन्द्र इति निश्चीयते । अत्र पञ्चकोशविवेकमहावाक्यविवेकवेदप्रामाण्यविवेकअहमर्थविवेक प्रकी-र्णार्थसंग्राहकाख्यपञ्चकरणानि सन्ति ।

125. प्रत्यक्स्वरूपाचार्यः (1400 A.D.)

प्रत्यक्प्रकाशविद्यागिर्योश्च शिष्योऽयं चतुर्दशशतकीय इति निर्णयः । अस्यैव प्रज्ञानात्मप्रकाश इति नामान्तरं दृश्यते ।

1. मानसनयनप्रसादिनी । (N. S. P.) चित्सुखाचार्यकृततत्त्वप्रदीपिकायाः व्या-ख्यात्मकोऽयं ग्रन्थः निर्णयसागरमुद्रणालये बाम्बेनगरे मुद्रितः ।

126. बलभद्रः (1600–1700 A.D.)

अद्वैतसिद्धिकारमधुसूदनसरस्वतीशिष्योऽयं बलभद्रस्सप्तदशशतकीय इति निर्णीयते ।

1. अद्वैतचन्द्रिका । अद्वैतसिद्धिव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरे मुद्रितः ।

2. सर्वसिद्धान्तरहस्यटीका । शाङ्करसर्वदर्शनसिद्धान्तसंग्रहाख्यग्रन्थव्याख्याभूतोऽयं ग्रन्थः दासगुप्तेन (HIP Vol. II 55) निर्दिष्टः ॥

127. बालकृष्णानन्दसरस्वती (1600–1700 A.D.)

वासुदेवेन्द्रसरस्वत्याः तोटकाचार्यकृतश्रुतिसारसमुद्धरणव्याख्यातुस्सच्चिदा-नन्दयोगिनश्च शिष्योऽयं बालकृष्णानन्दः दक्षिणदेशवासी विशेषतः मल्लिकार्जुन-क्षेत्रवासीति निश्चीयते ॥

1. अनुभवामृतम् । त्रयोदशस्वध्यायेषु 1500 पद्यैरद्वैतसिद्धान्तान् व्यासशुकाचार्य प्रश्नप्रतिवचनप्रणाल्या प्रतिपादयन्नयं अमुद्रितः ग्रन्थ अडयारपुस्तकालये (24 E. 37 AL) लभ्यते ॥

2. अद्वैतपञ्चरत्नव्याख्या—"किरणावली" (R. 1613 I. MGOML & AL)

128. बालगोपालेन्द्रयतिः (1475-1575 A.D.)

जगन्नाथाश्रमिशिष्योऽयं बालगोपालेन्द्रः नृसिम्हाश्रमिसामयिकः। शाङ्कर-मनीषापञ्चकव्याख्या मधुमञ्जरी (D 4706 MGOML) अनेन कृता। बरोडा-अनन्तशयन-नासिक-पुस्तकालयेषु लभ्यते च ।

129. वेल्लङ्गोण्ड-रामरायकविः (1850—1915 A.D.)

आन्ध्रदेशजोऽयं गुण्डूरजिल्लान्तर्गतनाराशरपेटतालुकान्तर्गत "पानिदीपतु" ग्रामे आसीत् । अस्य जन्मकालः (1875 A.D.) इति पुरुगुल्लरामशास्त्रिसुब्रह्मण्य-शास्त्रिणोश्शिष्योऽयं हयग्रीवोपासकः न्यायवेदान्तव्याकरणपण्डित अद्वैतीति च ज्ञायते ।

1. अद्वैतविजयः 2. अद्वैतामृतम् 3. त्रिमतसमर्थनम् 4. देह-देहिभावनिर्मूलनम् 5. भगवद्गीताभाष्यार्थप्रकाशिका 6. मोक्षप्रसादः 7. शारीरकचतुस्सूत्रीविचारः 8. वेदान्तकौस्तुभः 9. वेदान्तसंग्रहः 10. वेदान्तदीपिका 11. वेदान्तदिनकरः 12. वेदान्ततत्त्वामृतम् 13. वेदान्त-मुक्तावलिः 14. अद्वैतान्यमतखण्डनम् इति ग्रन्था अनेन कृताः। एषु वेदान्तमुक्ता-वलिः शार्दूलविक्रीडितछन्दोबद्धईशकेनकठप्रश्न—मुण्ड—माण्डूक्यतैत्तरीयछान्दोग्य-ऐतरेयबृहदारण्यककैवल्यश्वेताश्वतरोपनिषदां सारसङ्ग्राहकः 788 पद्यैः पूर्ण तेलुगुलिप्यां मुद्रितश्च । एनमधिकृत्य (Telugu Ency. Vol. III p. 1027) पुस्तकेऽधिकं विस्तृतम् । शंकराशांकरभाष्यविमर्शः, सिद्धान्तबिन्दुव्याख्या, अद्वैतन्यायमकरन्दः, सिद्धान्तकौमुदीव्याख्या-शरद्रात्रिः, चम्पूभागवतव्याख्या, अनर्घराघवव्याख्या, समुद्रमथनचम्पूः कृष्णलीलातरङ्गिणीत्यादि ग्रन्था अनेन रचिताः ।

130. बोधानन्दः (1700—1800 A.D.)

ब्रह्मानन्दयतिशिष्यः गुरुमूर्तिगुरुश्चायं बोधानन्दः द्रविडदेशीयपञ्चनद (तिरुवयार) क्षेत्रवासी अष्टादशशतकीय इति ज्ञायते ।

1. कैवल्यदीपिका (R. 2934 MGOML) अस्य व्याख्या नारायणप्रिययत्य-पराभिधानदुर्गाप्रसादयतिना कृता स्नेहनाम्नी ।

2. बोधानन्दगीता (316 TCL)

ईशादिबृहदारण्यकान्तोपनिषदां भाष्यार्थं सङ्गृह्यात्ययं ग्रन्थः । द्वादशभिः परिछेदैः पूर्णोऽयं अमुद्रित अनन्तशयनपुस्तकालये लभ्यते ।

131. बोधेन्द्रयतिः (1500—1600 A.D.)

गीर्वाणेन्द्रसरस्वतीशिष्यः विश्वाधिकसरस्वतीशिष्यश्चायं नृसिम्हाश्रमिसतीर्थ्य-श्चोलदेशीयः तञ्जपुरसमीपस्थगोविन्दपुरे प्राप्तसमाधिरिति ज्ञायते। केचित्तु बोधेन्द्र-गुरुर्गीर्वाणेन्द्रः नीलकण्ठदीक्षितगुरुर्गीर्वाणेन्द्र इति (1650—1750 A.D.) काले आसीदिति वदन्ति । पूर्वाश्रमेऽस्य पुरुषोत्तम इति नाम, काञ्चीमण्डलवासीति च केचिद्वदन्ति ।

1. अद्वैतभूषणम् । विवरणप्रस्थानानुयायी, पञ्चपादिकाविवरणार्थसंग्राहकः, विवरण-प्रमेयसंग्रहापरनामा ब्रह्मविद्यापत्रिकायां मुद्रितः। अस्य व्याख्या वासुदेवेन्द्रकृता आनन्ददीपिकाख्या वर्तते ।

2. आत्मबोधव्याख्या । भावप्रकाशिकापरनामायं ग्रन्थ (7175 TSML) सरस्वती महालये लभ्यते । नामामृतरसायनम्, हरिहराद्वैतभूषणम्, हरिहरभेदधिक्कारः, नामामृतरसोदयाख्याश्च ग्रन्थाः कृताः ।

132. ब्रह्मदेवपण्डितः (1700—1800 A.D.)

मल्लेश्वरसूर्याख्यात्स्वपितृव्यात् प्राप्तविद्यः पिन्निण्डिवंश्य आन्ध्रदेशजोऽयं ब्रह्मदेवपण्डित इति ज्ञायते ।

1. विशिष्टाद्वैतदूषणसारसंग्रहः । (29. L. 24. AL)

133. **ब्रह्मानन्दः** (1000–1100 A. D.)

सर्वज्ञात्मनः शिष्योऽयं स्वन्तेवासिने योगानन्दाय भगवत्पादशङ्करकथां दशसहस्राधिकैः पद्यैर्विवृणोति । अमुद्रितस्यास्य हस्तलिखिता मातृका कुम्भघोणस्थ महादेवशास्त्रिनिकटे लभ्यते । केचन अंशा श्रीभगवत्पादपूजाकल्पे मुद्रिताः ।

1. शङ्करविजयः (ब्रह्मानन्दीयशङ्करविजयः) ।

134. **ब्रह्मानन्दभारती** (1325–1425 A. D.)

आनन्दभारतीतीर्थस्य विद्यारण्यस्य च शिष्योऽयं ब्रह्मानन्दभारती चतुर्दशशतकीय इति निर्णीयते । अनेन रामानन्दभारती च नमस्कृतः ।

1. दृग्दृश्यविवेकव्याख्या— वाक्यसुधाटीका (B.S.S. 56) ग्रन्थेऽस्मिन् अद्वैतमकरन्दकारः निर्दिश्यते ।

पुरुषार्थबोधः, प्रपञ्चसारटीका, अद्वैतमार्तण्ड इत्यपरनामा श्रौतमार्तण्डश्चानेन कृताः ।

135. **भजनानन्दः** (1600–1700 A. D.)

अस्यैव भज्जुरामः, भजरामः, इत्यादि नाम दृश्यते। अनेन अद्वैतदर्पणाख्यः ग्रन्थः सव्याख्यः कृतः । अमुद्रितोऽयं ग्रन्थः पञ्जाबसूच्यां बरोडासूच्यां औधसूच्यां R. A. शास्त्रिसूच्यां च दृश्यते। पञ्जाबसूच्यां (1745 सं 1689 A. D.) अस्य काल इति निर्दिश्यते ।

1. अद्वैतदर्पणम् सव्याख्यम्—(1726 B.R.D.)

136. **भट्टवैद्यनाथः** (1650–1750 A. D.)

रामचन्द्रतत्सदाख्यपुत्रोऽयं पदवाक्यप्रमाणाभिज्ञः दक्षिणदेशीयस्स्यादिति ज्ञायते । अनेन शास्त्रदीपिकाया व्याख्या प्रभानाम्नी (1767 सं 1745 A. D.) काले रचित इति हालसूच्यां (Page 174 No. XV) दृश्यते। जयपुरपोटीखानापुस्तकसूच्यां तु कल्पतरुमन्दारमञ्जरीलेखनकाल 1604 संवदिति, दृश्यते। तस्मात् (1548 A. D.) अस्य काल इति वक्तव्यं भवति । लन्दननगरस्थपुस्तकालयसूच्यां (1778 सं 1722 A. D.) इति प्रतिलेखकाल दृश्यते। अत्र निर्णयो न कर्तुं शक्यते ।

1. वेदान्तकल्पतरुमन्दारमञ्जरी । परिमलसंग्राहकः कल्पतरुव्याख्यात्मकः ग्रन्थः (2249 IOL VOL. IV) दृश्यते ।

137. **भवदेवमिश्रः** (1600–1650 A. D.)

महामहोपाध्यायबिरुदभूषितः सन्मिश्रभवदेवापरनामायं मिथिलावासिनः कृष्णदेवसन्मिश्रस्य पुत्रः स्वयं पाटनानगरवासी शाहजहाँनामकस्य सम्राजः सामयिकः सठक्कुरभवदेवशिष्य इति ज्ञायते । अनेन (1571 श 1649 A. D.) काले ग्रन्थः कृतः ।

1. ब्रह्मसूत्रव्याख्या चन्द्रिका (2270 IOL)

138. **भवानीशङ्करानन्दः** (1750–1850 A. D.)

रघुनाथयतीन्द्रशिष्योऽयं भवनीशङ्करानन्दस्सप्तदशशतकादारभ्य एकोनविंशतिशतकान्ते काले उवासेति दासगुप्तमहाशयः । अद्वैतसिद्धान्तदीपिका । षड्भिः परिच्छेदैः पूर्णेऽत्र ग्रन्थे प्रथमेषु पञ्चसु प्रकरणेषु नैय्यायिक - वैशेषिक - सेश्वरसांख्य - निरीश्वरसांख्य - जैमिनीय - विशिष्टाद्वैत - द्वैतमतानि खण्डितानि । षष्ठे सिद्धान्तपरिच्छेदे स्वतन्त्रब्रह्माद्वैतवादः परिशीलितः । ग्रन्थोऽयं श्रीमहत्पुरे नक्षत्रशोधनमुद्रणालये मुद्रितः ।

139. **भास्करदीक्षितः** (1650–1750 A.D.)

अभिनवकालिदास इति प्रसिद्धस्य नृसिम्हाश्रमिशिष्यस्य उमामहेश्वराचार्यापराभिधानस्य पलक्किचोरिग्रामाभिजनस्य चोलदेशवासिनः वेङ्कटपतियज्वनः पुत्रोऽयं भास्करदीक्षितः हारीतगोत्रजः चोलदेशीयकोनेरिराजपुरवासी उमामहेश्वरविजयराघवशास्त्रिणोः सिद्धान्तसिद्धाञ्जनकारकृष्णानन्दसरस्वत्याश्च शिष्यः शाहजीराजेन (1681–1711 A.D.) दत्तस्य तिरुविशनल्लूराख्यग्रामस्य भागिष्वन्यतमः सप्तदशशतकापरार्धकालवासीति ज्ञायते । अस्य माता नाच्चमाम्बानाम्नी ।

नृसिम्हाश्रमी
|
विजयराघवशास्त्री — उमामहेश्वरः (वेंकटपतिः) — कृष्णानन्दसरस्वती
|
भास्करदीक्षितः

1. आत्मपरीक्षा (R. 756 MGOML) आत्मतत्त्वपरीक्षापरनामायं ग्रन्थः अह-मर्थविचारं अखण्डार्थविचारं च विशेषतः परिशीलयन् अष्टाध्यायपर्यन्त अमुद्रितः मद्रास - सरस्वतीमहालय - मैसूरपुस्तकालयेषूपलभ्यते ।

2. तप्तमुद्राविद्रावणम् (7520 TSML) । विशिष्टाद्वैतदूषणपरोऽयं ग्रन्थः सर-स्वतीमहालयमैसूरपुस्तकालययोर्लभ्यते ।

3. रत्नतूलिका । भास्करदीक्षितगुरुणा कृष्णानन्दसरस्वत्या कृतस्य सिद्धान्तसिद्धाञ्जनस्य व्याख्यात्मकोऽयं ग्रन्थ अनन्तशयनग्रन्थमालायां (TSS 47) मुद्रितः ।

140. भास्करशर्मा (1800–1900 A.D.)

अनेन ब्रह्मसूत्रभाष्यसंग्रहाख्यः ग्रन्थः कृतः । अमुद्रितोऽयं भाष्यसारभूतः ग्रन्थ उज्जैनपुस्तकसूच्यां दृश्यते ।

141. भास्करानन्दसरस्वती (1810–1900 A.D.)

कान्यकुब्जब्राह्मणोऽयं शाण्डिल्यगोत्रजः गोभिलसूत्री सामवेदी कौथुम-शाखीयः पूर्वाश्रमे हेमकरमिश्रनामा मिश्रीलालमिश्रस्य पुण्यमत्याश्च पुत्रः अनन्तराम-पण्डिताल्लब्धविद्यः दाक्षिणात्यात्पूर्णानन्दस्वामिनः लब्धदीक्षः काशीवासी, मिथिलायां लब्धजन्मा मणिराजचौबे इत्याख्यस्य दौहित्रः एकोनविंशतिशतकीय इति ज्ञायते।

1. सव्याख्यं अनुभूतिविवरणम् 2. ईशावास्यव्याख्या 3. उपनिषत्प्रसादः 4. कठोपनिषद्व्याख्या 5. केनोपनिषद्व्याख्या 6. ऐतरेयव्याख्या 7. माण्डू-क्यव्याख्या 9. गौडपादकारिकाव्याख्या 10. तैत्तरीयव्याख्या 11. स्वाराज्य-सिद्धिव्याख्या, इतीमे सर्वेऽपि ग्रन्थाः भारतीजीवनप्रेस वाराणस्यां मुद्रिताः ।

142. भैरवशर्मा (1750–1850 A.D.)

तिलकोपनामायं भैरवशर्मा दक्षिणदेशजः वेदाक्षिवसुचन्द्रेऽब्दे स्वग्रन्थं कृतवानिति ज्ञायते ।

1. ब्रह्मसूत्रतात्पर्यविवरणम् । शङ्करभाष्यभावनावदिदं सूत्रविवरणं पण्डितनूतन-ग्रन्थमालायां (P. N. Vols. III & IV) मुद्रितम् ।

143. मल्लनाराध्यः (1400–1500 A.D.)


कोटीश्वरवंश्योऽयं विरूपाक्षपुत्रः विरूपाक्षशिष्यश्च मल्लनाराध्यः चतुर्दश-पञ्चदशशतकीयो भवितुमर्हति । अनेन कृत अद्वैतरत्नाख्यः ग्रन्थ आनन्दतीर्थीयं द्वैतसिद्धान्तं खण्डयति । आनन्दतीर्थश्च (1199–1303 A.D.) पर्यन्तमासीदिति वदन्ति । (1500–1600 A.D.) कालीनेन नृसिम्हाश्रमिणा च अद्वैतरत्नस्य (अभेदरत्नस्य) व्याख्या तत्वदीपनाख्या कृता विद्यते । तस्मात् (1400–1500 A.D.) काले मल्लनाराध्य इति निर्णेतुं पार्यते ॥

1. अभेदरत्नम् (R. 5526 D. 4524 MGOML)

अद्वैतरत्नापरनामायं ग्रन्थः द्वैतमतखण्डनपर मुक्तिपरिच्छेदान्तं मद्रासराज-कीयपुस्तकालये लभ्यते । अस्य व्याख्या नृसिम्हाश्रमकृता तत्वदीपनाख्या ॥

144. महादेवसरस्वती (1600–1700 A.D.)

वेदान्ती-महादेवः, महादेवभट्ट इत्यादिनाम्ना प्रसिद्धोऽयं महादेवसरस्वतीति ज्ञायते । गोपालबालयोगीति प्रसिद्धस्य अद्वैतानन्दसरस्वत्याः प्रशिष्यः स्वयम्प्रका-शानन्दसरस्वत्याशिष्यः ऋजुप्रकाशिकाकर्तुरखण्डानन्दस्य सतीर्थ्यश्चायं महादेव-सरस्वती सुदर्शनेन्द्रापरनामा कामकोटिपीठाधीश आसीदिति वेदान्तसंग्रहव्याख्याया प्रकाशिकानाम्न्याः, जगद्गुरुपरम्परास्तोत्राच्च ज्ञायते । अस्य शिष्यावपि महादेवेन्द्रा-त्मबोधेन्द्रनामानौ । दासगुप्तमहाशयस्त्वेनं सप्तदशशतकीयं वर्णयति । श्रीकण्ठ-शास्त्रिणोऽपि षोडशशतकापरार्धकालवर्तिनमेनमङ्गीकुर्वन्ति । अनेन विष्णुसहस्रनाम-व्याख्या 1750 शके (1694 A. D.) काले लिखितेति जम्मूकाश्मीरसूचीपत्राज् ज्ञायते । तस्मादस्य काल (1600–1700 A.D.) भवति ॥ न्यायसूत्राणां मित-भाषिण्याख्या व्याख्यापि अनेन कृता वाराणस्यां दृश्यते ।



1. अद्वैतग्रन्थः । वेङ्कटेश्वरपुस्तकालयसूच्यां दृश्यते ॥

2. अद्वैतप्रकाशः । मैसूरसूच्यां दृश्यते ।

3. अद्वैतभूषणम् । ग्रन्थोऽयं लालाचन्द्रसूच्यां 5953 दृश्यते ।

4. तत्वबोधः । ग्रन्थोऽयं विजयनगरसूच्यां 25 दृश्यते ।

5. तत्वानुसन्धानम् । (CSS. 985, 1083, 1155, 1127)

प्रकरणग्रन्थेऽस्मिन् प्राणायामादिविविधोपायानामपि अद्वैतब्रह्मसाक्षात्कारोपयोगित्ववर्णनपूर्वकं प्राप्तस्य ब्रह्मतत्वज्ञानस्य रक्षणोपायमावेदयन्ती ज्ञानरक्षा पद्धतिरपि वर्णिता । चतुर्भिः परिछेदैः पूर्णोऽयं ग्रन्थः मायां, पञ्चीकरणतत्वं, स्मृतेः प्रामाण्यम्, मुक्तिस्वरूपञ्च विचारयति । मुद्रितोऽयं ग्रन्थः सव्याख्यः कलकत्तासंस्कृतमालायां चौखाम्बासंस्कृतमालायाञ्च । अस्य व्याख्या अद्वैतचिन्ताकौस्तुभाख्या च मुद्रिता ।

6. तत्वानुसन्धानव्याख्या—अद्वैतचिन्ताकौस्तुभः

कुत्रचिदादर्शपुस्तकेषु अद्वैतचिन्तामणिरित्यपि नाम दृश्यते ।

7. परमामृतम् (8260 B. R. d.)

8. बृहदारण्यकभाष्यसारः तात्पर्यटीका । द्वितीयाध्यायचतुर्थब्राह्मणसारात्मकोऽयं ग्रन्थः सरस्वतीमहालये लभ्यते ।

9. विश्वेश्वरानुसन्धानम् । (1996 B. R. d.)

10. वेदान्तसंग्रहव्याख्या—प्रकाशिका । स्वयम्प्रकाशेन कृतस्य वेदान्तसंग्रहस्य व्याख्यात्मकोऽयं ग्रन्थ अमुद्रितस्सरस्वतीमहालये (7622 TSML) लभ्यते ।

11. शारीरकसंक्षेपविवृतिः—प्रकाशिका । ग्रन्थोऽयं (186 DC. Anup.), जयपुरपोटीखानासूच्याञ्च (XXIV 97/2) लभ्यते । हरप्रसादशास्त्रिसूच्यान्तु संक्षेपशारीरककुतूहलमिति नाम दृश्यते । सांख्यवृत्तिसारः, अमरकोशव्याख्या जगद्गुरुपरम्परास्तोत्रम्, विष्णुसहस्रनामव्याख्या च अनेन कृताः ।

145. महीधरः (1550–1650 A.D)

रत्नाकरपौत्रः पूर्णभद्रपुत्रः बालातन्त्रकर्तुः कल्याणभट्टस्य पिता रत्नेश्वरस्य शिष्यश्चायं वाराणसीवासी श्रीवत्सगोत्रजः मन्त्रमहोदधिकारः महीधरः (1598 A.D.) काले योगवासिष्ठसारविवृतिमकरोत् । अयं षोडशशतकीय इति बन्दरकार ओरियण्टलपत्रिकाया एकविंशतितमे भागे (A.B.O.R.I. Vol XXI P. 248) वर्णितम् ।

1. योगवासिष्ठसारविवृतिः । बरोडालन्दनबाम्बेविश्वविद्यालयपुस्तकालयेषु लभ्यते ।

146. महेश्वरतीर्थः (1350–1450 A.D.)

चिदानन्दघनस्य विद्यारण्यस्य च शिष्योऽयं महेश्वरतीर्थस्स्वग्रन्थे आनन्दगिरिं निर्दिशति । विद्यारण्यशिष्योऽयं चतुर्दशशतकीयः ।

1. बृहदारण्यकवार्तिकसारसंग्रहः । विद्यारण्यीयबृहदारण्यकवार्तिकसारव्याख्यात्मकोऽयं लघुसंग्रहाख्यः ग्रन्थः चौखाम्बामुद्रणालये मुद्रितः ।

147. महेश्वरानन्दसरस्वती (1665–1750 A.D. ?)

पुरुषोत्तमानन्दसरस्वतीशिष्योऽयं महेश्वरानन्दसरस्वतीति परं ज्ञायते । यद्ययं पुरुषोत्तमः मधुसूदनसरस्वतीशिष्यस्स्यात्तर्हि सप्तदशशतकापरार्धकालवासीति निर्णेतुं शक्यते ।

1. आत्मानात्मविवेचनम् (R. 1391 A. MGOML)

2. महार्थमञ्जरी (614 TMPL)

3. महार्थमञ्जरीव्याख्या—परिमलः (614 TMPL)

4. सप्तदशप्रकरणम् । मैसूर पुस्तकालये लभ्यते ।

148. माधवतीर्थः (1825–1900 A.D.)

चन्द्रिकाचार्यशिष्योऽयं माधवतीर्थशिवानन्देन्द्रसतीर्थ्यस्तिरुविशनल्लूर रामसुब्रह्मण्यशास्त्रिसामयिकः दक्षिणदेशीय एकोनविंशतिशतकीय इति निश्चयः ।

1. चन्द्रिकासारबोधः। अद्वैतसिद्धान्तगुरुचन्द्रिकाग्रन्थस्य सारभूतोऽयं पद्यात्मकः ग्रन्थः सव्याख्यः ओरियण्टल्मुद्रणालये मद्रासनगरे मुद्रितः। अस्य व्याख्या शिवानन्दकृता स्वात्मादर्शाख्या।

149. माधवसरस्वती (1475–1575 A. D.)

चण्डिकानदीतीरवासिनः गोकर्णक्षेत्रवासिनश्च विद्येन्द्रवनाख्यस्य यतिवर्यस्य शिष्यः सोदाक्षेत्रीयकपिलाश्रमवासी माधवसरस्वत्ययं अरसेन्द्रभूपसामयिकः कपिलाश्रमे वसन् स्वदेहावसानं सन्निकृष्टं ज्ञात्वा पम्पाक्षेत्रमगमत्। तुङ्गभद्रानदीतीर एवास्य भौतिकशरीरत्यागश्चाभूदिति ज्ञायते। अस्य जीवनकालः (1523 A. D.) इति (2007 DC BUL) अमुद्रितात् सर्वदर्शनाख्यादर्शग्रन्थाज् ज्ञायते।

1. वेदान्तसारसर्वस्वम्। प्रकरणग्रन्थोऽयं (R. 3085 MGOML) अनन्तशयनपुस्तकालये च लभ्यते।

2. सर्वदर्शनकौमुदी। मुद्रितश्चायं (T. S. S. 135)

3. वासिष्ठव्याख्या–वासिष्ठपञ्चिका 4. चिन्तामणिटीका मयूखमाला, 5. सप्तपदार्थीटीका–मितभाषिणी 6. कुसुमाञ्जलिपद्यटीका–मन्दानुकम्पिनी, 7. अभिनवसप्तपदार्थी चास्य ग्रन्थाः। 8 प्रक्रियाकौमुदीव्याख्या प्राक्रियासुधा (DC. AL. Vol. VI No. 157.) अपि अनेन कृता।

150. माधवसरस्वती (1550–1650 A. D.)

विश्वेश्वरसरस्वतीशिष्योऽयं माधवसरस्वती स्वग्रन्थं न्यायचूडामणिं (1578 A. D.) काले चकारेति ज्ञायते। किमयं माधवसरस्वती मधुसूदनसरस्वतीगुरुरुतान्य इति निर्णये प्रबलप्रमाणं नोपलभ्यते।

1. न्यायचूडामणिः (64 DC. Anup) सूच्यां दृश्यते। अस्य व्याख्या वेदान्तमन्दाकिनीनाम्नी नारायणसरस्वतीकृता च विद्यते।

151. माधवाश्रमः (1750–1850 A. D.)

नारायणाश्रमशिष्योऽयं माधवाश्रमः रामाश्रमापरनाम्नः परमेष्ठिगुरुरिति-ख्यातस्य वेदान्तभूषणकारस्य प्रशिष्यः वाराणसीवासीति ज्ञायते।

1. स्वानुभवादर्शः। प्रकरणग्रन्थोऽयं 215 संख्यापरिमितैः प्रसादगाम्भीर्यादिगुणयुक्तैः मुमुक्षुजनमनोहरैः ललितशब्दगुम्फितैः पद्यैः ज्ञानयोगेनैव परं निर्वाणकैवल्यस्वरूपं निजब्रह्मानन्दाद्द्वितीयं परं ब्रह्म ज्ञातुमर्हतीति विवेचयन् सव्याख्यस्संस्कृतकलाशालाग्रन्थमालायां (CSS 171 & 256) मुद्रितः। अस्य व्याख्या अर्थप्रकाशिका नाम्नी मूलकृत्कृता।

152. मुकुन्दमुनिः (1550–1650 A. D.)

हरिनाथप्रशिष्यः रामनाथशिष्यः ब्रह्मामृतवर्षिणीकर्तुः रामकिङ्करधर्मस्य गुरुः महाराष्ट्रदेशीयः मुकुन्दानन्द-मुक्तिनाथ-मुकुन्दराजापरनामायं मुकुन्दमुनिस्सुज्ञानविंशतिकाराद्भिन्नस्ससदशशतकीय इति निर्णीयते।

1. अष्टावक्रगीता। (C. C. P. B.)

2. तत्त्वबोधः। विवेकसिन्धुः परमार्थबोधः इति नामान्तराण्यस्य। ग्रन्थोऽयं (10 E 35 AL, 12429 B. R. d.) सरस्वतीमहालये नासिकपुस्तकालये च लभ्यते॥ परमामृतप्रकरणं, ब्रह्मावबोधः (2401 ; IOL) च अनेन कृतौ ग्रन्थौ।

153. मोहनलालः (1850–1910 A. D.)

हीराधरपुत्रोऽयं मोहनलालः वाराणसीवासी प्रसिद्धस्य राममिश्रशास्त्रिणः मुकुन्ददासस्य च शिष्यः सिक्खधर्मप्रचारकस्य गुरुनानकस्य वंशजोऽपि शाङ्करेऽद्वैते बद्धादर इत्यत्र वेदान्तसिद्धान्तादर्श इति ग्रन्थकरणमेव प्रमाणम्। सांख्ये योगे वेदान्ते च पण्डितोऽयं (1887 A.D.) काले आसीदिति ज्ञायते।

1. वेदान्तसिद्धान्तादर्शः। वेदान्तादर्शः बालबोधग्रन्थ इत्यपरनामायं ग्रन्थश्शाङ्करे वेदान्तशास्त्रे प्रविविक्षुः मध्यममन्दाधिकारिणोस्सुलभप्रवेशाय आदर्शसमेषु संज्ञा-उत्पत्ति-प्रलय-यौक्तिकमतभेद-संज्ञकेषु चतुर्षु परिच्छेदेषु अद्वैतसिद्धान्तम् वर्णयति। ग्रन्थेऽस्मिन् अम्बिकादत्तगौडकृतः दुःखद्रुमकुठारः निर्दिष्टः॥ ग्रन्थोऽयं वाराणसी ग्रन्थमालायां मुद्रितः॥

154. यज्ञेश्वरदीक्षितः (1600–1700 A. D)

काश्यपगोत्रजोऽयं यज्ञेश्वरदीक्षितः बह्वृचशाखाध्यायी चक्रेश्वरविंश्यः यज्ञेश्वरपौत्रः, कोण्डुभट्टोपाध्यायगङ्गाम्बिकयोः पुत्रः तिरुमलैदीक्षितकनीयान् भ्राता

यज्ञेश्वरकृष्णाश्रमयोः शिष्य इति मदसीयग्रन्थपरिशीलनात् ज्ञायते। पञ्चपादिकाविवरणोज्जीविन्यां "नृसिम्हाश्रमयोगीन्द्रग्रन्थशाणनिकषात" इति दर्शनात् नृसिम्हाश्रमादर्वाचीन इति निश्चयः। न केवलं अद्वैते परं पूर्वमीमांसायामपि प्रभामण्डलनाम्नी शास्त्रदीपिकाव्याख्या कृता। दक्षिणदेशीयः चोलदेशीयशाहेन्द्रकालिकश्च ॥

1. पञ्चपादिकाविवरणोज्जीविनी। (R. 592 MGOML)

2. ईश्वरगीताभाष्यम् (8997 TSML)

शास्त्रदीपिकाव्याख्या "प्रभामण्डलम्," अलङ्कारराघवः, अलङ्कारसूर्योदयः काव्यप्रकाशव्याख्या, चित्रबन्धरामायणव्याख्या च अनेन कृताः ॥

155. योगीश्वरः (1700–1900 A. D.)

अनेन स्वात्मयोगप्रदीपाख्यः ग्रन्थः कृतः। अस्य व्याख्या अमरानन्दकृता। ग्रन्थोऽयं दासगुप्तेन (HIP Vol. II Page 57) निर्दिष्टः। परन्तु मद्रासराजकीयपुस्तकालये सव्याख्यस्वात्मयोगप्रदीप अमरानन्दकृत इति त्रयोदशशतकीय इति च दृश्यते।

156. रघुनाथशिरोमणिः (1477–1547 A. D.)

रघुनाथशिरोमणिरयं बङ्गदेशीयः नाडियावासी न्याये वेदान्ते नितरां निष्णातोऽपि, विशेषतः नैय्यायिकोऽपि

"ओं नमस्सर्वभूतानि विष्टभ्य परितिष्ठति।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥"

इति स्वग्रन्थेषु वदन्नयं अद्वैतब्रह्मणि विशेषमभिनिवेशं दर्शयतीति अद्वैतिकोटिमारोहति। विद्वन्मण्डले तार्किकशिरोमणिरिति बिरुदभूषितोऽयं रघुनाथकवेरिति दर्शनात्कविरपीति ज्ञायते। स्वीये चतुर्थे एव वयसि प्राप्तपितृवियोगोऽयं असहायया बन्धुजनवियुक्तया आतङ्कितया दारिद्र्यदुःखोपहतया मात्रा परिश्रमानविगणय्य पालितः पोषितश्च। एकदा मात्रा परिश्रमानविगणय्य स्वपुत्रपालने बद्धपरिकरया स्वपुत्रः अङ्गाराहरणाय गृहान्तरं प्रेषितः। रिक्तहस्तोऽयं अङ्गारग्रहणसमये तापपीडानिवारणाय स्वहस्तयोस्सिकताः गृहीत्वा तासु अङ्गाराणि जग्राह। तादृशं बुद्धिकौशलं

सन्दृश्य सन्तुष्टमनाः वासुदेवसार्वभौमाख्यनैय्यायिकाग्रणीः रघुनाथं सर्वाणि शास्त्राणि अध्यापयामास। गुरूपदिष्टानर्थान् न्यग्रोधवृक्षाध उपविश्य प्रतिरात्रं मननशीलोऽयं रघुनाथ अतितरां तुष्टेन स्वगुरुणा "शिरोमणि" रिति बिरुदेन भूषित इति साम्प्रदायिकी कथा।

अक्ष्णा काणोऽयं पक्षधरमिश्रसामयिक इति च श्रूयते। अतएव 'अभाग्यं गौडदेशस्य यत्र काणश्शिरोमणिः' इति कथनमपि श्रूयते। रघुनाथोऽयं मिथिलां गत्वा पक्षधरमिश्र इत्यपरनाम्नः जयदेवपण्डितस्य सकाशे न्यायविद्यायां महतीं नैपुणीमाससाद। कक्ष्यायां रघुनाथप्रश्नैः पराजितोऽयं पक्षधरमिश्रः रघुनाथाय चुकोप। गुरुकृतपरिभवासहिष्णुरयं रघुनाथः रात्रौ स्वगुरुं पक्षधरं जिघांसुः खड्गहस्तः गुरोश्शयनागारं प्रविवेश। तत्र गतोऽयं रघुनाथश्लाघाप्रधानं स्वपत्न्या साकं पक्षधरकृतं वार्तालापं श्रुत्वा सञ्जातलज्जः गुरवे क्षमामयाचत इति कथा च श्रूयते।

परन्तु पक्षधरकालः (1276 A. D.) इति सिद्धान्तः। एवञ्च रघुनाथस्य तत्सामयिकत्वे ऋते एतस्याः कथाया नान्यत्प्रबलप्रमाणमिति कथेयं पण्डितमण्डलीप्रसिद्धा किरातार्जुनीयकारभारवेः कथां मनसि कृत्वा केनापि प्रसिद्धिं यापितेति निर्णीयते ॥

1. खण्डनभूषामणिः।

खण्डनखण्डखाद्यव्याख्यात्मकोऽयं खण्डनदीधित्यपरनामा ग्रन्थ अंशतः चौखाम्बामुद्रणालये मुद्रितः। अमुद्रितस्तु (R. 4344 MGOML) लभ्यते ॥

157. रघुनाथसूरिः (1850 A. D.)

वासिष्ठगोत्रोत्पन्नः बह्वृचशाखाध्यायी आश्वलायनसूत्री रामचन्द्रसूरिपुत्रः रामशास्त्रिपिता महाराष्ट्रान्तर्गतवरहट्टदेशीयः राघवाचार्यशिष्यश्चेति ज्ञायते। अस्य पुत्र रामशास्त्री भोरराजधान्यां राजाश्रितः नीतिवक्ता राजकीयवकीलासीत्। ग्रन्थकारोऽयं रघुनाथसूरिः पुण्यपत्तने राजकीयांग्लाधिकारिप्रार्थनावशात् न्यायाधीशपदमलञ्चकार। स्वस्यापरे वयसि नीरातीरसमीपस्थभोरमण्डलान्तर्गतराज्याधीश्वरान् पण्डितनानाशाहेपन्तसचिवान् समाश्रित आसीत्। तदैव अद्वैतरत्नरक्षणकरण्डकोऽयं शङ्करपादभूषणग्रन्थः रचितः मुद्रितश्च।

1. शङ्करपादभूषणम् । ब्रह्मसूत्राणां प्रथमाध्यायप्रथमपादः द्वितीयाध्यायाद्यपादश्च व्याख्यातः । द्वैतमतखण्डनपरोऽयं ग्रन्थः शिवविष्णवभेदप्रतिपादकः नव्यतर्कशैलीबद्धश्च आनन्दाश्रमे (ASS 101) मुद्रितः ॥ भगवद्गीताव्याख्या शङ्करपदभूषणाख्या कृतेति भूमिकायाः ज्ञायते ॥

158. रघूत्तमसरस्वती (1684 A. D.)

अस्य गुरुस्स्वयम्प्रकाशः । प्राचार्यः ब्रह्मानन्दः । परात्परगुरुःपुरुषोत्तमानन्द इति परं ज्ञायते । अनेन स्वग्रन्थः (1605 श 1740 सं = 1684 A. D.) काले कृत इति जयपुरसूच्यां दृश्यते ॥

1. अद्वैतानन्दसागरः । सर्वविद्यासंग्रहापरनामायं ग्रन्थः जयपुरपोटीखानाराजपुस्तकालये तत्सूच्याञ्च (II 222) दृश्यते ॥

159. रत्नखेटश्रीनिवासः (1550–1650 A D.)

भाष्यकारभवस्वामिभट्टवंशजोऽयं विश्वामित्रगोत्रजः कृष्णभट्टपौत्रः लक्ष्मीवल्लभपुत्रः राजचूडामणिदीक्षितपिता कामाक्षीपतिश्चायं रत्नखेटश्रीनिवासदीक्षितः चोलमण्डलाधिराजस्य शूरप्पनायकस्य सामयिकः काञ्चीमण्डलान्तर्गतशूरसमुद्रग्रामाभिजनः प्रसिद्धाप्पय्यदीक्षितानां सामयिकश्चेति निश्चीयते ।

1. अद्वैतकौस्तुभम् । ग्रन्थोऽयं राजचूडामणिदीक्षितकृतरुक्मिणीकल्याणस्य बालयज्ञवेदेश्वरकृतायां व्याख्यायां निर्दिष्टः ।

2. वादावलिः । वेदान्तवादावल्यपरनामायं ग्रन्थः षड्विंशतिभिरध्यायैः पूर्णः विशिष्टाद्वैत-द्वैतवादान् खण्डयति । अपूर्ण अमुद्रितश्च ग्रन्थः मद्रास (R. 3855 MGOML) सरस्वतीमहालये च लभ्यते । ग्रन्थेऽस्मिन् "जन्माद्यस्ययत" इति सूत्रविवेचनावसरे "इत्यस्मद्गुरुचरणकेशवपुरीचरणादय" इत्युक्तम् । एवञ्चास्य गुरुः केशवपुरीतिनाम्ना प्रसिद्धस्स्यादित्यूह्यते ।

3. भावनापुरुषोत्तमनाटकम् (T. S. M. L. 4427)

150. राघवानन्दः (1685 A. D.)


"विवेकनिकषोपले वहति राघवे कौलमू" मिति कृष्णपद्यां दर्शनात् राघवानन्दोऽयं स्वयम्प्रकाशानन्दप्रशिष्यः कृष्णानन्दरामभद्रानन्दयोश्शिष्यः केरल-

देशाधिपराघवाख्यनृपसामयिकस्स्वयं केरलवासीति ज्ञायते । अनेन लघुस्तुतिव्याख्या 861 केरलवर्षेषु प्रणीतेति ज्ञायते । एवञ्चास्य काल (1685 A.D.) इति ज्ञायते ।

1. परमार्थसारव्याख्या विवरणम् (T. S. S. 12)
2. लघुस्तुतिव्याख्या (T. S. S. 60)
3. कृष्णपदी (भागवतव्याख्या) (R. 5205 MGOML)
4. त्रिपुराविंशतिव्याख्या (R. 2827 MGOML)
5. भगवद्गीताव्याख्या (तत्त्वार्थचन्द्रिका) (284 T. C. D.)
6. तात्पर्यदीपिका । मुकुन्दमालाया व्याख्यानभूतोऽयं ग्रन्थः अण्णामलैविश्वविद्यालये मुद्रितः ।

161. राजचूडामणिदीक्षितः (1530–1650 A. D.)

सत्यमङ्गलापराभिधशूरसमुद्रग्रामाभिजनस्य रत्नखेटश्रीनिवासदीक्षितस्य कामाक्ष्याश्च पुत्रः लक्ष्मीवल्लभपौत्रः कृष्णभट्टनप्ता विश्वामित्रगोत्रजः भाष्यकारभट्टवंशजः, राजचूडामणिदीक्षितः नागनाम्नागोविन्ददीक्षितयोः पुत्रस्य वेङ्कटेश्वरदीक्षितस्य अर्धनारीश्वरदीक्षितस्य च शिष्यश्चोलदेशवासीति ज्ञायते ।



1. शास्त्रारम्भः । ब्रह्मविचाराय शास्त्रारम्भसमर्थनपरोऽयं ग्रन्थः वेङ्कटेश्वरपुस्तकालये 507 लभ्यते ।

ऐतरेयोपनिषदां व्याख्या, तन्त्रशिखामणिः, शास्त्रदीपिकाव्याख्या कर्पूरवर्तिका च कृताः ।

162. रामकिङ्करः (1600–1700 A.D.)

हरिनाथरामनाथयोः प्रशिष्यः मुकुन्दगोविन्दशिष्यश्चायं रामकिङ्करः षोडश-सप्तदशशतकीय इति ज्ञायते ।

1. ब्रह्मामृतवर्षिणी । सूत्रवृत्तिरूपोऽयं ग्रन्थस्तेलुगुलिप्यां मुद्रितः । अस्य कर्ता धर्मभट्ट इति, रामानन्दसरस्वतीति, स्वयम्प्रकाशानन्दशिष्यसदाशिव इति बहुधा दृश्यते । परन्तु आनन्दाश्रममुद्रिते, अमुद्रिते बरोडास्थादर्शपुस्तके च रामकिङ्कर इत्येव दृश्यते ।

163. रामकृष्णः (1380–1480 A.D.)

विद्यातीर्थप्रशिष्यः भारतीतीर्थविद्यारण्यशिष्योऽयं रामकृष्णः मध्वमतचपेटिकाकर्तृ रामकृष्णाद्भिन्नश्चतुर्दशशतकीय इति निश्चीयते ।

1. अद्वैतविवेकव्याख्या । नायं ग्रन्थः पञ्चदश्यन्तर्गतः । पञ्चदश्यां तादृशप्रकरणस्यादर्शनात् । परन्तु अन्योऽयं व्याख्यात्मकग्रन्थ अमुद्रितः वेङ्कटेश्वरपुस्तकालये लभ्यते ।

2. पञ्चदशीव्याख्या । तात्पर्यबोधिनी-पददीपिकापरनामायं ग्रन्थः निर्णयसागर-मुद्रणालये वेङ्कटेश्वरमुद्रणालये मैसूरमुद्रणालये च मुद्रितः ।

3. महावाक्यविवेकव्याख्या । ग्रन्थोऽयं पञ्चदश्यन्तर्गतमहावाक्यविवेकव्याख्यात्मक एव । अमुद्रितोऽयं सरस्वतीमहालये (7568 T. S. M. L.) लभ्यते । केचित्तु शाङ्करमहावाक्यविवेकव्याख्यात्मक इति वदन्ति ।

164. रामकृष्णदीक्षितः (1625–1700 A.D.)

वेङ्कटनाथपौत्रः धर्मराजाध्वरिपुत्रः त्रिवेदीनारायणदीक्षितस्य भ्रातुष्पुत्रः कौण्डिन्यगोत्रजः ऋग्वेदान्यायी चोलदेशीयकण्डरमाणिक्यग्रामवासी धर्मराजाध्वरि-शिष्यश्चायं रामकृष्णदीक्षितः सप्तदशशतकीय इति निर्णयः ।

1. वेदान्तपरिभाषाव्याख्या शिखामणिः । ग्रन्थोऽयं वेङ्कटेश्वरमुद्रणालये मुद्रितः ।

2. विशिष्टाद्वैतभञ्जनम् । (R. 3236 B. MGOML) ग्रन्थोऽयं वेङ्कटेश्वरपुस्तकालये च लभ्यते ।

3. वेदान्तसारव्याख्या । ग्रन्थोऽयं दासगुप्तेन (H. I. P. Vol II 54) निर्दिष्टः । न्यायशिखामणिः (6228 TSML) मीमांसान्यायदर्पणश्चानेन कृतमिति ज्ञायते ।

165. रामचन्द्रानन्दसरस्वती (1650–1750 A.D.)

नारायणानन्दसरस्वतीप्रशिष्यः गुरुचन्द्रिकाकर्तुः गौडब्रह्मानन्दसरस्वत्याः शिष्यः बालकृष्णानन्दसतीर्थ्यश्चायं रामचन्द्रानन्दसरस्वती सप्तदशशतकापरार्ध-कालवासीति ज्ञायते ।

अनेन स्वाचार्यपरम्परा ग्रन्थ एव निर्दिष्टा "पूर्णानन्द - पुरुषोत्तमानन्द - शिवरामानन्द - गोपालनन्द - स्वयम्प्रकाशानन्द - नारायणानन्द - ब्रह्मानन्द - रामचन्द्रानन्द" इति ।

1. ब्रह्मबोधिनी (54 A. 40. AL.) सदानन्दकृतवेदान्तसारव्याख्यात्मकोऽयं ग्रन्थ अडयारपुस्तकालये लभ्यते ।

2. भगवद्गीताव्याख्या–"तत्वदीपिका" (D. 2068, R. 1921 MGOML) पदयोजनापरनामायं ग्रन्थः बरोडा-मद्रास-वेङ्कटेश्वर पुस्तकालयेषु लभ्यते । ग्रन्थोऽयं शाङ्करभाष्य - पैशाचभाष्य - श्रीधरीयव्याख्यासारभूतः । अनेन रामायणस्यापि व्याख्या कृतेति ग्रन्थादस्मात् ज्ञायते ।

166. रामचन्द्रेन्द्रसरस्वती (1765–1850 A.D.)

वासुदेवेन्द्रप्रशिष्यः वासुदेवेन्द्रशिष्यः उपनिषद्ब्रह्मापरनामकरामचन्द्रसरस्वती-सतीर्थ्यश्चायं रामचन्द्रेन्द्रसरस्वती काञ्चीपुरगतउपनिषद्ब्रह्मेन्द्रमठाधिष्ठाता अष्टादश-शतकपाराधादारब्धे काले आसीदिति निर्णीयते ।

1. कर्माकर्मविवेकः । (30. G. 13. AL) आनुष्टुभैः पद्यैर्निर्मितोऽयं प्रकरण-ग्रन्थः कर्माकर्मणोर्विवेकं समष्टिव्यष्टिभेदेन मूलाविद्यातूलाविद्याभेदेन विद्याविद्याभेदञ्च निरूपयति । अडयारपुस्तकालये लभ्यते ।

2. तत्त्वम्पदार्थलक्ष्यैकशतकम् । (34. D. 16. AL) पद्यात्मकोऽयं छान्दोग्योप-निषद्गततत्त्वमसिमहावाक्यार्थं निरूपयति ।

3. तरङ्गः सव्याख्यः । ग्रन्थोऽयं अनन्तशयने लभ्यते ।

4. त्रिपात्तत्वविवेकः । (R. 4202 A. MGOML)

5. ब्रह्मतारषोडशसमाधिः । (34. D. 16. AL)

6. ब्रह्मप्रणवदीपिका । (34. D. 16. AL. D. 4646. MGOML) माण्डूक्योपनिषद्दिशा ओङ्कारोपासनां प्रदर्शयन्नयं समाधिनिष्ठस्य वरिष्ठत्वं प्रतिपादयति । बरोडापुस्तकालयेऽपि वर्तते ।

7. भेदतमोमार्ताण्डशतकम् । (34. D. 16. AL) ग्रन्थोऽयं जीवब्रह्मभेदखण्डनपरः दृश्यस्य द्रष्टा चाभेदं प्रतिपादयति ।

8. महावाक्यरत्नावलिः ।

विंशतिभिः प्रकरणैः पूर्णोऽयं ग्रन्थः अष्टोत्तरशतोपनिषद्भ्यः अष्टोत्तरसहस्रमहावाक्यानि प्रतिपादयति । ग्रन्थोऽयं वाराणसीमुद्रणालये मुद्रितः । अस्य व्याख्या मूलकृत्कृता 'प्रभाख्यापि । व्याख्याया अपि व्याख्या भासकलोचनाख्या वर्तते ।

9. महावाक्यरत्नावलीव्याख्या—'प्रभा' (34. G. 14. AL) अडयार - पञ्जाब शृङ्गगिरि - मैसूरसूचिषु दृश्यते । अस्य व्याख्या उपनिषद्ब्रह्मकृता "भासकलोचनाख्या"

10. विदेहमुक्तिप्रकरणम् । (34. D. 16. AL) जीवन्मुक्तिविदेहमुक्तिभेदप्रदर्शनपरग्रन्थ अमुद्रितः ।

11. श्लोकत्रयम् । (D. 4769. MGOML) त्रिभिः पद्यैरद्वैतसारं प्रदर्शयन्नयं "विश्वंब्रह्मैवनेतरदिति" प्रतिपादयति । अमुद्रितोऽयं अडयारपुस्तकालयेऽपि लभ्यते ।

153. रामतीर्थः (1520–1620 A. D.)

कृष्णतीर्थशिष्यः सिद्धान्ततत्वकारस्य अनन्तदेवप्रथमस्य संक्षेपशारीरकव्याख्यासुबोधिनीकारस्य पुरुषोत्तममिश्रस्य च गुरुः नृसिम्हाश्रमिसामयिकोऽयं रामतीर्थ इति निश्चीयते । अनेन "जगन्नाथाश्रमाद्या ये गुरवो मे कृपालव" इति पञ्चीकरणविवरणव्याख्यायां तत्वचन्द्रिकायां निर्देशात् जगन्नाथाश्रमोऽस्य गुरुरिति ज्ञायते । अनेन संक्षेपशारीरकव्याख्याता विश्ववेदः स्वकृतसंक्षेपशारीरकव्याख्याने निर्दिष्टः । अनेन मानसोल्लासव्याख्या 1630 सं 1574 A.D. काले

कृत इति (1120 RAS Bombay) रायलासियाटिक सोसाइटिस्थात आदर्शपुस्तकात् ज्ञायते ।

1. उपदेशसाहस्रीव्याख्या—पदयोजनिका । (G.O.S. 21)

शाङ्करोपदेशसाहस्रीव्याख्यात्मकोऽयं ग्रन्थः निर्णयसागरमुद्रणालये बरोडाग्रन्थमालायां मैसूर पुस्तकालयमालायाञ्च मुद्रितः ।

2. नैष्कर्म्यसिद्धिसारार्थः । ग्रन्थोऽयं दासगुप्तमहाशयेन (HIP Vol. II) निर्दिष्टः ।

3. पञ्चपादिकाविवरणव्याख्या । दासगुप्तेन (HIP Vol. II 52) निर्दिष्टः ।

4. पञ्चीकरणविवरणव्याख्या । (10 E 34 AL)

आनन्दगिरिकृतपञ्चीकरणविवरणस्य व्याख्यात्मकोऽयं ग्रन्थ अमुद्रितः अडयारपुस्तकालये बरोडापुस्तकालये नासिकपुस्तकालये च लभ्यते । तत्वचन्द्रिका इति ग्रन्थस्य नाम ।

5. मानसोल्लासवृत्तान्तविलासः (R. 4261 c. MGOML)

सुरेश्वरकृतमानसोल्लासाख्यदक्षिणामूर्त्यष्टकव्याख्यायाः व्याख्यात्मकोऽयं ग्रन्थः अमुद्रितः मद्रास-बाम्बे-लन्दन पुस्तकालयेषु लभ्यते । विश्वरूपसुरेश्वरैक्यमत्रोपवर्णितम् ॥ जयपुरसूच्यामपि लभ्यते ॥ मैसूर नगरे मुद्रितश्च (B.S. No. 6)

6. मैत्रीयीउपनिषद्व्याख्या

7. वाक्यार्थदर्पणम् (8940 B.R.D.)

8. वेदान्तसारव्याख्या—विद्वन्मनोरञ्जिनी सदानन्दीयवेदान्तसारव्याख्यात्मकोऽय निर्णयसागरे मुद्रितः ।

9. शारीरकरहस्यार्थप्रकाशिका । अध्यायचतुष्टयवानयं सूत्रवृत्तिरूपः ग्रन्थः रायलासियाटिकसोसाइटि बाम्बे पुस्तकालये कलकत्तासंस्कृतकलाशालापुस्तकालये बन्दरकारानुसन्धानालये च लभ्यते ॥

10. संक्षेपशारीरकव्याख्या—अन्वयार्थप्रकाशिका (B.S.S)

11. चिदानन्दलहरीटीका वेदान्तसारव्याख्यायां उल्लिखिता (P. No. 98 Nirnayasagar Edn.) वस्तुतत्वप्रकाशोप्यनेन कृत इति ज्ञायते ॥

168. **रामधनः** (1753 A. D.)

अनेन ब्रह्मसूत्राणां संक्षिप्ता वृत्तिः कृता । रचनाकालः (1753 A. D.) ग्रन्थोऽयं पञ्जाबसूच्यां 718 दृश्यते ।

169. **रामनाथविद्वान्** (1650–1750 A. D.)

शिवानन्दयतिशिष्योऽयं रामनाथविद्वान् स्वगुरुणा शिवानन्देन कृतस्य आनन्ददीपस्य व्याख्याञ्चकार । दासगुप्तस्त्वेनं सप्तदश–एकोनविंशतिशतकयोरन्तरालवर्तिनमङ्गीकरोति । (H. I. P. II 57.)

1. आनन्ददीपिकाव्याख्या–विशुद्धदृष्टिः । (D. 4564 MGOML)

170. **रामब्रह्मेन्द्रयोगी** (1800–1900 A. D.)

वासुदेवेन्द्रप्रशिष्यः कृष्णानन्द - रामब्रह्मेन्द्र - उपनिषद्ब्रह्मेन्द्रसामयिकस्य सतीर्थ्यस्य च रामचन्द्रेन्द्रस्य शिष्यश्चन्द्रिकाचार्यसामयिकोऽयं रामब्रह्मेन्द्रः अष्टादश-एकोनविंशतिशतकमध्यवर्तीति निश्चीयते ।

1. स्वरूपदर्शनसिद्धाञ्जनम् (34 D. 16 AL.)

विदेहमुक्तिजीवन्मुक्तिविवेकं निर्विकल्पकसमाधिविवेकं प्रतिपादयन्नयं ग्रन्थः श्रवणमनननिदिध्यासनानां ज्ञानसाधनतां दर्शयति । अडयारपुस्तकालये लभ्यते च ।

171. **रामब्रह्मेन्द्रसरस्वती** (1800–1900 A. D.)

वासुदेवेन्द्रशिष्यः कृष्णानन्द - उपनिषद्ब्रह्मेन्द्र रामचन्द्रेन्द्राणां सतीर्थ्यः चन्द्रिकाचार्यगुरुश्चायं अष्टादशैकोनविंशतिशतकीयः रामब्रह्मेन्द्राद्भिन्न इति ज्ञायते ।

1. सूत्रभाष्य सारसंग्रहः (27 D. 27 AL.)

172. **रामभद्रदीक्षितः** (1600–1700 A. D.)

कौण्डिन्यगोत्रजः शाहेन्द्रभूपसभापण्डितः चोक्कनाथमखिजामाता शिष्यश्च, यज्ञरामदीक्षितपुत्रः नीलकण्ठदीक्षितशिष्यश्चायं रामभद्रदीक्षितः तिरुविशनल्लूर ग्रामवासीति ज्ञायते ।

1. अद्वैतसंग्रहः । (7631 TSML)

षड्दर्शिनीसिद्धान्तसंग्रहान्तर्गतोऽयं ग्रन्थः रामभद्रविद्वत्कृत इति अडयार-पुस्तकालयस्थात् (19. M. 50 प्र 25 AL) ग्रन्थाज्ज्ञायते । जानकीपरिणयपतञ्जलिचरित - उणादिमणिदीपिका - शब्दभेदनिरूपण - शृङ्गारतिलक - परिभाषावृत्ति-व्याख्यादीनामयं कर्ता ।

173. **रामवर्मा** (1896–1915 A. D.)

केरलदेशान्तर्गतगोश्रीमहाराजोऽयं शेषस्य पुत्र इति ज्ञायते । अस्य राज्यशासनकालः (1896-1915 A. D.)

1. वेदान्तपरिभाषासंग्रहः । ग्रन्थोऽयं कोचिनसंस्कृतमालायां (COSS I.) मुद्रितः ।

174 **रामशास्त्री** (1875–1930 A. D.)

दक्षिणदेशजः हरिकेशवपुरग्रामवासी शालिवाटीनगराभिजनः (तिरुनेलवेली) रामशास्त्र्ययमिति ज्ञायते ।

1. कप्यासकौमुदी । छान्दोग्यगतकप्यासशब्दस्य विशिष्टाद्वैतिभिरुपवर्णितमर्थं सन्दूष्य शाङ्करभाष्यार्थोऽत्र वैय्याकरणपद्धत्या व्यवस्थाप्यते भास्करमुद्रणालयेऽनन्तशयने मुद्रितश्च ।

175. **रामसुब्रह्मण्यशास्त्री** (1850–1920 A. D.)

अश्वत्थनारायणशास्त्रिपौत्रः रामशङ्करशास्त्रिपुत्रः चोलदेशान्तर्गतशाहजग्रामवासी श्रीवत्सगोत्रोत्पन्नः शिवरामशास्त्रिशिष्यः चन्द्रिकाचार्यभिक्षुसामयिकोऽयं रामसुब्रह्मण्य शास्त्री महामहोपाध्यायबिरुदभूषितः एकोनविंशतिशतकान्तरालवर्तीति ज्ञायते ।

1. अनुभाष्यगाम्भीर्यनिर्णयः । भगवत्पादभाष्यसारभूतोऽयं शाङ्करभाष्योपरि कथितानां दूषणानां खण्डनपरः । आनन्दाश्रममुद्रणालये मद्रासनगरे मुद्रितः ।

2. न्यायभास्करखण्डनम् । ग्रन्थोऽयं अद्वैतसिद्धिव्याख्यालघुचन्द्रिकायाः खण्डनपरस्य अनन्तार्यविरचितस्य न्यायभास्करस्य खण्डनपरः मुद्रितश्च चौखाम्बा-मुद्रणालये ।

3. न्यायरक्षामणिभाष्योक्तिविरोधग्रन्थः । ग्रन्थेऽस्मिन् अप्पय्यदीक्षितकृत-न्यायरक्षामणौ ब्रह्मजिज्ञासासूत्रार्थकथनप्रकरणे प्रतिपादितस्य "ब्रह्म प्रत्यगभिन्नं निर्विशेषं" इति वाक्यार्थश्शाङ्करभाष्यविरुद्ध इति प्रतिपादितम् । विनायक-मुद्रणालये चिदम्बरनगरे मुद्रितोऽयं ग्रन्थः ।

4. न्यायेन्दुशेखरदोषयोगघटनग्रन्थः । ग्रन्थोऽयं विनायकमुद्रणालये चिदम्बर-नगरे मुद्रितः । ग्रन्थेऽस्मिन् बिन्दुनाम्नी अप्पय्यदीक्षितकृतस्य परिमलस्य काचन टीका निर्दिष्टा । आभोगकारः लक्ष्मीनृसिम्हवाजपेयी कोट्टयूर्ग्रामवासीति च ज्ञायते ।

5. मध्वचन्द्रिकाखण्डनम् । व्यासरायकृतद्वैतपरमध्वचन्द्रिकायाः खण्डनपरोऽयं ग्रन्थः चौखाम्बायां मुद्रितः ।

अथर्वशिखारहस्यम्, अद्वैतपद्यभाष्यम्, अद्वैतसिद्धान्तमण्डनम्, अद्वैता-धिकरणस्रग्धरा, अनुपनीतसन्यासभङ्गः, आनन्तर्यवादः, ईशोपनिषद्विलासः, ऐतरेयोपनिषद्विलासः, ओङ्कारवादः, कठोपनिषद्विलासः, केनोपनिषद्विलासः, गाय-त्रीतत्वार्थविलासः, गीतोपनिषद्विलासः, छान्दोग्योपनिषद्विलासः, वेदान्तसूत्रमुक्ता-वलीव्याख्यात्मकं तत्वार्थविशोधनम्, तैत्तरीयोपनिषद्विलासः, दशोपनिषल्लघुप्रकाशः, निर्विशेषवादः, पञ्चरुद्रतात्पर्यनिर्णयः, पैङ्गलछन्दोरीत्यनुसारि रामस्तोत्रम्, प्रणवार्थ-निर्णयः प्रश्नोपनिषद्विलासः, ब्रह्मसूत्रतत्वार्थविलासः, ब्रह्मसूत्रविवरणम्, ब्रह्मसूत्र-सारः, ब्रह्मसूत्रसद्वृत्तिः बृहदारण्यकोपनिषद्विलासः, भक्त्यानन्दप्रकाशः, भगवद्-भक्तिप्रकाशः, भाट्टदीपिकाव्याख्या भाट्टकल्पतरुः, मतरहस्यरत्नावलिः, मर्दनध्वंस-मर्दनम्, माण्डूक्योपनिषद्विलासः, मुक्तिसुरभसोपानम्, मुण्डकोपनिषद्विलासः, रामकृतनलसेतुनिर्णयः, विष्णुतत्वरहस्यम्, विष्णुतत्वरहस्यमण्डनम्, विष्णुतत्व-तात्पर्यम्, विष्णुद्वेषकरमतमर्दनम्, विष्णुसहस्रनामोपन्यासः, व्यामोहविद्रावणम्, शाब्दबोधवादः शास्त्रैक्यभङ्गवादः, शाङ्करभाष्यगाम्भीर्यनिर्णयः, श्वेताश्वतरोपनिष-द्विलासः, सगुणनिर्गुणवादः, सज्जनमनोहरी, सर्वमतसंग्रहविलासः, सामगोष्ठीविचारः, सामस्वरविचारः, हिङ्कारमञ्जरी, हिम्सायज्ञमर्दनम्, इतीमे ग्रन्था अनेन कृताः । एषु केचन (R. 1808 MGOML) पुस्तकालये लभ्यन्ते ॥

176. रामभद्रानन्दसरस्वती (1600–1700 A.D.)

श्रीरामसंयमीन्दोरित्यस्य व्याख्यानावसरे गङ्गाधरेन्द्रेण रामभद्रानन्दस्यैव रामानन्द इत्यपि नामान्तरं प्रतिपाद्यते । रामभद्रानन्दोऽयं रामसंयमिकृष्णानन्द-सरस्वत्योश्शिष्यः इति ज्ञायते । दासगुप्तमेनं रामानन्दसरस्वतीशिष्यं सप्तदशशतकीयं (HIP Vol. II 56) वदति । अष्टादशशतकीयेन गङ्गाधरेन्द्रेण व्याख्यायमानोऽयं ग्रन्थकारः अष्टादशशतकप्राक्तन इति निश्चयः ।

1. सिद्धान्तचन्द्रिका ॥ वेदान्तसिद्धान्तचन्द्रिकापरनामायं ग्रन्थः पञ्चाशद्भिः पद्यैः पूर्णः बहुविषयभीषणसंसारकूटपन्नगग्रस्तं जीवलोकं मीमांसकमेकचमूः नैव मोचयेत् । अद्वैतसिद्धान्तराज्यस्य दौवारिकवदायैव सांख्ययोगन्यायशास्त्राण्यर्हन्ति इति शाङ्करमद्वैतमेव रक्षणार्हमिति प्रतिपादयति । गोपालनारायणमुद्रणालये मुद्रितः । अस्य व्याख्या गङ्गाधरेन्द्रसरस्वतीकृता उद्धाराख्या ।

177. रामाद्वयाचार्यः (1300–1400 A.D.)

अद्वयाश्रमशिष्योऽयं रामाद्वयाचार्यः स्वीये ग्रन्थे त्रयोदशशतकीयान् न्याय-वेदान्ताचार्यान् निर्दिशति । वेदान्तकौमुद्याः स्वोपज्ञव्याख्यायां जनार्दनापर-नामानमानन्दगिरिं निर्दिशति । वेदान्तकौमुद्याः कश्चनादर्शग्रन्थः रायलासियाटिक-सोसाइटि कल्कत्तायां विद्यते । तत्र प्रतिलेखावसरः (1512 A. D.) इति दृश्यते । तस्मात् आनन्दगिरिकालात् (1320 A.D.) अर्वाग्भव (1512 A.D.) काला-त्प्राक्तन इति च सिध्यति ॥

1. वेदान्तकौमुदी । प्रकरणग्रन्थोऽयं कल्पतरु-अमलानन्द-इष्टसिद्धिकारप्रकटार्थ-कारांश्च निर्दिशन्नयं मद्रासविश्वविद्यालयसंस्कृतमालायां (M.U.S.S. 20) मुद्रितः । अस्य व्याख्या:–मूलकारकृता काचन रायल आसियाटिक सोसाइटि कल्कत्तायां विद्यते । अपरा काचनाज्ञातकर्तृका भन्दरकारप्राच्यभाषानुसन्धानालयपुस्तकालये BORI लभ्यते । भावदीपिका इति नाम वाराणसीसंस्कृतविश्वविद्यालयसूच्यां दृश्यते । (Vol. VII) जीवकौमुदीनामा ग्रन्थः वेदान्तकौमुद्यां 93 पुटे निर्दिष्टः ॥

178. रामाध्वरीन्द्रः (1650–1750 A.D.)

नृसिम्हाश्रमिशिष्यस्य भक्तनाथस्य पौत्रः कृष्णयज्वनः पुत्रः नारायणाध्वरि-शिष्यश्चायं रामाध्वरी सप्तदशशतकापरार्धकालवासीति निश्चीयते ।

1. तत्वविवेकदीपनव्याख्या अद्वैतरत्नकोशपालिनी ॥ (R. 1513 MGOML) द्वितीयपरिच्छेदान्तमडयारपुस्तकालये बरोडा मैसूरपुस्तकालययोर्लभ्यते ।

179. रामानन्दतीर्थः (1300–1400A.D.)

"ऋजुविवरणभावस्य रचिता भावदीपिका । भारतीतीर्थशिष्येण रामानन्दाभिधेन च ॥" इति दर्शनात् भारतीतीर्थशिष्योऽयं रामानन्दतीर्थश्चतुर्दशशतकीय इति निर्णीयते ॥

1. ऋजुविवरणव्याख्या —त्रयन्तभावदीपिका (R. 2256 MGOML) विष्णुभट्टोपाध्यायकृतपञ्चपादिकाविवरणव्याख्याऋजुविवरणव्याख्यात्मकोऽयं ग्रन्थः मद्रासपुस्तकालये लभ्यते ॥
2. अद्वैतनिर्णयसंग्रहः
3. अद्वैतरहस्यम् । ग्रन्थाविमौ राजेन्द्रलालसूच्यां दृश्येते ॥

180. रामानन्दसरस्वती (1685–1785 A.D.)

स्वयम्प्रकाशप्रशिष्यः रामभद्रानन्दप्रशिष्यः राघवानन्दशिष्यश्चायं रामानन्दसरस्वती स्वग्रन्थे लघुचन्द्रिकाकारं गौडब्रह्मानन्दं निर्दिशन् सप्तदशशतकापरार्धकाले उवासेति निश्चीयते ॥

1. आत्मतत्वविवेकसारः । ग्रन्थोऽयं मैसूरपुस्तकालये लभ्यते ।
2. तत्वमस्यखण्डार्थनिरूपणम् । (R. 2921 MGOML)
3. त्रिपुरतापिनीव्याख्या (R. 611 BMGOML and Mysore)
4. भगवद्गीताभाष्यव्याख्या — गीताशयः (6939 d. BRd)
5. पञ्चदशीव्याख्या —विशुद्धदृष्टिः (D. 4564 MGOML)

181. रामानन्दभिक्षुः (1700–1800 A. D.)

स्वयम्प्रकाशेन्द्रशिष्योऽयं रामानन्दभिक्षुरच्युतकृष्णानन्दसतीर्थ्यः अष्टादशशतकीयश्च भवति ।

1. मानमालाविवरणम् । अच्युतकृष्णानन्दकृतायाः मानमालायाः व्याख्यात्मकोऽयं अडयारपुस्तिकामालायां मुद्रितः ॥

182. रामेन्द्रयोगी (1700–1850 A.D.)

गीर्वाणेन्द्रमुनिशिष्योऽयं रामेन्द्रयोगी सप्तदशशतकादारब्धे एकोनविंशत्यन्ते शतके उवासेति निर्णयः । अदसीयः "जगन्मिथ्यात्वदीपिकाख्यः" चतुर्दशप्रकरणपूर्णः ग्रन्थः (D. 4576 MGOML) लभ्यते ॥

183. रामेश्वरभारती (1320–1400 A.D.)

विद्याशङ्करप्रशिष्य आत्मभारतीशिष्यश्चायं रामेश्वरभारतीति ज्ञायते । विद्याशङ्करस्यैव शृङ्गगिरिपीठारोहणात्पूर्वं विद्यातीर्थ इति प्रसिद्धिः । पीठारोहणादनन्तरमेव विद्याशङ्करः शङ्करानन्द इत्यपि नामान्तरमिति ज्ञायते । विद्याशङ्करपीठारोहणकालः (1280 A.D.) इति शृङ्गगिरिपरम्पराप्रमाण्यात् ज्ञायते । एवञ्च विद्याशङ्करप्रशिष्योऽयं चतुर्दशशतकावसानवासीति निश्चीयते ।

1. वैय्यासिकसूत्रोपन्यासः । शाङ्करभाष्यतट्टीकादिसारसंग्रहात्मकोऽयं सूत्रवृत्तिग्रन्थः अनन्तशयन - अडयार - सरस्वतीमहालय - मैसूर - मद्रास (D. 4693 MGOML) पुस्तकालयेषु लभ्यते । व्याससूत्रदीपिका इत्यपि नामान्तरम् ।

184. रङ्गनाथः 1620 कालादर्वाचीनः

"आनन्दाश्रमपादाब्जपरागाणां कृपाबलात् ।" इति दर्शनादानन्दाश्रमशिष्य इति ज्ञायते । "विद्यातीर्थकृतैश्श्लोकैर्नृसिम्हाश्रमसूक्तिभिः । सन्दब्धा" इति विद्यातीर्थनृसिम्हाश्रमिणौ प्रमाणयन्नयं तयोरर्वाचीन इति निश्चयः । यद्ययं आनन्दरससागरकर्तुरानन्दाश्रमस्य शिष्यस्स्यात्तर्हि कालोऽस्य (1600 A. D.) षोडशशतकात् अर्वाचीन इति वक्तुं शक्यते । अनेन विद्वज्जनमनोहारिणीनाम्नी सूत्रवृत्तिः कृतेति लन्दननगरस्थपुस्तकाज् ज्ञायते भट्टोजिदीक्षितस्य भ्रात्रा रङ्गोजिभट्टेनापि 'अद्वैतचिन्तामणि' नाम्नी सूत्रवृत्तिरारचिता सरस्वतीभवने मुद्रिता च । तस्यां विद्वज्जनमनोहारिणीति नाम न दृश्यते । उभयोरानन्दाश्रमशिष्यत्वं समान दृश्यते । तस्मादयं रङ्गनाथो रङ्गोजिभट्टो वा उतान्य इति संशय उदेति ।

1. ब्रह्मसूत्रवृत्तिः—"विद्वज्जनमनोहरी" (2267 DC. Vol. IOL)

185. रङ्गनाथसूरिः (1600–1700 A. D.)

आत्रेयगोत्रजोऽयं रङ्गनाथसूरिर्दक्षिणदेशीयः श्रीरङ्गनगरसमीपस्थित 'चोलक्कनल्लूर' ग्रामवासी कावेरीनदीतीरलब्धवासः, विवरणोपन्यासरत्नप्रभाकारस्य रामानन्दसरस्वत्याः प्रशिष्यः वासुदेवेन्द्रस्य च प्रशिष्यः सिद्धान्तसिद्धाञ्जनकारस्य कृष्णानन्दसरस्वत्याः शिष्यः, भास्करदीक्षितस्य सिद्धान्तसिद्धाञ्जनप्रथमप्रतिलेखकस्य रामानन्दस्य सतीर्थ्यः सप्तदशशतकीय इति भवति। अनेन स्वाचार्यपरम्परा निर्दिष्टा–

- पूर्णानन्दः
  - पुरुषोत्तमानन्दः
    - शिवरामानन्दः
      - गोपालानन्दः
        - स्वयम्प्रकाशानन्दः
          - वासुदेवानन्दः
          - रामानन्दः (रामभद्रः)
            - (वासुदेवानन्दः, रामानन्दः →) कृष्णानन्दसरस्वती
              - भास्करदीक्षितः
              - रघुनाथसूरिः
                - शिवरामः
              - रामानन्दयतिः

अस्य शिष्यः भावाज्ञानप्रकाशिकाकारशिवरामाख्य इति (24. E 7. AL Mss) ज्ञायते।

1. पुरुषार्थरत्नाकरः। (28. H. 17. AL. . 5774 MGOML) विवेकनामभिः पञ्चदशभिरध्यायैः सीमितोऽयं ग्रन्थः जीवन्मुक्तगतिं ज्ञानाधिकारिणं तत्त्वम्पदार्थविचारञ्च कुर्वन् प्रकरणग्रन्थतामर्हति।

186. रङ्गराजाध्वरी (1500–1560 A.D.)

भारद्वाजगोत्रजः काञ्चीपुरान्तर्गताडयप्पलग्रामवासी, प्रसिद्धाप्पय्यदीक्षितानां पिता वक्षस्थलाचार्यापरनाम्न आचार्यदीक्षितस्य तोताम्बीनाम्न्यां उत्पन्नः बोम्मराजसभापण्डितष्षोडशतकपूर्वार्धवासी रङ्गराजाध्वरीति ज्ञायते।

- आचादीक्षितः (अष्टौ पुत्रा अस्य)
  - रङ्गराजाध्वरी
    - आचादीक्षितः
      - नारायणदीक्षितः (महावीरचरितसाहित्यरत्नाकरव्याख्याता)
        - नीलकण्ठदीक्षितः (नलचरितकर्ता)
        - अचादीक्षितः (नलचरितव्याख्याता)
      - अप्पय्यदीक्षितः (रुक्मिणी परिणयकारः)
    - अप्पय्यदीक्षितः (प्रसिद्धः)

(Ref. M. T. 1283 MGOML)

1. अद्वैतविद्यामुकुरः। (6686 A. B. R. D.) अद्वैतमुकुरनामायं ग्रन्थः बरोडापुस्तकालये लभ्यते। ग्रन्थोऽयं नलचरितनाटके नीलकण्ठदीक्षितेन निर्दिष्टः। मैसूरपुस्तकालये च लभ्यते।

2. विवरणदर्पणम्। (7064 TSML) पञ्चपादिकाविवरणव्याख्यात्मकोऽयं ग्रन्थः सरस्वतीमहालये अपूर्णं उपलभ्यते। रूपकरहस्यमप्यस्य कृतिरिति वदन्ति।

187. रङ्गोजिभट्टः (1600–1700 A. D.)

लक्ष्मीधरपुत्रः भट्टोजिदीक्षितकनीयान् भ्राता कोण्डुभट्टपिता आनन्दाश्रमभट्टेजिदीक्षितयोश्शिष्यः महाराष्ट्रविप्रकुलोत्पन्नः काशीवासी रङ्गोजिभट्टोऽयं नृसिंहाश्रमिणोऽपि शिष्य इति वदन्ति। भट्टोजिदीक्षितकाल (1650 A D.) इति निरूपितत्वात्तदनुजस्यापि स एव कालः। जयपुरसूच्यां प्रतिलेखनकाल (1568 A.D.) इति दृश्यते।

1. अद्वैतशास्त्रसारोद्धारः। ग्रन्थोऽयं वाराणसीसंस्कृतकालाशालाहस्तलिखितवर्णनात्मकग्रन्थसूच्यां (3. DC. Skt c. Benaras) दृश्यते।

2. अद्वैतचिन्तामणिः। (S. B. T. S. 2.)

अद्वैतसिद्धान्तपरमफलस्य उपायोपवर्णनपूर्वकं द्वैतसिद्धान्तबद्धपरिकरनैय्यायिकादिप्रतिद्वन्द्विमतनिरसनमुखेन अद्वैतमतं प्रतिपादितम् । महावाक्यार्थवर्णनपुरस्सरं सैद्धान्तिकी अखण्डार्थता प्रतिपादिता । परिच्छेदद्वयपूर्णोऽयं सरस्वतीभवनग्रन्थमालायां मुद्रितः ।

188. लक्ष्मणसूरिः (1820–1920 A.D.)

महामहोपाध्यायविरुदभूषितस्साहित्यवेदान्तादिषु प्रकाण्डपण्डितः आशुकविरयं लक्ष्मणसूरिः भारतराज्यचोत्तमप्राड्विवाकन्यायाधीशस्य T.L. वेङ्कटार्यस्य पिता दक्षिणदेशीयः एकोनविंशतिशतकीय इति ज्ञायते । अस्य पिता मुत्तुसुब्बा भारती । अस्य पत्नी लक्ष्मीनाम्नी । नैत्रपकाश्यपगोत्रोद्भवोऽयं युजुर्वेदाध्यायी तिरुनेल्वेलीसमीपस्थ "हरिकेशनल्लूर" ग्रामाभिजन इति ज्ञायते ॥

1. उपनिषत्संक्षेपवार्तिकम् । अनुष्टुभैः छन्दोभिस्सर्वासामुपनिषदां भावार्थग्राहकं वार्तिकं प्रणीतम् । तेषु माण्डूक्योपनिषद्वार्तिकं परं मुद्रितम् । अन्ये ग्रन्था T. L. वेङ्कटार्यगेहे वर्तन्ते "शङ्करभगवत्पादाभ्युदयः" भारतसाराद्याश्च ग्रन्था अनेन निर्मिताः ।

189. लक्ष्मीनाथझा (20th Cent. A.D.)

मिथिलासमीपस्थ दरभङ्गामण्डलान्तर्गत मधुवनीसीमास्थसीमाख्यग्रामवासी, हीराशङ्करझात् प्राप्तव्याकरणशास्त्रः, भवद्गीतागूढार्थदीपिकाकारात् बच्चाशर्माख्यात् धर्मदत्तात् प्राप्तपूर्वोत्तरमीमांसान्यायदर्शनः (1926 A. D) कालात् काशीहिन्दूविश्वविद्यालयदर्शनविभागप्रधानाध्यापकोऽयं लक्ष्मीनाथझा स्वग्रन्थौ (1874 श 1952 A. D.) काले समापितवानिति ज्ञायते ।

1. भामतीव्याख्या 'प्रकाशः' । भामतीव्याख्यात्मकोऽयं ग्रन्थः भामत्यर्थान् सुलभं बोधयति । ग्रन्थोऽयं वाराणस्यां ग्रन्थकृतैव मुद्रापितः ।

2. भामतीव्याख्या 'विकासः' । ग्रन्थोऽयं नव्यतर्कशैल्यां प्रकाशाख्यव्याख्यायामनुक्तानर्थान् प्रतिपादयति । पाण्डित्यपूर्णोऽयं महान् ग्रन्थः तत्र तत्र पञ्चावयववाक्यैः, क्वचित् परिष्कारप्रधानैः वाक्यैश्च भामती - तद्व्याख्यागतानर्थान् सविस्तरमुपर्णयति । ग्रन्थोऽयमपि वाराणस्यां मुद्रितः । व्युत्पत्तिवादस्यापि अनेन प्रकाशाख्या व्याख्या कृतेति ज्ञायते ।

190. लक्ष्मीनृसिम्हः (1650–1750 A.D.)

कोण्डुभट्टरमाम्बयोः पुत्रः महीश्वरवंशजोऽयं लक्ष्मीनृसिम्हः नारायणेन्द्रसरस्वतीशिष्यः कल्पतरुव्याख्यापरिमलकारादर्वाचीन इति तु निर्णयः । यद्ययं कोण्डुभट्टः रङ्गोजीभट्टस्य पुत्रः भट्टोजिदीक्षितस्य भ्रात्रीयस्यात् तर्हि लक्ष्मीनृसिम्होऽपि रङ्गोजिभट्टपौत्र इति सप्तदशशतकीय इति निर्णेतुं पार्यते । तिरुविशनल्लूर् रामसुब्रह्मण्यशास्त्रिकृते न्यायेन्दुशेखरदोषयोगघटनग्रन्थे लक्ष्मीनृसिम्हवाजपेयी कोट्टयूर्ग्रामवासीति निर्दिश्यते । एवञ्चायं दाक्षिणात्यो भवति ।

1. कल्पतरुव्याख्या आभोगः

अप्पय्यदीक्षितीयपरिमलार्थानुसारिणीयं कल्पतरुव्याख्या मद्रासराजकीयहस्तलिखितग्रन्थमालायां MGOMLS मुद्रितः । अस्य टिप्पणी श्रीरामशास्त्रिणा रचिता । सिद्धान्तकौमुदीव्याख्या विलासः तर्कदीपिका, चानेन कृताविति ज्ञायते ।

191. लिङ्गनसोमयाजी रायप्रोलु (2000 A.D.)

आत्रेयगोत्रजः गुण्टूराख्यान्ध्रनगरजः श्रीरमणराज्यलक्ष्म्योः पुत्रः कल्याणानन्दभारतीस्वामिशिष्योऽयं लिङ्गनसोमयाजी विंशतिशतकीय इति ज्ञायते ।

1. पञ्चदशीव्याख्या–कल्याणपीयूषः । सुमधुरकाव्यशैलीबद्धोऽयं ग्रन्थः लक्ष्मीपवरमुद्रणालये तेनालिनगरे मुद्रितः ।

2. तैत्तरीयवार्तिकव्याख्या– कल्याणविवरणम् । सुरेश्वराचार्यकृततैत्तरीयवार्तिकव्याख्यात्मकः भाष्यार्थसङ्ग्राहकश्च ग्रन्थः शारदामुद्रणालये भटनवल्लीनगरे मुद्रितः ॥

192. लोकनाथाध्वरी (1650–1750 A.D.)

अद्वैतदीपिकाकर्तुर्नृसिम्हाश्रमिणः पूर्वाश्रमे नप्ता नारायणशास्त्रिपुत्रः चोलदेशान्तर्गतआलङ्गुडिग्रामवासी चायं लोकनाथाध्वरी सप्तदशशतकापरार्धारब्धे काले उवासेति निश्चीयते ।

1. अद्वैतमुक्तासरः (R. 2985 MGOML, R. 2985 B. MGOML)

परिच्छेदचतुष्टयपूर्णोऽयं ग्रन्थः द्वैतवादखण्डनपर अप्रकाशितश्च मद्रास-वेङ्कटेश्वर-अनन्तशयन-पुस्तकालयेषु लभ्यते । अस्य व्याख्या कान्तिनाम्नी मद्रास (R. 2985 B. MGOML) अनन्तशयनपुस्तकालययोर्लभ्यते ।

193. वनमालिमिश्रः (1800–1900 A. D.)

अनेन ब्रह्मसूत्रसिद्धान्तमुक्तावलिरिति वृत्तिग्रन्थः कृतः स च चौखम्बा-मुद्रणालये मुद्रितः ।

194. वरदपण्डितः (1750–1850 A. D.)

भट्टनारायणपुत्रः हारीतगोत्रजः वरदराजपण्डितः विद्यानन्दपूज्यपादशिष्यः वाराणसीवासी सप्तदशशतकापरार्धकालवासीति ज्ञायते ।

1. खण्डनखण्डखाद्यव्याख्या—खण्डनमण्डनम् (R. 31618 MGOML) चतुर्थ-परिच्छेदान्तमपूर्णं अमुद्रितश्चायं ग्रन्थः मद्रासअड्यारअनन्तशयनबरोडापुस्त-कालयेषु लभ्यते ।

2. वेदान्तहृदयम् (R. 3600 MGOML)

195. वर्धमानः (1400 A. D.)

नव्यन्यायप्रवर्तकस्य तत्त्वचिन्तामणिकर्तुः गङ्गेशोपाध्यायस्य पुत्रोऽयं वर्ध-मानोपाध्यायः बहूनां व्याख्याग्रन्थानां निर्माता चतुर्दशशतकीयः । अनेन कृतः खण्डनखाद्यप्रकाश अमुद्रित आसियाटिक् सोसाईटि कल्कत्तापुस्तकालये लभ्यते । अदसीया अन्ये ग्रन्था अस्मदीयदर्शनमञ्जर्यां (p. 25) द्रष्टव्याः ।

196. वाञ्छेश्वरः (1760–1830 A.D.)

दक्षिणदेशवासी शाहजग्रामभागी महिषशतकव्याख्यातुः वाञ्छेश्वरस्य प्रपितामहः नरसिम्हस्य पितामहः महादेवपिता तञ्जपुरशासकप्रतापसिम्हस्य राजसभापण्डितः अष्टादशशतकापरार्धकालवासीति निश्चयः । विश्वामित्रगोत्रजः आश्वलायनसूत्री वाञ्छेश्वरसुधीपौत्रः शरभोजीसभाविद्वान् ईश्वरश्रीनिवासमहोविलानां शिष्य इति अनेन हिरण्यकेशीयश्रौतसूत्रव्याख्या वस्वग्निअद्रिक्षितिमितशके (1738 श 1816 A.D.) काले कृतेति (2072 D.C. TSML Vol. IV) दृश्यते । कर्णाटकाभिजनोऽयमित्यपि केचित् ।

1. ब्रह्मसूत्रार्थचिन्तामणिः ॥

सव्याख्योऽयं ग्रन्थः सूत्रवृत्तिरूपः कुम्भघोणशङ्करमठपुस्तकालये मैसूरपुस्त-कालये च लभ्यते ॥

भाट्टचिन्तामणिः, दत्तकचिन्तामणिः, श्राद्धचिन्तामणिः, हिरण्यकेशीय-श्रौतसूत्रव्याख्या च अनेन कृताः ग्रन्थाः ॥

197. वासुदेवब्रह्म (1800–1900A.D.)

अनिरुद्धपुत्रः हृषीकेशाश्रमशिष्यश्चायमुत्तरभारतीयः वासुदेवब्रह्माख्य एकोन-विंशतिशतकीय इति ज्ञायते ॥

1. बृहदारण्यकव्याख्या—प्रकाशिका (19981 B.R.D.)

2. सच्चिदनुभवप्रदीपिका (3822 B.R.D.) जयपुसूच्यां बरोडासूच्याञ्च दृश्यते । अस्य कालः (1883 A.D.) इति ।

198. वासुदेवब्रह्मेन्द्रः (1850–1905 A.D.)

रामचन्द्रेन्द्रापरनाम्नामुपनिषद्ब्रह्मेन्द्राणां प्रशिष्यः कृष्णानन्देन्द्रसरस्वती-शिष्यः कावेरीतीरवर्तिपञ्चनदक्षेत्रवासी वैद्यनाथशास्त्रिगुरुरयं वासुदेवब्रह्मेन्द्र एकोन-विंशतिशतकीय इति निश्चीयते ।

1. शास्त्रसिद्धान्तलेशतात्पर्यसंग्रहः । (N.S.P.) सिद्धान्तलेशसंग्रहसारभूतोऽयं ग्रन्थः निर्णयसागरमुद्रणालये मुद्रितः ॥

199. वासुदेवशास्त्री अभ्यङ्करः (1850–1920 A. D.)

नागोजिभट्टप्रशिष्यभास्कराचार्यपौत्रः प्रशिष्यः शिष्यश्चायं वासुदेवशास्त्री-अभयङ्करः रामशास्त्रिणां शिष्यः पुण्यपुरवासी एकोनविंशतिशतकीय इति निश्चीयते । अत्रेयं परम्परा - नागोजीभट्टः - नीलकण्ठः - भास्कराचार्यः - रामशास्त्री - अभ्यंकरः ।

1. अद्वैताङ्कुरः—(ASS 109) भगवद्गीताप्रथमद्वितीयाध्यायव्याख्यात्मकोऽयं ग्रन्थ आनन्दाश्रममुद्रणालये मुद्रितः ।

2. अद्वैतामोदः । (ASS 84)

ग्रन्थस्यास्य श्रीभाष्यकृता कृतस्य विशिष्टाद्वैतसिद्धान्तभूतस्य ग्रन्थस्य तद्दूषणानाञ्च दूषणं विषयः । अद्वैतमतप्रतिष्ठापनं मुख्यं फलम् । अद्वैतस्वरूपकथनम्, सूत्रकारात्प्रागपि मायावादस्य विद्यमानता, निर्विशेषब्रह्मवादः सूत्रकारसम्मतः, अवच्छेदवादः, आभासवादः, प्रतिबिम्बवादः, एकजीववादः, अनिर्वचनीयख्यातिः, मायाशब्दार्थ इतीमे विषयाः सूपपादिताः । आनन्दाश्रमे मुद्रितः । कायपरिशुद्धिरप्यस्य कृतिः । सिद्धान्तबिन्दुव्याख्या—"बिन्दुप्रपातः" (BORIS 2) अनेन कृतः मुद्रितश्च।

200. वासुदेवेन्द्रः (1800–1900 A. D.)

रामचन्द्रापरनाम्नामुपनिषद्ब्रह्मेन्द्राणां शिष्येष्वन्यतमोऽयं कृष्णानन्दसतीर्थ्यः वासुदेवप्रशिष्य एकोनविंशतिशतकीय इति ज्ञायते ।


1. प्रत्यक्तत्वप्रकाशिका (R. 1168 MGOML) प्रकरणग्रन्थोऽयं अध्यारोपापवादविवरणं प्रत्यगात्मवर्णनां महावाक्यार्थविचारञ्च कुर्वन्नमुद्रितः पूर्णः मद्रास-अडयारपुस्तकालययोः मैसूरपुस्तकालये च लभ्यते ।

2. ब्रह्मसूत्रविषयवाक्यविवरणम् । मैसूरपुस्तकालये लभ्यते ।

3. अद्वैतभूषणव्याख्या—आनन्ददीपिका । बोधेन्द्रकृताद्वैतभूषणव्याख्यात्मकः ग्रन्थः मैसूरपुस्तकालये लभ्यते ।

201. वासुदेवेन्द्रमुनिः (1700–1765 A. D.)

उपनिषद्ब्रह्मेन्द्रापरनामकस्य रामचन्द्रेन्द्रस्य रामब्रह्मेन्द्रस्य कृष्णानन्दस्य च गुरुः चन्द्रिकाचार्यरामब्रह्मेन्द्रयोः प्राचार्यः कृष्णानन्देन्द्रवासुदेवेन्द्रप्राचार्यश्चायं दक्षिणदेशवासी वासुदेवेन्द्रमुनिः वासुदेवेन्द्रयोगिशिष्यः अष्टादशशतकीय इति निश्चयः । एतद्रचिते तत्वबोधाख्ये लेखनकाल (1823 सं 1767 A.D.) इति निर्दिष्टः ।



1. तत्वबोधः । प्रश्नोत्तरपद्धत्या अद्वैतसिद्धान्तप्रदर्शनपरोऽयं प्रकरणग्रन्थः वाराणसीचौखाम्ब मुद्रणालये मुद्रितः ।

2. कर्माकर्मविवेकनौका (R. 4209 D MGOML)

3. विवेकमकरन्दः । ग्रन्थोऽयं नासिकसूच्यां लभ्यते ॥

4. वैराग्यपञ्चकम् (7769 TSML)

5. शास्त्रदीपिकाव्याख्या ग्रन्थोऽयं बाम्बेविश्वविद्यालयवर्णनात्मकग्रन्थसूच्याः ज्ञायते॥

202. वासुदेवेन्द्रसरस्वती (1800–1900 A D.)

अनेन मनीषापञ्चकव्याख्या कृता । व्याख्येयं सदाशिवब्रह्मेन्द्रसरस्वतीकृतायास्तस्याः स्वरूपा दृश्यते । तस्मात्तदर्वाचीनोऽयमिति निश्चयः ।

1. मनीषापञ्चकव्याख्या पञ्चरत्नविवृतिः । शङ्करगुरुकुलपत्रिकायां वाणीविलासमुद्रणालये मुद्रितः ॥

203. विज्ञानात्मा (1100–1200 A. D.)

विज्ञानाश्रमः, परमानन्दमस्कर्यपरनामायं विज्ञानात्मा ज्ञानोत्तमशिष्यः चित्सुखाचार्यसतीर्थ्यः द्वादशशतकवासीति निश्चीयते । शृङ्गगिरिसूच्यां ज्ञानोत्तमकालः (910–953 A. D.) इति दृश्यते । श्रीकण्ठशास्त्रिभिरप्युपपादितम् ।

1. तैत्तरीयोपनिषद्विवृत्तिः (R. 3208 MGOML)

2. नारायणोपनिषद्विवरणम् (1505 TSML)

3. पञ्चपादिकाव्याख्या (R. 4336 MGOML)

4. प्रणवार्थप्रकाशिका (307 T. C. D.)

5. प्रपञ्चसारवृत्तिः (R. 4466 MGOML)

6. श्वेताश्वतरोपनिषद्दीपिका (R. 1476 MGOML)

ग्रन्थोऽयं मद्रासनासिकविश्वभारतीशान्तिनिकेतनअनन्तशयनपुस्तकालयेषु लभ्यते । तिरुपतिपुस्तकालयेऽपि लभ्यते । पञ्चपादिकाविवरणस्यापि गूढार्थदीपिकाख्या व्याख्या कृतेति श्रूयते ।

204 विट्ठलेशोपाध्यायः (1700–1800 A.D.)

गूर्जरदेशीयोऽयं गादाधरीयव्याख्यातुः कृष्णभट्टस्य शिष्यश्च विट्ठलेशोपाध्यायः अष्टादशशतकीय इति ज्ञायते ।

1. लघुचन्द्रिकाव्याख्या—विट्ठलेशीया । (N. S. P.)

205. विट्ठलशास्त्री (1850—1925 A. D.)

आधुनिकोऽयं पाश्चात्यवेदान्तदर्शनतत्वज्ञः विट्ठलशास्त्रीति ज्ञायते ।

1. ब्रह्मनैर्गुण्यवादः । (9. F. 41 AL)

ग्रन्थेऽस्मिन् अद्वैतवेदान्तसिद्धान्तप्रदर्शनपूर्वकं ब्रह्मणो निर्गुणत्वं प्रसाध्य ब्रह्मनिर्गुणत्वे सन्दिहानानां अथवा विपरीतग्रहात् "निर्गुणवादिन अद्वैतिनश्शून्यवादिन" इति विवदमानानां पाश्चात्यविदुषां मतं खण्डितम् । द्वितीयपरिच्छेदे अद्वैतिना साकं नैय्यायिकवैशेषिकसांख्यख्रिष्टीयसिद्धान्तावलम्बिनां सम्भाषणं प्रश्नप्रतिवचनप्रणाल्या प्रसाध्य अद्वैतपक्षस्साधितः ।

206. विद्यातीर्थः (1228-1333 A D.)

नृसिम्हतीर्थशिष्यः भारतीतीर्थविद्यारण्यगुरुः कृष्णानन्दभारतीविद्यारण्यब्रह्मानन्दभारतीनां प्राचार्यः विद्यातीर्थ इति ज्ञायते । ब्रह्मानन्दभारत्यास्तु दीक्षागुरुरेव न तु विद्यागुरुः । अस्यैव शृङ्गगिरिपीठारोहणानन्तरं विद्याशङ्करतीर्थः शङ्करानन्द इति प्रसिद्धिः । अस्य पीठारोहणकालः (1280 A D.) इति ।

नृसिम्हतीर्थः
|
विद्यातीर्थः
|
भारतीतीर्थः
|
कृष्णानन्द भारती | विद्यारण्यः | ब्रह्मानन्दभारती

1. ऐतरेयोपनिषद्दीपिका । अमुद्रितोऽयं वेङ्कटेश्वरपुस्तकालये लभ्यते । अनेन रुद्रप्रश्नभाष्यमपि कृतम् (M. D. 141. Vol. I No. 141. MGOML) अत्रास्य गुरोर्नाम परमात्मतीर्थ इति दृश्यते ।

207. विद्येन्द्रसरस्वती (1550–1650 A. D.)

अग्निहोत्रभट्टप्राचार्यस्य ज्ञानेन्द्रसरस्वत्याश्शिष्यः वासुदेवेन्द्रसरस्वतीसतीर्थ्यश्चायं विद्येन्द्रसरस्वती षोडशशतकापरार्धकालवासी कैवल्येन्द्रस्यापि शिष्य इति ज्ञायते ।

1. वेदान्ततत्वसारः (7575 TSML)

मुक्तिस्वरूपनिरूपणपरोऽयं ग्रन्थः लाघवसहकृतश्रुतिवृन्दस्य अद्वैत एव तात्पर्यमिति असकृदावेदयति । अमुद्रितोऽयमानादिस्सान्तश्च ग्रन्थः सरस्वतीमहालये लभ्यते । ग्रन्थेऽस्मिन् वेदान्तभूषणाख्यः ग्रन्थः निर्दिष्टः ।

208. विमलब्रह्म (1700–1800 A. D.)

रामचन्द्रसरस्वतीप्रशिष्यः तारकब्रह्माश्रमिशिष्यश्चायं विमलब्रह्मा अष्टादशशतकीय इति निर्णीयते ।

1. स्वात्मानन्दस्तोत्रम् (7742 TSML) ग्रन्थोऽयं सरस्वतीमहालयसूच्यां (7742 DC. TSML Vol. XIII) मुद्रितः ।

209. विष्णुभट्टोपाध्यायः (1280–1350 A. D.)

त्रिणेत्रपौत्रः जनार्दनपुत्रः हरिहरबुक्करायपालितस्य विजयनगरवासिनस्तर्कभाषाव्याख्याकारस्य चतुर्दशशतकान्तवासिनश्चिन्नुभट्टस्य (चिन्नभट्टस्य) पिता स्वामीन्द्रपूर्णशिष्योऽयं सर्वशास्त्रविशारदः सर्वज्ञविष्णुभट्टोपाध्यायः चतुर्दशशतकपूर्वार्धान्तकालवासीति ज्ञायते । आनन्दगिरेरेव सन्यासस्वीकारात्पूर्वं जनार्दन इति नामेति प्रसिद्धम् । विष्णुभट्टोपाध्यायपितुर्जनार्दनस्य जनार्दनापरनामकस्य आनन्दगिरेश्चैवयं तर्हि आनन्दगिरिपुत्रः विष्णुभट्टोपाध्याय इति सिध्यति । एवंसति विष्णुभट्टोपाध्यायः गुजरातप्रान्तीय इति सिध्यति । केचित्तु आन्ध्रदेशजं वदन्ति । अस्य शिष्येण सर्वदर्शनसंग्रहकर्त्रा माधवाचार्येण ऋजुविवरणं शाङ्करदर्शने निर्दिष्टम् । एवञ्चायं सायणमाधवगुरुरिति "इण्डियम् आण्टिक्वैरि" (IA 1916 Page 2) पत्रिकायां निरूपितम् ।

श्रीकण्ठशास्त्रिणस्तु (IHQ XIV) एवं वर्णयन्ति-विद्याशङ्करः शार्ङ्गपाणिपुत्रः बिल्वारण्यजः । अस्य आश्रमस्वीकारात्पूर्वं सर्वज्ञविष्णुरिति नाम । कामकोटिपीठाधीशचन्द्रशेखरात्प्राप्ताश्रमः कामकोटिपीठाधीश आसीत् । अत्र प्रमाणम्—

बिल्वारण्यजशार्ङ्गपाणितनयः सर्वज्ञविष्णुः श्रयन्
सन्यासं गुरुचन्द्रशेखरमुनेरास्थाय पीठं गुरोः ।
योगेशस्य च चक्रराजवसतेर्देव्याश्च सक्तोऽर्चने
श्रीमन्माधवबुक्कभारतियतिप्रेष्ठैर्महिष्ठैर्वृतः ॥ इति

कामकोटिपरम्परा । एवञ्च शार्ङ्गपाणिजनार्दनौ यद्यभिन्नौ तर्हि ऋजुविवरणकारस्सर्वज्ञविष्णुभट्टः विद्याशङ्करान्नभिन्न इति वदन्ति ।

विद्यातीर्थस्यैव विद्याशङ्कर इत्यपि नामान्तरम् । यद्येवं विद्याशङ्करविद्यातीर्थः सर्वज्ञविष्णुभट्टविद्याशङ्कराद्भिन्नो वा उताभिन्न इति संशय उदेति ।

1. पञ्चपादिकाविवरणव्याख्या—ऋजुविवरणम् ग्रन्थोऽयं मद्रासराजकीय पुस्तकालये (R, 2957 MGOML) अडयारपुस्तकालये च लभ्यते । अस्य व्याख्या ऋजुविवरणव्याख्यानाम्नी अज्ञातकर्तृका अनन्तशयनपुस्तकालये लभ्यते ।

210. वेङ्कटराघवशास्त्री (1850-1920 A D.)

तिरुविशनल्लूर रामसुब्रह्मण्यशास्त्रिशिष्योऽयं वेङ्कटराघवशास्त्री कृष्णशास्त्रिनारायणशास्त्रिसतीर्थ्यः एकोनविंशतिशतकीय इति ज्ञायते ।

1. भाष्यगाम्भीर्यार्थनिर्णयमण्डनम् । रामसुब्रह्मण्यशास्त्रिकृतभाष्यगाम्भीर्यार्थनिर्णयग्रन्थस्य खण्डनं गौरीनाथशास्त्रिणा कृतम् । तद्दूषणपूर्वकं भाष्यगाम्भीर्यमत्र ग्रन्थे साध्यते । ग्रन्थोऽयं ब्रह्मवादिनीमुद्रणालये मद्रासनगरे मुद्रितः ।

211. वेङ्कटेशशास्त्री (1775–1850 A.D.)

आत्रेयगोत्रजः कोयम्पुरी (कोयम्पुत्तूर) वासी अध्यात्मकविरिति प्रसिद्धः सर्वदेवशिष्यः अय्यात्तुरैशास्त्रीत्यपरनामा वेङ्कटेश्वरशास्त्री स्वामिशास्त्रिसामयिकः एकोनविंशतिशतकीय इति ज्ञायते ॥

1. ब्रह्मगीताव्याख्या— तात्पर्यबोधिनी (R. 4065 MGOML)
2. मतत्रितयसर्वस्वम् (R. 3854 MGOML)

द्वैतविशिष्टाद्वैतअद्वैतमतत्रयमप्यत्र प्रतिपादितम् । परन्तु अद्वैतमत एव "सर्वश्रुतिशिरोरत्नमद्वैतं मतमागतम् ।" इत्यादिना विशेषत आदरः प्रदर्शितः ॥

3. स्वात्मानुभूतिमणिदर्पणः । (28 J. 2 AL)

विद्याशङ्करस्तुतिव्याजेन आत्मसाक्षात्कारोपायाः बन्धमोक्षव्यवस्थाश्च प्रतिपाद्यन्ते । ग्रन्थेऽस्मिन् अप्पय्यदीक्षितीयं "णत्वसमर्थनम्" शेषाद्रिशास्त्रिकृतं णत्वबाधाविधूननम्" बोधेन्द्रकृतः नामरत्नाकरश्च निर्दिष्टः । ग्रन्थोऽयं अडयारपुस्तकालये लभ्यते ।

4. स्वात्मानुभूतिमणिदर्पणव्याख्या (28 J. 2 AL)

212. वेदाद्रिसूरिः (1650–1750 A.D.)

देवाद्रिकुलोत्पन्नः धर्माध्वरिपुत्रोऽयं वेदाद्रिसूरिरन्नम्भट्टशिष्यः सप्तदशशतकापरार्धवासीति ज्ञायते ।

1. वेदान्तपरिभाषाव्याख्या—तत्त्वबोधिनी (357 T.C.L.) परिच्छेदचतुष्टयस्यैवायं ग्रन्थ उपलभ्यतेऽनन्तशयने ॥

213. वेदानन्दः (1600 A.D. ?)

कृष्णस्य माणिक्यदेव्याश्च पुत्रोऽयं शाम्बरक्षेत्रवासी (कन्याकुमारी) वेदाध्यक्षभगवत्शिष्य इति ज्ञायते । दासगुप्तस्तु षोडशशतकीयमेनं वदति ।

1. संक्षेपशारीरकसम्बन्धोक्तिः । (R. 2919 MGOML)

अमुद्रितोऽयं मद्रास-अनन्तशयन-लन्दननगरस्थभारतकार्यालयपुस्तकालयेषु लभ्यते ॥

214. शान्त्यानन्दः (1850–1915 A.D.)

शान्त्यानन्दोऽयमाधुनिकः । अस्याचार्यादि ग्रन्थादस्मात् न ज्ञायते । अनेन स्वस्य जीवनकाले स्वीयाः ग्रन्थाः प्राकाश्यं नीताः । अस्य कालः (1915 A.D.) इति ज्ञायते ।

1. पञ्चीकरणव्याख्या—अद्वैतागमहृदयम् (N. S. P.)
2. अद्वैतागमहृदयसंग्राहकश्लोकाः (N. S. P.)
3. शङ्कराचार्याष्टकम् (N. S. P.)
4. वेदान्तपरिभाषाव्याख्या — पदार्थमञ्जूषा (N. S. P.)

215. शाश्वतानन्दः (1700–1800 A.D.)

रामभद्रसंयमिशिष्योऽयं शाश्वतानन्द अष्टादशशतकीय इति ज्ञायते। सदाशिवब्रह्मेन्द्रकृतात्मविद्याविलासमनुसृत्यानेनापि ब्रह्मानन्दविलासाख्यः प्रकरणग्रन्थः कृतः। अमुद्रितोऽयं सरस्वतीमहालये लभ्यते।

1. ब्रह्मानन्दविलासः (7696 TSML)

216. शाश्वतानन्दतीर्थः (1600–1700 A.D.)

नारायणतीर्थशिष्योऽयं शाश्वतानन्दतीर्थ इति ज्ञायते। यद्ययं नारायणतीर्थः शारीरकमीमांसागद्यमयवार्तिककर्ता स्यात्तर्हि गौडब्रह्मानन्दसरस्वत्याः सतीर्थ्यः सप्तदशशतकीय इति सिध्यति।

1. अद्वैतरत्नकोशव्याख्या—भावार्थप्रकाशिका (R. 1756 MGOML) द्वितीयपरिच्छेदान्तमुद्रित उपलभ्यते।

217. शिवदत्तः (1750–1820 A.D.)

दत्तवंशावतंसोऽयं शिवदत्तः माधवीयशङ्करविजयव्याख्यातुर्धनपतिसूरेः पुत्रः रामकुमारस्य पौत्रः प्रत्यक्तत्त्वचिन्तामणिकर्तुस्सदानन्दव्यासवरस्य दौहित्रः पञ्चावदेशान्तर्गतरावलपिण्डीवासी वाराणसीवासी चेति ज्ञायते। अस्य गुरुर्बालगोपालतीर्थः। धनपतिसूरिणा पाण्डवेन्द्रहितारेशप्रमिते वैक्रमसंवत्सरे शङ्करविजयव्याख्या कृता। अनेन अर्थदीपिका गोत्राङ्कवसुतारेशमिते संवत्सरे (1811 A.D.) कृतेति ज्ञायते।

1. वेदान्तपरिभाषाव्याख्या—अर्थदीपिका। वेङ्कटेश्वरमुद्रणालये बाम्बेनगरे मुद्रितोऽयं ग्रन्थः।

218. शिवनारायणानन्दतीर्थः (1550–1650 A.D.)

शिवरामानन्दतीर्थशिष्योऽयं इति ग्रन्थाज् ज्ञायते। यद्ययं शिवरामानन्दः अद्वैतसिद्धिकारेण निर्दिष्टात्, यदि च भाष्यरत्नप्रभाकर्तू रामानन्दस्य प्रगुरोश्शिवरामात् नान्यस्तर्हि शिवनारायणानन्दोऽयं गोपालसरस्वतीसतीर्थ्यः षोडशशतकादिमे भागे आसीदिति निर्णीयते।

1. ब्रह्मसूत्रभाष्यव्याख्या–सुबोधिनी। ग्रन्थोऽयमद्वैतसभायां मुद्रितः। अमुद्रितस्तु (R. 2201 MGOML) लभ्यते।

2. पञ्चीकरणवार्तिकव्याख्या विवरणदीपिका (7306 TSML)। पञ्चकोशयात्रामञ्जरी सव्याख्यानेन कृतेति ज्ञायते।

219. शिवरामः (1650–1750 A.D.)

हयवंशजोऽयं अद्वैतविद्याविजयकर्तुः कृष्णशास्त्रिणः पुत्रः रत्नप्रभाकाररामानन्दस्य वासुदेवेन्द्रस्य च शिष्यस्य सिद्धान्तसिद्धाञ्जनकारस्य बालकृष्णानन्दसरस्वत्याः प्रशिष्यः श्रीरङ्गनगरवासिरङ्गनाथसूरिशिष्यः नृसिम्हाश्रमिण अर्वाक्तन स्सप्तदशशतकारम्भकालवासीति निश्चीयते।

1. भावाज्ञानप्रकाशिका (54. A. 17. AL) प्रकरणग्रन्थोऽयं अज्ञानस्य लक्षण प्रमाणे वर्णयन् चित्सुखाचार्यप्रदर्शितदिशा नृसिम्हाश्रमोक्तीश्च प्रमाणयन् भावरूपाज्ञानं साधयति। ग्रन्थोऽयमडयार पुस्तकालये लभ्यते।

220. शिवानन्दयतिः (1650–1750 A.D.)

रामनाथविद्वदाचार्योऽयं शिवानन्दः सप्तदशाष्टादशशतकमध्यवासीति ज्ञायते।

1. आनन्ददीपः। शारीरकमीमांसाभाष्यच्छायानुसारं रचितोऽयं प्रकरणग्रन्थः यद्यपि नोपलभ्यते तथाप्यस्य व्याख्या एतच्छिष्यरामनाथविदुषा कृता विशुद्धदृष्टिनाम्नी मद्रासपुस्तकालये लभ्यते।

2. ईशावास्यभाष्यटिप्पणम् (R. 3882,) कठोपनिषद्भाष्यटिप्पणम् (R. 3882) केनोपनिषद्भाष्यटिप्पणम् (D. 392,) तलवकारोपनिषद्भाष्यटिप्पणम् (D. 389) बृहदारण्यकभाष्यटिप्पणम् (R. 3882) मुण्डकभाष्यटिप्पणम् (R. 3882 MGOML) च लभ्यते।

221. शिवानन्देन्द्रः (1825–1900 A.D.)

दक्षिणदेशवासी चोलदेशीयोऽयं शिवानन्देन्द्रः रामब्रह्मेन्द्रकृष्णानन्दयोः प्रशिष्यश्चन्द्रिकाचार्यभिक्षोश्शिष्यः माधवतीर्थसतीर्थ्यः एकोनविंशतिशतकीयः रामसुब्रह्मण्य-राजुशास्त्रिसामयिकश्चेति ज्ञायते॥

1. स्वात्मादर्शः । चन्द्रिकाचार्यभिक्षुकृतस्य अद्वैतसिद्धान्तगुरुचन्द्रिकाग्रन्थस्य सारभूतः चन्द्रिकासारापरनामा ग्रन्थः माधवतीर्थेन कृतः । अस्य व्याख्यात्मकोऽयं ग्रन्थस्त्वात्मादर्शाख्यः ओरियण्टलमुद्रणालये मद्रासनगरे मुद्रितः ॥

222. श्रीधरस्वामी (1400–1500 A. D.)

"परमानन्दपादाब्जरजःश्रीधारिणा" इत्यनेन परमानन्दतीर्थस्सविनयं निर्दिष्टः । यद्ययं परमानन्दः गुरुचन्द्रिकाकर्तुर्ब्रह्मानन्दसरस्वत्याः गुरोर्न भिन्नः यदि च रत्नप्रभाकारस्य रामानन्दसरस्वत्यास्सतीर्थ्यात् स्वयम्प्रकाशगोविन्दानन्दयोश्शिष्यात् परमानन्दात् न भिन्नस्तर्हि अस्य काल (1550–1650 A. D.) इति वक्तुं शक्यते । महाराष्ट्रदेशजब्राह्मणः भागवतभावार्थदीपिकादिकृत् त्रयोदशशतकीय (1300 A.D.) इति वृद्धत्रय्यां गुरुपादहालदारः । साम्प्रदायिकसिद्धान्तस्तु पञ्चदशशतकीय इति । अस्य प्रतिलिपिकालः (1668 सं 1612 A.D.) इति पञ्जाबसूच्यां दृश्यते ।

1. भगवद्गीताव्याख्या—सुबोधिनी (N. S. P.)

विष्णुपुराणव्याख्या, भागवतभावार्थदीपिका, वेदस्तुतिव्याख्या, हरिभक्तिसुधोदयादयश्च अनेन कृताः ॥

223. श्रीधरशास्त्रिपाठकः (1850–1920 A. D.)

त्र्यम्बकशास्त्रिणः पुत्रः डेक्कानसंस्कृतविद्यालयप्रधानाध्यापक श्रीधरशास्त्रिपाठकः विंशतिशतकीय इति ज्ञायते ॥

1. कठोपनिषच्छाङ्करभाष्यव्याख्या—बालबोधिनी
2. केनोपनिषच्छाङ्करभाष्यव्याख्या ।

उभावपि ग्रन्थाविमौ पूनानगरे मुद्रितौ । अनेन विशिष्टाद्वैतमतानुसारिभाष्यस्यापि टीका कृतेति ज्ञायते ॥

224. श्रीधराचार्यः (1000 A. D.)

अम्बोकाबलदेवयोः पुत्रः गौडदेशवासी श्रीधराचार्यः दशमशतकीयः । न्यायकन्दलीतत्त्वबोधतत्त्वसंवादिनीसंग्रहटीकादीनां कर्त्ता अनेन अद्वयसिद्धिरिति अद्वैतग्रन्थोऽपि रचित इति ज्ञायते । निर्दिष्टश्च न्यायकन्दल्याम् (P. 57) ।

225. श्रीनिवासयज्वा (1550–1600 A. D.) ।

यद्यपि एतत्प्रणीतग्रन्थारम्भे अन्ते वा अस्य गुरोर्नामादिकं न दृश्यते । तथापि "जन्माद्यस्य यत" इति सूत्रविवरणावसरे "इत्यस्मद्गुरुचरणकेशवपुरीचरणादय" इत्युक्तम् । तस्मात् केशवपुरीनामा (केशवसाक्षिभगवत्पादः) अस्य गुरुरिति ज्ञायते । दासगुप्त एनं षोडशशतकीयं वदति । अयम पय्यदीक्षितसामयिकः अद्वैतकौस्तुभकर्ता रत्नखेटश्रीनिवासदीक्षित इत्यस्माकं निश्चयः ।

1. वादावलिः (R. 3885. MGOML)

वेदान्तवादावल्यपरनामायं ग्रन्थः षड्विंशतिभिरध्यायैरपूर्णः वादप्रधानः द्वैतविशिष्टाद्वैतमतखण्डनपर अमुद्रितः मद्रास-सरस्वतीमहालययोर्लभ्यते ।

226. श्रीवत्सलाञ्छनभट्टः (1825–1950 A. D.)

विष्णुध्वजाचार्यपुत्रोऽयं श्रीवत्सशर्मा गौडदेशज अष्टादशशतकीय इति ज्ञायते ।

1. सिद्धान्तरत्नमाला (B. 362 MGOML), (जयपुरसूची II 177) ग्रन्थोऽयं वेदान्तार्थनिरूपणापरनामा द्वैतिवादिमतखण्डनपूर्वकं अद्वैतप्रक्रियाः प्रतिपादयन् अद्वैतसिध्युक्तं प्रपञ्चमिथ्यात्वानुमानमनुवदति । ग्रन्थसमाप्तिश्चानेन ग्रन्थकर्त्रा 1840 शके इति निर्दिश्यते ।

227. शुभङ्करः (1600 A. D.)

कोटावंशजोऽयं नासिकक्षेत्रवासी प्रगल्भाचार्यापरनामा शुभङ्करः षोडशशतकारम्भकाले आसीदिति ज्ञायते । अनेन स्वग्रन्थः 1451 श. (1529 A. D.) काले कृतः ।

1. खण्डनखण्डखाद्यटीका—दर्पणम् (18 DC. B. S. C.)

अमुद्रितोऽयं ग्रन्थ अनुपसूच्यां वाराणसीसंस्कृतकलाशालापुस्तकालये च लभ्यते ।

228. शङ्करचैतन्यभारती (1850–1940 A. D.)

काशीवासी विश्वरूपभारतीशिष्योऽयं शङ्करचैतन्य एकोनविंशति शतकापरार्धेआसीदिति ज्ञायते ।

1. ख्यातिवादः। (B. S. S. 58) पञ्च ख्यातीः वर्णयन् अनिर्वचनीयख्यातिं सिद्धान्तयत्ययं ग्रन्थः।

229. शङ्करमिश्रः (1400–1500 A. D.)

भवनाथपुत्रः जयनाथभ्रातृपुत्रः दर्भङ्गासमीपवासी मैथिलः ब्राह्मणश्शङ्करमिश्रः वर्धमानोपाध्यायस्य गुरुः वाचस्पतिमिश्रपक्षधरमिश्रसामयिकः अभिनवकाणादापर-नामकरघुदेवभट्टाचार्यस्य भवनाथस्य च शिष्यः पञ्चदशशतकीयः। अनेन कृतस्य भेदरत्नाख्यग्रन्थस्य खण्डनं पञ्चदशशतकापरार्धवासिना मल्लणाराध्येन, सप्तदश-शतकीयेन मधुसूदनसरस्वत्या च क्रियते। अस्य भेदरत्नं (1462 A. D.) काले प्रतिलिखितम्। सरस्वतीमहालयस्थखण्डनखण्डखाद्यव्याख्यायाः प्रतिलेखनकालः (1602 A. D.) इति दृश्यते। एवञ्चास्य कालः पञ्चदशशतकमिति निर्णीयते। केचित्त्वेनं सप्तदशशतकीयं वदन्ति। गङ्गानाथझा तु स्वसम्पादिते वादविनोदनाम-कग्रन्थे शङ्करमिश्रः (1524 A. D.) कालवासीति वदति।

1. खण्डनखण्डखाद्यव्याख्या—आनन्दवर्धनम् (BSS 445) भागमुद्रणं चौखा-म्बायाम्। सम्पूर्णग्रन्थस्सरस्वतीमहालये। तर्कग्रन्थाणामपि रचयितायम्।

230. सच्चिदानन्दस्वामी (1700–1800 A. D.)

रामानन्दभिक्षुशिष्योऽयं सच्चिदानन्दस्वामी अष्टादशशतकीयः।

1. भिक्ष्वष्टकम्। (7761 DC TSML Vol. XIII) मुद्रितः।
2. वेदान्तलहरी। (8238 B. R. D.)
3. सर्ववेदान्तसंग्रहः। (R. 1613 MGOML)
4. स्वात्मनिरूपणव्याख्या (3825 B R. D.) नासिकसूच्याश्च लभ्यते।

231. सदानन्दव्यासवरः (1740–1810 A. D.)

सारस्वतब्राह्मणकुलोत्पन्नः पञ्जाबन्तर्गतरावलपिण्डीजिलान्तर्गतकुन्त्रीलाभिध-ग्रामभिजनः नानकसम्प्रदायानुगतबाबारामदयालुजीप्रेमपात्रं शिवलालप्रेमपात्रम्, रामकुमारपुत्रधनपतिसूरिश्वशुरोऽयं सदानन्दव्यासवरः अष्टादशशतकीयः। अस्य दीक्षागुरुर्वासुदेवयोगी। अनेन अद्वैतसिद्धिसिद्धान्तसारः (1797 A. D.) काले,

शङ्करदिग्विजयसारः (1780 A. D.) काले, गीताभावप्रकाशः (1781 A. D.) रचित इति ज्ञायते।

1. अद्वैतसिद्धिसिद्धान्तसारः सव्याख्यः (BSS 18)
2. अद्वैतदीपिकाव्याख्या। 256 नार्तवेस्ट सूच्यां दृश्यते।
3. प्रत्यक्तत्त्वचिन्तामणिः।

द्वादशभिः मयूखैः 1200 पद्यैश्च पूर्णोऽयं ग्रन्थः अद्वैतसिद्धान्तप्रदर्शनपर वेङ्कटेश्वरमुद्रणालये मुद्रितः। अस्य व्याख्या प्रभा नाम्नी मूलकृतैव कृता।

गीताभावप्रकाशः, तत्त्वविवेकव्याख्या, सव्याख्यः दशोपनिषत्सारः, सव्या-ख्यः महाभारततात्पर्यप्रकाशः, रामायणतात्पर्यप्रकाशः, शङ्करदिग्विजयसारः, स्वरूपनिर्णयश्च अदसीयाः ग्रन्थाः।

232. सत्यबोधाचार्यः (1200 A. D.) कालात्प्राक्

सत्यबोधाचार्योऽयं सर्वज्ञात्मनश्शिष्यः ज्ञानानन्दापरनामकस्य नैष्कर्म्यसिद्धि-व्याख्याचन्द्रिकाकर्तुः ज्ञानोत्तमस्य दीक्षागुरुः एकादशशतकवर्ती स्यादित्यनुमीयते।

1. पदकशतकम्—

ग्रन्थोऽयं कुमरिलभट्टगुरुसौगतगौतमकाणादमतखण्डनपरः इति आत्मबोध-प्रणीतायाः सुषमाख्यायाः जगद्गुरुरत्नमालाव्याख्यायाश्च (श्लो. 39) ज्ञायते। ग्रन्थस्तु न लभ्यते।

233. सदाशिवः (1750–1850 A. D.)

रामेन्द्रस्वामिशिष्योऽयं सदाशिव इति ज्ञायते। प्रसिद्धात् सदाशिवब्रह्मेन्द्रा-द्भिन्न इति प्रतीयते।

1. पञ्चरत्नकारिकाः। शाङ्करोपदेशपञ्चरत्नस्य व्याख्यारूपाभिः कारिकाभिः प्रणीतोऽयं ग्रन्थश्शङ्करगुरुकुलपत्रिकायाः प्रथमे भागे वाणीविलासमुद्रणालये मुद्रितः।

234. सदाशिवबोधेन्द्रः (1600 A. D) कालात्प्राक्

अड्यारपुस्तकालयस्थात् (8 F. 24. AL.) पुस्तकात् सदाशिवबोधेन्द्रोऽयं शङ्करपीठाधिपतिरासीदिति ज्ञायते। सप्तदशशतकीयेन मङ्गानाश्रमेण अष्टादश-

शतकीयेन सच्चिदानन्दयोगिना च व्याख्यातोऽयं ग्रन्थकर्ता तयोः पूर्वतन इति तु निश्चयः ।

1. बोधार्या । (8. F. 24. AL.)

स्वात्मनिरूपणम्, बोधसार इत्यपरनामायं ग्रन्थः । आर्यावृत्तघटितैः 158 पद्यैः परिगणितः शिष्योपदेशप्रणाल्यां निर्मितः सतताभ्यासचिन्तनादिभिरुपायैः आत्मैकत्वज्ञानं लब्धुमर्हतीति प्रतिपादयति । अमुद्रितोऽयं अडयार्-बरोडा वेङ्कटेश्वर पुस्तकालयेषु लभ्यते । कुत्रचिदयं ग्रन्थः भ्रमात् शङ्कराचार्यकृत इति निर्दिष्टः । शाङ्करात् आत्मबोधापरनामकात् बोधार्यग्रन्थात् भिद्यतेऽयं ग्रन्थः । अस्य प्रज्ञानाश्रमकृता, सच्चिदानन्दयोगिकृता स्वात्मानन्दप्रकाशिकाख्या च अपरा व्याख्या विद्यन्ते ।

235, सदाशिवेन्द्रसरस्वती (1550–1650 A. D.)

कामकोटिपीठाधीशस्य महादेवेन्द्रसरस्वत्याः प्रशिष्यः चन्द्रचूडेन्द्रसरस्वत्याः शिष्यः, दहरविद्याप्रकाशकारस्य परमशिवेन्द्रसरस्वत्याः ब्रह्मतत्वप्रकशिकाकारस्य प्रसिद्धसदाशिवब्रह्मेन्द्रस्य प्राचार्यश्चायं सदाशिवेन्द्रसरस्वती अभिनवनारायणेन्द्रसरस्वतीसामायिकः षोडशसप्तदशशतकवर्तीति ज्ञायते ।

1. आत्मानात्मविवेकः (22. D. 40 AL)

प्रश्नोत्तरशैल्या आत्मानात्मनोर्भेदं दुःखनिदानञ्च शृङ्खलाक्रमेण प्रतिपादयत्ययममुद्रितग्रन्थः अडयारपुस्तकालये लभ्यते । अस्य व्याख्या अस्य प्रशिष्येण सदाशिवब्रह्मेन्द्रकृता आत्मानात्मविवेकप्रकाशिका ॥

2. अमृतबिन्दूपनिषद्दीपिका (R. 1492 J. MGOML)

236. समरपुङ्गवदीक्षितः (1550–1650 A. D.)

वाधूलगोत्रजोऽयं वेङ्कटेशानन्ताम्बयोः पुत्रः अप्पय्यदीक्षितशिष्य धर्मदीक्षितस्य सूर्यनारायणदीक्षितस्य च भ्राता अयं समरपुङ्गवदीक्षितश्चोलदेशीयः षोडशशतकीय इति ज्ञायते ॥

1. अद्वैतविद्यातिलकम् । (S.B.S 34)

शिवं प्रति प्रार्थनाव्याजेन निखिलाद्वैतसिद्धान्तान् शाङ्करभाष्याभिमतब्रह्मसूत्राधिकरणार्थान् सङ्गृह्णन्नयं ग्रन्थः पद्यबद्धः अद्वैतकाव्यग्रन्थ इति वक्तुं शक्यते । सरस्वतीभवनग्रन्थमालायां मुद्रितः । अस्य व्याख्या दर्पणाख्या धर्मय्यदीक्षितकृता ॥ यात्राप्रबन्धमञ्जर्यपि अदसीया कृतिः ॥

237. साधुशान्तिनाथः (1800–1900 A.D.)

एकोनविंशतिशतकीयोऽयं साधुशान्तिनाथः । अनेन कृतात् ग्रन्थात् अस्याचार्यादि न ज्ञातुं पार्यते ॥

1. अद्वैततत्वप्रबोधिनी ॥ भागद्वयपरिमितोऽयं प्रकरणग्रन्थः अद्वैतसिद्धान्तप्रतिपादकानां बहूनां अमुद्रितग्रन्थेषु विप्रकीर्णानां युक्तिराशीनां सङ्ग्राहकः भारतीयवेदान्तसंस्थायां (इण्डियन् इंस्टिट्यूट आफ फ़िलोसफि) अमलनेरनगरे मुद्रितः ॥

238. सीतारामः (1600–1700 A.D.)

कौण्डिन्यगोत्रजः उत्तरमायूरक्षेत्रवासी चोलदेशीयस्सीतारामशास्त्री षोडशशतकापरार्धकालिक इति दासगुप्तः ।

1. अद्वैतसुधा । (33 L. 25 AL.)

उत्तरमीमांसासारार्थसुधा उत्तरमीमांसासारार्थसुधानिधिः वेदान्तार्थसारसंग्रहः वेदान्तसारचिन्तामणिरित्यपरनामायं सूत्रवृत्तिग्रन्थ अमुद्रित अडयारपुस्तकालये मद्रासवेङ्कटेश्वरअनन्तशयनराजगृहविश्वभारतीशान्तिनिकेतनपुस्तकालयेषु लभ्यते ।

2. अद्वैतानन्दानुभूतिः । (547 TCL.) स्वानुभूतिशैल्यामारचितोऽयं अनन्तशयनपुस्तकालये लभ्यते ।

3. तैत्तरीयोपनिषद्व्याख्या—आगमामृतम् (D. 514 MGOML)

4. वेदान्तकौस्तुभः (R. 4143 MGOML)

239 सुखप्रकाशः (1200–1300 A.D.)

"चित्सुखाख्यनखरायुधं नुम" इति अधिकरणरत्नमालायां, तत्वप्रदीपिकाव्याख्याभावद्योतनिकायां "चित्सुखाख्यमुनिपुङ्गवगीर्विलासान् वाचस्पतिः परमिह क्षमते विवेक्तुं" इति च वदन्नयं सुखप्रकाशः चित्सुखशिष्य इति ज्ञायते ।

सुखप्रकाशयतिनं तं नौमि विद्यागुरुमिति अमलानन्देन नमस्कृतोऽयं अमलानन्दगुरुश्चेति निश्चीयते । अमलानन्देन "आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुमिति निर्दिष्टत्वात् सुखप्रकाश आनन्दात्मनोऽपि शिष्य इति, आनन्दगिरिरपि सुखप्रकाशशिष्यो भवितुमर्हतीति च श्रीकण्ठशास्त्री (I. H. Q. XIV) वदति । तस्मादयं त्रयोदशशतकीयः ।

1. अधिकरणरत्नमाला (R. 2902 MGOML) सूत्रवृत्तिरूपोऽयं ग्रन्थः मद्रासपुस्तकालये लभ्यते ।

2. तत्वप्रदीपिकाव्याख्या—भावद्योतनिका (R. 2902 MGOML) चित्सुखीयतत्वप्रदीपिकाव्याख्यात्मकः ।

3. न्यायापदेशमकरन्दव्याख्या—विवेचनी । न्यायमकरन्दव्याख्यात्मकः सरस्वतीमहालये शृङ्गगिरिसूच्याञ्च लभ्यते ।

4. न्यायदीपावलीतात्पर्यटीका । (54 D.) शृङ्गगिरिसूच्यां दृश्यते ।

240. सुन्दररामशास्त्री (1850–1920 A. D.)

ब्रह्मानन्द इत्याश्रमस्वीकारादनन्तरं प्रसिद्धस्य रामलिङ्गार्यस्य पुत्रः मधुरावासी दाक्षिणात्य एकोनविंशतिशतकापरार्धवासी स्वपितुरेवावाप्तविद्य इति ज्ञायते ॥

1. सर्ववेदान्ततात्पर्यसारसंग्रहः । ग्रन्थेऽस्मिन् अद्वैतसिद्धान्ता अधिकरणार्थसंग्राहकश्लोकाः औपनिषदानि सङ्कलनात्मकवाक्यानि च दृश्यन्ते । 779 पद्यैः पूर्णोऽयं विक्टोरियामुद्रणालये मुद्रितः ॥

241. सुब्रह्मण्यः (1650–1750 A.D.)

दक्षिणदेशीयश्रीवत्सगोत्रजोऽयं सिद्धान्तसिद्धाञ्जनकर्तुः कृष्णानन्दस्य शिष्यः इति ज्ञायते ।

1. पञ्चरत्नप्रकाशः (7552 TSML) सरस्वतीमहालयेऽमुद्रित उपलभ्यते ॥

242. सुब्रह्मण्य मणेरीकर (1600–1700 A.D.)

नीलकण्ठयज्वनः पुत्रोऽयं सप्तदशशतकवर्तीति ग्रन्थाज् ज्ञायते ॥

1. महावाक्यनिरूपणप्रक्रिया । (2084 DC. BUL)

243. सुब्रह्मण्यशर्मा (1890–1930 A. D.)

बङ्गलूरसमीपस्थयलम्बसिग्रामवासी सुब्रह्मण्यशर्मायं विंशतिशतकीय इति ज्ञायते ॥

1. मूलाविद्यानिरासः । शङ्करहृदयापरनामायं ग्रन्थः अद्वैतवेदान्तविचारसरण्यां अविद्यास्वरूपं अविद्याविषयं अविद्याश्रयं अविद्याकार्यञ्च प्रतिपादयन् अविद्यानिरासे उपायञ्चावेदयति । मुद्रितोऽयं अध्यात्मप्रकाशमुद्रणालये बंगलूरनगरे ॥

244. सुब्रह्मण्यशास्त्री (1879–1947 A. D.)

मिण्डिसोमयाजिवंशजः मलबारदेशीयपालघाटसीमान्तर्गतकाविशेरीग्रामवासी तिरुप्पुणत्तुरै संस्कृतकलाशालायाः प्राप्तवेदाध्ययनः व्याकरणगणितशास्त्रेष्वपि व्युत्पन्नोऽयं शोणाद्रिसूरिणः वेङ्कटपण्डितस्य च शिष्यस्सुब्रह्मण्यशास्त्री आधुनिक इति ज्ञायते । न्यायशास्त्रेऽप्यस्य कृतयः श्रूयन्ते ॥

1. उपनिषत्सारसंग्रहः । (R. 2182 MGOML)

अद्वैतवेदान्तप्रस्थानत्रयस्यातिविस्तरेण तदवलोकनासमर्थानां मन्दाधिकारिणां सुखेन आत्मस्वरूपावगतये रामपार्थनामुखेन अद्वैतभावान् प्रकटयन्नयं प्रकरणग्रन्थः औपनिषदानर्थान् वर्णयति । बृहदारण्यकात् ऋते अन्यास्सर्वा अपि उपनिषदः ग्रन्थेऽस्मिन् उपवर्णिताः । ग्रन्थोऽयं मद्रासपुस्तकालयेऽस्ति ॥

2. ब्रह्मसूत्रभाष्यार्थरत्नमाला । पद्यात्मकः भाष्यार्थसंग्राहकः ग्रन्थ आनन्दाश्रमे मुद्रितः ॥

3. भामतीविवरणमप्यनेन कृतमिति ज्ञायते ।

तर्कसंग्रहव्याख्यासिद्धान्तरत्नमाला, घटभाष्यव्याख्या, सांख्यतत्त्वकौमुदी, योगवाचस्पत्यव्याख्या, व्याकरणसूत्रवृत्तिः, गुणखण्डदिनकरीयव्याख्याश्चानेन कृता इति ज्ञायते ॥

245. सुब्रह्मण्यशास्त्री (20th Cent. A. D.)

दक्षिणदेशीयवेप्पत्तूरग्रामाभिजनाः वेङ्कटरामश्रौतिनां पुत्राः विश्वनाथशास्त्रिणां शिष्याः विंशतिशतके प्रसिद्धाः पण्डितोत्तमाः शास्त्रेषु प्रकाण्डपण्डिताः पण्डितराजविरुदभूषिताः व्युत्पत्तिवादव्याख्यातारः चिदम्बरम्अण्णामलैविश्वविद्यालय-

प्राध्यापकाः भारतराष्ट्रपतिभिः विरुददानेन अलंकृता एते शाब्दतरङ्गिण्यादिग्रन्थ-कर्तारो राजन्ते । एतैस्सम्पादिता ब्रह्मानन्दीयभावप्रकाशिका विद्यते ।

246. सूर्यनारायणशुक्लः (1900–2000 A. D.)

वाराणसीवासी प्रसिद्धानां चिन्नस्वामिशास्त्रिमहोदयानां सखा सूर्यनारायण-शुक्लोऽयं विंशतिशतकीय इति वाराणसीसंस्कृतकलाशालाध्यापक इति च ज्ञायते ॥

1. खण्डनखण्डखाद्यसारः खण्डनरत्नमालिका (B.S.S.)

2. माध्वमुखभङ्गः । द्वैतवादं खण्डयन् अद्वैतस्य श्रुतिपुराणादिप्रमाणेन उपादेयतां प्रतिपादयन्नयं ग्रन्थः हितचिन्तकमुद्रणालये वाराणस्यां मुद्रितः । अद्वैतभ्रान्ति-प्रकाशापराख्य - अद्वैतरसनाकर्तर्याख्यद्वैतग्रन्थस्य खण्डनपरः ।

3. मध्वभ्रान्तिनिरासः । ग्रन्थोऽयं नारायणाचार्यद्वारा प्रकाशितस्य द्वैतसिद्धान्त-मण्डनपरस्य अद्वैतविमर्शाख्यग्रन्थस्य खण्डनपर अद्वैतमतसाधकः मुद्रितश्च ॥

247. सूर्यसूरिः (1600 A. D.)

दैवज्ञसूर्यपण्डितापरनामायं नृसिम्हचम्पूकर्ता षोडशशतकीयः । अनेन वेदान्ते प्रबोधसुधाकरनामा ग्रन्थः प्रणीतः । स च शङ्कराचार्यकृतत्वेन मुद्रितः । अमुद्रितोयं सूर्यसूरिकृतः ग्रन्थः बरोडापुस्तकालये लन्दनपुस्तकालये च लभ्यते ॥

1. प्रबोधसुधाकरः (5766 BRd, 2359 IOL)

248. सोमनाथव्यासः (1800–1900 A. D.)

गुजरातदेशीयोऽयं नागरब्राह्मणः साहूरपाठशालायाः संस्कृताध्यापक आसीत् । आश्रमस्वीकारादनन्तरं ब्रह्मतारकतीर्थ इति प्रसिद्धः ।

1. अद्वैतपद्यभाष्यम् ।

2. अद्वैतप्रकाशिका । उभावपि ग्रन्थौ उज्जयिन्सूच्यां दृश्येते ।

249. स्वयम्प्रकाशयतिः (1550–1650 A.D.)

स्वरचितग्रन्थेषु सर्वेषु कैवल्यानन्दयोगिनं नमस्कुर्वन्नयं स्वयम्प्रकाशः कैवल्यानन्दात् प्राप्तविद्यः, शुद्धानन्दञ्च प्रणमन्नयं शुद्धानन्दाच्च प्राप्तविद्यः इति

ज्ञायते । सच्चिदानन्दयोगिनः कृपावलोकनेन तीर्णस्संसारवारिधिरिति वदन्नयं सच्चिदानन्दात्प्राप्तदीक्ष इति ज्ञायते ।

स्वग्रन्थेषु गोपालयोगी शिवानन्दयोगी चानेन नमस्कृतौ । सरस्वतीमहालयस्थे रसाभिव्यञ्जिकाख्ये अद्वैतमकरन्दव्याख्याने बोधज्ञानेन्द्रः गीर्वाणयोगी नारायणेन्द्र योगी च नमस्कृताः । तस्मात् केचनेमं गीर्वाणेन्द्रशिष्यं वदन्ति ।

श्रीकण्ठशास्त्रिणस्तु विद्यारण्यादर्वाचीन आनन्दगिरिगुरुभिन्नस्य शुद्धानन्द-द्वितीयस्य शिष्योऽयं कैवल्यानन्दस्यापि शिष्यस्स्वयम्प्रकाशष्षोडशशतकीय इति वदन्ति ।

बन्दरकारप्राच्यभाषानुसन्धानालयपुस्तकालयस्थे रसाभिव्यञ्जिकाख्ये तस्य प्रतिलिपिकालः 1626 श 1626 A. D. इति दृश्यते । एवं अस्य कालष्षोडश-शतकापरार्धादारब्ध इति ज्ञायते ।

कैवल्यानन्दयोगी — शुद्धानन्दः — सच्चिदानन्दः

स्वयम्प्रकाशयतिः

1. अद्वैतमकरन्दव्याख्या—रसाभिव्यञ्जिका । वाणीविलासे मुद्रितः ।

2. दक्षिणामूर्त्यष्टकव्याख्या—तत्वसुधा (R. 1132 MGOML) सरस्वतीमहालये नासिक शृङ्गगिरिपुस्तकालये च लभ्यते ।

3. हरिमीडेस्तोत्रव्याख्या—हरितत्वमुक्तावलिः । मैसूर बिब्लियोथिकाग्रन्थमालायां 20 मुद्रितः ।

250. स्वयम्प्रकाशानन्दः (1550–1650 A. D.)

शिवरामयोगिप्रशिष्यः गोपालानन्दसरस्वतीशिष्यः रामानन्दस्य रामानन्दस्य गुरोः गोविन्दानन्दस्य च सतीर्थ्यः स्वयम्प्रकाशानन्दष्षोडशशतकमध्यवर्तीति निश्चीयते । एतदीये पञ्चीकरणविवरणे गुरुपरम्परा—

पूर्णानन्दसरस्वती
|
पुरुषोत्तमसरस्वती
|
शिवरामानन्दसरस्वती
|
गोपालानन्दसरस्वती
|
गोविन्दानन्दः | स्वयम्प्रकाशानन्द इति दृश्यते।

1. एकश्लोक (किंज्योतिश्लोक) व्याख्या—स्वात्मदीपनम् (D. 4570 MGOML) सरस्वतीमहालय - अडयार - अनन्तशयन - वेङ्कटेश्वर - पुस्तकालयेषु लभ्यते ।

2. द्वादशमञ्जरिकाव्याख्या—मकरन्दः (R. 4079 A. MGOML) भजगोविन्द-मोहमुद्गरापरनामक द्वादशमञ्जरिकाव्याख्यात्मकोऽयं मद्रास अनन्तशयनयोर्लभ्यते ॥

3. पञ्चीकरणविवरणम् (7299 TSML)

4. परमसिद्धान्तसारः (D. 4643 MGOML)

5. वेदान्तसंग्रहः (7622 TSML) संसारमहातापतप्तानां भाष्यादिमहानदीप्रवाहावगाहनासमर्थानां तापनिवृत्त्यर्थं प्रपापरिकल्पनमिव ऋजुना मार्गेण अद्वैतब्रह्मविज्ञानाय कृतः प्रकरणग्रन्थः सरस्वतीमहालये लभ्यते ॥

6. हस्तामलकश्लोकव्याख्या (7412 TSML)

251. स्वयम्प्रकाशानन्दः (1700–1800 A.D.)

ब्रह्मविद्याभरणकारस्य अद्वैतानन्दसरस्वत्याशिष्यः, विवरणोपन्यासकारस्य रामानन्दस्य प्रशिष्यः रत्नप्रभाव्याख्यातु अच्युतकृष्णानन्दस्य मानमालाकाररामानन्दस्य चाचार्यस्सप्तदशशतकीयापरार्धोदारण्धाकालवासीति निश्चीयते ।

1. वेदान्तनयभूषणम् । भामतीप्रस्थानानुयायी ब्रह्मविद्याभरणार्थानां संग्राहकः सूत्रवृत्तिरूपः ग्रन्थ अमुद्रितः रायल आसियाटिक सोसाइटि पुस्तकालये कलकत्तायां लभ्यते ।

252. स्वयम्प्रकाशयोगी (1700–1900 A.D.)

अनेन महादेवसरस्वतीकृततत्त्वानुसन्धानस्य व्याख्या कृता । तस्मिन् प्रतिलिपिकालः (1899 सं. 1843 A.D.) इति दृश्यते । तस्मादस्य सप्तदशैकोनविंशतितकमध्यमिति परं ज्ञायते ।

1. आत्मानात्मविवेकः (D. 4560 MGOML) अडयारपञ्जाबमद्रासपुस्तकालयेषु लभ्यते ।

2. तत्वानुसन्धानव्याख्या (615 Panjab)

3. प्रमाणविभागश्लोकव्याख्या (22 D. 86 प्र 4 AL.)

4. माण्डूक्यकारिकाव्याख्या — मिताक्षरा (B. S. S. 48)

253. स्वयम्प्रकाशमुनिः (1750–1825 A.D.)

वासुदेवेन्द्रप्रशिष्यः, वासुदेवेन्द्रशिष्यः उपनिषद्ब्रह्मकृष्णानन्दरामब्रह्मेन्द्र-कर्माकर्मविवेककाररामचन्द्राणां सतीर्थ्यस्सप्तदशअष्टादशशतकीय इति ज्ञायते ।

1. गुणत्रयविवेकः (R. 4209 C, MGOML., AL.)

2. चिदचिद्ग्रन्थिविवेकः (7670 T. S. M. L.)

3. स्वरूपब्रह्मभावना (7669 T. S. M. L.) मुमुक्षूणां असम्भावनाविपरीतभावनाविरोधिनिजानन्दानुभवानुकूलसमाधिचतुष्टयेऽपि स्वस्वरूपब्रह्मभावनाया अवस्थानोपायप्रदर्शकोऽयं ग्रन्थ अमुद्रितस्सरस्वतीमहालये लभ्यते । हरतत्वमुक्तावलिरप्यस्य कृतिः ।

254. स्वामियतिः (1750–1820 A.D.)

विरूपाक्षपुत्रः धारणकोटिकुलोत्पन्नोऽयं स्वामियतिः ब्रह्मानन्दशिष्यः रसरामशैलशशिगे शकवत्सरे (1736–1813 A.D.) काले स्वग्रन्थं समापितवानिति ज्ञायते ।

1. ब्रह्मानन्दविलासः (R. 4063 MGOML)

2. माण्डूक्यकारिकाव्याख्यापि कृतेति ज्ञायते । तस्याः मिताक्षरेति नाम । परन्तु स्वयम्प्रकाशानन्दकृतायाः मिताक्षरायाः अभिन्ना वा उतनेति न ज्ञायते ।

255. स्वामिशास्त्री (1750–1825 A. D.)

प्रसिद्धानामप्पय्यदीक्षितानां वंश्यः त्यागराजाध्वरिपौत्रः नीलकण्ठाध्वरिपुत्रः चोळदेशीयः स्वामिशास्त्री अष्टादशशतकीय इति निश्चीयते ।

1. श्रीभाष्यदूषणम् । (20 F. 44. AL)

256. हरिभास्करः (1650–1700 A. D.)

आपाजीभट्टपुत्रोऽयं हरिभास्करः । अदसीयः मुक्तोपदेशाख्यः ग्रन्थ अनूप-सूच्यां दृश्यते ।

1. मुक्तोपदेशः । (152 DC Anup)

257. हरीदीक्षितः (1700–1800 A. D.)

लक्ष्मीनरहरिदीक्षितपुत्रः रामरायगुरुश्चायं हरिदीक्षितः स्वग्रन्थं 1658 शकवत्सरेषु समापितवानिति अष्टादशशतकीय इति निश्चीयते ।

1. ब्रह्मसूत्रवृत्तिः । (ASS. 82)

258. हरिहरपरमहंसः (1750–1850 A. D.)

शिवरामस्य विश्वेश्वराश्रमस्य च शिष्योऽयं हरिहरपरमहंसः अष्टादशशतकापरार्धकालवासीति निश्चयः । दासगुप्तस्तु एकोनविंशतिशतकपूर्वभागवासिनं मनुते ।

1. अनुभवविलासः । (R. 3763 MGOML) गुरुशिष्यसंवादरूपेऽस्मिन् ग्रन्थे जीवब्रह्माभेदस्साधितः । अमुद्रितोऽयमनुभवप्राधान्यमावहन् ग्रन्थः मद्रासराजकीयहस्तलिखितपुस्तकालये लभ्यते ।

—: 0 :—

अद्वैतग्रन्थकाराः

परिच्छेदेऽस्मिन् अज्ञातकालादिविषयविशेषा अद्वैतग्रन्थकारा वर्णमालाक्रमेण वर्ण्यन्ते । तेषां ग्रन्थाः, तेषां कालादिनिर्णये सम्मतानि प्रमाणानि, कालादिनिर्णयाशक्तेः कारणानि च प्रतिपाद्यन्ते ॥

259. अखिलात्मा

अयमखिलात्मा रामयत्यपराख्यदशरथप्रियपूज्यपादशिष्य इति "दशरथप्रियमस्करिभास्करस्फुटपदाम्बुजचिह्नितमस्तकः" इति पद्यांशाज् ज्ञायते । अदसीये ग्रन्थे सर्वज्ञात्मा, संक्षेपशारीरकम्, भर्तृप्रपञ्चः, व्यवस्थामातृकाश्च ग्रन्था निर्दिष्टाः । 425 पुटे पञ्चदश्यां कूटस्थदीपप्रकरणे यादृशोऽर्थस्समुपपादितस्तादृश एव वर्णितः । परन्तु पञ्चदश्या पद्यं न किमप्युद्धृतम् । तस्मात् पञ्चदश्या पूर्वतनः सर्वज्ञात्मन अर्वाक्तनस्स्यादिति ऊह्यते ।

1. नैष्कर्म्यसिद्धिव्याख्या—विवरणम् (R. 4340 MGOML) अड्यारपुस्तकालये (39 B. 17 AL) अनन्तशयने (298 T.C L.) च लभ्यते ॥

260. अच्युतमुनिः

अच्युतमुनिरयं सिद्धान्तबिन्दौ मधुसूदनसरस्वत्या निर्दिष्टः । शिवभक्तोऽयमच्युतमुनिर्मधुसूदनकालात्प्राक्तन इति परं निश्चीयते । अनेन स्मृतयः श्रुतयः परं प्रमाणत्वेन निर्दिष्टाः ।

1. अद्वैतनिर्णयः । (R. 2264 MGOML)

प्रकरणग्रन्थोऽयं नव्यन्यायाश्रितया सरण्या आत्मनस्स्वप्रकाशत्वसमर्थनपूर्वकं पञ्चेन्द्रियाणां परिष्कारं करोति । पञ्चभिरध्यायैः प्रत्यक्ष-अनुमान-उपमान-आगम-अनुपलब्धिप्रमाणानि विशदयति ॥

261. अच्युताश्रमी

अद्वैताचार्यं प्रणमन्नयं स्वीयग्रन्थे अद्वैतसिद्धान्तान् सङ्गृह्णाति ।

1. वेदान्तसंग्रहः । (R. 2213 C. MGOML) प्रकरणग्रन्थोऽयमपूर्णं अमुद्रितश्च ।

262. अद्वैतानन्दतीर्थः

दक्षिणदेशवासी श्रीरङ्गचिदम्बरादिपुण्यक्षेत्रवासी चायं अद्वैतानन्दः सदानन्दतीर्थशिष्यः। अस्य पूर्वाश्रमे पितुर्नाम माधवसूरिरिति। माता महालक्ष्मीः। हरितगोत्रजः। अनतिप्राचीन इति परं ज्ञायते।

1. अद्वैतानन्दलहरी। पञ्चोपनिषत्तात्पर्यदीपिकापरनामायं ग्रन्थ ईशादिमुण्डकान्तानामुपनिषदां तात्पर्यं गृह्णाति। ब्रह्मविद्यामुद्रणालये मुद्रितः।

2. तैत्तरीयोपनिषत्तात्पर्यदीपिका। ब्रह्मविद्याप्रेसि मुद्रितः।

3. ब्रह्मसूत्रतात्पर्यदीपिका। तेलुगुलिप्यां मुद्रिता। अस्य व्याख्या तात्पर्यविमर्शिन्याख्या गुरुमूर्तिशास्त्रिकृता।

263. अद्वैतेन्द्रसरस्वती

अनेन "वेदान्तमञ्जरी" नामा ग्रन्थः कृतः। अमुद्रितोऽयं विश्वभारतीग्रन्थ कोशालये 1698-1995 लभ्यते। प्रतिलिपिकालः (1776 A.D.) स्वानुभवतरङ्गनामा ग्रन्थोऽपि कृत इति ज्ञायते।

264. अनन्तपण्डितः

अनेन स्वानुभूतिनाटकं कृतम्। ग्रन्थोऽयं जयपुरपोटीखानासूच्यां XXVI 2/12 लभ्यते।

265. अनन्तराममुनिः

अनन्तरामभगवानिति नाम्ना प्रसिद्धोऽयं कृष्णरामपूज्यपादानां शिष्य इति ज्ञायते।

1. सम्प्रदायतिलकम् (R. 3438 B. MGOML, 260 B. TCL)

2. समाधिप्रक्रिया। (R. 2946 MGOML, 657 G. T. M. P. L.)

पञ्चीकरणवार्तिकापरनामायं ग्रन्थ अनन्तशयनमहाराजपुस्तकालये च लभ्यते।

3. तत्वसिद्धान्तबिन्दुः (608) पञ्जाबसूच्यां दृश्यते।

266. अप्पकविः

अप्पलिसूरिरिति चास्य नाम। अस्य पिता सोमनाथद्विवेदीश्रोत्रियः। नरसिम्हार्यशिङ्गार्यशिष्यः।

1. तत्वदर्पणम्। (R. 2271 MGOML) नायं सम्पूर्णग्रन्थ अद्वैतपरः। द्वितीयेऽध्याये परं अद्वैतसिद्धान्ताः प्रतिपादिताः। अद्वैतदर्पणमिति नाम च निर्दिष्टम्।

267. अभिनन्दः

तर्कवागीश्वरसाहित्याचार्यगौडमण्डलालङ्कारादिविशेषणविशिष्टोऽयं अभिनन्द इति ज्ञायते। अस्य कालादिनिर्णयः ग्रन्थात्र लभ्यते। आत्मसुखकृतायां वासिष्ठचन्द्रिकायां "अभिनन्दो नाम काश्मीरपण्डित इति द्वितीये पुटे दृश्यते। तस्मात् काश्मीरीति परं निश्चेतुं पार्यते। परन्तु ग्रन्थान्तपुष्पिकायां गौडमण्डलालङ्कारेति दर्शनात् किमयं गौडीय उत काश्मीरीति संशयस्तुल्य एव। दासगुप्तस्तु अभिनन्दमेनं काश्मीरिणं मत्वा नवमशतकवर्तिनं (900 A. D.) मनुते। राघवमहोदयास्तु (J.O.R. Vol. XIII Page 126–8) जर्नलआफओरियण्टलपत्रिकायां लघुयोगवासिष्ठकारमभिनन्दमेनं नवमशतकीयाद्भिन्नं प्रवदन्ति॥

1. लघुयोगवासिष्ठम्। (N.S.P.)

षट्सहस्रसंख्यापरिमितैश्श्लोकैः पूर्णोऽयं ग्रन्थः निर्णयसागरमुद्रणालये मुद्रितः। अस्य व्याख्या आत्मसुखकृता वासिष्ठचन्द्रिका॥ मोक्षोपायाख्यः ग्रन्थोऽप्यनेन कृतः।

268. अमरेश्वरशास्त्री

स्वग्रन्थेषु दक्षिणामूर्तिं नमस्कुर्वाणोऽयं आन्ध्रदेशीयः भारद्वाजकुलोत्पन्न स्वम्मम्बाटिकुलोत्पन्नः न केवलं दक्षिणामूर्तिप्रसादेन लब्धमहावाक्यार्थोपदेशः परन्तु दक्षिणामूर्तीश्वराचार्यशिष्योऽपीति बिम्बदृष्टिविचाराख्यग्रन्थाज् ज्ञायते॥

1. अज्ञानध्वान्तचण्डभास्करः। (D. 4513 MGOML) दशभिः परिच्छेदैः पूर्णोऽयं तनीयान् ग्रन्थः जीवेश्वरस्वरूपौ सृष्टितत्वं, ज्ञानस्वरूपं वासनाक्षयसाधनानि जीवन्मुक्तस्वरूपं बन्धनिवृत्तिरेव मुक्तिरिति प्रतिपाद्य, निवृत्तिश्च प्राप्तिपूर्विकेति प्रथमं बन्धप्राप्तिं सपरिकरं निरूपयन् तदुच्छेदोपायांश्च विचारयन् करालमायाभिधरात्रि-

शायिनां मूलाज्ञानसंसारापारमहादुःखसमुद्रमग्नानां मुमुक्षूणां अज्ञानध्वान्तनिचय-मुच्चाटयन् चण्डभास्कर इव भवतीति अन्वर्थनामा ग्रन्थः आन्ध्रलिप्यां मुद्रितश्च ।
2. अज्ञानस्वरूपम् । (R. 1393 a) 3. अद्वैतरत्नप्रकाशः । (R. 5050)
4. अविद्यापिशाचीभञ्जनम् 5. आत्मतीर्थः 6. जीवराजविजयः 7. दक्षिणा-मूर्तिविलासः 8. प्रौढानुभवः । 9. बिम्बदृष्टिविचारः । (R. 5050 c)
10. महावाक्यार्थविचारः । 11. वासनाप्रतीकारशतकम् । 12. वेदान्तभेरी-भाङ्कारः । 13. विचित्रशतकम् । एते सर्वे ग्रन्थाः मैसूरपुस्तकालये केचन मद्रासपुस्तकालये च लभ्यन्ते ।

269. अवधूतशिवयोगीन्द्रः

अवधूतसदाशिवापरनामायं प्रसिद्धात् सदाशिवेन्द्राद्भिन्नः कर्णाटकदेशीयः परशिवयोगिशिष्यः कर्णाटकभाषायां शिवपराणां ग्रन्थानां रचयितेति ज्ञायते ।

1. वाक्यप्रकरणम् । (7573 TSML) तत्त्वमसिवाक्यार्थवर्णनपरोऽयं पूर्णः ग्रन्थ सरस्वतीमहालये लभ्यते ।

270. आदिनारायणः

आदिनारायणोऽयं विद्यारण्यं प्रणमति । "कल्याणाचलकोदण्ड" इत्या-दिना कल्याणाचलक्षेत्रपरामर्शात् पद्मनाभपुरसमीपस्थं कल्याणाचलपुरं अनेन निर्दिष्टं भवति । पारशवायसं कोटिद्वयञ्च राजाधिराजात् प्रार्थयन्नयं विशेषतः केरलीय इति निर्णीयते ।

1. अद्वैतामृतसारकम् । आर्याशार्दूलवृत्तघटितैः पद्यैः अद्वैतप्रक्रियाः प्रकाशयन्नयं ग्रन्थ अनन्तशयनपुस्तकालये 252 T. C. D. (812 C. O. L.) लभ्यते ।
2. चतुर्वेदमहावाक्यचिन्तामणिः । (286 T. C. . (812 C. G. L.)
3. षट्त्रिंशदद्वैततत्त्वमालिका । (386 T. C. D. (810 C. O. L.)

271. आनन्दज्ञ

वसुनन्दनभगवत्योः पुत्रेण चन्द्रशेखरफणिभूषणतर्कवागीशवामाचरण शिष्येण सीतापद्मयोः भर्त्रा मृत्युञ्जयधनञ्जयवसुन्धरा सत्यम्भराविश्वम्भराणां पित्रा दर्भङ्गामण्ड-लान्तर्गतसिम्हवाडाभिधग्रामजेन आनन्दज्ञपण्डितेन वेदान्तपरिभाषाव्याख्या भग-

वत्याख्या सुरुभबोधा (1911 A.D.) विरचिता, लक्ष्मणपुरीयाखिलभारतीयसंस्कृत-परिषदा प्रकाशिता च ।

272. आनन्दप्रकाशः

कोऽयमानन्दप्रकाश इत्यत्र न प्रमाणमुपलभ्यते । एतदीये हस्तामलकव्या-ख्याने "केचिदिमम् श्लोकम्" इत्यादिना (Page 10) षोडशशतकीयस्य स्वयम्प्रकाशयतिकृतस्य व्याख्यानस्य निर्देशः कृतः । तस्माद् षोडशशतकानन्तर-भावीति परं ज्ञायते ।

1. हस्तामलकटीका । (R. 3634 MGOML)

273. इच्छारामस्वामी

अनेन "सत्सुखानुभव" इति कश्चन ग्रन्थः कृतः यश्च नासिकग्रन्थालये हालसूच्यामपि (Page No. 129) दृश्यते ।

274. ऐयणाचार्यः

श्रीरङ्गवासी रामाचार्यपौत्रः गोपालाचार्यपुत्रः वसुधेन्द्रतीर्थशिष्यः इति निश्चयः । अनेन त्रिमतैक्यप्रकाशाख्यः ग्रन्थः प्रणीतः । अद्वैतानुयायी परिच्छेदस्तु द्वितीय एव ।

1. अद्वैतमतैक्यप्रकाशः । (292 T. C. D.) अमुद्रितोऽयं अनन्तशयने लभ्यते ।

275. कल्याणभट्टः

अनेन भगवद्गीतायाः काचन व्याख्या कृतेति मध्यप्रान्तीयबरार्ग्रन्थसूच्याः ज्ञायते । (1383 CCPB)

276. कविसरोजभिक्षुः

अनेन शङ्कराचार्यकृतत्वेन प्रसिद्धायाः "षट्पद्याः" व्याख्या कृता । अमु-द्रितोऽयं ग्रन्थः पञ्जाबपुस्तकसूच्यां 959 दृश्यते । प्रतिलिपिकालः (1796 A.D.)

277. काण्डद्वयातीतयोगी

हारीतगोत्रजोऽयं काण्डद्वयातीत अतिवर्णाश्रमी सन्यासस्वीकारात्पूर्वं काण्ड-यार्यनीराम्बयोः पुत्रः सामराजतीर्थशिष्य इति ज्ञायते । यद्यं सामराजः रतिकल्लो-

लिनीश्रीदामचरितशृङ्गारामृतलहर्याख्यादिग्रन्थकर्ता नरहरिदीक्षितपुत्रः आनन्दरायकालिकः मथुरावासी सामराजः स्यात्तर्हि काण्डद्वयातीतकाल (1775 सं 1719 A.D.) इति निर्णीयते ।

1. उत्तरगीताव्याख्या (7568 TSML)
2. सनत्सुजातीयभाष्यम् (7382 TSML)

278. कात्यायनः

अनेन ब्रह्मसिद्धान्ताख्यः कश्चन ग्रन्थः प्रणीतः यस्य खण्डिता काचन हस्तलिखितप्रतिः नासिकपुस्तकालये लभ्यते । अस्य व्याख्यापि कृष्णानन्दसरस्वती कृता तत्वबोधिन्याख्या वर्तते ।

1. ब्रह्मसिद्धान्तः सव्याख्यः (141 Nasik)

279. काशीरामः

न्यायालङ्कारभट्टाचार्यपुत्रोऽयं काशीराम इति ज्ञायते । सत्यज्ञानानन्दात्मकमद्वितीयं ब्रह्मैव शुद्धसत्वप्रधानमायोपाधिकं ईश्वरभावं मलिनसत्वप्रधानाविद्योपाधिकं जीवभावञ्च जगामेति वर्णयन् अद्वैतसिद्धान्तप्रकरणग्रन्थस्य नन्दरामतर्कवागीशकृतस्य आत्मप्रकाशकस्य व्याख्यां विरचितवानिति ज्ञायते । ग्रन्थोऽयं लन्दननगरपुस्तकालये लभ्यते ।

1. आत्मप्रकाशकव्याख्या (2400 I. O. L.)

280. कुबेरानन्दवर्णिः

अनेन "आत्मविवेचनिका" कृता । अमुद्रितोऽयं ग्रन्थः बरोडापुस्तकालये 758 लभ्यते । तस्य लेखनकाल (1791 सं. 1734 A.D.)

281. कृष्णभट्टः

मैनिकुलोत्पन्नोऽयं कृष्णभट्टः गोवर्धनभट्टपौत्र रघुनाथभट्टपुत्रः माधवेन्द्रसरस्वतीशिष्यः इति ज्ञायते ।

1. वृत्तिदीपिका । (2440 I. O. L.) तत्वमस्यादिमहावाक्यानां शाब्दबोधाय शाब्दबोधे च वृत्तिग्रहजन्योपस्थितेर्हेतुत्वेन ग्रन्थेऽस्मिन् वृत्तयः सपरिकरं निरूपिताः ।

282. कृष्णरामचक्रवर्ती

अनेन पञ्चदशीसारः कृतः । जयपुरसूच्यां (XVI 7) दृश्यते च ।

283. कृष्णशर्मा

आधुनिकेनानेन कृष्णशर्मणा अद्वैतसुधाबिन्दुः कृतः । ग्रन्थोऽयं (7999 Vol. I BRD.) बरोडापुस्तकालये लभ्यते ।

284. कृष्णावधूतपण्डितः

षड्भाषारसकविनानेन गुडपुरवासिना मतत्रयेऽपि ग्रन्थाः प्रणीताः—

1. अद्वैतसूत्रार्थपद्धतिः । (R. 5727 MGOML)
2. अद्वैतनवनीतम् । (R. 5750 MGOML) सूत्रार्थामृतलहर्यप्यनेन कृता ।

285. केशवसाक्षिभगवत्पादः

अनेन विद्यारण्यः नृसिम्हभारती च स्वीये ग्रन्थे निर्दिष्टौ ।

1. भगवद्गीताभाष्यसंक्षेपः (D. 2058 MGOML) लभ्यते ।

286. कैवल्यानन्दतीर्थः

महादेवतीर्थशिष्येणानेन कैवल्यानन्देन प्रणवार्थप्रकाशिका सव्याख्या कृता । व्याख्यायाः नाम अन्वयार्थप्रदर्शिनीति ।

1. प्रणवार्थप्रदर्शिनी (7619 TSML. 7758 TSML) नृसिम्हतापनीयसारात्मकोऽयं ग्रन्थस्सरस्वतीमहालये लभ्यते ।

287. कैवल्याश्रमी

अनेन महावाक्यविवरणापरनामा वेदान्तसारपञ्चीकरणग्रन्थः कृतः । द्वादशमहावाक्यविवरणात्मकोऽयं ग्रन्थः द्वादशभिः परिच्छेदैः पूर्णश्चौखाम्बायां मुद्रितः ।

288. कौण्डिन्यः

अनेन ब्रह्मसूत्रवृत्तिः कृता । मैसूरसूच्यां लभ्यते ॥

289. गणेशः

अनेन प्रबोधचन्द्रोदयीचिद्चान्द्रिकानामा कश्चन ग्रन्थः कृतस्स च बरोडा-पुस्तकालये (9672 B. R. D.) लभ्यते ।

290. गोकुलनाथः

न केवलं वेदान्ते परन्तु न्यायशास्त्रेऽपि निष्णातोऽयम् । अनेन कृतः मिथ्यात्वनिरुक्तिरहस्याख्यः ग्रन्थः (21 G. 6 AL.) लभ्यते । ग्रन्थोऽयं नव्य-तर्कशैल्यां प्रपञ्चमिथ्यात्वं साधयति । वियद्वारिवह्निवसुधादयः अचेतनः प्रपञ्चो मिथ्या जडत्वात् परिच्छिन्नत्वात् दृश्यत्वात् इत्यनुमानेन प्रपञ्चमिथ्यात्वं साधयन् यस्य यस्य वस्तुनः यत्र यत्र धर्मिणि यत्कालयद्देशावच्छेदेन येन येन संसर्गेण वैशिष्ट्यं प्रतीयते तत्र तत्र तदवच्छेदेन वर्तमानस्य तत्संसर्गावच्छिन्नप्रतियोगिता-कात्यन्ताभावस्य प्रतियोगित्वमेव तस्य वस्तुनो मिथ्यात्वमिति मिथ्यात्वलक्षणं साक्षेपपरिहारं निरूपयति । अदसीया न्यायग्रन्था अस्मदीये दर्शनमञ्जर्यां (p p. 47-48) द्रष्टव्याः ।

291. गोपालानन्दाश्रमः

अनेन स्वस्य दीक्षागुरुरद्वयानन्द इति प्रतिपाद्यते । ग्रन्थान्तपुष्पिकायान्तु अद्वैतानन्दशिष्य इति वर्ण्यते । यदि अस्य गुरोर्नाम अद्वयानन्द इत्येव स्यात्तर्हि वेदान्तसारकर्तुस्सदानन्दस्य सामयिक इति षोडशशतकीयो भवति । यद्यद्वैतानन्द एव अद्वयानन्दशब्देन निर्दिष्टस्स्यात्तर्हि तत्रापि ब्रह्मसूत्रदीपिकाकार अद्वैतानन्दः स्यात् तर्हि कालो दुर्निर्णयः । यदि ब्रह्मविद्याभरणकारस्यात्तर्हि द्वादशशतकीय-स्सप्तदशशतकीयो वा भवितुमर्हति ॥ न कोप्यनेन स्वग्रन्थे निर्दिष्टः ।

1. ब्रह्मतत्वसुबोधिनी (R. 1716 a MGOML) प्रकरणग्रन्थोऽयं वेङ्कटेश्वरपुस्त-कालयेऽपि लभ्यते ॥

292. गोविन्दानन्दगिरिः

अदसीया ब्रह्मसूत्रभाष्यार्थप्रदीपिका चौखाम्बायां मुद्रिता ।

293. चिदानन्दयोगी

अदसीयः सप्तदशभिश्शिखरिणीवृत्तनिबद्धैश्श्लोकैः पूर्ण आत्मबोधलहर्याख्यः ग्रन्थः नासिकसूच्यां दृश्यते ।

294. चिदम्बरयोगी

अद्वैतबोधदीपिका कृता । ग्रन्थोऽयं अनन्तशयनराजगृहपुस्तकालये लभ्यते ॥

295 चिद्घनभारती

सच्चिदानन्दसुखचिद्रूपभारतीशिष्योऽयं चिद्घनभारतीति ज्ञायते । अनेन कृतः प्रकरणग्रन्थः वेदान्तसारमननाख्यः तेलुगुलिप्यां मद्रासपुस्तकालये लभ्यते ॥

1. वेदान्तसारसंग्रहमननम् । (R. 1694 MGOML)

296. चिन्मयमुनिः

वेङ्कामात्यापरनामायं चिन्मयमुनिराधुनिक इति ज्ञायते ।

1. चिदद्वैतकल्पतरुः 2-परिमलः—चिदद्वैतकल्पतरुव्याख्या । एतावुभावपि ग्रन्थौ पञ्जाबसूच्यां दृश्येते । ब्रह्मसूत्रवृत्तिरित्यन्या कृतिः मैसूर सूच्यां दृश्यते ।

297. जयसिम्हः

जयपुरस्थापकोऽयं जयसिम्हः । अनेन ब्रह्मसूत्राणां वृत्तिः कृता । ग्रन्थोऽयं जयपुरसूच्यां XX 30/3 दृश्यते । अस्य व्याख्या शेषयादवपण्डितकृता सूत्रवृत्ति-प्रबोधिनी ।

298. ज्ञानदेवः

1. अनुभवामृतम् । (134 CC. PB.) लभ्यते

299. ज्ञानानन्दः

भगवत्पादशब्देन विशेषितो दृश्यते ।

1. अद्वैतसुधासारः । अमलापुरसूच्यां दृश्यते मुद्रितश्च ।

300. ज्ञानेन्द्रगुरुः

मध्वन्यक्कारनामा ग्रन्थः कृतः। सोऽयं ग्रन्थः अज्ञातकर्तृके मध्वमत-ध्वान्तदिवाकरे (I. A. 18 AL.) निर्दिष्टः।

301. त्रिविक्रमः

1. प्रपञ्चसारव्याख्या "विज्ञानद्योतिनी" (R. 2826 MGOML) लभ्यते।

302. दिव्यसिम्हमिश्रः

1. शारीरककारिकाभाष्यवार्तिकम्। एकेन द्वे निर्जित्येत्यादिश्लोकव्याख्यारूपोऽयं वाराणसीसंस्कृतकलाशालापुस्तकालये (109 DC. SKT) लभ्यते।

303. दुर्गाप्रसादयतिः

नारायणप्रियापरनामायं रामतीर्थं प्रमाणयति। गोविन्दाश्रमशिष्योऽयं उत्तर-देशवासी सप्तदशशतकादर्वाक्तन इति निर्णेतुं शक्यते।

1. अद्वैतप्रकाशः (R. 4208 MGOML)

नारायणीया वृत्तिरिति नामान्तरम्। नवभिः भागैः पूर्णोऽयं ग्रन्थः सूत्र-वृत्तिरूपः मद्रासराजकीयपुस्तकालये लभ्यते।

304. देवनारायणः

नीलकण्ठनारायणयोश्शिष्योऽयं देवनारायण इति ज्ञायते।

1. वेदान्तरत्नमाला। (607 TCL) कृष्णपरमात्मैक्यप्रतिपादकः प्रकरणग्रन्थः अनन्तशयनस्थः।

305. नन्दरामतर्कवागीशः

अनेन आत्मप्रकाशिका कृता। ग्रन्थोऽयं लन्दननगरपुस्तकालये (2400 IOL) लभ्यते। अस्य व्याख्या काशीरामकृता आत्मतत्त्वप्रकाशिकाख्या।

306. नन्दनार्यः

अनेन कृतः मोक्षधर्मदीपिकाख्यग्रन्थ असम्पूर्ण मैसूर पुस्तकालये (454) लभ्यते।

307. नन्दीशः

अनेन अविदितसुखदुःखस्येत्यादिपद्यस्य टीका कृता या च (21. DC. Anup) अनुपसूच्यां दृश्यते।

308. नारायणः

अनेन ब्रह्मानन्दप्रदीपिकाख्यः ग्रन्थः कृतः। आनुष्टुभैः पद्यैः पूर्णोऽयं प्रकरणग्रन्थ अमुद्रित अनन्तशयनराजगृहपुस्तकालये (608 TMPL) लभ्यते।

309. नारायणगजपतिराजः

नारारायवेङ्काम्बयोः पुत्रः जमदग्निगोत्रजः क्षत्रियोऽयमिति ज्ञायते। अनेन कृता कठोपनिषद्व्याख्या द्विमतप्रकाशिकापरनाम्नी शाङ्करभाष्यानुसारिणीं व्याख्यां द्वयोर्मतयोरन्यतमां स्वीकरोति। ग्रन्थोऽयं (10058 B. R. D.) बरोडापुस्तकालये लभ्यते।

310. नारायणविद्वान्

परदेशिभट्टपार्वत्योः पुत्रोऽयं नारायणभट्टः वेङ्कटाद्रिभट्टारकशिष्य इति ज्ञायते। अनेन धर्मराजाध्वरिकृतवेदान्तपरिभाषायाः व्याख्यारूपः भूषणनामा ग्रन्थः कृतः। अमुद्रितः मद्रास राजकीयपुस्तकालये (R. 1463 MGOML) लभ्यते।

311. नारायणसरस्वती

अदसीय अद्वैतसुधाख्यः ग्रन्थः बरोडापुस्तकालये (3820) वाराणसीसंस्कृत विद्यालयेऽपि लभ्यते॥

312. नारायणेन्द्रसरस्वती

पूर्णचन्द्रोदयनाम आध्यात्मिकविषयप्रधानं नाटकमारचितम्। ग्रन्थोऽयं जयपुरसूच्यां (XXI 98/5) लभ्यते॥

313. निर्मलकृष्णः

अनेन ब्रह्मसूत्राणां वृत्तिःकृता। निर्मलकृष्णभाष्यमिति नामान्तरम्। ग्रन्थोऽयं लन्दननगरपुस्तकालये IOL लभ्यते॥

314. नीलकण्ठदीक्षितः

अनेन ज्ञानाङ्कुशाख्यः ग्रन्थः सव्याख्यः कृतः। स चामुद्रित अडयार-पुस्तकालये (33 K. 3 म 9 AL) लभ्यते ॥

315. नृसिम्हभट्टः

अनेन अद्वैतबोधदीपिका (585 BRd), ज्ञानसर्वस्वसंग्रहः (Mysore) आनन्ददायिनी (TCL) ति ग्रन्थाः कृताः ॥

316. नृसिम्हप्रज्ञः

कुलशेखरशिष्योऽयं नृसिम्हप्रज्ञः। अनेन "न्यायतत्वविवरणम्" कृतम्। ग्रन्थोऽयं बृहदारण्यकवार्तिकस्य व्याख्यात्मकः मद्रासराजकीयपुस्तकालये (R. 3327 MGOML) अनन्तशयनशृङ्गगिरि - वेङ्कटेश्वर - पुस्तकालयेषु लभ्यते ॥

317. पञ्चाननभट्टाचार्यः

वङ्गदेशीयेन काश्यपान्वयजेन लक्ष्मणशास्त्रीद्राविड–योगेन्द्रनाथयोः शिष्येण श्रीनाथगङ्गादेव्योःपुत्रेण यादवपुरीविश्वविद्यालयदर्शनाध्यापकेन कृतः ग्रन्थः परिभाषासंग्रहाख्यः आगमानुसन्धानसमित्या कल्कत्तानगरे मुद्रितः। ग्रन्थोऽयं वेदान्तपरिभाषाव्याख्यारूपः मूलग्रन्थं सुगमं आपादयति।

318. परमहंसः

अनेन कृतः श्रुतिसारोद्धारः (1747) बरोडापुस्तकालये, आत्मनात्मविवेकः अडयारपुस्तकालये च लभ्यते ॥

319. परिव्राजकाचार्यः

प्रथमवर्णकमात्रान्तः विवरणभावप्रकाशिकाख्यः ग्रन्थः (900) पञ्जाबसूच्यां दृश्यते ॥

320. पापयाराध्यः

वेमनाराध्यवंशजः आन्ध्रदेशजोऽयं पापयाराध्य इति ज्ञायते। अनेन वेदान्तसंग्रहाख्यः प्रकरणग्रन्थः कृतः। स च (R. 2232 MGOML) लभ्यते।

321. पूर्णविद्यः

वेदपूर्णमुनीन्द्रशिष्योऽयम्। अनेन कृता पञ्चप्रक्रियाव्याख्या मद्रासराजकीयप्राचीनहस्तलिखितपुस्तकालये (R. 2793, b. MGOML) लभ्यते।

322. पूर्णानुभवः

वेदप्रकाशशिष्योऽयं पूर्णानुभवः। अनेन कृत आत्मज्ञानप्रकरणदीपिकाख्यः ग्रन्थः (261 TCL) अनन्तशयने लभ्यते।

323. पूर्णानन्दः

अष्टावक्रगीताव्याख्या (327 CCPB) तत्वम्पदार्थविवेकः (40 E. 54 AL) ब्रह्मभावनानिर्णयः (5728 BRD,) श्रुतिसारसमुच्चयः (D. 4557 MGOML) एते ग्रन्था पूर्णानन्दकृताः।

324. प्रगल्भमिश्रः

अनेन खण्डनखण्डखाद्यस्य व्याख्या खण्डनदर्पणाख्या कृता या च चौखाम्बामुद्रणालये लभ्यते।

325. प्रज्ञानेन्द्रः

वासुदेवेन्द्रशिष्योऽयं प्रज्ञानेन्द्र इति ज्ञायते। अनेन ब्रह्ममीमांसासूत्रसारसंग्रहः कृतः यश्च मद्रासपुस्तकालये (R. 399 c MGOML) लभ्यते।

326. प्रत्यग्विष्णुः

अनेन संक्षेपशारीरकव्याख्या कृता। सा च मधुसूदनसरस्वतीकृतसंक्षेपशारीरकसारसंग्रहोपोद्घाते निर्दिष्टा।

327. बलदेवविद्याभूषणः

अनेन कृतौ सिद्धान्तरत्नप्रमेयरत्नावल्याख्यग्रन्थौ चौखाम्बायां मुद्रितौ।

328. बालकृष्णानन्दः

शारीरकभाष्यसारः। ग्रन्थोऽयं जयपुरसूच्यां (XX 29/3) लभ्यते।

329. बालब्रह्मानन्दः

वेङ्कटकृष्णानन्दशिष्योऽयं बालब्रह्मानन्दः । अदसीयाः—आत्मानुभवस्तुतिः, कायशोधः, द्वासुपर्णाश्रुत्यर्थविचारः, मानदीपिका, मानदीपिकास्मृतिसारसंग्रहश्च मैसूरसूच्यां दृश्यन्ते । श्रुतिस्मृतिसारसंग्रहः बरोडापुस्तकालये लभ्यते ॥

330. बोधनिधिः

विद्याधामशिष्योऽयं बोधनिधिः । अनेन कृतं उपदेशसाहस्रीविवरणं (R. 1820 MGOML) मद्रास-सरस्वतीमहालय-अडयार-वेङ्कटेश्वर-विश्वभारती-शान्तिनिकेतन मैसूर पुस्तकालयेषु लभ्यते ॥

331. ब्रह्मवित्प्रवरदासः

अनेन कृतः चैतन्यप्रकरणाख्यग्रन्थः शृङ्गगिरिसूच्यां लभ्यते ॥

332. ब्रह्मनिराकारयोगीन्द्रः

अनेन श्रुतिगतानामद्वैतपराणां वाक्यानां सङ्कलनात्मकः जीवन्मुक्तप्रकरणान्तः ग्रन्थः श्रुतिसारसमुच्चयाख्यः (D. 4757 MGOML) पुस्तकालये लभ्यते।

333. ब्रह्मानन्दयोगी

सच्चिदानन्दशिष्योऽयं ब्रह्मानन्द इति परं ज्ञायते । अनेन कृता आत्मबोधव्याख्या-प्रणवदीपिका-प्रणवार्थप्रकाशिकाख्याः ग्रन्थाः मद्रासराजकीयपुस्तकालये लभ्यन्ते ॥

334. ब्रह्मानन्दयतिः

विश्वेश्वरानन्दशिष्योऽयं ब्रह्मानन्द इति ज्ञायते । अनेन कृतः ब्रह्मसूत्रभाष्यसिद्धान्तसंग्रहाख्यग्रन्थः (R. 3788 MGOML) लभ्यते ॥ चौखाम्बायां मुद्रितः ॥

335. ब्रह्मानन्दसरस्वती

रामराजसरस्वती - सदाशिवतीर्थयोरिशिष्योऽयम् । अनेन कृताः पुरुषार्थबोधः (R. 3309 MGOML) शिवगीताव्याख्या (R. 926 A. MGOML) प्रबोधशतकं (N.S.P.) इति ग्रन्थाः लभ्यते ॥

336. ब्रह्मेन्द्रसरस्वती

देवेन्द्रसरस्वतीशिष्यः वाणीगीरिरिति प्रसिद्धः । अनेन कृत अद्वैतामृतनामा सूत्रवृत्तिग्रन्थः प्रथमपरिच्छेदान्तं लन्दननगरपुस्तकालये (2405 IOL) लभ्यते । प्रबोधचन्द्रिकाख्यः ग्रन्थः बरोडापुस्तकालये लभ्यते । वेदान्तपरिभाषाख्यः ग्रन्थः (169 DC Anup) अनूपसूच्यां दृश्यते ।

337. भरद्वाजः

भरद्वाजगोत्रजोऽयं नाम्नापि भरद्वाजः । अनेन भगवद्गीतासङ्गतिमालाख्यः 135 पद्यैः पूर्णः ज्ञानयोग एव भगवद्गीतायास्तात्पर्यं वर्णयन्नयं ग्रन्थः कृतः यश्च मद्रासराजकीयपुस्तकालये (R. 5336 A. MGOML) लभ्यते । अस्य व्याख्यापि अज्ञातकर्तृका (R. 5336 b.) लभ्यते ।

338. भावावागीश्वरः

अनेन कृतः ब्रह्माद्वैतप्रकाशिकाख्यः ग्रन्थः (R. 3314 MGOML) लभ्यते । मुद्रितश्चायं केरले, भवन्स् जर्नलपत्रिकायां जूलै 1967 विमृष्टश्च ।

339. भासुरानन्दः

काशीवासी सन्नपि चोलदेशकावेरीतीरवासी सञ्जातः । अस्य शिष्येण उमानन्देन नित्योत्सवाख्यः ग्रन्थः कृतः यश्च (R. 2462 MGOML) लभ्यते । अनेन अष्टावक्रगीताव्याख्या कृता । या च (CCPB) लभ्यते ।

340. भीमदासभूपालः

अनेन वाक्यसुधायाः व्याख्या कृता । व्याख्यानेऽस्मिन् वाक्यसुधाकर्ता शंकराचार्य इत्येव दृश्यते । ग्रन्थोऽयं (7374 TSML) लभ्यते ।

341. भूधरः

अनेन शाङ्करसोपानपञ्चिकायाः व्याख्या साधनपञ्चकनाम्नी व्याख्या कृता (3848 B. R. D.) नासिकपुस्तकालययोर्लभ्यते ।

342. मथुरानाथशुक्लः

अनेन शाङ्करमाण्डूक्यभाष्यस्य व्याख्या कृता । ग्रन्थोऽयं दासगुप्तेन निर्दिष्टः (HIP Vol. II 78) ।

343. मुकुन्दः

पूर्णानन्दसरस्वतीप्रशिष्यः चिन्तामण्याचार्यशिष्योऽयं विवेकसिन्धुकाराद्भिन्न इति परं ज्ञायते। अनेन कृता "सुज्ञानविंशतिः" (7724) सरस्वतीमहालये, वेदान्ततात्पर्यविवेकव्याख्या (8941) बरोडापुस्तकालये, वेदान्तार्थविवेचनभाष्यम् 741 बरोडापुस्तकालये च लभ्यते ॥

344. मुम्मुडिदेवः

कोटिकलग्रामवासिनः नागमाम्बात्रिविक्रमाचार्ययोः पौत्रः भामतीतिलककर्तुरल्लालसूरेः पुत्रोऽयं मुम्मुडिदेव इति ज्ञायते ॥ अल्लालकालस्त्रयोदशचतुर्दशशतकमिति केचित्। षोडशसप्तदशशतकमिति परे। तस्मात् (1756 A. D.) प्राक्तन इति अन्ये। अनेन योगवासिष्ठव्याख्या संसारतरणिः कृतः। अनन्तशयननासिकपुस्तकालययोर्लभ्यते ॥

345. योगस्फुरणानुभवः

अनेन वेदान्तवार्तिकाख्यः ग्रन्थः कृतस्स च महीशूरसंस्कृतकलाशालापुस्तकालये लभ्यते ॥

346. राघवः

अदसीय आत्मतत्त्वनामा ग्रन्थः बौद्धसिद्धान्तान् खण्डयति मण्डयति च शाङ्करमतम्।

347. राघवानन्दः

विश्वेश्वरसरस्वती प्रशिष्यः अद्वयभगवतशिष्यश्चायं राघवानन्दः परमार्थसारव्याख्यातृ राघवानन्दाद् भिन्नः।

1. माण्डूक्यभाष्यार्थसंग्रहः। ग्रन्थोऽयं दासगुप्तेन (HIP II 78) निर्दिष्टः।
2. सिद्धान्तलेशसंग्रहव्याख्या—सिद्धान्तकौमुदी (12441 BRd)
3. संक्षेपशारीरकव्याख्या—विद्यामृतवर्षिणी। ग्रन्थोऽयं दासगुप्तेन (HIP Vol. II 116) निर्दिष्टः। हालसूच्यां नवमे पुटे निर्दिष्टः ॥

348. रामः

रामभद्रविदुषः पुत्र आत्रेयगोत्रजः नूजवीटीपुराधीशेन अप्परायेन पालितोऽयं रामपण्डित इति ज्ञायते।

1. अद्वैतसंग्रहः। प्रकरणग्रन्थोऽयं (19. M. 50 AL.) अनन्तशयने च लभ्यते।
2. सिद्धान्तसंग्रहः। त्रयीसिद्धान्तसंग्रहापरनामायं ग्रन्थः मद्रासपुस्तकालये (R. 1645 B) लभ्यते।

349. रामकृष्णः

तिरुमलरायापरनामकदिलारामपुत्रः कृष्णचन्द्रपौत्रः दत्तकुलतिलकोऽयं विश्वेश्वराश्रमशिष्यः रामकृष्ण इति ज्ञायते ॥

1. आत्मपुराणव्याख्या। सत्वसवापरनामास्य ग्रन्थस्य जयपुरसूच्यां दृश्यते। मुद्रितोऽयं ग्रन्थः ॥
2. मध्वमतचपेटिका। (R. 2263 B. MGOML)

अमुद्रितोऽयं ग्रन्थः सव्याख्यः मैसूर - मद्रास - बरोडा - वेङ्कटेश्वर - नासिकपुस्तकालयेषु लभ्यते। व्याख्यानाम प्रदीपः ॥

350. रामचन्द्रपण्डितः

सिद्धेश्वरसूरिपुत्रेणानेन कृतः दशोपनिषद्रहस्याख्यः ग्रन्थः बाम्बेसंस्कृतमुद्रणालये मुद्रितः ॥

351. रामचन्द्रबुधः

1. तत्वबोधप्रकरणम्। ग्रन्थोऽयं मैसूरपुस्तकालये लभ्यते ॥
2. जगन्मिथ्यात्वदीपिका (R. 3926 B.)
3. परमाक्षरविवेकः (R. 4209 J.)
4. परमाद्वैतदर्शनम् (R. 4209 A.)
5. भक्तिस्वरूपविवेकः (R. 4209 L.)

6. सत्तासाम्यविवेकः (R. 4209 R.) एते ग्रन्थाः मद्रासराजकीयपुस्तकालये लभ्यन्ते ॥

7. त्रिपाद्विभूत्यादिप्रकरणम् । मैसूरपुस्तकालये लभ्यन्ते ॥

352. रामचन्द्रयतिः

शिवरामतीर्थशिष्येणानेन कृता वाक्यसुधाटीका (4883 BRD) नासिकपुस्तकालये च लभ्यते ॥ सुबोधिनीनाम्नी सूत्रभाष्यटीकात्मकश्चतुस्सूत्र्यन्तः ग्रन्थः अद्वैतसभायां मुद्रितः ॥

353. रामदासः

अनेन कृते पञ्चप्रकरणीनामके ग्रन्थे ब्रह्मज्ञानविचारपूर्वकाध्यारोपापवादाः ज्ञानसाधनानि चोपवर्णितानि । ग्रन्थोऽयं (8 D. 68 AL) अडयारपुस्तकालये लभ्यते ॥ प्रबोधचन्द्रोदयव्याख्या-प्रकाशाख्यापि अनेन कृता विद्यते ।

354. रामब्रह्मेन्द्रयोगी

उपेन्द्रमहायोगिशिष्येणानेन लघुयोगवासिष्ठव्याख्या वासिष्ठतत्त्वबोधिनीनाम्नी कृता सा च (R. 3201 MGOML) लभ्यते ।

355. रामभद्रानन्दतीर्थः

अनेन नृसिंहाश्रमिकृतभेदधिक्कारस्य नारायणाश्रमिकृतायाः व्याख्यायास्सत्क्रियायाः व्याख्या उज्वलानाम्नी कृता । सा च (7595 B. R. D.) बरोडापुस्तकालये लभ्यते ।

356. रामयतिः

गोविन्दानन्दशिष्येणानेन रामतापिनीव्याख्या पदयोजनिकानाम्नी कृता सा च (D. 764 MGOML) लभ्यते।

357. रामशरणशास्त्री

अनेन सदानन्दीयवेदान्तसारस्य व्याख्या भावबोधिनी कृता सा च चौखाम्बायां मुद्रितः ।

358. रामानन्दः (अध्यात्मरामायणकारः)

रामशर्माख्यः कश्चन तपस्तप्त्वा महेश्वरात् रामभक्तिमयाचत । महेश्वरप्रसादाच्च रामभक्तः रामानन्दश्च सञ्जातः । कृष्णचैतन्यं गुरुमाश्रित्य तदाज्ञया वेदान्तसिद्धान्तप्रतिपादकं अध्यात्मरामायणं निर्मितवानिति "इत्युक्त्वान्तर्दधे देवो रामानन्दस्स चाभवत् । ....कृतं तदाज्ञया तेनाध्यात्मरामायणं शुभमिति" भविष्यपुराणे (Venkateswara Edn Page 358) श्लो. सं. 30-32 दृश्यते । रामानन्दोऽयं तुलसीदासेनानुसृत इति प्रसिद्धम् । तुलसीकालश्च (1532–1632 A.D.) तस्मात् रामानन्दः (1500 A.D.) काले आसीदिति निर्णेतुं शक्यते । बन्दरकारमहाशयस्तु रामानन्दं (1299–1400 A.D.) कालवर्तिनं मनुते । एवञ्चाध्यात्मरामायणनिर्माणकालः चतुर्दशशतकपञ्चदशशतकं भवितुमर्हति ।

1. अध्यात्मरामायणम् । रामगीता, रामहृदयम्, रामोपनिषद् अध्यात्मरामचरितम्, इति नामान्तराणि । शिवपार्वतीसंवादमुखेन प्रवृत्तोऽयं ग्रन्थः ।

"रामं विद्धि परं ब्रह्म सच्चिदानन्दमव्ययम् ।
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम् ॥
आनन्दं निर्मलं शान्तं निर्विकारं निरञ्जनम् ।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥"

इत्यादिना रामब्रह्मणोरभेदमुपवर्णयति । अस्य कर्ता सामान्यतः व्यास इति सम्प्रदायः । अस्य व्याख्याः—षोडशशतकीयेन बंगालवासिना नरोत्तमेन कृता काचन व्याख्या, रामवर्मकृता व्याख्या, गोपालचक्रवर्तिकृता अन्या व्याख्या च वर्तन्ते ॥ ग्रन्थोऽयं कलकत्तासंस्कृतमालायां (C. S. S. XI) मुद्रितः ॥

359. रामानन्दसरस्वती

मुकुन्दगोविन्दाचार्यशिष्योऽयं रामानन्दसरस्वती रामकिङ्करशर्मापरनामा एकोनविंशतिशतकात् प्राक्तन इति ज्ञायते । बाम्बे विश्वविद्यालयपुस्तकालयस्थे ब्रह्मामृतवर्षिणीग्रन्थे प्रतिलिपिकालः (1877 सं. 1821 A.D.) इति दृश्यते ।

1. ब्रह्मामृतवर्षिणी (A. S. S. 67) सूत्रवृत्तिरूपोऽयं ग्रन्थः । अस्य कर्ता रामकिङ्करशर्मा: धर्मभट्टः, सदाशिवानन्द इति बहुधा कथ्यते । ग्रन्थोऽयं सूत्राणां

सङ्गतिं सशयं पूर्वपक्षसिद्धान्तान् विवरणभामत्यादिकृतांश्च मतभेदान् प्रदर्शयन् शाङ्करभाष्यानुसारिणमर्थं सुलं बोधयति । ग्रन्थोऽयं आनन्दाश्रममुद्रणालये वाराणसीग्रन्थमालायाञ्च मुद्रितः ॥

2. श्रौताखण्डार्थसिद्धिः ॥ ग्रन्थोऽयं 1119 पद्यैः पूर्णं अखण्डार्थत्वं साधयति । अस्य प्रतिलिपिकालः 5000 कलिरिति दृश्यते । वाराणस्यां मुद्रितः ।

3. लघुवाक्यवृत्तिव्याख्या प्रकाशिका (782 B. R. D.)

360. रामाशास्त्री

अणुवेदान्तः, नवकोटिः उभावपि ग्रन्थौ मैसूरपुस्तकालये लभ्येते । ब्रह्मविचाराधिकारनिरूपणम् (R. 3086 MGOML) मिथ्यात्वानुमानम् (R. 145 A. MGOML.)

361. रामेश्वरभट्टः

सुब्रह्मण्यसूरिपुत्रोऽयं रामेश्वरभट्ट आधुनिक इति ज्ञायते ।

1. अद्वैततरङ्गिणी । ग्रन्थोऽयं मैसूर कूर्गसूच्यां दृश्यते ॥
2. ध्वान्तानुबन्धविकारः । (41 C. 93 AL.)
3. निगमार्थदीपिका 4. अद्वैतदीपिकानामा ग्रन्थः रैससूच्यां दृश्यते ॥

362. रुचिकरः

भानुकरभट्टपुत्रेण रुचिकरेण कृतः सिद्धान्तसंग्रह अनूपसूच्यां (205) दृश्यते ।

363. लक्ष्मणपण्डितः

दत्तसूरिपुत्रेणानेन कृतौ परमहंससंहिता सिद्धान्तसर्वस्वाख्यौ ग्रन्थौ अनूपसूच्यां दृश्येते ॥

364. लक्ष्मीनृसिम्हः

कौण्डिन्यगोत्रजेन कैपालक्ष्मीनृसिम्ह इति प्रसिद्धेनानेन अद्वैतवेदान्तसिद्धान्तान् चम्पूशैल्यां प्रतिपादयन् ज्ञानाङ्कुशाख्यः ग्रन्थः कृतः । स च अमुद्रितः मद्रपुरीपुस्तकालये मैसूरपुस्तकालये च लभ्यते ।

365. लिङ्गाध्वरी

अनेन कृतः वेदान्ततत्त्वनिर्णयाख्यः ग्रन्थः (R. 3903) मद्रासपुस्तकालये लभ्यते ॥

366. लिङ्गोजीपण्डितः

अनेन कृता व्यासभावप्रकाशिकाख्या भगवद्गीताव्याख्या (R. 2294 MGOML) लभ्यते ॥

367. लीलानन्दः

स्वात्मानन्दनाथशिष्येणानेन प्रणवोपासनामुखेन अद्वितीयात्मतत्त्वप्रतिपादकः ग्रन्थ अमुद्रित पञ्चब्रह्माख्यविवरणनामा कृतः यश्च (7701 TSML) लभ्यते ॥

368. वल्लभदीक्षितः

अनेन कृतस्तत्त्वदीपाख्यः ग्रन्थः । स चानादिस्सान्तश्च (38 E. 37. 107 AL) अड्यारपुस्तकालये लभ्यते ॥

369. वल्लभेन्द्रसरस्वती

काशीवासिना वासुदेवेन्द्रसरस्वतीशिष्येणानेन जाबालोपनिषदां मोक्षलक्ष्मीविलासाख्या अद्वैतपरा व्याख्या कृता या च (2433 IOL) लन्दननगरपुस्तकालये लभ्यते ॥

370. वामनपण्डितः

अनेन अनुभूतिलेशाख्यः ग्रन्थ कृतस्स च वाराणस्यां मुद्रितः ॥

371. वासुदेवज्ञानमुनिः

अनेन अद्वैतप्रकाशकाख्यः कैवल्यरत्नाख्यः ग्रन्थौ कृतौ । तयोः कैवल्यरत्नन्तु ब्रह्माद्वैतपराणां उपपुराणान्तर्गतानां वाक्यानां सङ्कलनात्मकम् । ग्रन्थोऽयं (R. 3628 MGOML) लभ्यते । अद्वैतप्रकाशकस्तु कैवल्यरत्ने निर्दिष्टः ॥

372. वासुदेवपरमहंसः

"मननाख्यं प्रकरणं वासुदेवयतीश्वरैः । रचितं विस्तरेणाथ संग्रहेण प्रकाश्यते ॥" इति वासुदेवेन्द्ररचिते लघुवासुदेवमनने दृश्यते । एवञ्चायं ग्रन्थः वासुदेवमननाख्यः वासुदेवपरमहंसकृतस्स एव वा अन्यो वेति निर्णये नास्ति

किमपि प्रमाणम् । परन्तु कुत्रचित् अस्यैव ग्रन्थस्य मननमिति, कुत्रचित् वासुदेवमननमिति च नाम दृश्यते ।

1. वासुदेवमननम् (7570 TSML) ग्रन्थोऽयं सरस्वतीमहालये विश्वभारतीशान्तिनिकेतने बरोडापुस्तकालये मध्यप्रान्तवराग्रन्थसूच्यां दृश्यते ।

373. वासुदेवयतिः

गोपालतीर्थशिष्येणानेन केरलवासिना आत्मबोधप्रकरणाख्यः ग्रन्थः कृतस्स च वेङ्कटेश्वरपुस्तकालये लभ्यते । आत्मानात्मविवेकव्याख्या पञ्चावस्थाविवेकश्च (R 5327 MGOML) लभ्येते । पञ्चावस्थाविवेकोऽयं ग्रन्थः जाग्रत्स्वप्नसुषुप्तिमूर्छामरणाख्या अवस्था अनिर्वचनीयाखण्डार्थत्ववादौ च प्रतिपादयति । वेदान्तप्रकरणनामा ग्रन्थः साक्ष्यसाक्षिविवेकः पञ्चावस्थाविवेकात्मकप्रकरणद्वयभेदेन भिन्न मद्रासराजकीयपुस्तकालये (R. 5327) लभ्यते ।

374. वासुदेवयतिः

रामकृष्णयतिशिष्येणानेन परमार्थसारस्य व्याख्या प्रकाशिकाख्या कृता सा च (R. 4149 C. MGOML) लभ्यते । वेङ्कटेश्वरपुस्तकालये च लभ्यते ॥

375 वासुदेवसरस्वती

अनेन कृता ब्रह्मप्रकाशिकाख्या कृतिः जयपुरसूच्यां दृश्यते ।

376. वासुदेवेन्द्रः

अनेन लघुवासुदेवमननाख्यः ग्रन्थः कृतः । स च वासुदेवपरमहंसकृतस्य मननग्रन्थस्य सारभूतः । मुद्रितश्चायं वाणीविलासमुद्रणालये ।

377. विज्ञानभिक्षुः

अनेन ब्रह्मसूत्रऋजुव्याख्यानामा ग्रन्थः कृतः । स च (722) पञ्जाबसूच्यां दृश्यते ।

378. विज्ञानवासयतिः

अस्य विज्ञानवासोयतिः विज्ञातवरयतिरिति च नामान्तरं दृश्यते । अनेन पञ्चपादिकायाः व्याख्या कण्ठीरवाख्या कृता । अमुद्रितोऽयं (666) पञ्जाबसूच्यां मद्रासराजकीयपुस्तकालये च लभ्यते ।

379. विज्ञानेश्वरः

वासुदेवेन्द्रशिष्योऽयं विज्ञानेश्वरः । अनेन महावाक्यप्रकरणाख्यः ग्रन्थः कृतः । महावाक्यार्थप्रदर्शनपरोऽयं ग्रन्थ अड्यारपुस्तकालये (27 E. 55 AL) लभ्यते ।

380. विट्ठलबुधभण्डारकः

अनेन वेदान्तशोधनाख्यः ग्रन्थः कृतस्स च सूत्रवृत्तिरूपः उज्जयिन् सूच्यां दृश्यते ।

381. विद्याभूषणः

अनेन ब्रह्मसूत्रतत्त्वार्थदीपिका कृता जयपुरसूच्यां दृश्यते ।

382. विनायकः

रामेश्वरपुत्रः राघवानन्दयोगिशिष्यश्चायं विनायकः । यद्ययं राघवानन्दः परमार्थसारव्याख्याता स्यात्तर्हि तस्य कालः (1600–1700 A. D.) इति निर्णेतुं शक्यते । विनायकोऽयं केरलवर्मसामयिकः ।

1. विवरणतत्त्वदीपनसारः (1955) बरोडापुस्तकालये लभ्यते ।
2. सिद्धान्तपञ्जरम् (R. 2941 MGOML)

383. विमलबुधाकरः

अनेन शाङ्कराद्वैतपञ्चकस्य व्याख्या कृता पञ्जाबसूच्यां दृश्यते । सिद्धान्तपञ्चकव्याख्या (976) इति नामान्तरम् ।

384. विश्वनाथः

काशीराजशिष्येणानेन वाराणसीवासिना कृत उपदेशसारः शाङ्करोपदेशसाहस्रीसारात्मकः दशभिरुल्लासैः पूर्णः सरस्वतीमहालये (7620 TSML) लभ्यते ।

1. वेदान्तसिद्धान्तरत्नमाला (11970 B. R. D.)
2. वाक्यार्थप्रकाशिका (3035 I.) विश्वभारतीशान्तिनिकेतनपुस्तकालये लभ्यते ।

3. सिद्धान्तलेशसंग्रहव्याख्या । प्रथमपरिछेदान्तोऽयं ग्रन्थः (987) पद्मावसूच्यां दृश्यते ।

385. विश्ववेदः

आनन्ददेवशिष्योऽयं विश्ववेदः रामतीर्थेन (1570–1670 A.D.) स्वीये संक्षेपशारीरकव्याख्याने निर्दिष्टः । तस्मात्पूर्ववर्तीति ज्ञायते ।

1. संक्षेपशारीरकव्याख्या "सिद्धान्तदीपः" ग्रन्थोऽयं सरस्वतीमहालये मद्रास (R. 1568) अनन्तशयनबरोडापुस्तकालयेषु (H. P. R. IV 317) लभ्यते ।

386. विश्वरूपदेवः

पराशरगोत्रजोऽयं शतगुणाचार्यपुत्रः रजन्विपुरवासी विश्वरूपदेव इति ज्ञायते । राधनपुरस्यैव रजन्विपुरमिति मुहम्मदीयाक्रमणात्पूर्वं नामेति बाम्बे प्रान्तीयवासीति ज्ञायते । प्रकाशनाय परीक्षितानां ग्रन्थानामायुः द्विशतपूर्वतनमिति ज्ञायते । तस्मात् द्विशतवत्सरेभ्यः पूर्वतन इति ज्ञायते । नान्यदत्र प्रमाणम् । देवोपनामश्रवणात् भूपतिस्स्यादित्यूह्यते ।

1. विवेकमार्ताण्डः । (TSS. 119) पद्यात्मकोऽयं प्रकरणग्रन्थः ज्ञानेन परमात्मतत्त्वप्रकाशनम्, ज्ञानयोगमार्गोपदेशेन मोक्षापरपर्यायाद्वैतत्त्वप्राप्त्युपायं च प्रतिपादयति।

387. विश्वानुभवः

प्रत्यग्बोधभगवच्छिष्योऽयमिति ज्ञायते ।

1. तैत्तरीयभाष्यवार्तिकसङ्गतिः (R. 2929 MGOML)
2. बृहदारण्यकभाष्यवार्तिकसम्बन्धोक्तिः (R. 4435 MGOML)
3. वेदान्तसप्तशती (R. 3089 MGOML) वेङ्कटेश्वरालये च लभ्यते ।

388. विश्वेश्वरः

स्वयम्प्रकाशहयग्रीवयोगिशिष्योऽयं विश्वेश्वरः ।

1. आत्मानात्मविवेकः । मैसूर पुस्तकालये लभ्यते ।
2. गोपालतापिन्युपनिषद्दीपिका (1474 TSML)

3. वाक्यसुधाव्याख्या (7372 TSML)
4. वाक्यामृतम् (7574 TSML) योगवासिष्ठव्याख्या रामतापिनीव्याख्या च कृता ।

389. विश्वेश्वरपण्डितः

माधवप्रज्ञगुरुशिष्योऽयम् ।

1. अष्टावक्रगीताव्याख्या—दीपिका । अवधूतानुभूतिदीपिका, अध्यात्मप्रदीपिका, अष्टावक्रदीपिकापरनामायं ग्रन्थ आप्टेकरकम्पनी पूनानगरे मुद्रितः ।

2. आत्मबोधव्याख्या—दीपिका (8. J. 50. AL) ग्रन्थोऽयं अनन्तशयन मद्रास - मैसूर - अडयार - वेङ्कटेश्वरपुस्तकालयेषु लभ्यते ।

3. वाक्यवृत्तिव्याख्या (R. 144. B. MGOML) वेङ्कटेश्वर–मैसूर–अनन्तशयन–बरोडा–लन्दन–नासिक–पुस्तकालयेषु लभ्यते ।

390. वीरराघवयज्वा

अनेन अद्वैतब्रह्मतत्त्वप्रकाशिका कृता सा च नेल्लूरनगरे मुद्रिता ॥

391. वेङ्कटः

शिवरामगौरीपुत्रः कौण्डिन्यगोत्रजोऽयम् । अनेन कृता ब्रह्मसूत्रार्थदीपिका (R. 3481 MGOML) लभ्यते ॥

392. वेङ्कटनाथः

अभिनवशङ्कराचार्यापरनामकरामब्रह्मानन्दसरस्वतीशिष्योऽयं वेङ्कटनाथ इति ज्ञायते । यद्ययं वेङ्कटनाथः "श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्कुडिनिवासिनः" इति धर्मराजाध्वरिणा निर्दिष्टस्स्यात्तर्हि धर्मराजाध्वरिगुरुः षोडशशतकवासी (1550-1650 A. D.) इति निर्णेतुं शक्यते । परन्तु नामसाम्यादन्यत्प्रमाणं प्रबलतरं नोपलभामहे ।

1. अद्वैतवज्रपञ्जरः । ग्रन्थोऽयं गीताव्याख्यायां ब्रह्मानन्दगिरावुद्धृतः ॥

2. भगवद्गीताव्याख्या—ब्रह्मानन्दगिरिः । द्वैतविशिष्टाद्वैतखण्डनपरोऽयं शाङ्करभाष्यानुसारी अत्युत्तमः गीताव्याख्याग्रन्थः वाणीविलासग्रन्थमालायां (VVSS 12 मुद्रितः ।

3. मन्त्रसारसुधानिधिः 4 तैत्तरीयोपनिषट्टीका 5. पाखण्डमतखण्डनम् । 6. पाषण्डगजकेसरी इतीमे ग्रन्था अदसीयाः ब्रह्मानन्दगिरौ (461, 206) पुटे अन्यत्र च निर्दिष्टाः ॥

393. वेङ्कटयोगी

अनेन कृतः ब्रह्मविन्निधिरिति ग्रन्थः (R. 4369 M.G.O.M.L) लभ्यते ॥

394. वेङ्कटस्वामी

अनेन कृतः ब्रह्मतत्वसुबोधिनीग्रन्थः मैसूरपुस्तकालये लभ्यते ॥

395. वेङ्कटाद्रिसूरिः

प्रयागकुलोत्पन्नः नरसिम्हार्यपुत्रोऽयं वेङ्कटाद्रिसूरिरिति ज्ञायते ॥

1. विद्वन्मुखभूषणम् सव्याख्यम् (R. 2316 M G.O M.L)

ब्रह्मसूत्राणां अधिकरणार्थानाञ्च प्रदर्शकोऽयं प्रथमाध्यायान्तः मद्रासपुस्तकालये लभ्यते ॥

396. वेदान्तवागीशभट्टः ।

अदसीयः वेदान्तरहस्यनामा ग्रन्थः चौखाम्बामुद्रणालये मुद्रित उपलभ्यते ॥

397. वेदोत्तमभट्टारकः

अनेन कृतः बृहद्वाक्यवृत्तिग्रन्थः (R. 3324 MGOML) लभ्यते ॥

398. वैद्यनाथदीक्षितः

कोऽयं वैद्यनाथदीक्षित इति ज्ञातुं न पार्यते । अनेन ब्रह्मसूत्राणां शाङ्करभाष्यानुसारिणी वृत्तिः कृतेति दासगुप्तेन (H.I.P. II 81) निर्दिश्यते । यद्ययं परिभाषासंग्रहकारः वैय्याकरणस्स्यात् तर्हि अस्य मातुलः रामभद्रदीक्षितः वाधूलगोत्रजः रामभद्रमखिशिष्यः कण्डरमाणिक्कग्रामवासी सप्तदशशतकापरार्धवासीति निर्णेतुं शक्यते ॥

399. व्यङ्कटनाथः

अनेन कृतस्सिद्धान्तामृताख्यः ग्रन्थः बरोडापुस्तकालये (1970) लभ्यते ।

400. शिवरामभट्टः

सर्वेश्वरतीर्थशिष्येणानेन शिवरामभट्टेन वेदान्तसारसंग्रहाख्यः ग्रन्थस्सव्याख्यः कृतः । ग्रन्थेऽस्मिन् निर्विशेषब्रह्मज्ञानं साक्षान्मोक्षहेतुः । सगुणोपासनन्तु अर्चिरादिमार्गेण सत्यलोकनिवासहेतु तद्वावान्तरमुक्तिरिति व्यपदिश्यते । ग्रन्थोऽयं बरोडा - अनन्तशयन - विश्वभारतीशान्तिनिकेतन - वेङ्कटेश्वर - मद्रास— पुस्तकालयेषु लभ्यते ।

1. वेदान्तसारसंग्रहः आत्मबोधामृतव्याख्योपेतः (R. 4750 B. MGOML)

401. शिवरामयतिः

अनेन कृतं स्वानुभवविवेकसारमननं विश्वभारतीपुस्तकालये (2824 B.) लभ्यते ।

402. श्रीकुदः

अनेन शङ्कराचार्यकृतत्वेन प्रसिद्धायाः विज्ञाननौकायाः व्याख्या स्वरूपानुसन्धानप्रकरणव्याख्या—पदव्याख्यापरनाम्नी कृता या च (1745) बरोडापुस्तपुस्तकालये लभ्यते ।

403. श्रीकृष्णः

अनेन पञ्चपादिकाविवरणव्याख्या कृतेति (HIP Vol. II 103) दासगुप्तेन निर्दिश्यते ।

404. श्रीदेवः

अनेन अद्वैतचिन्तामणिः कृतस्स च (1429) बरोडापुस्तकालये लभ्यते ॥

405. श्रीधरानन्दः

अनेन कृत ईशावास्योपनिषद्विवेकः (33 H. 7 आ 2 AL) लभ्यते ॥

406. शेषगोविन्दः

अनेन कृता शाङ्करसर्वसिद्धान्तसंग्रहव्याख्या (D. 15319 MGOML) लभ्यते ॥

407. शङ्करभारतीतीर्थः

शृङ्गगिरिमठपरम्परागतोऽयं शङ्करभारती नृसिंहभारतीशिष्यः। यदि वेदान्तसारव्याख्याकारनृसिंहसरस्वती स्यात्तर्हि अस्य कालस्सप्तदशशतकमिति निर्णेतुं शक्यते।

1. असङ्गात्मप्रकरणम् (7681 TSML) सव्याख्योऽयं ग्रन्थः गुरुशिष्यसंवादमुखेन ब्रह्मण एकत्वं तटाकस्थतोयदृष्टान्तेन प्रतिपादयति। यथा च दण्डप्रहारजन्या नानाप्रतीतिर्जले भवति तथैव नित्येऽभिन्ने निश्चले परमात्मनि नानाप्रतीतिः, न तु सा सत्येति प्रतिपादयन् मैसूरसरस्वतीमहालययोर्लभ्यते॥

408. शङ्करमिश्रसुकविः

अनेन द्वात्रिंशद्भिः पद्यैः पूर्णः ब्रह्मोत्तरतत्त्वरत्नमालाख्यः प्रकरणग्रन्थः प्रश्नप्रतिवचनशैल्यां प्रणीतः। अमुद्रितोऽयं (23 D. AL) अडयारपुस्तकालये लभ्यते॥

409. शङ्करानन्दतीर्थः

नारायणतीर्थसदाशिवयोगिनोश्शिष्योऽयं इति ज्ञायते। नारायणतीर्थस्यैव शिवनारायणतीर्थ इत्यपि नामान्तरम्।

1. षट्पदीव्याख्या षट्पदमन्दारमञ्जरी। ग्रन्थोऽयं गोपालनारायणमुद्रणालये बाम्बेनगरे मुद्रितः।

410. शङ्कुशास्त्री

अनेन कृतः दृश्यविषयताखण्डनपरः दृश्योन्मार्जनिकाप्रकरणनामा ग्रन्थः (6820 E.) बरोडापुस्तकालये लभ्यते॥

411. शङ्खपाणिः

केरलदेशजोऽयं नम्पूतिरिजातिज इति परम्परागता वार्ता। अनेन मण्डनमिश्रीयब्रह्मसिद्धेः व्याख्या समीक्षाफक्किकानाम्नी कृता। मुद्रिता च मद्रासराजकीयपुस्तकालये (MGOML S. 4)

412. संक्षेपकाचार्यः

वासुदेवेन्द्रशिष्येणानेन कृतः वेदान्तमननाख्यः ग्रन्थः हरप्रसादशास्त्रिसूच्यां (HPR Vol. IV 279) दृश्यते।

413. सच्चिदानन्दयोगी

पूर्णात्मयोगिशिष्यस्सोपानपञ्चकव्याख्यातुः बालकृष्णानन्दसरस्वत्याः गुरुश्चायं सच्चिदानन्दयोगी सप्तदशशतकीय इति ऊह्यते। कालनिर्णये एतत्कृतग्रन्थाद्विशेषतः प्रमाणानि नोपलभ्यन्ते। परन्तु बालकृष्णानन्दकालस्य निर्णीतत्वेनास्यापि कालस्स एवेति निर्णीयते। प्रतिलेखनकालः (1343 A.D.) इति दर्शनात् तत्पूर्वतन इति तु निश्चयः।

1. श्रुतिसारसमुद्धरणव्याख्या तत्त्वदीपिका (ASS 103)
2. आत्मबोधव्याख्या (बोधार्थव्याख्या) (28. R. 34. AL)

414. सच्चिदानन्दाश्रमी

नृसिंहाश्रमिशिष्योऽयमिति परं ज्ञायते। कोऽयं नृसिंहाश्रमी? किं प्रसिद्धः? उतान्यः? इति ज्ञातुं न पार्यते।

1. ईशोपनिषद्दीपिका (1969 B. R. D.)

415. सदाशिवानन्दसरस्वती

स्वयम्प्रकाशानन्दशिष्येणानेन ब्रह्मसूत्रवृत्तिरारचिता। स्वयम्प्रकाशाख्याः बहवस्सन्ति। तेषु कस्यायं शिष्य इति न ज्ञायते। सर्वथा सप्तदशशतकीयो भवति।

1. ब्रह्मसूत्रवृत्तिः (ब्रह्मामृतवर्षिणी ब्रह्मसूत्रपदयोजना) ग्रन्थोऽयं (2268 IOL) पुस्तकालये लभ्यते। अस्य कर्तृत्वे विप्रतिपत्तयः विद्यन्ते। रामकिङ्करशर्म इति केचित्। धर्मभट्ट इत्यन्ये।

416. सदेकानन्दः

मेधादक्षिणामूर्त्युपासकेनानेन जीवन्मुक्तिविवेकसारसंग्रहः कृतः। पद्यबद्धोऽयं ग्रन्थः (R. 1820 MGOML) लभ्यते। ग्रन्थोऽयं विद्यारण्यकृतजीवन्मुक्तिविवेकस्य सङ्ग्राहकः।

417. सुन्दरराजः

नृसिंहाश्रमिकृताया अद्वैतदीपिकायाः व्याख्या अद्वैतदीपिकाप्रकाशनाम्नी कृता या मिथिलासूच्यां सरस्वतीभवनग्रन्थसूच्यां च दृश्यते। (S.B.C 408)

418. सुन्दरेशः

दक्षिणदेशीयेन वेङ्कटनाथशिष्येणानेन वेदान्तन्यायसंग्रह अद्वैतचिन्तामण्यपरनामा ग्रन्थः कृतः। स च मद्रास (R. 2760) मैसूरपुस्तकालययोर्लभ्यते॥

419. सुखचिद्रूपभारती

अनेन वैदिकसिद्धान्ताख्यः प्रकरणग्रन्थकृतस्स च (A. 763 क 112) मैसूरपुस्तकालये लभ्यते॥

420. सुन्दरमूर्तिः

अनेन अद्वैतसारः कृतः। चतुश्चत्वारिंशद्भिः पद्यैः पूर्णोऽयं ग्रन्थः श्रीविद्यामुद्रणालये कुम्भघोणे मुद्रितः॥

421. सुब्रह्मण्याग्निचित्

विद्यारण्यं वैय्यासिकन्यायमालाञ्च प्रमाणीकुर्वतानेन पद्यमयी सूत्रवृत्तिरारचिता। वृत्तेरस्याः तात्पर्यार्थप्रकाशिका, भाष्यार्थन्यायमाला शारीरकमीमांसासूत्रसिद्धान्तकौमुदी इति नामान्तराणि। ग्रन्थोऽयं (R. 3734 MGOML) दृश्यते॥

422. सुब्रह्मण्येन्द्रः

सोमेश्वरभगवत्पादशिष्येणानेन अद्वैतानुभवोल्लासनामा ग्रन्थः निरमायि। स्वतन्त्रोऽयं प्रकरणग्रन्थः (R. 47 F. MGOML) लभ्यते॥

423. सुरेश्वराश्रमी

रघुरामतीर्थशान्ताश्रमिशिष्योऽयं रामोत्तरतापिन्युपनिषदां अद्वैतसिद्धान्तप्रदर्शनपरस्य रामचन्द्रज्योत्स्नाख्यव्याख्यानस्य कर्ता। ग्रन्थोऽयं बरोडापुस्तकालये (246) लभ्यते॥

424. स्वयम्प्रकाशनारायणतीर्थः

अनेन कृता आत्मबोधव्याख्या बालबोधिनी–आत्मबोधिनीनाम्नी जयपुर सूच्यां (XX 106/3) लभ्यते।

425. स्वरूपानन्दमुनिः

गोविन्दानन्दस्य विषमारण्यापरनामकागस्त्यारण्यस्य च शिष्योऽयं स्वरूपानन्दः षोडशशतकादर्वाग्भव इति निर्णीयते। यद्ययं गोविन्दानन्दः रत्नप्रभाकारत्वेन प्रसिद्धस्स्यात् तर्हि सप्तदशशतकीय इति निर्णेतुं शक्यते। नान्यदत्र नामसाम्यात् किमपि प्रमाणं लभ्यते।

1. न्यायचन्द्रिकाव्याख्या— न्यायप्रकाशिका (R. 3031 MGOML)

आनन्दपूर्णकृताया न्यायचन्द्रिकायाः व्याख्या। वेदान्तानां ब्रह्मणि समन्वयमुपपाद्य समन्वयविरोधान् परिहरन्नयं ग्रन्थः मद्रासअनन्तशयनयोर्लभ्यते।

426. स्वानन्दयोगी

आत्मानन्दशिष्येणानेन कृतस्स्वात्मानन्दचन्द्रिकाख्यः ग्रन्थः स्वानुभवशैल्या आत्मानन्दं प्रतिपादयति। 109 पद्यैः पूर्णोऽयं प्रकरणग्रन्थस्सरस्वतीमहालये (7606 TSML) लभ्यते।

427. हरियशोमिश्रः

मैथिलेनानेन हरियशश्शर्मणा अद्वैततात्पर्यविचारापरनामा वेदान्ततात्पर्यविचाराख्यः ग्रन्थो विरचितः, यश्च पञ्जाबसूच्यां बरोडासूच्यां (1445) च लभ्यते।

—: * :—

अज्ञातनामान अद्वैतग्रन्थकाराः

परिच्छेदेऽस्मिन् अज्ञातनामधेयाः ज्ञातगुरुकाश्च अद्वैतग्रन्थकाराः, तेषां ग्रन्थाश्च प्रदर्श्यन्ते । बहुषु हस्तलिखितकाकलतालपत्रमयेषु ग्रन्थेषु ग्रन्थकर्तृनाम न निर्दिष्टम् । परन्तु गुरोर्नाम निर्दिश्य, तच्छिष्य इत्याद्येव निर्दिश्यते । एतादृशग्रन्थकर्तृविषये ग्रन्थकर्तुर्नामपरामर्शस्सुदुष्कर इति तच्छिष्यत्वेनैवात्र व्यवह्रियते । एवञ्च परिच्छेदेऽस्मिन् मुद्रितामुद्रितोभयविधाश्च अज्ञातकर्तृनामधेया ग्रन्था अज्ञातनामान अद्वैतग्रन्थकाराश्च वर्णमालाक्रमेण निर्दिश्यन्ते ।

428. अद्वैतानन्दसरस्वतीशिष्यः

षट्शास्त्रपारीणशिष्यैः युक्तं सदा ब्रह्मविचारशीलैः । अद्वैतवाणीचरणाब्जयुग्मं मुक्तिप्रदं तत्प्रणतोऽस्मि नित्यम् ॥ इति अद्वैतानन्दसरस्वतीं नमस्यन्नयं तच्छिष्य इत्येव ज्ञायते ।

1. भाष्यरत्नप्रभाभागव्याख्या–अभिव्यक्ता (40 C 48 AL) अपूर्णोऽयं अड्यारपुस्तकालये लभ्यते । वाराणस्यां मुद्रितश्च । पूर्णानन्द (पूर्णप्रकाश) कृत इति तु मम निश्चयः ।

429. आनन्दाश्रमशिष्यः

"आनन्दाश्रमनाम्नः श्रीगुरोश्चरणपङ्कजम्" इत्यादिना गुरोर्नाम परमनेन निर्दिष्टम् । एतदीये मध्वसिद्धान्तभञ्जिन्याख्यग्रन्थे भट्टोजिदीक्षितः नमस्कृतः । अस्य गुरुणानन्दाश्रमेण "आनन्दरससागरः" कृतः । एवञ्च सप्तदशशतकादर्वाक्तन इति परं निर्णेतुं शक्यते ।

1. मध्वसिद्धान्तभञ्जिनी । (R. 4759 A. MGOML)

430. केशवानन्दशिवरामयोगिशिष्यः

अनेन रचितायां ब्रह्मसूत्रवृत्तौ रामग्रहेन्दुसंख्याता (193) न्याया वैयासिका मता इति प्रतिपाद्यते ग्रन्थोऽयं (R. 4403 MGOML) लभ्यते ।

431. चित्सुखशिष्यः

"गुरुं तं नौमि चित्सुखम्" इति वदता चित्सुखशिष्येणानेन कृता आत्मबोधटीकानाम्नी आत्मबोधप्रकरणव्याख्या (69-5. B. U. L.) लभ्यते ।

432. चिद्घनानन्दगुरुशिष्यः

अनेन कृत अद्वैतचूडामणिरिति ग्रन्थः (141 AL) अड्यारसूच्यां दृश्यते ॥

433. नित्यानन्दशिष्यः

अनेन कृत अपरोक्षानुभूतिव्याख्या मध्यप्रान्तीयवरार्सूच्यां दृश्यते ॥

434. नृसिम्हाश्रमिशिष्यः

अनेन कृतः शारीरकमीमांसोपयोगिश्रुतिवाक्यसङ्ग्रहः सव्याख्यः जयपुरपोटीखाना सूच्यां (XX 31/8) दृश्यते ॥

435. परमानन्दयोगिशिष्यः

अनेन पञ्चचत्वारिंशद्भिस्स्तबकैः पूर्ण अद्वैतमञ्जर्याख्यः सूत्रवृत्तिग्रन्थः कृतस्स च नासिकपुस्तकालये (27.2) दृश्यते ॥

436. पुरुषोत्तमसरस्वतीशिष्यः

अनेन कृत अध्यारोपणप्रकरणनामा ग्रन्थ अध्यारोपशब्दनिर्वचनं तस्य वेदान्तशास्त्रे प्रयोगञ्च सोदाहरणं निरूपयन्नमुद्रित अड्यार पुस्तकालये (22 B- 26 AL) लभ्यते ॥

437. पूर्णमुनीन्द्रशिष्यः (पूर्णविद्यः ?)

अस्य गुरोर्नाम वेदपूर्णमुनीन्द्र इति । शिष्यस्यास्य नाम पूर्णविद्य इति निश्चीयते । अनेन कृता पञ्चप्रक्रियाव्याख्या (R. 2793 b, MGOML) लभ्यते ॥

438. पूर्णात्मकृष्णशिष्यः

अनेन कृता श्रुतिसारसमुद्धरणव्याख्या अमुद्रिता अपूर्णा च मद्रासराजकीयपुस्तकालये (R. 51714) लभ्यते ॥

439. भारतीतीर्थशिष्यः

अस्य कालः (1300–1400 A. D.)। अनेन कृत महावाक्यार्थदर्पणाख्यः ग्रन्थः (7562 TSML) सरस्वतीमहालये लभ्यते ॥

440. योगीन्द्रशान्ताश्रमशिष्यः

अनेन कृत अद्वैतब्रह्मसुधाख्यः ग्रन्थः (VIII 4) नासिकसूच्यां दृश्यते ॥

441. राघवेन्द्रशिष्यः

"तं राघवेन्द्रं यतिनामधीश्वरं कारुण्यमूर्तिं विबुधं भजे गुरुम्" इति वदन्नयं राघवेन्द्रशिष्य इति परं ज्ञायते। ग्रन्थकृतानेन राघवेन्द्र अनुभवानन्दः शङ्करः प्रकाशात्मा च निर्दिष्टाः। परन्तु गुरुशब्देन विशेषितौ राघवेन्द्रानुभवानन्दावेव। ग्रन्थान्तपुष्पिकायां राघवेन्द्रशिष्य इत्येव निर्दिश्यते। लन्दनगरकार्यालयस्थपुस्तकालयवर्णनात्मकग्रन्थसूच्याश्चतुर्थे भागे (DCIOL vol. VI No. 2403) तु ग्रन्थकर्तुर्नाम नारायणेन्द्र इति प्रतिपाद्य रामेन्द्रसरस्वतीशिष्य नारायणो वा भवेदिति शङ्का समुत्पादिता। अडयारपुस्तकालयस्थात् (10. H. 1) हस्तलिखितग्रन्थाज् ज्ञायते अस्य पिता कालनिर्णयदीपिकाविवरणकर्ता नृसिम्हाचार्यः, अयं च राघवेन्द्रशिष्यः प्रक्रियाकौमुदीव्याख्याप्रसादकर्ता विट्ठलस्स्यादिति।

1. न्यायप्रमाणमञ्जरी-सटीका (2403 DCIOL)

442. रामचन्द्रेन्द्रशिष्यः

रामचन्द्रेन्द्रशिष्येणानेन नारायणतीर्थरामानन्दतीर्थौ नमस्कृतौ। अनेन वेदान्तमननाख्यः ग्रन्थः कृतः। स च अनन्तशयनपुस्तकालये (263 TCD) लभ्यते॥

443. रामब्रह्मेन्द्रशिष्यः

अनेन पद्यमयः भेदखण्डनाख्यः ग्रन्थः कृतः। अपूर्णोऽयं ग्रन्थः (D. 4695 MGOML) लभ्यते॥

444. रामानन्दशिष्यः

अनेन चतुर्णामेव सूत्राणां वृत्तिः कृता सा च (D. 4692 MGOML) लभ्यते।

445. वासुदेवशिष्यः

विवेकसारे वासुदेवः नमस्कृतः। पुरुषोत्तमोऽपि अस्य गुरुरिति ज्ञायते। सर्वेष्वपि मदसीयेषु ग्रन्थेषु वासुदेववन्दनात् "मूढान् विवेकिनः कृत्वा लोके सर्वोपदेशकः। यस्तिष्ठति च तं वन्दे श्रीमद्वासुदेवगुरुं परम्" इति दर्शनाच्च

सर्वेषां ग्रन्थानां कर्ता वासुदेवशिष्य इति निश्चयः। अनेन अध्यारोपणग्रन्थस्य व्याख्या आन्ध्रभाषायां कृता। तस्मादयं आन्ध्रदेशज इत्यूह्यते।

1. अध्यारोपणम् (7607 TSML)
2. कुमारकारिकाः (280 TCD)
3. वासुदेवमननसंग्रहसारः। 46 वर्णकैः पूर्णोऽयं ग्रन्थः (9. B. 24 AL) लभ्यते॥
4. विवेकसारः (8 H. 55 AL)

अध्यारोपापवादौ सदृष्टान्तं प्रदर्शयन्नयं ग्रन्थः अनन्तशयनअडयारपुस्तकालययोर्लभ्यते। ग्रन्थोऽयं रामेन्द्रयतिकृत इति C.C. ग्रन्थे दृश्यते। रामानन्दसरस्वत्या आत्मतत्वविवेकसाराख्यः ग्रन्थ कृत इति पूर्वमुपपादितमस्माभिः। किं सोऽयमेव उतान्य इति निश्चेतुं न शक्यते।

446. वासुदेवविश्वरूपेन्द्रशिष्यः

अनेन कृतः वेदान्तदीपिकाख्यः ग्रन्थ अपूर्णं मद्रासपुस्तकालये (R. 1567 MGOML) लभ्यते।

447. वैकुण्ठशिष्यः

अनेन शाङ्करषट्पदी व्याख्या कृता सा च (1992 BRD) लभ्यते।

448. शिवयोगिशिष्यः

अनेन कृता शाङ्करमनीषापञ्चकव्याख्या तात्पर्यदीपिका (826) पञ्जाबसूच्यां दृश्यते।

449. शिवरामकेशवानन्दयोश्शिष्यः

अनेन कृता ब्रह्मसूत्रवृत्तिः (R. 4403 MGOML) विद्यते।

450. शिवरामानन्दशिष्यः

अनेन कृतः वेदान्तसिद्धान्तचूडामण्याख्यः ग्रन्थः (30 B. 10 AL) अडयारपुस्तकालये लभ्यते।

451. शुद्धानन्दशिष्यः

अनेन नृसिम्हाश्रमीयभेदधिक्कारस्य नारायणाश्रमिकृतायाः सत्क्रियानाम्न्याः व्याख्यायाः उज्वलानाम्नी व्याख्या कृता। ग्रन्थोऽयं (D. 4702, D. 4703 MGOML) लभ्यते। बरोडापुस्तकालये तु रामभद्रानन्दकृत इति दृश्यते।

452. शङ्कराचार्यशिष्यः

शङ्कराचार्यशिष्यकृतेति काचन ब्रह्मसूत्रवृत्तिः श्रीविद्यामुद्रणालये कुम्भघोणे मुद्रिता। सा च भगवत्पादशिष्येष्वन्यतमेन वार्तिककारेण सुरेश्वराचार्येण कृतेति समामनन्ति साम्प्रदायिका वृद्धाः।

1. ब्रह्मसूत्रवृत्तिः। मन्दाधिकारिणां सङ्ग्रहेण अद्वैतब्रह्ममीमांसार्थप्रतिपादकोऽयं ग्रन्थः। अत्र केवलं श्रुतयः उपनिषद्भ्योद्धृताः, नान्ये। तस्मात् सम्भवति सर्वप्राचीनेयं वृत्तिः, सुरेश्वरकृता चेति। परन्तु 'तदधीनत्वात् अर्थवत्' इत्यादिस्थलेषु भाष्यदूषित अर्थः परिगृहीतो लक्ष्यते।

453. सदाशिवब्रह्मशिष्यः

अनेन कृता मनीषापञ्चकव्याख्या (7328) सरस्वतीमहालये लभ्यते।

454. स्वयम्प्रकाशयतिशिष्यः

अनेन कृतः परमसिद्धान्तसाराख्यः प्रकरणग्रन्थः अपूर्णः अमुद्रितश्च मद्रासराजकीयप्राचीनहस्तलिखितपुस्तकालये (D. 4643 MGOML) लभ्यते।

इति शुभमस्तु

इति कप्याङ्गीरसगोत्रोद्भवेन, ऋक्शाखाध्यायिना आश्वलायनसूत्रेण सभापतिशास्त्रिणः पौत्रेण, रत्नसभापतिशास्त्रिणः पुत्रेण नागलक्ष्म्यम्बायाः गर्भजेन, चिदम्बरक्षेत्रे अण्णामलै विश्वविद्यालयसंस्कृताध्यापकेभ्यः म. म. दण्डपाणिस्वामिदीक्षित-श्रीरामसुब्बाशास्त्रि – शिवरामकृष्णशास्त्री – गुरुस्वामिशास्त्रि – पण्डितराजसुब्रह्मण्यशास्त्रिभ्यः प्राप्तव्याकरणन्यायशास्त्रेण मद्रपुरीसंस्कृतकलाशालाध्यापकेभ्यः पोलकम्-श्रीरामशास्त्रि कृष्णमूर्तिशास्त्रिभ्यः प्राप्ताद्वैतवेदान्तशास्त्रेण रामस्वामिशर्मापराभिधेन तञ्जस्वामिशर्मणा रचितोऽयं अद्वैतवेदान्तसाहित्यकोशः भगवत्कृपया समाप्तः।

इति शुभम्

स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषं तमजं नित्यं भजामि शरणं हरिम्॥

शिवनामनि भाविते ऽन्तरङ्गे महति ज्योतिषि मानिनीमयार्धे।
दुरितान्यपयान्ति दूरदूरे मुहुरायान्ति महान्ति मङ्गलानि॥

॥ एतत्प्रबन्धरचनायां सहायभूताः ग्रन्थाः ॥

1. मुद्रितास्सर्वेऽपि अद्वैतवेदान्तग्रन्थाः ये च मद्रासविश्वविद्यालयपुस्तकालयस्थाः ये च कुप्पुस्वामिशास्त्रिसंशोधनशालापुस्तकालयस्थाः ये संस्कृतकलाशालापुस्तकालयस्थाः, ये च प्रान्तीयकलाशालास्थाः ये च प्राचीनतराः ग्रन्थलिपिबद्धाः अडयारमद्रासराजकीयहस्तलिखितपुस्तकालयस्थाश्च।

2. अमुद्रितास्तालपत्रलिखिताः काकलमयाश्च हस्तलिखितग्रन्थाः, ये च मद्रासराजकीयहस्तलिखितप्राच्यभाषापुस्तकालयस्थाः, अडयारपुस्तकालयस्थाश्च।

3. नूतनबृहत्सूचीसम्पादनाय (न्यू काटलागस काटलागरम्) मद्रासविश्वविद्यालयसंस्कृतविभागे विद्यमानाः कुप्पुस्वामिशास्त्रिपुस्तकालये च विद्यमानाः निखिलहस्तलिखितपुस्तकालयवर्णनात्मकग्रन्थसूचयः।

4. आङ्गलभाषामयाः, संस्कृतभाषामयाश्च पत्रिकाः।

(A) अद्वैतसभास्वर्णजयन्तीपत्रिका, कुम्भघोणम्।
(B) अनाल्स आफ् ओरियण्टल रिसर्च, मद्रास।
(C) अनाल्स आफ् बन्दरकार ओरियण्टल रिसर्च, पूना।
(D) अडयार बुलेटिन, मद्रास।
(E) इण्डियन् आण्टिक्वैरि।
(F) इण्डियन् हिस्टारिकल, क्वार्टर्लि।
(G) जर्नल आफ् ओरियण्टल रिसर्च, मद्रास।
(H) प्रोसीडिङ्स आफ् आल इण्डिया ओरियण्टल कान्फ्रेंस।
(I) ब्रह्मविद्यापत्रिका, मद्रास।
(J) शङ्करगुरुकुलपत्रिका, श्रीरङ्गम्।
(K) स्वर्णजयन्तीपत्रिका संस्कृतकलाशाला, बनारस।

5. आगमशास्त्र आफ़ गौडपाद — विधुशेखर भट्टाचार्यः ।
6. द्रविडात्रेयदर्शनम् — पोलकंश्रीरामशास्त्री ।
7. न्यू काटलागस काटलागरम् — मद्रासविश्वविद्यालयः ।
8. भारत का बृहद् इतिहास — भगवद्दत्तजी ।
9. योगवासिष्ठदर्शनम् — आत्रेयः ।
10. बृहत्त्रयी — गुरुपादहालदारः ।
11. सायणमाधवौ — बलदेवोपाध्यायः ।
12. हिस्ट्री आफ़ इण्डियन् फ़िलासफि — दासगुप्तः ।

INDEX OF AUTHORS

(ग्रन्थकर्त्रनुक्रमणिका)

स्थूलाक्षराङ्किताङ्कसंख्याः ग्रन्थकर्तृविवरणं द्योतयन्ति।

Letters in Bold type indicate details of Authors.

—: * :—

INDEX OF ADVAITA WORKS

(अद्वैतग्रन्थानुक्रमणिका)

स्थूलाक्षराङ्कितास्संख्याः ग्रन्थविवरणं द्योतयन्ति ।

Letters in Bold type indicate details of Works.

Authors Pages

Authors Pag

सामान्यानुक्रमणिका

GENERAL INDEX

(Names, works, Place etc.)

नामानि

ग्रन्थाः

उपासना:

गोत्रवंशादयः

पारिभाषिकशब्दाः

पुरग्रामादि

मतानि

वादाः

विद्या

संवादाः

सामान्यम्

—: 0 :—

INDEX OF QUOTATIONS

उद्धृतवाक्यावलिः

—: 0 :—

ADDITION AND CORRECTION

॥ योजनं शोधनञ्च ॥

Page पत्रम्	Line पंक्तिः	अशुद्धम् Wrong	शुद्धम् Correct	Page पत्रम्	Line पंक्तिः	अशुद्धम् Wrong	शुद्धम् Correct
II	22	ऽय	ऽयं	118	22	तन	तान
V	29	युक्तः	युक्ता	121	28	-नात्म	नात्म-
XIX	21	-स्तलिखित	हस्तलिखित	122	5	स्वयं	स्वयं
4	19	वैर्णना	वर्णना	125	17	वश	दश
4	15	त एव	ता एव	132	5	नृहि	नृसि-
8	1	पन्थः	पन्थ	133	24	वाक्यर्थ	वाक्यार्थ-
10	11	दैहित्रः	दौहित्रः	149	21	सुद्र	मुद्र
15	9	श्र	श्रम	162	1	-द्वि	द्वि
15	12	चेय	चेयं	163	16	असु	अमु
18	1	सज्ञा	संज्ञा	165	11	लक्षण	लक्षणं
18	2	कृ	कृतं	167	5	अम	अन
18	11	षनिष	पनिष	167	7	-पत्ति	-त्पत्ति
18	20	तत्कृत	तत्कृतं	167	12	कञ्जुक	कञ्चुक
19	7	क्षेन्द्र	क्षेन्द्रः	168	19	नियः	निश्चयः
19	24	सज्ञा	संज्ञा	171	15	प्रकरन	प्रकरण
22	17	मधि-	मधि-	172	18	लक्षणा	लक्षणम्
24	8	कृत	कृतः	174	9	वक्यम्	वाक्यम्
30	18	निर्दिष्टः	निर्दिष्टः	175	5	पतिया	पतिपा-
39	25	जायन्ती	जयन्ती	186	25	भर्तृरि	भर्तृहरि
59	5	R. 533	R 5336	188	22	-मला	-माला
64	16	समराज	सामराज	188-189		अत्र सर्वत्र -षष्ठिका	
78	6	-पुत्रः	-पौत्रः			-"षष्टिका" इति पठनीया	
97	7	समह	संग्रह	192	9	काष्णा	कर्ष्णा
97	14	ऽय	ऽयं	197	10	मद्य	माद्य-
105	15	-ब्ध्वा	ब्ध्वा	198	2	कृताह	कृता
106	16	ऽय	ऽयं	200	6	सौष्ठे	सिष्ठे
110	20	गुरु	गुरू	200	26	वासिष्टीय	वासिष्ठीय
111	4	ऽय	ऽयं	202	22	-नामाय	नामायं
112	21	-शतक	-शतक	203	33	कलात्	कालात्
116	17	कुम्म	कुम्भ	204	3	सिम्ह	सिंह

Page पत्रम्	Line पंक्तिः	अशुद्धम् Wrong	शुद्धम् Correct
208	17	सिम्ह	सिंह
217	18	-नद	नन्द
220	10	मिश्र	मिश्रं
231	3	-वर्तिक	वार्तिक
232	4	-क्तिरी	क्तिरि
236	12	-शस्तु	शयस्तु
237	1	विरणं	विवरणं
298	26	-ण्य	-रण्य
239	4	प्रमाणलक्षणम्। मुद्रितोऽयं ग्रन्थः अनन्तशयनपुस्तकमालायाम्।	
241	1	ण	-णं
245	13	-न्तिम्	न्तितम्
248	11	-व्यज्ञ	-यज्ञ
255	15	श्चि	श्री
955	16	-क्रि	-स्क्रि
257	2	रत	-रात्
258	2	व्य	व्या
260	8	गिरी	गिरि
260	10	नर	नगर
264	15	रूय	रूया
267		अत्र "नृसिम्ह" स्थाने "नृसिंह" इति भवितव्यम्	
268	2	निर्णतु	निर्णेतु
285	9	कचित्	कश्चित्
292	6	ग्रन्थोऽयं मद्रपुरीसंस्कृतविद्यासमित्या च प्रकाशितो विद्यते। (Samskrit Education Society Madras; Madras-4	
292	14	सरस्गती	सरस्वती
293	13	पस्वाचार्यरम्परा	स्वाचार्यपरम्परा
354	13	सरणि	तरणि
365	16	मबकरणानि	पञ्च प्रकरणानि
368	25	स्वन्ते	स्वान्ते
371	20	अमेद	अभेद
374	6	रुतान्य	स्तान्य
397	16	ह्न	ह्न्‍य
405	24	मप	मप्य
407	10	सुषमा	सुषमा
412	12	द्वैवज्ञ	दैवज्ञ
424	9	स्था	स्था
428	8	आत्म	आत्मा
430	1	लभ्यते	लभ्यन्ते
433	11	मदास	मद्रास
434	1	मुद्रितः	मुद्रिता
434	22	मैसूर	एते ग्रन्थाः मैसूर
436	3	गौत्रज	गोत्रज
437	7	रत्नाख्यः	रत्नाख्यश्च
445	20	शतकीस्य	शतकीय
451	19	ग्रन्थ	ग्रन्थः
451	19	अस्मभिः	अस्माभिः
456	26	आतन्दझा	आनन्द झा।
497	25	अत्रि	अत्रि

—:*:—

[illegible]